



॥ श्रीः ॥

॥ श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः ॥

॥ श्रीरामानुजसिद्धान्तसंग्रहः ॥

मुडुम्बिवात्स्य विद्वच्चक्रवर्तिचण्डमारुतं श्रीकृष्णमाचार्यसूनुना अळीकुळं ग्रामाभिजनेन
सर्वतन्त्रविदुषा चण्डमारुतं श्रीनिवासराघवाचार्येण विरचितः।

SRI RAMANUJA SIDDHANTA SANGRAHA

By

Chanda Marutam Srinivasa Raghavacharya

पुनः अहोबिलमठास्थानविदुषा डा ई एस् वी. नरसिंहाचार्येण 1994 तमे भव वर्षे
प्रकाशितः। (द्वितीयं संस्करणम्)

Published with the Financial assistance from the
"Rashtriya Sanskrit Samsthan"
New Delhi

श्रीवाणीविलासमुद्रणालयः श्रीरङ्गम् ।

SRI AHOBILA MUTT
ஸ்ரீமதழகியசிங்கர் ஸந்நிதி
ஸ்ரீ அஹோபில மடம்
Camp ஸ்ரீபெரும்பூதூர்



To,
Dr E S V. நரஸிம்ஹாச்சார்யார்,
ஸ்ரீரங்கம், ஆஸ்தான வித்வான்.
பவ-ஸ்ரீ சித்திரை-திருவாதிரை
Date 16--4—1994.

॥ श्रीः ॥

॥ श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥

॥ श्रीमते श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकाय नमः ॥

लक्ष्मीनृसिंह तव पादसरोजयुग्मे ब्रह्मेन्द्ररुद्रमुनिवृन्द शिरोऽभिवन्द्ये ।
श्रीमच्छठारि यतिराजसुपूजिते च शुद्धं मदीयँहृदयं दृढमस्तु लग्नम् ॥

नाथोपज्ञे प्रवृत्ते यतिपतिशुभ सत्सूक्ति संरक्षितेऽस्मिन
सिद्धान्ते वेदचूडा गुरुवर विविधग्रन्थ सन्दोहभव्ये ।
सारानर्थान्यथावद्विविदिषुरि-कग्राह्यया रम्यरीत्या
प्राज्ञः श्रीवासरध्वीडभिधपृथुयशाः ग्रन्थरत्न व्यतानीत् ॥

स एष श्रीरामानुजसिद्धान्तसंग्रहाख्यो ग्रन्थः अस्मत्सिद्धान्त प्रतितन्त्रार्थान् यथावत् नातिसंग्रहं नातिविस्तरं च प्रतिपादयन् श्रीन्यायसिद्धाञ्जन न्यायपरिशुद्धितत्वमुक्ताकलापादीनां समेषां ग्रन्थरत्नानां एकीभूतः आकर इव दरीदृश्यते । बहोः कालात् सर्वोपयोगिनं ग्रन्थमिमं प्रकाशयितुं पूर्वाश्रम एव ममाशाऽऽसीत् । परं तु नावकाशो लब्धः ।

इदानीमस्मदास्थानविदुषा स्वर्गनाथपुराभिजनेन श्रीमदुभयवे डा. ई. एस्. वी. नरसिंहाचार्येण श्रद्धया प्रयासेनचायं ग्रन्थः प्रकाश्यते इति महान्मे मोदः । गच्छतः स्खलनस्यौत्सर्गिकत्वेऽपि यावच्छक्यं अक्षरज्ञैः अप्रमादेन शुद्धमेव सर्वं प्रकाशनीयमिति मे दृढोऽध्यवसायः । अस्मिन्ग्रन्थे कतिपयानां त्रुटीनां दर्शनमपि "मलिनमिव हिमांशोर्लक्ष्म लक्ष्मीं तनोति" इति न्यायेन वक्तृविषयवैलक्षण्यविद्भिः सोढव्यमेवेति मन्ये । अस्मिन्ग्रन्थे रसिकानां मितज्ञानामपि सुगमयारीत्या प्रकृति जीवेश्वर प्रमाण द्रव्याद्रव्य परिच्छेदेषु परमतखण्डनपूर्वकं अस्मन्मतप्रधानप्रतितन्त्राम्शाः सुललितं निरूप्यन्त इति नेयमत्युक्तिः ।

अस्य च द्रामिडानुवादः आर्थिकश्रमेण विलम्बितप्रकाश इति श्रुत्वा तस्य प्रकाशनाय आढ्या आस्तिकाः यथाशक्ति उपकुर्युरिति विश्वसिमः । अस्य प्रकाशकस्य श्रीलक्ष्मानृसिंहः उपर्युपरि एतादृशकैङ्कर्योपयुक्तानि आयुरारोग्य वित्तादीन्यनुगृह्णीयादिति सहृदयमाशास्महे ॥

ஸ்ரீ ஶ ஒ ஹ ல ஸ்ரீ ஃ

(Sd) 45 तम श्रीमदहोबिलमठाधिपतयः



॥ श्रीः ॥

श्रियै नमः । श्रीरङ्गनाथपरब्रह्मणे नमः ।

श्रीरङ्गं श्रीमदाण्डवन् (वळुत्तूर्) वेदान्तलक्ष्मणमुनेः अविच्छिन्न संन्यस्त गुरुपरम्परासमागत श्रीरङ्गं पौण्डरीकपुर श्रीमदाण्डवन् आश्रमे विराजमानानां परवाक्काट्टै श्रीमदाण्डवन् परमहम्सेत्यादि श्रीगोपालदेशिक महादेशिकानां श्रीमुखम् ।

अस्मत्सर्वगुरुभ्यो नमः ।

श्रीमत्पौण्डरीकपुरं श्रीमदाण्डवन् आश्रमः

श्रीरङ्गम्

दिनाङ्कः 14—4—94

विदितमेवेदं समेषां यदस्माकं विशिष्टाद्वैतसिद्धान्तः आभगवत्तः प्रथितः ब्रह्मनन्दि द्रमिड गुहदेवप्रभृतिभिः तथा भगवद्बोधायनेन, पराङ्कुश परकाल श्रीमन्नाथमुनि यामुनमुनि रामानुज-मुनिभिः श्रीमन्निगमान्तमहादेशिकैश्च घण्टापथेन प्रदर्शितः संस्थापितः दिशासु दशसु च जेजीयते । सोऽयं सिद्धान्तः अवैदिकैः वैदिकैश्च बहुधा प्रलोभितं आस्तिकजनचित्तं सान्त्वयितुं अनघान् बहून ग्रन्थान् बिभ्रत् दुर्मतानि शतशः सहस्रशश्च खण्डयित्वा स्थापितः सर्वोत्कर्षेण जरीजृम्भते ।

तमेनं सिद्धान्तं यथावद्यथाऽध्येतारः सुलभसुलभज्ञानीयुः तथा प्रधानप्रतितन्त्रभूतैः तत्त्वहित पुरुषार्थ विषयैः संमिश्राः बहवो ग्रन्थाः तदातदाऽवतेरुः, येषां मध्ये निगमान्तगुरुचरणानां न्याय-परिशुद्धिः, न्यायसिद्धाञ्जनं, तत्त्वमुक्ताकलाप इत्यादयो ग्रन्थाः प्रथमकक्षामधिरोहन्ति ।

तेषां ग्रन्थानां प्रौढिम्ना मितबुद्धीनां दुरवगाहतया च तत्रत्यान् विषयान् सर्वान् ललितया सरण्या अस्याः शताब्द्याः प्रथमेपादे अळिशूर् (அழகியசெய்பூர்) नामके श्रीग्रामेऽवतीर्णः पितुः शतगुणं वैदुष्यादिभिः प्रथितः, चण्डमारुतं विरुदमपि दायधनक्रमात् बिभ्राणः वेदान्तद्वन्द्व-पारङ्गतः श्रीश्रीनिवासराघवाचार्यं धन्यनामा विद्वद्वरः उत्तममिमं प्रकरणग्रन्थं "श्रीरामानुजसिद्धान्त-संग्रहाख्यं" निरमात् । यत्र ग्रन्थे पूर्वाचार्य श्रीसूक्तिमनतिक्रम्य परिच्छेदाः क्रमशः निरूप्यन्ते । प्रकृति-जीव-ईश्वर-बुद्धि शाब्द-अद्रव्य परिच्छेदाः षट् । तदन्तरा विविधाः प्रधानप्रतितन्त्राः दुरवगमाः विषयाः सुलभयारीत्या प्रतिपाद्यन्ते । अस्मत्सिद्धान्त विरुद्धानां वैशेषिकादि मतान्तरीयाणां बहूनां विषयाणां स्पष्टतया खण्डनं दृश्यते । समष्टिव्यष्टिलक्षणं, शरीरलक्षणं, ब्रह्मणः अन्तर्बहिर्व्याप्तिः मुक्तेषु आनन्द तारतम्याभावः, अपच्छेदन्यायः, निर्विशेषत्वनिरासः, लक्ष्मी-

तत्त्वनिरूपणं, ख्यातिभेदाः, अनुमितौ हेत्वाभासः, केवलव्यतिरेकिखण्डनं, अन्विताभिधाना-भिहितान्वयवादौ, सामानाधिकरण्यस्वरूपं, "यद्वेदादौ स्वरः प्रोक्तः" इति श्रुत्यर्थः, वेदनित्यत्वं, अद्रव्याणां निरूपणं, चतुर्विधाभावानां भावरूपता, त्रिगुणनिरूपणं इत्यादीनां उपपादनक्रमः किञ्चिज्ज्ञानामपि नितान्तं हृदयङ्गम इति निश्चप्रचम्।

अशीति सम्वत्सरेभ्यः पूर्वं ग्रन्थाक्षरैः प्रकाशितोऽयं अनर्घोग्रन्थः मा तावल्लोपं प्राप्स्यदिति महत्या श्रद्धया अस्मत्प्रियसुहृत् विमर्शकः देशिकदर्शन चूडामणिः, व्याकरणवेदान्तरत्नं, सरलकवनचणः, श्रीमदहोबिलमठीयाख्यानविद्वान्, अस्मदाश्रमीयसत्सम्प्रदायसंरक्षणीसभा-प्रवर्त्यमान-साप्ताहिक श्रीभाष्य विद्वत्सभाकार्य धुरन्धरः, शोक्कनाथ् र् अभिजनः डाक्टर् नरसिंहाचार्यः M. A. ग्रन्थमिमं आर्थिकेन कायिकेन च परिश्रमेण प्राचीकशदिति महान् सम्मोदोऽस्माकम्।

अचिरादेव संस्कृतमयस्यास्य ग्रन्थस्य द्रामिडभाषाव्याख्यामपि एतदीयां प्रकाशयितुं आस्तिकाः श्रीवैष्णवाः भृशमुपकुर्युरिति विश्वसिमः।

विद्वानयं आवश्यकसाम्प्रदायिकग्रन्थमुद्रापकः अरोगदृढगात्रः दीर्घायुष्मान् सर्वसम्पत्समृद्धश्च भूयादिति श्रीरङ्गदिव्यदम्पती, अस्मदाचार्य परम्परां च सम्प्रार्थ्य शुभानि मङ्गळानि पौनःपुन्येन नारायणस्मरणपूर्वकं आशास्महे। नारायण नारायण —

श्रीमदाण्डवन पौण्डरीकपुरं स्वामि आश्रम श्रीरङ्गम्-620 006.

इत्थम्,

अ. अनन्तनरसिंहाचार्यः श्रीकार्यम्।

॥ श्रीः ॥



॥ श्रीरङ्गनाथमणिपादुकाभ्यां नमः ॥

श्रीरङ्गं श्रीमदाण्डवन् श्रीरङ्गरामानुजमहादेशिकरनुगृहीता

श्रीमुखपत्रिका

अभिजनाग्रेसराग्रजन्मावासभूताग्रहाराग्रिमाग्रसूर्ग्रामसमुद्भूतैः सदाचारधुरन्धरैः, सर्वकलानिलयैः, मुदुम्बै-वात्स्यचक्रवर्तिकुल ललामभूतैः, कुमतिप्रतिवादिकुलकुवादनिवहतूलविश्लेषणरूप शिक्षण दक्षचण्डमारुतैः, सर्वदास्मरणीयसुगृहीतनामधेयैश्श्रीनिवास राघवाचार्यैः न्यायसिद्धाञ्जनादि पूर्वाचार्यप्रणीत ग्रन्थजात विषयपुञ्ज संप्रतिपिपादयिषया संप्रतिपन्नदिशा कृतोऽयं ग्रन्थः श्रीरामानुजसिद्धान्त संग्रह" इति समुल्लसति ।

नातिसंग्रहविस्तरेऽस्मिन् सयूथ्यमत भेदोऽपि तत्रतत्रधिषणाजितधिषणं प्रदर्शितो विलसति। तादृशोऽयं ग्रन्थः पूर्ववदेवाद्यापि अहोबिलमठास्थानविद्वद्भिः काश्यपीय श्रीनरसिंहाचार्यैः प्रकाशित-श्चास्मिन्वर्षे सुमनोहररीत्या । प्रीत्याचाधिकारिणः एतद्ग्रन्थाध्ययने प्रवर्तन्ताम् । सर्वैस्सद्भिस्सर्वत्र सर्वदा सादरं स्मरणीयोऽयं रमणीयश्लोकाम्शस्सर्वतन्त्रस्वतन्त्रस्य : - "सङ्कर्षयन्ति हृदयान्यसतां गुणाम्शे सन्तस्तुसन्तमपि न प्रथयन्ति दोषम्"

इत्याशासनपूर्वकं क्रियते

श्रीमदाण्डवन् आश्रमः
श्रीरङ्गम् 15—5—94

श्रीरङ्गनाथदिव्यमणिपादुका स्मृतिः
श्रीरङ्गरामानुजयतिना ॥

Srimad Ubhayave Mahavidwan,
Dr. N. S. Ramanuja Tatacharyaswamy
Vice Chancellor
Rashtreeya Samskrita Samsthanam, Tirupathi.

श्रीमदुभयवे महाविद्वान्
डा. एन् एस् रामानुजताताचार्यस्वामी
कुलपतिः, राष्ट्रीय संस्कृत संस्थानम्
तिरुपतिः

॥ श्रीमते रामानुजाय नमः ॥

प्रशस्तिपत्रम्

अष्टोत्तरशतप्रबन्धनिर्मातृत्वेन प्रख्यातवैभवैः श्रीवेङ्कटेशावतारभूतैः विशिष्टाद्वैतसिद्धान्तपोषकेषु मूर्धन्यैः श्रीमन्निगमान्तमहादेशिकैः प्रमाणपरिशोधकः न्यायपरिशुद्धिनामा ग्रन्थः, प्रमेयपरिशोधकः न्यायसिद्धाञ्जननामा ग्रन्थश्च प्राणायिषातामिति विदितमेतत् सभेषाम्। प्रमाणप्रधाने गौतममहर्षि-प्रणीते न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दाख्यप्रमाणचतुष्टयतदनुबन्धिनो विषयाः प्रत्यपादिषत। परं तु प्रमाणलक्षणतद्विभागादिविषये वेदान्तविरुद्धाः बहवो विषयाः सन्ति। तच्छोधनपूर्वकं प्रमाणलक्षणतद्विभागादिकं निष्कृष्टं न्यायपरिशुद्धौ। कणादमहर्षिप्रणीते वैशेषिकदर्शने षट्पदार्थ-निरूपणेन प्रमेयप्रतिपादनं कृतम्। तदङ्गीकृताः सर्वेऽपि पदार्थाः प्रायः वेदान्तविरुद्धा इति प्रमेय-परिशोधनपूर्वकं प्रमेयनिष्कर्षाय न्यायसिद्धाञ्जनं निरमायि। सूचितमेतदाचार्यपादैरेव न्याय-सिद्धाञ्जने — "तथा प्रमाणप्रमेयादिकं व्यवहारोपयिकमखिलमपि तत्रैव प्रपञ्चितमिति नेह प्रस्तूयते। वैशेषिकशैलीमनुसृत्य यथावस्थितं पदार्थस्वरूपं ह्यत्र विशोध्यते।" इति। यद्यपि न्यायपरिशुद्धावन्ते प्रमेयमप्यभिहित, तथापि प्रमाणप्रधाने तत्र प्रमेयस्य संग्रहेणाभिधानात् विस्तरेण तन्निरूपणाय न्यायसिद्धाञ्जनं पृथङ्निर्मितम्। तदप्युक्तमाचार्यपादैरेव —

यन्न्यायपरिशुद्धयन्ते संग्रहेण प्रदर्शितम्। पुनस्तद्विस्तरेणात्र प्रमेयमभिदध्महे ॥

इति। तदेतत् ग्रन्थद्वयमपि प्रौढगम्भीरशैलीयुतत्वात् दुरवगाहमित्यालोच्य तत्रत्यविषयाणां सुबो-धार्थं प्रमाणप्रमेयप्रतिपादकः श्रीरामानुजसिद्धान्तसंग्रहनामा ग्रन्थः अहोबिलमठीयषड्विंशपरमास्थान-पट्टाभिषिक्त-परमहम्सपरिव्राजकाचार्य श्रीवण्शठकोप श्रीरङ्गनाथयतीन्द्रमहादेशिककटाक्षलब्धसत्ताकेन

अवान्तर - विषयसूचिका

पृष्ठम्

१. प्रकृति परिच्छेदः २

१. मङ्गळाचरणम्
२. ग्रन्थप्रयोजनम्
३. तत्त्वविभागः
४. उपादानलक्षणम्
५. धर्मधर्मिसामाण्यम्
६. तयोरभेदखण्डनम्
७. क्षणिकत्वखण्डनम्
८. द्रव्याणां साधर्म्यलक्षणम्
९. एकत्वानेकत्वव्यवहारौचित्यम्
१०. अणुकारणत्वभङ्गः
११. अण्वनुमाननिरासः
१२. त्रिगुणात्मकसृष्टिक्रमः
१३. इन्द्रियलक्षणम्
१४. तेषां द्रव्याद्रव्यग्राहकत्वम्
१५. त्वगादीनां वायव्यत्वादिनिरासः
१६. कर्मेन्द्रिय विवरणम्
१७. इन्द्रियाणुत्वम्
१८. तन्मात्राणि
१९. आकाशोत्पत्तिः
२०. आकाशस्य गुणक्रियावत्त्वम्
२१. नीलपटन्यायः
२२. वायुः तत्प्रत्यक्षताच
२३. स्थावरेषु प्राणसम्बन्धः
२४. तेजो लक्षणं - विभागश्च
२५. तेजसः शुक्लगुणनिषेधः
२६. स्वर्णादीनां तेजस्त्वनिरासः
२७. जलं पृथिवी च
२८. तमसो द्रव्यता
२९. कालः
३०. समष्टि - व्यष्टि निरूपणम्
३१. दिशां तत्त्वान्तरतानिरासः
३२. कारणादनतिरिक्तं कार्यम्
३३. शरीरस्यानेकभूतोपादानता
३४. शरीरलक्षणं - परमतखण्डनञ्च

२. जीवपरिच्छेदः ४१

१. जीवनिरूपणम्
२. ब्रह्मणः अणुवियदन्तर्बहिश्च व्याप्त्यभावः
३. जीवलक्षणम्
४. जीवाणुत्वसमर्थनम्
५. जीव विभागः
६. नित्यसम्बन्धी
७. नित्यसूरयः
८. भक्तिस्वरूपम्
९. अधिकारिशोधनम्
१०. काम्यात् नित्यसिद्धिः
११. उपासात्रैविध्यम्
१२. हानोपायन शब्दार्थः
१३. दृप्तप्रपन्नस्य रागविषयः
१४. ज्ञानस्य द्रव्यता
१५. मुक्तस्य दुःखासम्बन्धः
१६. आनन्दतारतम्याभावः
१७. कैवल्यवादः

पुटम्

३. ईश्वरपरिच्छेदः ७१

१. ब्रह्मशब्दार्थः
२. अपच्छेदन्यायः
३. निर्विशेषत्वनिरासः
४. अभिन्ननिमित्तोपादानता
५. अशरीर शब्दार्थः
६. अनेन जीवेनेत्यस्यार्थः
७. ईश्वरानुमाननिरासः
८. वेदापौरुषेयता
९. अनुमान निरासफलम्
१०. अधिकरणद्वयाविरोधः
११. लक्ष्मीतत्त्व निरूपणम्
१२. श्रीगुणरत्नकोशभावः
१३. नित्यविभूतिः स्वयम्प्रकाशता च
१४. चतुर्विंशतिरूपता
१५. व्यूहस्वरूपम्

४. बुद्धिपरिच्छेदः १०१

१. कौमारिलमतखण्डनम्
२. नैयायिकमतखण्डनम्
३. सम्बन्धैक्यनिरासः
४. मतिविभागः
५. ज्ञानयाथार्थ्यम्
६. स्वाप्रयाथार्थ्यम्
७. अन्यथाख्यातिनिरासः
८. सम्शयस्वरूपम्
९. ख्यातिभेदाः
१०. धीविभागाः
११. प्रत्यक्षं - भेदश्च
१२. अनुमितिः तत्प्रामाण्यञ्च
१३. उपाधिलक्षणम्
१४. केवलव्यतिरेकि खण्डनम्
१५. न्यायशास्त्रकथनम्
१६. हेत्वाभासाः
१७. पञ्चावयवाः
१८. तर्काङ्गानि
१९. कथाभेदः
२०. निग्रहस्थानानि

५. शाब्दपरिच्छेदः १३०

१. प्राभाकरनिरासः
२. शक्तित्रयम्
३. विधिवाक्य भेदः
४. अन्विताभिधानम्
५. अभिहितान्वयवादः
६. सामानाधिकरण्यार्थः
७. विशेषणस्वरूपम्
८. शक्यनिर्णयः
९. ज्ञानस्य स्वतः प्रामाण्यम्
१०. स्मृति परिच्छेदः

पृष्ठम्

६. अद्रव्यपरिच्छेदः १४१

१. सिद्धयसिद्धिपरिहारः
२. अद्रव्यविभागः
३. त्रिगुणनिरूपणम्
४. शब्दस्वरूपम्
५. "यद्वेदादौ" - अर्थः
६. वेदनित्यत्वम्
७. स्पर्श - रूपनिरूपणम्
८. चित्ररूपनिरासः
९. रसः
१०. संयोगः, नित्यसंयोगश्च
११. शक्तिः
१२. गुरुत्व, द्रवत्व, स्नेहनिरासः
१३. संस्कारानतिरेकः
१४. अपूर्वनिरासः
१५. सङ्ख्यापरिमाणातिरेक निरासः
१६. पृथक्त्वभङ्गः
१७. विभाग, परत्वापरत्वभङ्गः
१८. कर्मनिरूपणम्
१९. जातिनिरासः
२०. सामान्यनिरासः
२१. विशेष, सम्बन्धभङ्गः
२२. सम्बन्धभङ्गः
२३. अभावरूपनिरूपणम्
२४. निष्कर्षः
२५. नञ्प्रयोगसमर्थनम्
२६. चतुर्विधाभावानां भावरूपता
२७. सिद्धयसिद्धि व्याघातपरिहारः



॥ श्रीः ॥

॥ श्रीमते लक्ष्मीनृसिंहपरब्रह्मणे नमः ॥

॥ श्रीमद्रामानुजसिद्धान्तसंग्रहः ॥

அழிகுடி சண்டமாருதம் श्रीनिवासाचार्य विरचितः ।

यस्यामवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्योमे सन्निधत्तां सदा हृदि ॥

प्रपद्ये निरवद्यानां निषद्यां गुणसंपदाम् । शरणं भवभीतानां शठकोपमुनीश्वरम् ॥

श्री वीरराघवयतीन्द्रपरांकुशादि रामानुजार्य कमलानिधियोगिवर्यैः ।
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीरङ्गनाथयतिशेखरमाश्रयामः ॥

श्रीमते श्रीवण्शठकोप श्रीरङ्गनाथयतीन्द्रमहादेशिकाय नमः ।

बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् । येनाध्याहतसङ्कल्प वस्तु लक्ष्मीधरंविदुः ॥ १ ॥

वरदंद्विरदाद्रीश श्रीनिधिं करुणानिधिम् । शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥ २ ॥

श्रीमानेवशरण्य इत्यनुपदं जोघुष्यतेऽनुश्रवस्मृत्याचार्यपरं परोक्तिभिरथाप्येतद्दृढिम्नेक्षयम् ।
अङ्केपङ्कजवासिनीं खसदृशींबिभ्रज्जगद्रक्षणा लक्ष्मीणविहार मेदरसिको जीयान्नृकण्ठीरवः ॥

जननीं जगतां पत्युरधिगम्यत्वकारिणीम् । अज्ञाननिग्रहांनौमि जगद्रक्षणदीक्षिताम् ॥ ४ ॥

आरमारमणादा श्रीरङ्गनाथ गुरूत्तमात् । गुरुपारंपरीं वन्दे करुणामिव रूपिणीम् ॥ ५ ॥

श्रीकृष्णसूरिचरणौ शरणं संश्रये परम् । यत्सेवया परत्रेव समृद्धिरिह पुष्कला ॥ ६ ॥

यद्वाग्झरीमिवादेऽदात् श्रीनिवासमहामुनिः । चण्डमारुतसंज्ञां हि यस्मै तं पितरंश्रये ॥ ७ ॥

श्रीवासराघवेणाद्य क्रियते विदुषां मुदे । रामानुजार्यसिद्धान्तसंग्रहस्साधुसंमतः ॥ ८ ॥

न्यायसिद्धाञ्जने सर्वमाचार्यैस्सुनिरूपितम् । तत्रापि मन्यमानानां दुर्ग्रहत्वमियं कृतिः ॥ ९ ॥

द्रव्याद्रव्यविभेदेन तत्त्वयाथार्थ्यरूपणम् । परपक्षप्रतिक्षेपपूर्वकं क्रियते मया ॥ १० ॥

ध्यासप्रसङ्गात्मिका। समर्थश्चेत् कुसूलस्थबीजेनाप्यङ्कुरोत्पत्तिस्स्यात्। असमर्थश्चेत् क्षेत्रस्थबीजेनापि अङ्कुरोत्पत्तिर्न स्यात्। अतः सामर्थ्यासामर्थ्यरूप विरुद्धधर्मसमावेशाय बीजानां भेदः आवश्यकः। एवमन्यत्रापि। एवं च बीजादीनां भेदसिद्धौ ज्वालैक्य प्रत्यभिज्ञावत् सर्वस्या अपि प्रत्यभिज्ञायाः भ्रान्तित्वात् क्षणभङ्गोयुक्त इति चेत् मैवम्। समर्थस्यैव बीजस्य जलसंयोगादिरूपसहकारिसन्निधितदभावाभ्यां करणाकरणोपपत्तेर्विरुद्धधर्माध्यास प्रसङ्गाभावेन-बीजैक्ये सिद्धे प्रत्यभिज्ञायाः निर्बाधत्वेन द्रव्याणां स्थिरत्वसिद्धेर्निष्प्रत्यूहत्वात्। न च सहकारिसन्निध्यसन्निध्योः विरुद्धयोर्वाकथमेकत्र समावेश इति वाच्यम्। तयोरपि तत्तत्सामग्री संतान प्रतिनियतत्वात्। तत्राप्येवं चोद्ये अनवस्थेतिचेन्न। बीजाङ्कुरवत् प्रामाणिका नवस्थाया अदोषत्वात्। यत्र केवलयुक्त्याभासेना प्रामाणिकार्थपरंपराकल्पिः, जातिवादे जाते र्जातिमत्वे, परमाणुकारणवादे परमाणोरपि सावयवत्वे, व्यावर्तकस्वरूपस्य विशेषपदार्थस्यव्यावर्तकान्तरापेक्षत्वे, तत्रैवानवस्थाया दोषत्वम्। अन्यथाक्षणिकत्वेऽपि बीजस्य तस्मिन्नेवक्षणेक्षेत्र विशेषबीजमङ्कुरं जनयति। न देशान्तर इति करणाकरणाभ्यां सामर्थ्यासामर्थ्यरूपविरुद्ध धर्माध्यास प्रसङ्गेनक्षणेऽपिक्षुभ्यमाणे शून्यवाद एव शरणीकरणीय इत्यकामेनापि द्रव्याणां स्थिरत्वमेष्टव्यम्। अत एव क्षणभङ्गानुमानमपि वह्वयनुष्णत्वानुमानवत् बाधितमिति अनुमानमपि न प्रमाणम्। तथा हि विप्रतिपन्नं वस्तु क्षणिकं, सत्वात्। यत् सत् तत् क्षणिकं यथाजलधरपटलम्। सत्याश्रामी भावा इति हि तेषां अनुमानप्रकारः। तत्र वस्तु शब्देन विश्वपक्षीकारे पक्ष हेतुदृष्टान्तमेदासिद्धिः जलधरपटलव्यतिरिक्त पक्षीकारे तस्यक्षणिकत्वा संप्रतिपत्त्या दृष्टान्तत्वासिद्धः। विरुद्धधर्माध्यासस्य परिहृतत्वात्।

तत्र दीपादिदृष्टान्तोऽप्यनुपपन्नः। तस्य त्रिचतुरक्षणावस्थायित्वाभ्युपगमात्। अस्तुतर्हि क्षणोपाधिदृष्टान्तः। सहि न स्थिरः। तथात्वे क्षणावच्छेदायोगात इति चेन्न। स्थिरैरेव विशेषणान्तरविशिष्टैः क्षणोपाधिसम्भवात्। क्रियायाश्चतुः क्षणवृत्तित्वेऽपिस्वजन्य प्रागभावाविशिष्टत्ववैषेणोपाधित्वसम्भव त। न तेन त्वदभिमतदृष्टान्तसिद्धिः। अतः क्षणिकत्वे प्रमाणाभावात्। प्रत्यभिज्ञाप्रत्यक्षेणद्रव्यस्यस्थिरत्व सिद्धम्। तच्च द्रव्यं षोढा। त्रिगुणकालजीवेश्वर नित्यविभूतिमतिभेदात् अथैषां सामर्थ्यमुच्यते; षण्णामपि संयोगित्वं साधर्म्यम्। अद्रव्येषु संयोगाभावान्नातिव्याप्तिः। ईश्वरान्यपञ्चानां ईश्वरशरीरत्वं लक्षणम्। शरीरत्वस्य द्रव्यत्वघटितत्वादद्रव्येषुनातिव्याप्तिः। त्रिगुणकालनित्यविभूतिमतीनां अचेतनत्वं पराकत्वं च साधर्म्यम्। अचेतनत्व ज्ञानशून्यत्वम्। नित्यविभूतिमत्यो ज्ञानाश्रयत्वाल्लक्षणसमन्वयः। ज्ञानानन्दमयालोकाः इत्यनेन नित्यविभूतेर्ज्ञानस्वरूपत्वाभि

धानात् । पराकत्वं च परस्मा एव भासमानत्वम् । परस्मा इति तादर्थ्ये चतुर्थी । एवकारेणस्वार्थत्वव्युदासः । तथा च परप्रयोजनमात्रपर्यवसायि प्रकाशाश्रयत्वमितिफलितम् । तेन स्वामि प्रयोजन प्रयोजक प्रकाशाश्रयभृत्यादौ नातिव्याप्तिः । भृतिरूपस्य प्रयोजनस्यापि सत्वात् । धर्मभूतज्ञानस्यनित्यविभूतैश्चाचेतनत्वात् । तत्प्रकाशेनापधर्मीश्वरयोरेव फलित्वा च्छ्रवणमन्वयः । जीवेश्वरनित्यविभूतिमतीनामजडत्वं साधर्म्यम् । तच्च स्वतो भासमानत्वं स्वावपद्यज्ञाननिरपेक्षप्रकाशाश्रयत्वमितियावत् । तच्च जीवेश्वरनित्यविभूतीनां शास्त्रसिद्धम् । धर्मभूतज्ञानस्यतु स्वप्रकाशत्वमनुभवसिद्धम् । विषयेन्द्रिय संयोगसमनन्तरं घटमहं जानामीत्युपलम्भात् । न च सुषुप्तिदशायां धर्मभूत ज्ञानस्याप्रकाशादव्याप्तिरिति वाच्यम् । तस्यैवजागरितावस्थायां विषयप्रकाशनकाले स्वप्रकाशत्वतत्वात् । नहीदं कालघटितं, येनाव्याप्तिस्स्यात् न च तथाऽपि नित्यविभूतेस्तेषांणां शास्त्रानिरपेक्षप्रकाशमानत्वेनस्वप्रकाशत्वं न स्यादिति वाच्यम् । स्वापदशायां धर्मभूत ज्ञानस्येव बद्धदशायां अप्रकाशत्वेऽपि जागरदशायामिवमुक्तौ तस्यास्स्वप्रकाशत्वे बाधकाभावात् । त्रिगुणकालवोर्जडत्वं साधर्म्यम् । जडत्व च परत एव भासमानत्वम् । एवकारेण स्वतो भासमानत्वव्यवच्छेदः । तेन कदाचित् परतो भासमानेषुपरज्ञानादिषुनातिव्याप्तिः । उन्मेष निमेषाद्यनुमेयपरात्मनि च नातिव्याप्तिः । तस्य तं प्रति स्वप्रकाशत्वात् । जीवेश्वरयोः प्रत्यक्त्व ज्ञातृत्वं च साधर्म्यम् । प्रत्यक्त्वं च स्वप्रकाशफलित्वम् । जीवेश्वरयोश्चेतनत्वेन स्वोपप्रकाश फलित्वं तयोरवेतिलक्षणसमन्वयः । ज्ञातृत्वं च ज्ञानाश्रयत्वम् । तच्च यस्सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । सोऽकामयतेत्यादि श्रुतिसिद्धम् । जीवस्यत्वहं जानामीत्यनुभवसिद्धमितियोर्लक्षणसमन्वयः । अथ त्रिगुणं निरूप्यते । तत्र सत्वोगुणकत्व तमोगुणकत्व महदाद्यवस्थार्हत्वानि त्रिगुणलक्षणानि । तत्रप्रकृति महदहङ्कारेन्द्रियतन्मात्रेष्वागमः प्रमाणम् । आकाशादिमहाभूतेषु पञ्चसु प्रत्यक्षं प्रमाणमिति बोध्यम् । तच्चाधोदेशेऽपरिच्छिन्नम् । ऊर्ध्वदेशे नित्यत्वेभूत्यापरिच्छिन्नम् । नित्यविभूतेस्तमसः परत्वश्रुतेः । तदनन्तमसङ्ख्यातमिति प्रमाणं तु अधोदेशविषयमिति भाव्यम् । तच्चविचित्र-सृष्ट्युपकरणत्वेन मायाशब्देन, विकारान् प्रकरोतीति प्रकृतिशब्देन चोच्यते । इदं च परमेश्वर सङ्कल्पात् क्वचित् सदृशसन्तानान् क्वचिद्विसदृशसन्तानांश्चारभते । इदं च परिस्पन्दादियोग्य भूतादिपरिणामदशायामपे निच्छिद्रमेव । अत एव स्वकार्यव्यापकत्वं तस्य । इदमेव त्रिगुणद्रव्यं पूर्वावस्थोमर्दकावस्थामेदाच्चतुर्विंशति तत्त्वानीत्युच्यते । मूलप्रकृतिर्महान् अहङ्कारः इन्द्रियाण्येकादशपञ्चभूतानि, पञ्चतन्मात्राणिचेति । नन्वेकस्य प्रकृतिद्रव्यस्यकथं बहुधाऽवस्थित विचित्रजगद्रूपेणपरिणाम इतिचेन्न । एकस्यैव मृत्पिण्डस्यघटशरावादिरूपेण-

विविधपरिणामवत्तथा परिणामोपपत्तेः । नच एवमप्यवयव्यनभ्युपगमात् अन्ततः प्रकृति द्रव्यमेवानेकजगदाकारीदितिवक्तव्यम् । ततश्चविरुद्धयोरेकत्वानेकत्वयोः कथमेकद्रव्यवृत्तित्वमिति वाच्यम् । एकत्वानेकत्वयो रप्यवस्थारूपयोः कालभेदेन एकद्रव्यवृत्तित्वे बाधकाभावात् । यथा घटत्वकपालत्वचूर्णत्वाद्यवस्थाः एकस्यामेव मृदि पूर्वावस्थ प्रहाणेनजायन्ते । तथा प्रकृतिद्रव्येऽपि एकत्वावस्थाप्रहाणेन बहुत्वावस्था, बहुत्वावस्थ प्रहाणेन पुनरेकत्वावस्था जायते । ततश्चप्रळयकाले एकत्वावस्थापन्नप्रकृतिद्रव्यस्य सृष्टिकाले महदाद्यवस्थारूपबहुत्वावस्थापुनः प्रळये तत्प्रहाणेन एकत्वावस्थत्यभ्युपगमेनविरोधाभावात् । अत्र बहुत्वं च नामरूपविभागार्हावस्थाविशिष्टत्वम् । तद्विगध्यकत्वं च नामरूपविभागानर्हावस्थाविशिष्ट-त्वम् । एतादृशमेव मृद्द्रव्यस्याप्येकत्वमनेकत्वं चदृश्यते । यथापिण्डत्वावस्थावास्थायां मृद्घटशरावादिनामरूपविभागानर्हावस्थाविशिष्टत्वादेक-वचनव्यवहारः, तस्या एव घटशरावादिरूपेण परिणामे नामरूपविभागार्हावस्थायोगात् बहुत्वबहुवचनव्यवहारः । तथा प्रकृतिद्रव्यस्यापि इति नानुपपन्नत्वम् । नचैवमपि अवयवसङ्घातातिरिक्त प्रकृतिद्रव्यस्याभावेन तस्यैवांशतः परिणामे तत्तदंशा एव यथास्वं परिणमन्ति । ते ते अंशा एवाणवः इति परमाणुकारणवाद एवाङ्गीकृत इति वाच्यम् । शब्दस्पर्शरूपरसगन्धरहित सत्वरजस्तमोगुणत्रयाश्रयप्रत्यक्षागोचरद्रव्यरूपत्वेन श्रुत्यादिसिद्धे परामतपरमाणुस्वरूपगन्धाभावेन परमाणुकारणत्वासिद्धेः । एतेन परमाणु कारणवादानरस्तः । जालालोकविलोकनोपयत्रसरेणुशब्दवाच्यद्रव्यातिरिक्ताप्रत्यक्षाणुकल्पने प्रमाणाभावात् । तेष्वेव मात्रया भेदमवलम्ब्य परमाण्वणुकत्र्यणुकादिव्यवहारः । तेष्वेव कथाचित् क्वचिद्पनुद्भूतदशायां प्रत्यक्षगन्धाश्रयगन्धवहानीतसुरभिभागवदचाक्षुषत्वादि संभवात् ।

परमाणोरप्रत्यक्षत्वव्यवहारश्च न विरुद्धयते । न हि पवनानीतगन्धवद्द्रव्येषु रमाणुत्वं भवतामिष्टम् । परमाणूनां प्रत्यक्षगुणाश्रयत्वानभ्युपगमात् । अतः प्रत्यक्षान्न ॥ भवदाभिमताणुसिद्धिः । नचागमात्तत्सिद्धिः । तथाविधागमाभावात् , ननु,

जालद्वरेणरीक्ष्यं सूक्ष्मं यद् परिदृश्यते । तस्याष्टमोवा षष्ठोवा भागोऽणुः परिकीर्तितः

—इति शिल्पशास्त्रात्

जालसूर्यमरीच्यां यत् सूक्ष्मं तस्याष्टमो मतः । परमाणुरपि वा षष्ठः तद्द्वयं द्व्यणुकं मतम् ॥

द्व्यणूनामविषष्ठं तु परिनाम प्रकीर्तित इति स्वर्णस्तेय प्रायश्चित्तविधायक धर्मशास्त्राच्च परमाणु-

तत्र परमाणुद्रव्यत्वानन्यथाभावात् । मानोन्मानादिविशेषनिश्चयत्रसरेणौ बुद्ध्या कल्पितमात्रप्रतिपादनपरत्वेन परमाणुद्रव्यमाधकत्वात् । तथाकल्पनं च त्र्यणुकपरिमाण स्वर्णस्तेयस्य प्रायश्चित्तबाहुल्य-प्रतिपादनाय । यथा एकस्यामेव द्वादशकपालकवैश्वानरेष्टौ यदष्टाकपालोभवति । गायत्र्यैवैनं ब्रह्मवर्चसेन पुनातीत्यादिना एकदेशे ब्रह्मवर्चसत्वादि प्रतिपादनं द्वादशकपालकवैश्वानरेष्टेः फलभूयस्त्वार्थकं तद्वत् । तत्राष्टाकपालत्वादिकं वास्तविकम् । अत्रतु परमाणुत्वपरित्वादिकं बुद्धिकल्पनमितिविशेषः । एवमनभ्युपगमेत्रिसरेण्वष्टमभागभाग परिमितस्यापमाणितस्याप्रत्यक्षवस्तुनः स्तेयकरणासम्भवेन तदुन्मानकरणवैयर्थ्यप्रसङ्गात् । नचैवं द्व्यणुकस्यापमाणिकत्वमागमेन दृष्टमितिवाच्यम् । "तस्येयं पृथिवी सर्वावित्तस्यपूर्णस्यात् । स एको मानुष आनन्द" इत्यादेर्दर्शनात् । अतो नागमात् भवदभिमतपरमाणुसिद्धिः ।

ननुत्र्यणुकपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यरूपत्वात् महत्परिमाणतारतम्य वदित्यनुमानेन सर्वतोऽपकृष्टं परमाणुद्रव्यं सिद्ध्यतीति चेन्न । तारतम्य रूपत्वादित्येतावता ऽपिव्यभिचारसम्भवेन, परिमाणविशेषस्यहेतौ व्यर्थत्वात् । अपकृष्टमहत्वातिरिक्तपरिमाणा सिद्धेश्च ऽऽश्रयासिद्धेश्च । तस्य च त्रसरेणावेवविश्रान्तेः । अथावयवापकर्षतारतम्यं क्वचिद्वि श्रान्तं तारतम्यरूपत्वादित्यनुमानेन सर्वतोऽपकृष्टावयवरूपतयाणोरसिद्धिरितिचेन्न । तादृशत्वेन संप्रतिपन्नत्रसरेणुनासिद्धसाधनात् । अवयवधारायाअपि तत्रैवविश्रान्तेः । अन्त्यावा तस्याविश्रान्तिः । तथ्याधिक्यन्यूनताभ्यां प्रमाणसिद्धाभ्यां सर्षपमहीधरादि परिमाणविशेष प्रसङ्गः परिहियते । अनन्तत्वाविशेषेऽपि आश्रयाणां परावरजातिषु-क्षणदिवसपक्षमासवत्सरा-दिष्वनन्तेष्वाधिक्य न्यूनतयोर्मवद्भिरभ्युपगमात् ।

यदिघटत्वपृथिवीत्वयोराश्रयानन्त्येऽपि घटत्वाश्रयनिखिलवृत्तित्वेसतितदनाश्रयवृत्ति त्वात् पृथिवीत्वस्याधिक्यम् एवमतीतयोः क्षणदिवसयोरानन्त्येऽपि एकस्यदिवसस्य नेक्षणघटितत्वात् दिवसापेक्षयाक्षणानामाधिक्यं इत्युच्यते, तर्हि सर्षपमहीधरयोरनन्तावयव-कत्वेऽपि सर्षपव्याप्यदेशव्याप्यत्वे सति सर्षपव्याप्यदेशव्यापित्वात् सर्षपापेक्षया महीधरस्याधिक्य मित्यपिसुवचत्वात् । विप्रतिपन्नं कार्यद्रव्यारब्धं चाक्षुषद्रव्यत्वात् घटवदित्यनुमानमपि विपक्षेबाधकाभावादप्रयोजकम् । द्रव्यचाक्षुषं प्रतिमहत्त्वस्य कारणत्वात् । त्रसरेणौअवयव ह्रस्वा प्रकाधीन महत्तायाएव वक्तव्यतया कार्यद्रव्यारब्धत्वमावश्यकम् । अन्यथात्रसरेण श्चाक्षुषं न स्यादितिचेन्न । यथोपलब्धं येव्यणुकास्तत्र स्वीकारेण कार्यद्रव्यानारब्धत्वेऽपि न बाधकाभा-वात् । अन्यथा महावयवारब्धत्वस्यापिचाक्षुषद्रव्यत्वव्याप्यत्वात्त्रसरेणौ महावयवारब्धत्व प्रसङ्गात्

परमाण्वसाधकत्वात् । वायवीयतैजसादित्यरेणोः पूर्वभूतात्मककार्यं द्रव्यारब्धत्वात् सिद्धसाधनत्वं च । चाक्षुषत्वयाऽभ्युपगते कालेऽप्यभिचाराच्च ।

पृथिवीत्वं नित्यसमवेतवृत्ति-घटपटवृत्तिजातित्वात् सत्तावदित्यनुमानेन साध्यकोटिप्रविष्टतयानित्यपृथिवीसिद्धौ स एव परमाणुः । एव जलत्वं नित्यसमवेतवृत्ति ह्रदनदीजलवृत्तिजातित्वात् सत्तावदित्यादिकमपि विपक्षेबाधकाभावादप्रयोजकम् । पृथिवीत्वं नित्यवृत्ति, न भवति, पृथिवीमात्रवृत्तिजातित्वात् घटत्ववदित्यादिभिः प्रतिपक्षयितुं शक्यत्वाच्च । घटादीनांसर्वेषां नित्येश्वराश्रितत्वाभ्युपगमादतिरिक्तसमवायानभ्युपगमाच्चसिद्धसाधनत्वम् । नित्यवृत्तीतिसाधनेऽपिघटादिरूपेण परिणतस्यापि त्रिगुणद्रव्यस्य स्वरूपतो नित्यत्वाभ्युपगमात् स एव दोषः ।

एवं परमाणूनां कार्यारंभकत्वं संयुज्यैव वक्तव्यम् । सच संयोगः कात्स्न्येन उतैकदेशेनवा । कात्स्न्येनचेदधिकपरिमाणारंभकत्वं न स्यात् । एकदेशेन चेत् परमाणूनां सांशत्वप्रसङ्गः । ततः परामितनिरवयवाण्वसिद्धिः । प्रत्यक्षागमसिद्धाणु-ईश्वरादिषु संयोगो यथाप्रमाणमङ्गीकार्यः । तत्र नोक्तविकल्पावसर इति श्रुतेस्त्विति सूत्रेण सूत्रकारैर्निर्णीतम् । अस्तुतर्हि प्रत्यक्षसिद्धैरेव सूक्ष्मद्रव्यैर्जगदारम्भः, किमेकत्वावस्थ प्रकृत्येतिचेन्न । स्वतन्त्रारम्भे शास्त्रविरोधात् । परतन्त्रारंभाभ्युपगमे यथ गमं प्रकृतेरपिस्वीकार्यत्वात् । भूतचतुष्टयपूर्वभाविनः महदाद्याकाशपर्यन्तप्रपञ्चस्य भूतचतुष्टयारम्भणीयत्वायोगात् । आकाशाद्वायु वायोरग्निरिति सृष्टिक्रमविरोधच्च । भूतचतुष्टयातिरिक्तानित्यद्रव्यजातं नास्तीतिचेन्न । आकाश द्युत्पत्ति बोधकागमविरोधात् । तथा त्रसरेणूनामेव जगदादिरहितावस्थास्वीकारे तद्वत्तेषामेकीभावावस्था स्वीकार्येति सैवमूलप्रकृतिरितिसिद्धम् ।

साच सत्त्वरजस्तमोगुणा । तस्यामपिमात्रया भेदमाश्रित्याव्यक्ताक्षरतमोरूपावस्थात्रयमप्याहुः केचिदाचार्याः । तत्पक्षेऽव्यक्तमक्षरेलीयते । अक्षरं तमसि लीयते इति श्रुत्यानुगुण्यम् । सत्त्वरजस्तमसां साम्यं यदा तदाप्रळयावस्था । यदा तेषांवैषम्य तदा सृष्टयवस्थेतिबोध्यम् । अव्यक्ताव्यवहितोत्तरावस्थाविशिष्ट अहङ्काराव्यवहित पूर्वावस्थाविशिष्ट वा त्रिगुणं महान् । अहङ्कारादौ-प्रकृत्यादौचातिव्याप्तिवारणायाव्यवहितेति । सत्रिविधः । सात्त्विको राजसस्तामसश्चेति । सत्त्वादिगुणोन्मेषवशात् अंशभेदेनतत्त्रयोपदेशः ।

इन्द्रियाव्यवहितपूर्वावस्थाविशिष्टं त्रिगुणमहङ्कारः । महत्यतिव्याप्तिवारणायाव्यवहितेति । अहमभिमानोऽहङ्कार इति साङ्ख्यलक्षणं-तदसङ्गतम् । अहमभिमानरूपोऽहङ्कार-

स्वात्मधर्मभूतस्य प्राकृतद्रव्यनिरूपणप्रकरणे तन्निरूपणमाक्षिप्तत्वात् । अव्यक्तपरिणामभूतोऽहङ्कारः । अनात्मनि देहेऽहम्भावकरणहेतुत्वमात्रादहङ्कारशब्दवाच्यः । अहमभिमानरूपाहङ्कारस्यात्मधर्मभूतस्याहङ्कार द्रव्यकार्यस्य उत्कृष्टजनावमानहेतोर्गर्वापरपर्यायस्य तु—

"अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममश्शान्तो ब्रह्मभूयाय कल्पते ॥"

इति त्याज्यत्वमुच्यते । अव्यक्तपरिणामाहङ्कारद्रव्यस्य त्याज्यत्वासंभवात् । अतोऽस्याहं मानहेतोः अहमभिमानत्वासम्भवात् माङ्गल्यलक्षणमसंभवग्रस्तमिति बोध्यम् ।

असावपि त्रिविधः । सात्विकराजसतामसभेदात् । तत्र सात्विकादेकादशेन्द्रियाणि जायन्ते । तामसाच्छब्दतन्मात्रम् राजसस्तु उभयानुग्राहकः । राजसतामसयोरपीन्द्रियाण्यव हित पूर्वावस्थाविशिष्टत्वाल्लक्षणसमन्वयः । तत्रेन्द्रियजनकत्वं सात्विकाहङ्कारलक्षणम् । शब्द तन्मात्रजनकत्वं तामसाहङ्कारलक्षणम् । उभयानुग्राहकत्वं राजसाहङ्कारलक्षणम् । हृत्कर्ण चक्षुरादिप्रदेशविशेषावच्छिन्नव्यापारतया तत्तत्कार्यविशेषकत्वमिन्द्रियम् । मनइन्द्रियं हृत् प्रदेशावच्छेदेन । घ्राणेन्द्रियं नासाग्रावच्छेदेन । श्रोत्रेन्द्रियं कर्णावच्छेदेन । त्वगिन्द्रियं सर्वावयवावच्छेदेन । चक्षुरिन्द्रियं कृष्णतारकाग्रावच्छेदेन । रसनेन्द्रियं रसनाग्रावच्छेदेन । वागिन्द्रियमास्यावच्छेदेन । पाणीन्द्रियं हस्तावच्छेदेन । पादेन्द्रियं पादावच्छेदेन । पायवस्थेन्द्रिये तत्तत्प्रदेशावच्छेदेन । व्यापारसत्स्मृत्याद्यानन्दपर्यन्त तत्तत्कार्यं करोतीति तेषां लक्षणसमन्वयः ।

अशरीरं प्राणधार्यमेव यत् द्रव्यं पुरुषोपकारकं तत् इन्द्रियमिति वा लक्षणम् । शरीरेऽतिव्याप्तिवारणायाशरीरमिति । वैशेषिकोक्तान्यत्वत्यक्षसाक्षात्कारसाधनमिन्द्रियम् । शरीरसंयोगे सत्येव साक्षात् प्रमितिसाधनं इन्द्रियम् । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वमित्यादीन्द्रियलक्षणानि कर्मेन्द्रियाण्यप्रेम्नादर्शनीयानि । वक्ष्यते च वागादीनामपि इन्द्रियत्वम् । तच्चेन्द्रियं द्विविधम् । प्राकृतमप्राकृतं चेति । शुद्धसत्वे सतीन्द्रियत्वमप्राकृतेन्द्रियत्वम् । मिश्रसत्वे सतीन्द्रियत्वं प्राकृतेन्द्रियत्वम् । अव्यक्तमहदहङ्कारेष्वपि प्राकृताप्राकृत विभागोऽस्तीति केचिदाचार्याः ।

पुनश्चेन्द्रियं द्विविधम् । ज्ञानेन्द्रियं कर्मेन्द्रियं चेति । ज्ञानप्रसारणजनकमिन्द्रियं ज्ञानेन्द्रियम् । तच्च षोढा । मनः श्रोत्रत्वक्चक्षूरसन घ्राण भेदात् । तत्र प्राकृतत्वे इन्द्रिय लक्षणमुच्यते । मिश्रसत्वे सति शब्दादिपञ्चविषयज्ञानासाधारणकारणमिन्द्रियं प्राकृतत्वेन्द्रियं

मिश्रसत्त्वे सति रूपसंस्कारोऽनिन्द्रियं प्राकृतं मनः । नखहृन्प्रदेशमात्रवृत्ति । इन्द्रियान्तराणामपि हृन्प्रदेश एव कन्दस्थानम् । स्थानान्तरेषु तत्तत्कार्यकरणायकादाचित्क वृत्तित्वम् । आत्मनोऽपि तत्रैववृत्तिः अनन्तेऽप्यात्मविशेषदेवयक्षकल्पविकल्पा ध्यवसायादयः उत्पद्यन्ते इति नान्तःकरणं त्रैविध्यम् । मन एकमेवान्तःकरणमित्युच्यते । एतेन साङ्ख्योक्तान्तःकरणत्रैविध्याद्यपास्तम् ।

मिश्रसत्त्वे सति शब्दादिपञ्चविषयज्ञानानामसाधारणकारणत्वं प्राकृतबाह्येन्द्रियत्वम् । शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं प्राकृतश्रोत्रम् । तन्मनुष्यादीनामपिकर्णशष्कुल्यवच्छिद्रप्रदेशवृत्ति । द्विजिह्वानांनयनवृत्ति । आकाशः इन्द्रियारम्भकः भूतत्वात् पृथिवीवत् । शब्दः स्वसमानजातीयगुणवदिन्द्रियेण गृह्यते । बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात् रूपवत् । श्रोत्रं स्वग्राह्यगुणसजातीय गुणवत् बहिरिन्द्रियत्वात् चक्षुरादित्यनुमानानां चक्षुरादीनामभौतिकत्वस्य वक्ष्यमाणत्वात् दृष्टान्तासिद्धिः । श्रोत्रादीनामाहङ्कारिकत्वश्रुत्याद्यनुष्णत्वानुमानवत् बाधितत्वं च । शब्दस्य द्रव्यत्वाद्द्रव्यत्व श्रोत्रगमनशब्दागमनादिविवाद अद्रव्ये शब्दे वक्ष्यिष्यामः ।

शब्दादिपञ्चकमध्ये स्पर्शमात्रग्रहणशक्तं प्राकृतत्वगिन्द्रियम् । तच्चकुस्तनवपुर्वृत्ति । प्रदेशभेदेनस्पर्शोपलम्भतारतम्यम् । नखदन्तकेशेषुस्पर्शानुपलम्भश्च प्राणवायुमान्द्यतारतम्यात् । त्वगिन्द्रियं वाय्वादिभूतचतुष्टयमूर्द्भूतस्पर्शगुणकं गृह्णाति संयोगेन । उद्भूतस्पर्शं तु संयुक्तनिष्ठतया । श्रोत्रं तु न द्रव्यग्राहकं किंतु संयुक्तनिष्ठतयापञ्चभूतवृत्ति शब्दमात्रग्राहकम् । संयुक्तनिष्ठत्वं संबन्धः । शब्दादिमध्ये रूपमात्रग्रहणशक्तमिन्द्रियं प्राकृतं चक्षुः । तच्चनायन गोळवृत्ति । गगनस्यापि चाक्षुषत्व वक्ष्यामः ।

उद्भूतरूपवत्वं चक्षुर्योग्यत्वम् । अतः प्रभायाः उद्भूतरूपस्पर्शाभावात् न त्वाचप्रत्यक्षत्वम् । वायोरुद्भूतरूपाभावात् न चाक्षुषत्वम् । प्रसृतचक्षुर्महत्सम्बन्धाद्दूरस्थग्रहणम् । स्फटिकादौ नायनप्रभाया तत्प्रवेशयोग्यत्वसम्भवात् । सर्वेषां तद्व्यवहितानामुपलम्भः । अञ्जनादि संस्कृतनयनप्रभायाः पृथिव्यादावनुप्रवेशसामर्थ्यादञ्जनात्तच्चक्षुषा पृथिव्यादिव्यवहितनिधि प्रभृति रुपलभ्यते । शब्दादिपञ्चकमध्ये रसमात्रग्राहकमिन्द्रियं रसनम् । तच्चजिह्वाग्रवृत्ति । संयुक्तनिष्ठतयारसग्राहकम् । शब्दादिपञ्चकमध्ये गन्धमात्रग्राहकमिन्द्रियं घ्राणम् । तदपि संयुक्तनिष्ठतयागन्धं गृह्णाति । तथाचविषयेन्द्रियसम्बन्धः सम्योगः संयुक्तनिष्ठताचेतिद्विविधः । ननुशब्दस्पर्शादिमाक्षात्कारायसम्बन्धान्तरमपिस्वीकार्यमितिचेन्न । शब्दस्पर्शरूपरसगन्धादिषु द्रव्यातिरिक्तधर्मानभ्युपगमात् । तच्चाद्रव्ये निरूपयिष्यते ।

नन्वेवमपि समवायाभावग्रहणाय विशेषणविशेष्यभावसम्बन्धस्वीकार इति चेन्न । स्वरूपातिरिक्तसमवायस्य भावातिरिक्ताभावस्य चानभ्युपगमात् । तदप्यद्रव्ये वक्ष्यते । तदेवं मनस्त्वक्चक्षूंषि द्रव्याद्रव्यग्राहकाणि श्रोत्ररसनघ्राणानि द्रव्याद्रव्य ग्राहकाणि ।

यद्वा सर्वेन्द्रियाणामपि तत्तत्कालादि विशिष्टवस्तु ग्राहकत्वात् द्रव्याद्रव्यग्राहकत्वम् । पूर्वोक्तविभागस्तु प्राधान्येन द्रव्यग्रहणाभिप्रायेणोक्तः अत्र वैशेषिकाः; त्वगिन्द्रियं वायवीयं स्पर्शादिषुमध्यस्पर्शस्यैवाभिव्यञ्जनात् । अंगसंगिनोरित्याभिव्यञ्जकव्यञ्जनपवनवत् । चक्षुस्तैजसं-स्पर्शादिषुमध्ये रूपस्यैवाभिव्यञ्जकत्वात् दीपप्रभावत् । रसनं जलीयं स्पर्शादिषु मध्ये रसस्यैवाभिव्यञ्जकत्वात् । सक्तुरसाभिव्यञ्जकादकवत् घ्राणं पार्थिवं स्पर्शादिषुमध्यगन्धस्यैवाभिव्यञ्जकत्वात् । कुङ्कुमगन्धाभिव्यञ्जकघृतवत् । इत्याद्यनुमानैस्त्वक्चक्षुर्जिह्वाघ्राणानिक्रमेण वायुतेजस्सलिलपृथिवीमात्रानीतिसाधयन्ति तदसत् । तत्राभिव्यञ्जकत्व नामकि तदभिव्यक्तिकरणत्वम् । उत तदभिव्यक्तिहेतुत्व वा । आभव्यक्तिश्चप्रकाश ज्ञानमितियावत् ।

तथा च तज्ज्ञानकरणत्वं तद्ज्ञानहेतुत्वं वा तदभिव्यञ्जकत्वमिति फलितम् । आद्ये स्पर्शादिज्ञानं प्रतीन्द्रियाणामेव करणत्वात् व्यजनपवनादिदृष्टान्तानासाधनवैकल्यन-हेतोरसाधारणानैकान्तिकत्वम् । सर्वंसपक्षविपक्षव्यावृत्तत्वाद्धेतोः । द्वितीय कालादृष्टश्वरषु व्यभिचारः, तेषां कार्यमात्रकारणत्वात् । अथहतोस्पर्शस्यैवेत्युक्त्यास्पर्शेतरानभिव्यञ्जकत्वे सतिस्पर्शाभिव्यञ्जकत्वमिति विशिष्टो हेतुः, तस्यकालादावभावान्नव्यभिचार इति चेत्तर्हित्वक् संयुक्तत्वादिषुव्यभिचारः । अमौतिकानां तेषां स्पर्शादि मात्राभिव्यञ्जकत्वात् । द्रव्यत्वेसतीति विशेषणेऽपि इन्द्रियाधिष्ठानगोळकादौ तत्संस्कारे अञ्जनादौ व्यभिचारः । इन्द्रियाधिष्ठानस्यापि परम्परया हेतुत्वात् । आगमबाधश्च सर्वेषामनुमानानां दुर्वारः । सदृश्यधर्मिग्राहकमान बाधाऽपि । आगममन्तरेण त्वग्गोळकाद्यतिरिक्तेन्द्रियासिद्धेः । त्वाचचाक्षुषादिकार्ये करणपूर्वकं कार्यत्वाद-तिसाधनेऽपि करणमात्रं सिद्ध्यति । नतु त्वग्गोळकाद्यतिरिक्तम् ।

न च गोळकादेरवैकल्येऽपि दर्शनादिकार्यवैकल्यादतिरिक्तं कल्प्यत इति वाच्यम् । तत्र गोळकादिवैकल्यस्यैव सत्वात् । सूक्ष्मस्य तद्वैकल्यस्य मूषकावृतबीजवत् दुर्दर्शत्वात् । न चेन्द्रियाणां प्राप्यकारित्वनियमात् गोळकस्य दूरस्थविषयसम्बन्धाभावात् गोळकातिरिक्त मेवान्यथानुपपत्त्यासिद्ध्यतीतिवाच्यम् । पुष्पात् परिमळप्रसर इव पार्थिवगोळकावयव प्रसरवत्त्वा

देव विषयसंबन्धसिद्धेः । प्राप्यकारित्वाविरोधात् । अतः कनीनिकालक्षणगोळकपत्वेचाक्षुषम् । तदभावेनचाक्षुषमिति अन्वयव्यतिरेकसिद्धस्य गोळकस्य पक्षीकारेतस्य प्रत्यक्षतः पार्थिवत्वात् तेजस्त्वसाधने बाधः ।

आगमसिद्धस्याहंकारिकस्य पक्षीकारेधर्मिग्राहकबाधोऽवर्जनीयः । यत्तु आलोकाभावे जायमानो रूपादिसाक्षात्कारः तेजः करणकः रूपसाक्षात्कारत्वात् आलोके जायमानसाक्षात्कारवादित्यनुमानेन तत्करणत्वेन तेजस्त्वसिद्धौ इतरेषां बाधाच्चक्षुरेवतत्करणतयासिद्ध्यतीति । तदपिन । आप्यायकतेजसासिद्धसाधनत् । मोक्षधर्मे भृगुभारद्वाजसंवादे अप्यायन्ते च ते नित्यं धातवस्तैस्तु पञ्चभिरितीन्द्रियाणां तत्तद्भूतैराप्यायितत्वसिद्धेः । तेजसस्तत्रकारणत्वेऽपि तच्चक्षुरेवेति नियामकाभावात् । इन्द्रियवदेवानुद्भूतस्पर्शरूपस्यकस्यचिद्बाह्यतेजसो ग्रीष्मोष्मवत् सम्भवात् ।

उद्भूतरूपवत्त्वस्यापि तत्रसाधने भवदभिमतेन्द्रियस्यापि तथात्वप्रसङ्गेनालोकाभावरूपतमव एवासाद्धप्रसङ्गात् । ईश्वरज्ञानेव्यभिचारश्च । तस्य नित्यत्वेन तेजः करणत्वरूपसाध्य शून्यत्वात् । रूपसाक्षात्कारत्वहेतोस्सत्वाच्च । अनित्यत्वे सतीतिविशेषणे स्वाप्ने योगिरूपसाक्षात्कारादौ च व्यभिचारः । तत्तद्व्यभिचारस्थलव्यतिरिक्तत्व विशेषणे तु आविष्कृतं तत् कौशलम् । एवमनुमानान्तरेऽपि यथासम्भवं दूषणमूह्यम् ।

अप्राकृत श्रोत्रादिषु तु मुक्तेश्वरादीनां करणाधीनज्ञान प्रसराभावेऽपिस्वेच्छयापरिग्रहाद्विषयनियमस्सहकारिनियमश्चानपेक्षतः । अतः तत्तदधिष्ठानविशेषैरेव तत्तल्लक्षणमूह्यम् । अत एव श्रीवत्साङ्कमिश्रा अपि,

त्वक्च दृक् च निपिपासतिजिह्वाविह्वलाश्रवणवत् परवृत्तौ । नासिका त्वयिकरीश तथेति प्राप्नुयां कथमिमांस्विदवस्थाम् ॥ इत्यनुजगृहुः । यस्यामवस्थायां त्वक्स्पर्शमात्रग्रहण शक्तं त्वगिन्द्रियं दृक् च रूपमात्र चक्षुरिन्द्रियं च निपिपासतिनितरां पातुमिच्छति । रसनैकगोचररस साक्षात्कारसमर्थं भवति । जिह्वारसनेन्द्रिय श्रवणवत् श्रोत्रेन्द्रियवत् परवृत्तौ इन्द्रियान्तरसाध्यरूपस्पर्शादिसाक्षात्काररूपव्यापारे विह्वला आसक्तामवति । नासिकाघ्राणेन्द्रियमपि तथा शब्दादिग्रहणधुरंधरंभवति । त्वयि सर्वगन्धः सर्वरस इत्याद्युक्तशब्दादिसर्वविषयपरिपूर्णे सर्वेन्द्रिय विषयभूतदिव्यमङ्गळवति तादृशीमवस्थां कथंस्वत् प्राप्नुयाम् । तथाचमुक्त्यवस्थायामिन्द्रियाणां विषयनियमाभावादिन्द्रियनिरपेक्ष सर्वविषयकज्ञानसम्भवात् तादृश्यवस्था प्रार्थितामवतीति श्लोक तात्पर्यात् ।

अथ कर्मेन्द्रियं निरूप्यते ।

उच्चारणशिल्पकरणगमनमलोत्सर्जनानन्दविशेषाद्यन्यतमहेतुत्व [illegible]म् । [illegible] च पञ्चविधम् । वाक्पाणिपादपायूपस्थभेदात् , तत्र वर्णोच्चारणकारणमिन्द्रियं वाक् । तच्च [illegible]ठ जिह्वामूलतालुदन्तोष्ठनासिकामूलरूपस्थानाष्टकवृत्ति । शुकादिष्वतिरिक्त [illegible]ष्वपि तत्तददृष्ट [illegible] दृष्टवर्णोच्चारणाच्च वाक्तः । शुकादीनामपि कांश्चिददृष्टैकरूप्यादुच्चारणवैषम्यम् । मूकस्यतु [illegible] शेषेण प्रतिबन्धादुच्चारणाच्च वाक्तः । शिल्पकरणमिन्द्रियं पाणिः । सच [illegible]ङ्कुळ [illegible] वृत्ति , वारणादीनां नासावृत्तेः । ननुतालुपादादिभिरप्यस्य सम्भवात् [illegible] करणादिदर्शनेऽपि तदवृत्तित्वमास्थेयमिति चेन्मात्रया तदवृत्तित्वमस्त्वेव , [illegible] इन्द्रियान्तरव्याप्त प्रदेशे, इन्द्रियान्तरवृत्तेश्चक्षुरुन्मेषादौ दर्शनात् ।

सञ्चारकरणमिन्द्रियं पादः । सचमनुष्यादीनां चरणवृत्तेः । सर्पमत्स्यादीनां उरः पक्षादिवृत्तिः । मलोत्सर्जनकरणमिन्द्रियं पायुः । सचावयवावयवीवृत्तेः । मान्धळादीनामास्यवृत्तेः । आनन्दविशेषकरणमिन्द्रियमुपस्थः । ननुकर्मेन्द्रियाणि न सन्ति गमनादिकार्येषु पादादीनां सहकारित्वनापरोक्षात् तर्हि चक्षुरादीनामतीन्द्रियत्व मस्तु; तेषामपि चाक्षुषादिकार्येसहकारित्वनोपपत्तेः । रूपादिज्ञानं किञ्चित्करणकं, जन्यज्ञानत्वात् शब्दज्ञानवत् स्मृतिवच्चेत्यनुमानाच्चक्षुरादीनामेव करणत्वावश्यकतया तेषां इन्द्रियत्वासिद्धेरिति चेत्, तथागमनादि कार्यं सकरणकं कार्यत्वात् छेदनभेदनवादित्यनुमानाच्चेषां [illegible] करणत्वावश्यकतयापीन्द्रियत्वसिद्धेः । यद्यागमनादौ करणत्व सिद्धम् । तथापीन्द्रियत्वं नासिद्ध्यतीतिचेन्न । देहाद्याश्रयत्व सति ज्ञानापकारकत्वस्यैवेन्द्रियत्वात् । अतस्तत्कारणमात्रमत्र तुरीयत्वादुक्तादेशेऽतीन्द्रियमीतिसिद्धम् ।

पादादीविद्यमानेऽपेक्षाबुद्धिमनाद्यभावस्सूक्ष्मदोषविशेषेण प्रतिबन्धात् ।

"इन्द्रियाणि दशैकं च पञ्चवेन्द्रियगोचराः" इति हि शास्त्रम् । एतानीन्द्रियाणि उपलब्ध्य योग्यपरोक्षत्वात्तत्कारणमाणवन्ति । तदुत्क्रान्तौ सर्वे प्राणा अनूत्क्रामन्तीतिजीवनसहोत्क्रमणश्रवणात् तदानीं पञ्चत्वेऽनुपलम्भाच्च । एतच्च विकारगोलकत्वाच्चक्षुश्शकुनादिवच्चित्रपरिणामत्वं, कालभेदेन परिणामभेद सिद्धमात्रात् । अत्रेदं बोध्यम् । तदुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति ।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥

इति श्रुतिस्मृतिभ्यां जीवस्य शरीरान्तरप्राप्तौ

पूर्वशरीरसम्बन्धीन्द्रियाणामेवोत्क्रान्तिकरत्वेनमनुष्यशरीरे जीवस्य मातृजशरीरसम्बन्धिशुक्रशरीरपरिमितत्वेनेन्द्रियादेर्मातृजशरीरव्याप्तिबलात्तेषेन्द्रियाणां परिणामविशेषः स्वीकार्य इति

सर्वेषामेषांस्वाधिष्ठानदोष एव दोषः । तेनान्धस्य शरीरान्तरपरिग्रहेनान्धवत् । सुषुप्त्यादिदशास्ववस्थावशादशरीरेषु कर्मणाप्रतिबन्धाद्वद्यमानानामपीन्द्रियाणां तत्तद्व्यापाराभावः प्रबलादृष्टवशाद्यागि प्रभृतीन्द्रियाणामतिसूक्ष्मव्यवहितविषयत्वम् ।

सजीवपरकाय प्रवेशेऽपजीवस्यमृतपरकाय प्रवेशवत् स्वेन्द्रियैरेवोपकारकत्व नतु परेन्द्रियैः । शरीर यदवाप्नोतीतिस्मृतः । ननुपरकायप्रवेशाभ्युपगमे एकस्यैवशरीरस्यकालभेदेनाभयशरीरत्वस्यावश्यकतयायावत्सत्तमृतनवाप्रविष्टेनवाऽधायेतया उभयापि प्राक्शरीरत्वं न स्यात् एव परकाय प्रवेशदशाया पारत्यक्तस्याशाथलस्य पूर्वावस्थस्यैव सतः कालान्तर पुनः पारिग्रहतस्यापियावत् सत्तंधायेत्वाभावात् तस्यापि शरीरत्व नस्यादितिचेन्न । मृत परकायस्य परकायत्वव्यवहारो गौणः । दग्धपटे पटव्यवहारवत् । प्रविष्टं प्रति कायत्व त्विष्टमव । परकायारम्भकस्थादोषः प्रविशता पुरुषणानीतेभूतसूक्ष्मैश्चतदानी शरीरान्तरारम्भात् ।

एवं मृतपरकायप्रवेशवत् पुनः स्वशरीरप्रवेशेऽपि पूर्वस्मादन्यकाय आरभ्यते । जीवपरकाय प्रवेशेतु परकायत्वं मुख्यं प्रवेशानन्तरमपि पूर्ववत् तत्पुरुषणधार्यत्वात् । अनेक शरीराधिष्ठानशक्तानां तु यथेच्छमनेक शरीराधिष्ठानमन्यतरस्यत्यागे इति नानुपपत्ति. । शरीर विनाश्चचान्द्रियाण्यपि आप्यायकैमात्रया हीयन्त । शरीरान्तर पारिग्रहपुनरपूर्वन्त मुक्तपरित्यक्तानीन्द्रियाणिशलाकाष्ठादिशरीरकेरन्येमनुष्यादिदेहप्राप्तापरिगृह्यन्त । कानिचन्नपरिगृह्यन्त एव । तानिसर्वाण्यप्रळयं तिष्ठन्ति । अत इन्द्रियाणि एकादश सात्विकाहङ्कारजन्यानि आप्रळय स्थितानीतिसिद्धम् ।

अथ तन्मात्रसृष्टिः । तत्तद्भूतानामव्यवहितपूर्वावस्थाविशिष्टं द्रव्यं तन्मात्रम् । दधिरूपेणपरिणममानस्य पयसः मध्यमावस्थावत् भूतरूपेण परिणममानस्यपयसः मध्यमावस्थावत् भूतरूपेण परिणममानस्य द्रव्यस्य ततः पूर्वाकाशादवस्थातन्मात्रम् । तादृशद्रव्य सूक्ष्मशब्दादिविषयावच्छिन्न तन्मात्रमित्युच्यते । तद्भूतद्भूतोपादानम् । विशिष्टत्व च प्रत्यक्षयोग्यत्वम् । अत्रापिप्राकृताप्राकृतविभागः पूर्ववत् । तन्मात्रच शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रगन्धतन्मात्रभेदात् पञ्चविधम् । भूतमपि आकाशवायुतेजोजलपृथिवीभेदात् पञ्चविधम् ।

तत्र तामसाहङ्काराकाशयोमध्यमावस्थाविशिष्टद्रव्यं शब्दतन्मात्रं एवमाविशिष्टशब्दगुणकत्वमाकाशोपादानत्वं च तल्लक्षणम् । एवं स्पर्शतन्मात्रादीनामपितत्तद्भूतद्वयमध्यमावस्थाविशिष्टत्वमाविशिष्टतत्तद्गुणाश्रयत्वं तत्तद्भूतोपादानत्व च लक्षणमूह्यम् । सात्त्विकास्तु पञ्चापि तन्मात्राणि सात्त्विकात्तामसाहङ्कारात्पन्नानि । तत्रशब्दतन्मात्रमाकाशारम्भकम् । शब्दतन्मात्रं

स्पर्शतन्मात्रं च वायव्यारम्भकम् । शब्दद्वयसहितं रूपतन्मात्रं तेज आरम्भकम् । त्रितयसहितं रसतन्मात्रं जलारम्भकम् । चतुर्भिस्सहितं गन्धतन्मात्रं पृथिव्यारम्भकम् । ततश्च तन्मात्रमेव साक्षाद्भूतोपादानम् । न तु भूतान्तरस्य तन्मात्रद्वाराभूतान्तरोपादनत्वमित्याहुः ; तदसत्

आकाशाद्वायुरित्यनन्यथासिद्धोपादानक्रमविशेषाभिधानदर्शनात् ।

भूतादिस्तुविकुर्वाणश्शब्दतन्मात्रकं ततः । ससर्जशब्दतन्मात्रमाकाश शब्दलक्षणम् ॥
आकाशश्चविकुर्वाण स्पर्शमात्रं ससर्जह । बलवान भवद्वायुस्तस्यस्पर्शोगुणोमतः ॥
ततोवायुर्विकुर्वाणो रूपमात्रं ससर्जह । अन्यत्र शब्दतन्मात्रमभवत तच्चाकाशमजीजनत् ॥
स्पर्शमात्रं तथाऽऽकाशात् तस्माद्वायुरजायत । रूपमात्र ततोवायोस्तस्मादग्निरजायत ॥
रसतन्मात्रन्तु जज्ञेऽग्नेस्तस्मादापः प्रजज्ञिरे । गन्धतन्मात्रमद्भ्योऽपिगन्धमात्रात्ततो मही ॥

इत्यादि प्रमाणदर्शनाच्च । तन्मात्राणि भूतादौलीयन्ते । इति श्रुतिस्तु नयौगपद्येन तन्मात्राणां भूतादौ लयपरा । किंतु यथाकथञ्चिल्लय प्रतिपादिकाः । अत एवक्रमविशेषोऽपि तत्रप्रतिपाद्यते । आकाश इन्द्रियेषु इन्द्रियाणितन्मात्रेष्विति । तेषामपि अनभिमतक्रमविशेष प्रतीतेः । अतोन तत्तद्भूतद्वयसंसृष्टमात्रस्याविशिष्ट द्रव्यलक्षणस्यस्पर्शतन्मात्रादिषु अव्याप्तिः शब्दतन्मात्रादाकाशमुत्पद्यते । निस्पर्शत्वे सतिविशिष्टशब्दाधारत्वं श्रोत्रेन्द्रियाप्यायकत्वंचाकाशलक्षणम् । वायवादावतिव्याप्तिवारणाय सत्यन्तम् । न च शब्दाधारत्वाभावादेववायौ नातिव्याप्तिरितिवाच्यम् । शब्दस्याकाशपञ्चभूतवृत्तित्वस्यवक्ष्यमाणत्वात् । प्रकृत्यादावतिव्याप्तिवारणाय विशेष्यम् । शब्दतन्मात्रेऽतिव्याप्तिवारणायविशिष्टेति । अयं चावकाशदानादिना उपकरोतीतिशास्त्रसिद्धम् ।

नन्वाकाशोनित्यः विभुश्चनिरवयवद्रव्यत्वात् । निरवयवद्रव्यत्वे सति महत्वात् सर्वदानिष्पन्दत्वे सति महत्वात् । कालवदित्यनुमानादितिचेन्न । एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणिचेत्युपक्रम्य खंवायुर्ज्योतिरापः पृथिवी । आत्मन आकाशस्संभूतः इत्यादि वाक्यैराकाशानित्यत्वबोधनेन ॥

प्रधानतत्त्वमुद्भूतं महान्तं तत्त्व समावृणोत् । यथा प्रधानेन महान् महतामतथावृतः ॥
इत्यादेना उत्तरोत्तरतत्त्वस्य पूर्वपूर्वतत्त्वार्थत्वबोधनेन च तद्विरुद्धनित्यत्वविभुत्व साधकानुमानानुदयात् ।

किञ्च । इदं नित्यत्वं किमवस्थाशून्यत्वं उतद्रव्यस्य सर्वदा सत्त्वम् । नाद्यः आरम्भक संयोगरूपावस्थात्मपृथिव्यादिपरमाणुत्वाद्रव्येषु निरवयवद्रव्यत्वहेतोरव्याप्तिवाधः । पक्षेच शब्दवत्स्वरूपावस्थास्वीकारेण बाधश्चाघटादिसंयुक्तेकालेद्वितीयतृतीयहेत्वोरव्याप्तिवाधः । गगनस्य घटादिसंयुक्तत्वाद्बाधश्च । घटादिसंयोगानभ्युपगमे कालाकाशयोर्विभुत्वं न स्यात् । सर्वमूर्तद्रव्य संयोगित्वस्यैवविभुत्वात् । न द्वितीयः । सिद्धसाधनात् । आकाशत्वावस्था विशेषित प्रकृतिद्रव्यस्य सर्वदा सत्त्वात् । प्रत्यक्षश्चाभ्राकाशः । दृष्टेःमीलन च क्षुषा नहा-नीलं नभ इतिप्रतीतेः । ननुनभसिनैल्यादिरनीलत्वमप्यारोपितमिचेत्स । अयमारोपः चाक्षुषः अन्योवा । आद्ये अधिष्ठानस्यापिचाक्षुषत्वमेष्टव्यम् अन्यथा ईश्वरादावपि नैल्याद्यारोप प्रसङ्गात् । द्वितीयेनभसम्भवः । निमीलिताक्षस्यनादारोपादृष्टेः । अत एवानुमिते नभसि नैल्यारोप इत्यपि परास्तम् ।

न च नीलं नभ इतिधीरेव नास्तीतिवाच्यम् । विश्वविसंवादप्रसङ्गात् । नाप्य-नाक्षुषः - आगादिनिश्चर्यागानुविधायित्वात् । ननु नभसिवितनानांपार्थिवांशानां कृष्ण रूपाणां चक्षुषा गृहीत इतिचेत्स । नीलंनभ इतिधर्मि पर्यन्तेलेखात् । नीलमिति नपुंस-कलिङ्गेन गुणनिर्देशाच्च । तस्मात्सैकृप एतद्रव्यं इहवनः पत्रीत्यादिचाक्षुषमपिनभसिप्रमाणम् । तद्विशेषितत्वाधारत्व प्रतीतौ । तच्च आलम्बादेरेव न नभसस्तस्याप्रत्यक्षत्वादितिचेत्स । इह वनपादिरेति आलम्बादिसामानाधिकरण्येन इहशब्दार्थप्रतीतेः । न चेहेति आलम्बवत्वानुल्लिख्य आलम्बनेऽवयवानुल्लेखेनेतिवाच्यम् । इहावयवेषणुका इति प्रतीतेः अणुकादीनामभावात् । इहसमवायेऽप्रत्यक्षत्वात् । एवमिहभूमौऽणुकमिह नभसि आतप इति सर्वलोकव्यवहारात् ।

ननु नभो न चक्षुषागृह्यते रूपशून्यद्रव्यत्वादात्मवत् नापित्वचागृह्यते, स्पर्शशून्य द्रव्यत्वात् । पृथिवत् । नापि मनसा, बहिर्द्रव्यत्वात् । नापिघ्राणादिभिः तेषांद्रव्यग्रहणासमर्थत्वात् । अतः नाक्षुषत्वं नभसमिचेत्स । नीलं नभ इत्यमद्दादिप्रत्यक्षविषयत्वस्य समर्थितत्वात् । प्रतियोगश्च-विशेषणस्यमद्दादिबाह्येन्द्रियग्राह्यम् । बाह्यत्वेमस्यमद्दाद्यपरोक्षधीविषयत्वात् । अत्र चेतरसिद्धः परिशेषन्यायात् तत्सिद्धेः ।

तथा हि, न तावदागमिकोनभ इति प्रतीतिः । तदनभिज्ञानामपितत्सम्भवात् । नाप्या नुमानिकी । अनुमानापेक्षेणैववालं नभ इति प्रतीतेः । अतः परिशेषात् प्रत्यक्षिकी गगन प्रतीतिरभ्युपेया । ननुरूपशून्यत्वान्नभसः कथं चाक्षुषत्वमितिचेत् । रूपवत्तोवा कथं चाक्षुषत्व उप नभसिद्धयोग्यतयेतिचेत्तुल्यम् । नचोद्भूतरूपस्यचाक्षुषयोग्यत्वात् तदभावान्नभसः कथं चाक्षुष

स्वमितिवाच्यम् । रूपरूपवत्त्वघटत्वादीनां रूपवत्त्वयोग्यतानिरूपितत्वेऽचाक्षुषत्वप्रसंगात् । यदि तत्र रूपवत्त्वरूपवद्वृत्तित्वरूपसमानाधिकरणत्वादिकमपि चक्षुर्योग्यत्वे त्यक्ष्यते तर्ह्याकाशेऽपि चाक्षुषेऽलम्भान्यथानुपपत्त्याकिञ्चिद्योग्यताकल्पनाप्रसक्तौरूपवन्निमश्रित्वस्वयोग्यत्वकल्पनात् ।

न चेश्वरस्यापि चाक्षुषत्व प्रसङ्ग । रूपवन्निमश्रितत्वस्य वक्तव्यत्वात् । रूपसमानाधिकरणत्वस्य गुरुत्वादौ व्यभिचारेऽपि यथा गुरुत्वस्य न चाक्षुषत्वं तथेश्वरस्यापि चाक्षुषत्वमस्त्वेव । अण्डान्तर्वर्तिनभसः पञ्चीकरणेन रूपवत्त्वसम्भवाच्च । ननु नभस्यपि नैल्याभावात् पञ्चीकरणेऽप्यस्मिन् नैल्यस्य पार्थिवांशमात्रनिष्ठत्वात् तस्मिन्नेवांशेऽसौ चाक्षुषो स्यात् । मैवं । तस्य नभश्शब्दार्थत्वायोगेन नभ इत्युल्लेखायोगप्रसङ्गात् । नील इदमित्येवंपार्थिवांशगतं नैल्यं प्रत्यक्षं तेनैवग्रहणात् । अवेद्यं बोध्यम् । कार्यमविकारभूतः पटः स्वतो न नीलः । अथ च नीलीद्रव्यसम्बन्धात् नीलश्चासौ नीलः पट इति व्यवहियते । सच मुख्यः । नच नीलः पट इति प्रतीतिः भ्रान्तिरिति वाच्यम् । उत्तरकालेन नीलः पट इति बाधदर्शनात् । नीलीद्रव्यघटितसङ्घातस्यैव नीलपटत्वात् । तन्तुसंघतघटकनीलीद्रव्यवृत्तित्वान्नैल्यस्य, तदाश्रयनीलः पट इतिधियो याथार्थ्यं च ।

एवं पृथिव्यादिपञ्चभूतस्यैव नभः पदार्थत्वात् तद्घटकपृथिव्यांनैल्यसत्त्वात् तदाश्रय नील नभ इति प्रतीतेः याथार्थ्यम् । तेन प्रत्यक्षत्वं च नभसः अन्यदीयरूपेण तत्संसृष्टद्रव्यप्रत्यक्षस्य नीलघटसुवर्णबहुव्यादौ दर्शनात् । अयमेव नीलपटन्यायः । न च वायोरपि पञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वं स्यादितिवाच्यम् । तस्य रूपवत्त्वेऽपि उद्भूतरूपवत्त्वाभावात् । उद्भूतत्वस्य फलबलकल्पितत्वात् । अत आकाशं पश्यतीतिप्रतीतिरङ्गुलीनिर्देशपूर्वकाकाशशब्दव्यवहारश्च सङ्गच्छेते ।

नन्वानुमानिकाकाशविषयस्तद्व्यवहारः अनुमानं च शब्दः क्वचिदाश्रितः गुणत्वात् । रूपवदितितेनचेतरेषां बाधादाकाशसिद्धिरितिचेन्न । शब्दस्यभेर्यादिधर्मत्वे तदुत्पादकवायुधर्मत्वे-बाधकाभावेनतदाश्रयत्वेन गगनासिद्धेः । न च शब्दस्य वायुगुणत्वेस्पर्शवत् स्पार्शनप्रत्यक्षं स्यादितिवाच्यम् । एकभूतगुणस्यैव गन्धरसरूपादेर्भिन्नाक्षग्राह्यत्वस्यदृष्टत्वात् । एवंबाधकान्तर-मपिद्रष्टव्यम् । अत आकाशः प्रत्यक्षसिद्धः । अ काश तूपर्शतन्मात्रमुच्यते । ततोवायुः । विशिष्टस्पर्शवत्वे सति उद्भूतरूपशून्यत्व वायोर्लक्षणम् । समष्टिवायोः रूपशून्यत्वाद्व्यष्टिवायोः रूपवत्त्वेऽप्युद्भूतरूपाभावात् प्रत्यक्षस्पर्शाश्रयत्वाच्चलक्षणसमन्वयः ।

समष्टिलक्षणे प्रकृत्यादौ चातिव्याप्तिवारणायविशेषणफलम् । तावन्मात्रोक्तौ वह्निज्वालादावतिव्याप्तिः=अतो विशेषणफलम् । दर्शनस्पर्शनाभ्यामेकार्थग्रहणाभावाद्व्यष्टिवायावव्याप्तिवारणाय उद्भूतेति । तस्य पञ्चीकरणेन रूपवत्त्वेऽप्युद्भूतरूपाभावान्नव्याप्तिः न चैवं ग्रीष्मोष्मणि भर्जनकपाकस्थवह्नौ चातिव्याप्तिरिति वाच्यम् । तयोरप्युद्भूतरूपवत्त्वेनातिव्याप्त्यभावात् । नन्वेवमुद्भूतरूपवत्त्वेचाक्षुषत्वं स्यादिति वाच्यम् । उद्भूतरूपवन्त्वेऽपि पार्श्वस्थतमोरूपपार्थिवरूपस्यामिभवात् । उद्भूतानभिभूतरूपवत्त एव चाक्षुषत्वात् । अथवा समष्टिवायोरेव निरूपणीयत्वान्न तस्य सामान्यतो रूपशून्यत्वान्न विशेषणफले उद्भूतपदं न देयमेव एवमग्रेऽपि दर्शनस्पर्शनेन्द्रियग्राह्यद्रव्यत्वमपि लक्षणम् मुक्तेन्द्रियाणां विषयनिष्ठभावाभावादसंभव वारणायादरादीति । पृथिव्यादावतिव्याप्तिवारणाय एकेति । स्पर्शोऽतिव्याप्तिवारणायद्रव्यत्वम् । सचाय वायुस्पर्शनेन्द्रियेण गृह्यते । त्वगिन्द्रियपवनसंयोगे सति सावधानस्यवातोवातीति प्रत्यक्षेण वायोः क्षित्यादिवदुपलम्भात् ।

यदित्वक्षिन्द्रियवायुसंयोगेतदीयस्पर्शः साक्षात्क्रियते ततस्तेनवायुरनुमीयते इत्युच्येत तर्हि क्षितिसलिलतेजसामपिकथंस्पर्शनग्राह्यत्वं न स्यात् तत्रापिस्पर्शानुमेयत्वस्य वक्तुं शक्यत्वात् । उपलब्धस्य समत्वान्न इष्टमिति चेन्न दर्शनस्पर्शनाभ्यामेकार्थग्रहणाभावे द्रव्यापह्नवप्रसङ्गात् । तथापि नीरूपस्यवायोः कथं प्रत्यक्षत्वमिति चेदात्मानं पश्य । कथंवाह्याक्षग्राह्यत्वमितिचेत् रूपादीक्षि रूपय । रूपशून्यस्यवायोः दर्शनायोग्यत्ववत् स्पार्शनायोग्यत्वमपीतिचेन्न । उद्भूतस्पर्शस्यैव स्पार्शनत्वेनतत्र तन्नत्वात्तत्तदिन्द्रियग्राह्यतायाएव तत्तदिन्द्रियग्राह्यतायांनियामकत्वाभ्युपगमात् । अन्यथात्वक्षिन्द्रियाणेयस्य प्रभायाः चाक्षुषत्वमपि न स्यात् । किञ्चान्येन्द्रियग्राह्यत्व प्रयोजकत्वे घ्राणग्राह्यगन्धशून्यस्यमनग्राह्यसुखशून्यस्य चात्मनः दर्शनस्पर्शनाभ्यां ग्रहण न स्यात् । द्रव्यग्राहकेन्द्रियेष्वेवायं नियम इतिचेन्न । मनोग्राह्यज्ञानशून्यघटादेः दर्शनस्पर्शनाभ्यांग्रहण न स्यात् । द्रव्यग्राहकत्वाद्येन्द्रियेष्वयं नियम इति चेन्न । उपलम्भविरोधेन तादृशनियमासिद्धेः । सिद्धौचद्रव्यग्राहिस्पर्शनग्राह्यगुणविरहिण्याः प्रभायाश्चाक्षुषोपलम्भव्यभिचारस्योक्तत्वाच्च ।

यद्यवहिर्द्रव्यप्रत्यक्षं प्रति उद्भूतरूपस्य स्पर्शस्यचद्वयोर्हेतुत्वेगौरवात् । प्रभायाः प्रत्यक्षत्वाच्चलाघवादुद्भूतरूपस्यैवहेतुत्व वाच्यम् । तद भावाद्वायोरप्रत्यक्षमितिब्रूयात् । तदावयोः प्रत्यक्षत्वात् लाघवादुद्भूतस्पर्शस्यैव बहिर्द्रव्यप्रत्यक्षत्वमङ्गी कृत्य प्रभाया अप्रत्यक्षत्वे इष्टापत्तिरितिधार्ष्ट्येन प्रतिब्रूयात् । अतो यथोपलम्भ वायोः स्पार्शनग्राह्यत्वमावश्यकम् । तस्य च वायोः स्वभावाद्वा ऽदृष्टात्मकेश्वरसङ्कल्पाद्वा स्वाभाविकं तिर्यग्गमनम् । पार्थिवादिद्रव्येणवाऽन्तरेण वाऽभिघातवशात् ।

भ्रमणोर्ध्वगमनादयः जायन्ते । तेन च दूरस्थितेनतृणादीनां भ्रमणोर्ध्वगमनादिभिरनुमीयन्ते तत्तन्येन तु स्पर्शनेनगृह्यन्ते । एतेनवायोर्नानात्वमपि सिद्धम् ।

अस्य सर्वतः पार्थिवजलाद्युपरोधे सति तत्तन्मात्रैः । अस्मिंश्चजलिलातपङ्कुमादि सम्बन्धात् शीतोष्णसौरभप्रतीतिः । अथैतत्त्वागन्द्रियाध्यायेन प्राणशरीरविषयात्मनाचापक्रान्ति तत्र शरीरधारणादिहेतुः वायुर्विशेषः प्राणः । स एक एव व्यापारभेदात् पञ्चधा दशधा चोच्यते ।

प्राणापानव्यानोदानसमानभेदात् पञ्चधा । नागकूर्मकृकरदेवदत्तधनञ्जयाख्यो दशधा ॥

प्राणोऽपानस्समानश्च उदानाख्यान एव च । नागश्चकूर्मः कृकरो देवदत्तो धनञ्जयः ॥

चरन्ति दशनाडीषु दशप्राणादयोऽथवा । तुन्दस्थजलनं च रसादिच समाकृतम् ॥

इत्युपक्रम्य, उद्गरादिक्रियानागः कूर्मोऽक्ष्यादेर्निमालनम् ।
कृकरश्क्षुधः, कृता दत्तोजृम्भादिकमकृत् ॥

इत्यादिप्रमाणानि पत्रानुसन्धेयानि । अस्य शरीरेन्द्रियादिधारकत्वं यस्मिन्नुत्क्रान्ते इदंशरीरं पांसुशरीरमिवोदस्यत इत्यादिश्रुतिसिद्धम् । एवंजङ्गमशरीरवत् स्थावरशरीरेष्वपि प्राणोऽस्त्येव । मूलानापक्तसलिलादग्रहणात् । जलसङ्कामावेविशीर्णत्वाच्च । अथापि पञ्चधावस्थानं पर तेषुनास्ति । शिलाकाष्ठशुष्कादिशरीरेषु प्राणसम्बन्धो नास्ति । सत्यवायुर्द्विविधः । शरीरनियमभेदात् । एवं तेजोजलपृथिवीशरीरभेदेनापि द्रष्टव्यः । वायुशरीरे तु वायुप्रकृतीनां विषयशब्दस्पर्शरूपरसगन्धवत्त्वादिः । वायोरुत्तन्मात्रम् ततस्तेज उत्तमम् । वायोरग्नेरित्यत्राग्निशब्दः तेजोमात्रपरः ।

नन्वग्निरितिविशेषश्रुतस्याग्निशब्दस्य कथं तेजस्तन्मात्रत्वमितिचेन्न । छान्दोग्येता अग्नमसृजन्तेत्यत्र श्रुतस्याग्निशब्दस्याविकारत्वपरत्वोक्त्यन्यायेन पृथिवीमात्रत्ववत् आकाशाद्वायुः । वायोरग्निः । अग्नेरप इति भूताविकारादग्निशब्दस्यापितेजोरूपभूतपरत्वात् । छान्दोग्ये तत्तेज ऐक्षत बहुस्या प्रजायेयेति तदपोसृजतेति तेजोमात्रस्यैव जलप्रकृतित्वावदनात् । वैत्तरीयके अपां प्रकृतौ प्रयुज्यमानस्याग्निशब्दस्य छान्दोग्यगततेजश्शब्दसमानार्थकत्वस्यस्वीकर्तुमुचितत्वाच्च । ननुतृणकाष्ठादीनामवमस्मधूनध्वनादिरूपेण परिणामदर्शनात् तृणादीनां च पार्थिवत्वाच्छतेः प्रत्यक्षविरुद्धार्थप्रतिपादनासम्भवात् । वायोरग्नेरित्यत्राग्नवायूपादानकत्व विवक्षाऽनुपपन्ना ।

नच पर्णादिपंयुक्तैरदृष्टोपनीतैस्सूक्ष्मैस्तेजोवन्वैर्ज्वालारम्भ इति वाच्यम्। तथा कल्पनस्य गुरुत्वात्। नचैवं चत्वारम्भावम्भव एव कल्पकमिति वाच्यम्। भस्मधूमांगारादिष्वेव चत्वारंभकस्य दृष्टत्वात्। नचोष्णस्पर्शाग्रहतेन पार्थिवांशेनोष्णस्पर्शवद्द्रव्यस्यैवोत्पत्तेः कथमिति वाच्यम्। पार्थिवाम्बुशालभास्पृक्षवत् पर्णाद्यारब्धतेजसोऽपि विलक्षणस्पर्शोत्पत्तेर्बाधकाभावात्। अतस्सलिलस्य सहकारिभेदात् फेनतद्बुद्बुदवत् पृथिव्या एवांशतोहुतवहादिपरिणाम इतिसिद्धे वायोरग्निरिति श्रुतिर्निमित्तकारणत्वमात्र परातिचेन्नैवम्। वायोरिति पञ्चम्या हेतुमात्राधारण्येऽप्यात्मन आकाशस्यभूत आकाशाद्वायुः वायोरग्निरित्युपादान प्रायपाठानुगृहीता वायोरग्निरिति श्रुतरनन्यथा सद्वत्वादुपादानतरा लभ्यप्रकरणे पृथिव्यप्सु प्रलीयते आपस्तेजसिलीयन्ते। तेजोवायौलीयत इतिलयप्रक्रमप्रतिपादनेन च निमित्तकारणेलयासम्भवाच्च, तादृशश्रुतेरुपादान परत्वमेवेति निश्चीयते।

पर्णतृणादीनामपि पाञ्चभौतिकत्वस्य वक्ष्यमाणत्वात्। तदन्तर्गततेजो भागैस्तेजस उत्पत्तेरिष्टत्वात्। ज्वालानिर्वापणानन्तरं सत्तामेव तदवयवानां अनुपलम्भात्तदुत्पत्तेः पूर्वमपिसतां तदवयवनामनुपलम्भे यावत्कमपेक्षेण कल्पनागौरवानवकाशात्। एवमग्निबन्धनबडवानलेऽप्यप्संसृष्टतेजोवयवैरेतेजस उत्पत्तेः अन्यथाऽनियतोपादानकत्वप्रसङ्गात्। स्मरन्ति च महर्षयः।

दारुण्यग्निर्यथा तैले तिलेतद्वत्सदौ पुमान्। इत्यतस्तमग्निसृष्टावुपादान भूताद्वायोरेवाग्नेरुत्पत्तिरुपपन्ना। व्यष्टौ तु सूक्ष्मतेजसः स्थूलतेजस उत्पत्तिरिति सर्वमुपपन्नम्। उष्णस्पर्शवद्द्रव्यस्वरूपत्वादिकं तेजसालक्षणम्। तच्चक्षुरादिग्राह्यकं तेजोमयीवाक्। आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्। रश्मिमारणाऽस्मिन् प्रतिष्ठित इत्यादि श्रुतैश्वानराद्यात्मना च तदुक्तेः। वैश्वानरश्च शरीरान्तर्वर्त्तिः पीतभुक्तसंपाकादि हेतुस्तेजा विशेषः। तेजः प्रचुरदेशे तेजश्शरीरं प्रसिद्धम्। चान्द्रकादहुतवहादिर्विषयः विशेषः। हुतवहस्य ज्वालात्मकस्य दारुनाशेन नाशदर्शनात्।

दीपस्यापितथात्वेन पुष्पलकारणक्रमसन्निपाते एकदानेकदीपादर्शनादास्तुविनाशित्व रूपक्षणिकत्वं तस्य स्वाभाविकम्। सा य दीप इति प्रत्यभिज्ञा तु निष्क्रान्तप्रविष्टस्य निष्क्रमणदशा निर्वापितारोपितदोषादेवान्यथासिद्धा सती न स्थैर्यसाधिका। अबाधितानन्यथासिद्धाया एव प्रत्यभिज्ञायाः विषयसाधकत्वात्। तेजः पुनरुद्भूतान्यतो द्विविधम्। प्रभाप्रभावच्चेति। तत्रावरणसङ्कोचाधीन सङ्कोचविकासवान् वेगवत्त्वाद्यनुगुणस्वाश्रयाधिक देश प्रसर्पितेजो

विशेषः प्रभा । सा च प्रभावता सहोत्पद्यते । तदपृथक्सिद्धविशेषणा च । अन्वयव्यतिरेकाभ्यां तयैवोपलम्भात् ।

न च प्रभा प्रभावतो रूपादिवद्गुणः, रूपवत्त्वयोपलम्भात् । स्वाश्रयादन्यत्र वृत्तित्वात् । संयोगित्वाच्च द्रव्यमेव । द्रव्यान्तर प्रकाशहेतु भूत भास्वररूपवत्त्वात्तेजः । औष्ण्यं च प्रदेश भेदेन प्रतीयते । तस्याः गुणत्वव्यवहारः, नित्यद्रव्याश्रितत्वतच्छेषनिबन्धनः । अस्याश्चमूलाग्रयार्धनत्वविरळत्वादयो यथादर्शनं ग्राह्याः । अतस्तेजो द्रव्यमेव प्रभाप्रभावाद् पृथक्सिद्धविशेषणत्वेनावतिष्ठत इति सिद्धम् । न च विशीर्णस्यावयवा एव प्रभा, अतिरिक्त द्रव्यमिति वाच्यम् । ऊर्ध्वगमनस्वभावानां तेजसां वाताद्यभिघातादर्शनं युक्तमूर्ध्वगमनादेकरूपस्य गुरुत्वात् । प्रक्षयास्तूपयोपलम्भं तथाभ्युपगमात् ।

किञ्चास्थिरतरेषु प्रभावत्सु मणिद्युमणि प्रभृतिषु अवयवानां विश्लेषाभ्युपगमे तेषामप्रसङ्गः । न चेष्टापत्तिः । सोऽयंमणिरिति प्रत्यभिज्ञाया विरोधप्रसङ्गात् । सोऽयं दीप इति वत् सोऽयं मणिरिति प्रत्यभिज्ञाभ्रान्तिरितिवाच्यम् । मण्यादेर्विश्लेषसिद्धे प्रत्यभिज्ञाया भ्रान्तित्व सिद्धिः भ्रान्तित्वसिद्धौ विश्लेषसिद्धिरित्यन्योन्याश्रयणात् । दीपादेस्तूज्वालात्मकावयवद्रव्यादेर्दाह्य नाशे नाशनियमात् । वर्तिकाद्यवयवनाशेन प्रत्यक्षसिद्धेन ज्वाला भेदानुमाने सत्यविनष्टावयवापेतदोषादविनष्टोऽयं दीप इति प्रत्यभिज्ञायास्तादृश्यनिबन्धनत्वेन ऐक्यसाधकत्वाभावेन भ्रान्तित्वं सम्भवतीति वैषम्यात् ।

न च विशीर्णगन्धा श्रयचम्पकादिकुसुमवदम्बुतो विशीर्णेऽपिमण्यादौ भ्रमात्मकं प्रत्यभिज्ञानमिति वाच्यम् । अन्योन्याश्रयात् भ्रान्तित्वं न सम्भवतीत्युक्तत्वात् । न चैवं चम्पक कुसुमादौ । तत्र गन्धवद्द्रव्यनाशहेतुसाध्यकुसुमत्वानुसारेण गन्धोपलम्भादन्यत्रानुपलम्भात् चम्पक कुसुमनाशानन्तरमपि तदेशगन्धोपलम्भाच्च विशीर्णगन्धावयवावश्यकत्वेनान्योन्याश्रयाभावात् । एव ग्रीष्मनिशादावौष्ण्योपलम्भे तेजस्त्वापरिशीर्णतेजोवयवनिष्ठत्वेन तेषां प्रभावत्वप्रसङ्गश्च । अतो विशीर्णतेजोवयवातिरिक्तस्तेजोवशेष एव प्रभेतिसिद्धम् । तद्विशिष्टतेजः प्रभावत् ।

तत् द्युमणिदीपादि भेदेनबहुविधम् सामग्रीविशेषाधीनस्वभावभेदात् तेजस्त्वशोकहर्षादिजनकत्वमनुभूयतेहि । ग्रीष्मकालकमलाह्लादकसहस्रांशुहेतुत्वम् । शरदाकाचन्द्रमसः हर्षहेतुत्वं च । ऊर्ध्वज्वलनमपितत एवस्वभावाद्ब्रह्मादेरुत्पत्तिमात्रादेव रोहितमास्वरैकरूपस्वभावस्यापि सलिलादि संसर्गभेदात् वर्णवैचित्र्योपलम्भः । एतच्चयदग्नेरोहितं रूपमित्यादि श्रुतिसिद्धम् ।

वैशेषिकोक्तशुक्लत्व साधकान्वयव्यतिरेकौ श्रुतिविरोधादन्यथासिद्धौ। मध्याह्न मार्तण्डमण्डलश्वेत्योपलम्भस्यापि मण्डलावष्टब्धानुद्भूतस्पर्शोद्भूतरूपसलिलांशनिबन्धनत्वोपपत्तेः। गुणानामुद्भावानुद्भावयोः फलबलकल्प्यत्वात्। अत्रायं सग्रहः।

दाह्यनाशविनाशित्वादीपेष्वाशुविनाशिता। कुसुमावयवानां च शैथिल्यात्कुसुमेष्वपि॥
दाह्यनाशविनाशित्वविशीर्णावयवत्वयोः। अभावात्स्थिरताभीष्टामणिद्युमणितेजसोः॥
दीपादिप्रत्यभिज्ञातः भ्रान्तिरूपेतिगीयते। सादृश्यालम्बिनीनैवविषयैक्यस्यसाधिका॥
मण्यादिप्रत्यभिज्ञातु विषयैक्यस्यसाधिका। अन्यथासिद्धिराहित्यादबाधाच्च प्रमात्वतः॥
प्रत्यभिज्ञायथार्थत्वसिद्धौशैथिल्यकल्पना। मणेश्शैथिल्यकल्पौतु तदभिज्ञायथार्थता॥
अन्योन्या श्रयदोषाच्च भ्रान्तित्वं तुन सम्भवि। अतोऽस्थिरं स्थिरंचेति द्विविधं तेज इष्यते॥

यत्तु सुवर्णंरजतादेस्तेजस्त्वमाहुः वैशेषिकाः तन्न तेषां गुरुत्वेनापार्थिवत्वात् तथाहि, हेमादि पार्थिवम्। जलाभिन्नत्वे सति पार्थिवरूपसजातीयरूपवत्वात्। अभ्रकादिवत्। जलव्यभिचारवारणाय जलाभिन्नत्व सतीतिविशेषणम्। तावन्मात्रकौ तेजासव्यभिचारः। अतोविशेष्यम्। तेजसः भास्वररूपवत्वेन पार्थिवरूप सजातीयरूपवत्वाभावात्। अभ्रकन्तु सुवर्णसजातीयवर्णकम्। शुक्तिरजतसमानवर्णा। अतस्तादृश्यादभ्रकस्वर्णोरापः। शुक्तिरजतारापः एवं हेमादिपार्थिव काठिन्यवत्वात् शिलादिवत्। नचकाठिन्यं करकादौव्यभिचारितामात्रवाच्यम्। स्वाभाविककाठिन्यस्यहेतुत्वेन करकादौ तदभावात्। विलीन तास्मिन् काठिन्याभावात्।

एवं सुवर्णं पार्थिवं, विलक्षण गुरुत्वाश्रयत्वात्। शिलावत्। न च जलेऽपि गुरुत्वसत्वाद्व्यभिचार इति वाच्यम्। विलक्षणगुरुत्वस्यजलेऽभावात्। जलगुरुत्वं तत्समान परिमाण जलान्तरवृत्ति गुरुत्वात् न्यूनाधिक भावावरहितम्। पृथ्वीगुरुत्वं तु तत्समानपरिमाण पृथ्वीगुरुत्वन्यूनाधिकभावरूपतारतम्यवत्। इदमेव गुरुत्वानष्ठ वैलक्षण्यम् अतो न व्यभिचारः। किञ्च सुवर्णादस्तेजस्तसृष्टत्वं साध्यते। उततेजस्त्वम्। आद्ये पञ्चीकरणेन सर्व स्यापितेजससंसृष्टत्वेन सिद्धसाधनात्। द्वितीये बाधः। गुरुत्वपीतमादानां तेजस्त्वाभाव व्याप्यत्वेन तस्या तदभावानिश्चयात्। पञ्चीकरणेन तेजस्संसृष्टत्वेऽपि अभ्रकशुक्त्यादिवत् पार्थिवांशः प्रभूत इतिनिश्चीयते। अन्यथानिष्के तु सत्यवचनं वाच्यम्। नापह्नवः कार्यः। आधिक्यदोषादित्यादिधर्मशास्त्रव्यवहारोऽसङ्गतस्यात्। तेजसो गुरुत्वाभावेन निष्कनिर्वचनानुपपत्तेः।

ननु सुवर्णस्य पार्थिवत्वे आयसात् तैजसं शस्तम्। तैजसं शोधकैश्शुद्धम्। भुञ्जीत तैजसेपात्रे, तैजसं न यतेर्ग्राह्यम्। नयतिस्तैजसेपात्रे इत्यादि विधिनिषेध शास्त्रे तैजसशब्देन सुवर्ण पात्राद्यभिधानं कथमितिचेन्न। तेजस्समानवर्णविशेषस्वतश्शुद्धत्वाभ्यां तथाप्रयोगस्य भाक्तत्वात्। अन्यथा सर्वात्मना तैजसत्वे प्रमादादि वनिष्कादि व्यवहार प्रयोजकगुरुत्वाभावेन निष्के तु सत्यवचनं वाच्यम्। माषमात्रप्रभृतिनिष्कपर्यन्त परिमाणस्वर्णचौर्ये प्रायश्चित्त भेदविधायक शास्त्रं च दत्तजलाञ्जलिस्यात् ननु। सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामत्यन्तानल संयोगेलुप्तद्रवत्वं दृष्टम्। न तथासुवर्णादौ। अतस्तेषामलुप्तद्रवत्वादपार्थिवत्वमितिचेन्न। तोयान्यस्यदुस्साधत्वात्।

यदितोयस्यापि लुप्तद्रवत्वमत्यन्तानलसंयोगे द्रवत्वनाशादित्युच्येत, तर्हिसुवर्णमस्माभिर्दृष्टत्वात् सुवर्णरूपनाशेनतस्यापि लुप्तद्रवत्वादलुप्तद्रवत्वं तस्मिन्नप्यसिद्धमितितल्यम्। द्रवत्वविशेषेण तेजस्त्वसाधने तत्र न कश्चिद्दृष्टान्तः। पाकजद्रवत्वेन पार्थिवत्वसाधने तु सर्पिर्जत्वाद्यस्माकं दृष्टान्तः। किंच त्वदुक्तरीत्यासुवर्णस्यानुच्छिद्यमान द्रवत्वाभ्युपगमेऽपिनस्य तेजस्त्वसाधकत्व न संभवति। पीतिमगुरुत्वाश्रयसंप्रतिपन्न पार्थिवभागेऽपितत्सत्वेनव्यभिचारात्। तदानीं पीतिमगुरुत्वाश्रये तादृशद्रवत्व नभ्युपगमे तत्रकाठिन्यानुवृत्तिप्रसङ्गात्। तथाचालुप्तद्रवत्वस्यविपक्षे पार्थिवांशे पक्षेतेजसि च वृत्त्या विरुद्धत्वम्।

अत्रेदं बोध्यम्। स्यन्दमानजलवृत्तिचूर्णसंहतिवत् पीतिम गुरुत्वा श्रयपार्थिवांशेऽलुप्त द्रवत्वानधिकरणत्वं न निश्चेतुं शक्यते। चूर्णसंहतेः पृथग्वस्थाने द्रवत्वा भावस्य प्रत्यक्षसिद्धत्वात्। पीतिमगुरुत्वाश्रयस्य तु पृथग्वस्थानाभावात् द्रवत्वाभावानिश्चयेन दुस्सुवर्णे तादृशांशस्यापिद्रव त्वप्रत्यक्षात् पीतिमाश्रय पार्थिवांशेऽपि तादृशद्रवत्वं स्वीकर्तव्यमेव। अतस्तेनतेजस्त्वसाधनमनुप पन्नमेवेति। नचैवमपि पृथिवीत्वेन संप्रतिपन्नाजवसादिव्यावृत्तद्रवत्वाधिकरणत्वात् सुवर्णस्य पृथिवीभेदस्साध्यत इतिवाच्यम्। पीतिमगुरुत्वादिभिः पृथिवीत्वे सिद्धे विलक्षणद्रवत्वस्यदर्शनानु गुण्यात् पृथिवीत्वेन संप्रतिपन्नदुरालभायांकण्डूतिजनकविलक्षणस्पर्शवत् तत्स्वीकारेबाधकाभावात्। तथा तेजस्त्वेन संप्रतिपन्नदीपादिविलक्षणानुच्छिद्यमान द्रवत्वाधिकरणत्वात्। तेजो भेदस्यापि सुवर्णेसाधने परिहाराभावाच्च। अतो यथादर्शनं नैमित्तिकद्रवत्वगुरुत्वाश्रयहेमादिपार्थिवमेवेति सिद्धम्। एतत्सर्वमभिप्रेत्याचार्यैरनुगृहीतम्।

अवान्तरविशेषाच्च नातज्जातीयता भवेत्। अतिप्रसङ्गसाम्राज्यादशेषापह्नवेन वा॥

न च हेमादि शब्दानां युक्तं दृष्टप्रमाणतः। आलोक्यव्यवहारार्हं कुत्रचिद्वृत्तिकल्पनम्॥

इतिदृष्ट प्रमाणत इतिव्यक्तीपे पञ्चमी। दृष्टप्रमाणं प्रत्यक्षप्रमाणं परित्यज्य लौकिकव्य वहारानर्हकुत्रचिद्वस्तुनि शक्तिकल्पनमयुक्तमित्यर्थः। अथतेजसोरसतन्मात्रम्। तत आपश्शोत स्पर्शवत्वं निर्गन्धत्वेसति विशिष्टरसवत्वमित्यादि तल्लक्षणम्। आसांशुक्लमधुरशीतस्पर्शगुणाः स्वाभाविकाः। नीलतिक्तोष्णादिगुणाः पृथिवीतेजस्संसर्गादारोपिताः। तद्गुणव्यवस्थाश्चाद्रव्ये समर्थयिष्यन्ते। स्वाभाविकपानां द्रवत्वं आप्येष्वपि कारकादिषूष्मवशात् काठिन्यम्। प्राण रसनाव्यायनेनोपकुर्वते। शरीरत्वमासामप्रभुत्वेषुरुषलोकवृत्तिशरीरेषु प्रसिद्धम्। विषयत्वं सरित्समुद्रेषु। अद्भ्यो गन्धतन्मात्रम्। ततः पृथिवी। विशिष्टगन्धवत्त्व रसवत्त्वे सति विशिष्टा नुष्णा शीतस्पर्शवत्त्वमित्यादि तल्लक्षणम्। साप्रथमं सुरभिमधु कृष्णानुष्णाशीतस्पर्शाजाता। अस्याश्चतेजस्सलिलसम्बन्धादौपाधिक एवौष्ण्यशैत्योपलम्भः। कारण्यं स्वाभाविकमिति श्रुति सिद्धम्।

पाकभेदात्तु विचित्रवर्णता। सुरभिस्वभावत्वमपि औत्सर्गिकन्याय सिद्धम्। कारणस्य पद्मसोमाधुर्यानुविधानं च बाधकाभावे ग्राह्यम्। तस्याः काठिन्येऽपि सलिलान्वयेनात् क्वचित् द्रवत्वोपलम्भः। अन्नेघ्राणव्यायनेन तस्या उपकारः। शरीरत्वमस्याः मनुष्यतिर्यक्स्थावरादिषु व्यक्तम्। विषयत्वं मृत्पाषाणादिषु। यद्यपिविषयादिरूपेणनिर्दिष्टानां सर्वेषामपि तत्तज्जीवशरीर तया ईश्वराशरीरत्वाच्चायं विभागोऽनुपपन्न। तथापिलोकव्यवहारापेक्षयाविभज्यनिरूपितम्।

तमोरूपं पार्थिवं च नीलंतमश्चलतीति अबाधितनीलादि प्रतीतिविषयत्वान्नीलघटवत्। तन्नविद्यमाने आलोके उत्पद्यमानायाः नीलादिप्रतीतेरबाधितत्वं न संभवति। नीलादि ग्रहेत्वालोकसंयोगाभावात्। तथाचालोकविरहदशोत्पन्नाया नीलं तम इति प्रतीतै बाधितत्वेन विषयबाधकत्वाभावात् तमसो द्रव्यत्वं न सिद्ध्यतीतिचेन्न। आलोकमन्तरेण जायमानानां तैजोविषयकप्रतीनौ बाधितत्वाभावेनव्यभिचारात् तेजो विषयकचाक्षुषाति-रिक्तत्वे सत्यालोकमन्तरेणदृश्यानां जायमानचाक्षुषत्वं बाधितत्वव्यभिमितिचेत्, तथ पि तेजोऽभावस्यालोकमन्तरेणदृश्यमानचाक्षुषे आलोकाभावेऽपि जायमानेऽब धितत्वस्वीकारात् व्यभि-चारो दुर्वारः।

यद्यालोकाभावेऽपि तमश्चाक्षुषजननात् तमसश्चक्षुर्योग्यतासिद्ध्यर्थमविरोधार्थं च तत्प्रत्यक्षेऽप्यालोकस्य न हेतुत्वम्। योग्यता च द्विविधा। स्वरूपयोग्यता सहकारियोग्यता चेति। स्वरूपयोग्यत्वं च कारणतावच्छेदकावच्छिन्नत्वम्। सहकारियोग्यत्वं इतरसामग्रीसकल्यम्। तच्चालोकाभावरूपस्य तमसः योग्यतासिद्ध्यर्थमितरसामग्रीसाकल्यं वक्तव्यम्। ततश्च यदि

तन्प्रत्यक्षे आलोकोऽपि सामग्र्यन्तर्गतस्यात् तदाऽऽलोकाभावस्य कदापि तत्समवधानासंभवात् चाक्षुषत्वयोग्यता हीयेत । प्रत्युतविरोधात् विषयधर्म्यभावस्यात् । अतस्तदभयं माभूदित्यालोकस्यान्धकार विषयकचाक्षुषेण हेतुत्वमभ्युपगमनीयमित्युच्येत । तथैव नीलत्व चलत्वद्रव्यत्वाभावत्वाद्याकारेणोपलभ्यमानतमसोऽप्यतासिद्ध्यर्थं अविरोधार्थं च भावत्वरूपतमसः प्रत्यक्षेऽप्यालोकस्य न हेतुत्वमित्यालोकाभावे जायमानायानीलतम इत्यादिप्रतीतेर्बाधितत्वेन द्रव्यत्वसाधनसंभवात् ।

न च नीलघटादिचाक्षुषे आलोकमापेक्षत्व दर्शनात् अन्यत्रापि तदपेक्षत्वं स्यादिति-वाच्यम् । स्वेदादिशैत्यग्रहेवायुसापेक्षस्वकर्णेन्द्रियस्यौष्ण्यग्रहे तदभावमापेक्षत्वदर्शनात् । ननुतथाऽपितमसः द्रव्यत्वेऽपि पार्थिवत्वं कुतस्सिद्धमितिचेन्न । नीलरूपत्वेन पार्थिवत्वसिद्धेः । तेजः पर्यन्तानां रूपशून्यत्वेन तेजसोभास्वररूपत्वात् । जलस्य शुक्लरूपवत्वाच्च परिशेषन्यायेन पार्थिवत्वसिद्धेः । यत् कृष्णं तदन्नस्येति श्रुत्यापृथिव्या एव नीलरूपवत्त्वबोधनात् । न च नील घटादिपृथिवीत आलोकापसार्यत्व लोकासहकृतचक्षुर्ग्राह्यत्वादिवैलक्षण्यात्तमसोनपार्थिवमिति वाच्यम् । अवान्तरविशेषस्यातज्जातीयत्वनियामकत्वात् अन्यथानुष्णाशीत पृथिवीतो विलक्षणस्य दुग्धमौषधिविशेषस्यकण्डूति जनकविलक्षणस्वभावतः पार्थिवत्वं न स्यादिति उक्तत्वात् । अतः पार्थिवत्वं सिद्धम् । नच तमसः स्वतन्त्रद्रव्यत्वे आलोकगत्यागत्यनुविधानं कथमिति-वाच्यम् । पृथग्द्रव्यस्यायसः अयस्कान्तगत्यागत्यनुविधानवत् तमसेऽपितदुपपत्तेः तत्तद्वस्तुस्व भावानां युक्तिबाध्यत्वायोगात् । अन्यथवायुतेजः प्रभृतीनांतिर्यग्गमनोर्ध्वज्वलनादिभङ्ग प्रसङ्गात् । नचैवमपि पार्थिवत्वरूपवत्त्वयोः स्पर्शव्याप्यत्वेन तमसि स्पर्शाभावेन पार्थिवत्वरूप-वत्त्वयोरभावसिद्ध इति वाच्यम् । दीपप्रभाग्रहणानुद्भूतस्पर्शाङ्गीकारात् प्रभाया अपिनि स्पर्शवत्त्वमितिचेन्न । तेजस्त्वस्यौष्ण्यव्याप्यत्वेन प्रभाया औष्ण्याभावेन तेजस्त्वाभाव प्रसङ्गात् । अतस्तत्रानुद्भूतस्पर्शवत्त्वमेष्टव्यम् । तद्वत्तमस्यपीति । ननुतमोन रूपिद्रव्यमालोकासहकृतचक्षु र्ग्राह्यत्वात् आलोकाभाववदित्यनुमानेन तमसो द्रव्यत्वाभावसिद्धिरितिचेन्न । आलोके द्रव्ये हेतोस्सत्वेनव्यभिचारात् ।

आलोकभिन्नत्वे सतीति विशेषणेऽपि साञ्जनचक्षुर्ग्राह्यघटादिष्वव्यभिचारः । आलोका सहकृतसाञ्जन चक्षुर्भिन्नचक्षुर्ग्राह्यत्वविवक्षणेऽपि तादृशयोगिचक्षुर्ग्राह्यघटादौव्यभिचारतादवस्थ्यात् योगिचक्षुर्भिन्नत्वस्यापि विशेषणे तादृशदिवान्धचक्षुर्ग्राह्यघटादौव्यभिचार द्रष्टव्यम् । सर्वेष्वभि चारस्थलभिन्नत्वविशेषणे आविष्कृतं तर्ककौशलम् । श्रुतिस्मृतयश्च तेजस इवतमसोऽपि सृष्टि-प्रकरणे सृष्टि, लयप्रकरणेलयं, शरीरत्वप्रतिपादकप्रकरणे शरीरत्वं च प्रतिपादयन्ति । तमस्यसर्ज-

भगवान । अक्षरंतमसिलीयते । यस्यतमश्शरीरमित्याद्याः । नाहो न रात्रिर्नन्भो न भूमिर्नासीत्तमोज्योतिःभृकचान्यदिति प्रळयकालेतेजस्तमश्चनिषेध उक्तः । सच तमस्तेजोभाव रूपत्वे न घटते । भावाभावविरोधवत् ।

भावाभावनिषेधस्यापिव्याहतत्वात् तमस्तेजोभावरूपत्वमनुपपन्नम् । आरोपितनील-रूप तम इति पक्षस्तुनिरधिष्ठान भ्रमाभावप्रसङ्गः । आलोकभावरूपं तम इति पक्षस्तुनील तमश्चलतीति प्रत्यक्षविरोधादुपेक्ष्यः । अस्मिन् पक्षेबाधकान्तरं च तथाहि, आलोकाभावरूपतमसि नैलाद्यारोप्यस्य नैयत्य न संभवनिकालदेशभेदेनपुरुषदोषाणां विचित्रत्वात् । तथाच, शौक्ल्याद्यारोपोऽपिकदाचित् स्यात् । न तथारोप्यते ।

नन्वालोकोहि भास्वरः तद्विरोधीच तदभावः । कृष्णं च भास्वरान्यत्वम् । तथा चालोकविरोधित्वप्रकाशरूपत्वाभ्यांतमसिकृष्णाध्यासः इति चेत् । एवमपि रक्तपीतादीनामपि तदात्वाविशेषात् तत्रतत्रतदारोपाः किंनस्युः । अतो न नैयत्यम् । न चारोपे सतिनिमित्तानुसरणम्, न तु निमित्तमस्तीत्यारोप इति न सर्वारोप प्रसङ्गइति वाच्यम् । आरोपे सतीत्यसिद्धेः । बाधान्यथानुपपत्त्यवगतं । अतिप्रसक्तस्यनिमित्तत्वानुसरणयोगाच्च । यथा रज्जौ सर्पाध्यासः तथाकदाचित्रबुधारादध्यासोऽपिकिं न भवेत् । सामग्रीसत्वेकदाचिदपि कार्यानुत्पत्ति वचनं लोकविरुद्धम् । युक्तिरहितं च । अदृष्टादिक तत्रनियामकमितिचेत् । विचित्रादृष्टभेद विषमिते जगतिसर्वजन्तुसाधारणस्यालोकतावन्मात्रभ्रमहेतोरदृष्टविशेषस्यकल्पकाभावात् । अत स्तमोद्रव्य पार्थिवं चेतिसिद्धम् । त्रिगुणानन्तरं कालोनिरूप्यते ।

अत्रवैशेषिकाः । अनियतदिग्वस्थितयोर्युवस्थविरपिण्डयोः अयमस्मात्स्वल्पतरकालसम्बन्धी अयमस्मात् प्रचुरकालसम्बन्धी इत्यपेक्षाबुद्धिसहकृतेनकालपिण्डसम्बन्धेनयुन्यपरत्वंस्थविरे च परत्वमुत्पद्यते । तत्र च भूयोऽल्पकालसम्बन्धोनाम भूयोऽल्पतपनपरिस्पन्दक्रियासम्बन्ध एव । कालाल्पभूयस्त्वयोरनुमानाल्पत्व भूयस्त्वरूपत्वात् । ततश्चतपनस्पन्दक्रियाया युवस्थविरपिण्डयोर्न साक्षात् सम्बन्धस्सम्भवति । अन्यदीयक्रियाया अन्यस्यासाक्षात्सम्बन्धाभावात् । नापि संयुक्त समवायः । विप्रकृष्टतयातेनपिण्डस्य संयोगस्याप्यभावात् । अतस्तपनसंयुक्तद्रव्यसंयुक्तत्वमेव पिण्डस्य सम्बन्ध इति वक्तव्यम् ।

तत्रच तपनपिण्डसंयुक्तमेकद्रव्यं सम्बन्धघटकमभ्युपेयम् । नच पृथिव्यादिकं तादृशं तस्येभयसंयुक्तत्वाभावात् । न च दिगेवोभय युक्तासम्बन्धनियामिकेतिवाच्यम् । तस्याः देशिक परत्वोपयोगिदिङ्मूर्तसंयोगमात्रोपनायकत्वेनैवसिद्धत्वात् । नाप्याकाशात्मानौ । तयोरसम्बन्धघट

कत्वेऽतिप्रसङ्गात्। अत एव लीलावत्त्वमुक्तम्। यदि च गगनवायुभावान्यधर्मेणान्यमवच्छिन्द्यात्। तदाकाशीयपुरुषशरीरवर्तिनाकुङ्कुमरागेण कर्णाटचक्रवर्तिकरतलमप्यवच्छिन्द्यादिति नच कालेऽप्येष दोष इतिवाच्यम्। तस्य तावन्मात्रोपनायकत्वनैवसिद्धया धर्मान्तरोपनायकत्वा प्रसक्तेः। नचातप एव तपनापण्डाभ्यां संयुक्तोभयसम्बन्धघटक इति वाच्यम्। पर्वतगुहान्तर्वर्त्ति पदार्थे पातालतलवर्तिनि वातस्याप्यभावात्; अतस्तपनारस्पन्दघटकत्वेन तदुपनायकः पदार्थः कालोभ्युपेय इति वदन्ति। तदसत्। तपनसंयुक्तातप संयुक्त भूमसंयुक्तत्वपर्वतादपरंपरया पातालगुहान्तर्वर्तिष्वप्युपनायकत्वसंभवनातिरिक्तकालासिद्धेः। यदितपनापण्डाभ्यां संयुक्त एक एव पदार्थः लाघवात्तादृशसम्बन्धघटक इत्यभिलाषा, तर्ह्याकाश एवास्तु तस्याभयसंप्रतिपन्नत्वात्। नन्वाकाशस्यतादृशसम्बन्धघटकत्वे सर्वस्य सर्वधर्मोपनायकत्वप्रसङ्गन सर्वस्य जगतस्सर्वं धर्मित्व प्रसङ्ग इति चेन्न। अतिरिक्तकालस्यैवासिद्धस्याकाशस्यापितपनापरस्पन्दमात्रोपनायकत्व सिद्धेः। धर्मिकल्पनातोधर्मकल्पनं, लाघवात्।

किञ्च परत्वापरत्वाद्यनुमेयः काल इत्ययुक्तम्। भूयोऽवयवातिरिक्तपरत्वापरत्वं भावात्। ततश्च परत्वापरत्वयोः प्रत्यक्षत्व वदतीकालस्यापि प्रत्यक्षत्वमभ्युपगमेवतिसिद्धं कालस्य प्रत्यक्षत्वम्। तत्वावदस्तु प्रत्यक्षणमाभ्यां घटोवर्ततेक्षणकोऽयं घट इत्यादि प्रतीतिषुकालावाशष्ट घटादिभिन्नाद्रव्यगुणभूतकालस्यापि प्रत्यक्षत्वम्। नच रूपशून्यस्य प्रत्यक्षत्व न सम्भवतीवाच्यम् रूपवान्मात्रेतत्वन प्रत्यक्षत्वसम्भवादित्युक्तम्। आगमश्च अनादिर्भगवान्कालः। कलामुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः। कालोऽस्तिलोकक्षयकृदित्यादिनित्यावभूतापापकालोऽस्त्येव। अथापि सच तत्रस्थ पदार्थानां न पारिपाकहेतुः।

कालं स पचते तत्र नकालस्तत्रवै प्रभुः। कलामुहूर्तादि मयश्चकालः नयद्विभूतेः परिणामहेतुः॥

इत्यादिवचनात्। अन्यथा सदा पश्यन्तिसूरयः इत्यादेर्विरोधः। अस्यचान्वयव्यतिरेकाभ्यामेवयथायोगं तत्तत्कार्यं निमित्तत्वं बाध्यम्। कालास्यैकस्यप्युपाधिभेदादुपाध्यवच्छिन्नकालस्यान्वयातिरेकौबाध्यौ। अस्मिन् पक्षे क्षणलवादिकालपरिणामव्यवहारः उपाधिपरिणाम प्रयुक्त इतिबोध्यः। स्वरूपविकाराभ्युपगमपक्षे स्वविकारान् प्रत्युपादानत्वम्। कार्यान्तरं प्रतिनिमित्तत्वम्। विकारश्चक्षणरूप एव। क्षणाश्चसर्वेव्यापिनः। तानादायैव घटिकामुहूर्ताहोरात्रादि नपक्षमासर्तुसंवत्सरादिव्यवहाराः प्रवर्तन्ते। अस्मिन् पक्षे,

सर्वेनिमेषाजज्ञिरेविद्युतः पुरुषादधि। कलामुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः॥

इत्यादि श्रुतेस्त्वारस्यम्। अतस्त्वारसिकार्थबाधकाभावादभिमानिदेवतोपाध्युत्पत्त्यानिर्वाहस्तुनिःस्वरसः। विभोर्विकारित्वानुपपत्तिर्बाधिकतिचेन्न। अवयवोच्छूनतादिलक्षणस्य विकारस्यानभ्यु

पगमात्। अवस्थान्तरापत्तिमात्रस्याविरोधात्। अन्यथा विभोरेवासिद्धिप्रसङ्गात्। सर्वमूर्तसंयोगित्वं हि विभुत्वम्। अतः संयोगलक्षणानेकास्त्वमङ्गीकार्यम्। उक्तपक्षद्वयेऽपि सर्गप्रत्यया: कालोपलक्षिता एव दृश्यन्त इति कालप्रत्यक्षत्वम्। तदेवमव्यक्तोक्तक्रममहदहङ्कारेन्द्रियतन्मात्रभूतसृष्टिप्रकरणेषु जीवपरमात्मानौ पञ्चविंशकषष्ठविंशकौ भवतः। अक्षरतमसोरन्य तयोपक्रमे कालस्य पृथग्गणनं च सप्तविंशकाष्टाविंशकत्वादिकं यथासम्भवमूह्यम्। श्रुतिश्च तं षड्विंशकमित्याहुस्सप्तविंशमथापरे इति पञ्चविंशातिरिक्तनिषेधपराणां निर्वाहस्तु

अन्यश्च राजन् स परस्तथान्यः पञ्चविंशकः। तत्स्थत्वादनुपश्यन्ति ह्येक एवेतिसाधवः॥ इतिमोक्षधर्मे भगवताव्यासेनाभिहितः। नन्वेवमपि तत्तद्भूतेषु सावृतकान्तर्हिमकरवैद्युतवैश्वानरा द्युत्तरोत्तरावस्थादशेनात् तत्तत्संख्यानियमोऽनुपपन्नः। मैवं; समष्ट्यपेक्षया तन्नियमात्। पञ्चीकरणपश्चाद्भाविव्यष्टयवस्थाविशेषाणामानन्त्यादपरिसंख्यानम्। एतेषुसमष्टितत्त्वेष्वंशत एवोत्तरोत्तरतत्त्वसृष्टिर्न सर्वात्मनापूर्वपूर्वतत्त्वैरुत्तरोत्तरतत्त्वेष्वावृतत्वस्य तत्तदाकारेणपूर्वपूर्वतत्त्वानां स्वकार्येषु वृत्तेश्च श्रुतत्वात्।

प्रधानतत्त्वमुद्भूतं महान्तं तत्समावृणोत्। यथा प्रधानेन महान् महता स तथावृतः॥

आकाशं शब्द तन्मात्रे स्पर्शमात्रं तदाविशत्। इत्यादि प्रमाणमत्रानुसन्धेयम्। अन्यथा पृथिवीमात्र परिशेषप्रसङ्गात्तन्मात्राणां तु आवारकत्वाभावान्निरशेषपरिणाम इत्येके। शतारादेश्चतुर्विंशतितत्त्वमयत्वप्रतिपादनवचनात्। तेषामप्येकदेशतः परिणाम इत्यपरे। पूर्वस्मिन् पक्षे शतारादे श्चतुर्विंशतितत्त्वमयत्वश्रुतिस्सर्वचित्तत्वमयत्वप्रतिपादन परेति द्रष्टव्यम्। अपरस्मिन् पक्षेकचित् केषांचित् सृष्ट्यनुक्तिवदविवक्षयावरणाद्यनुक्तिरितिगतिः। एतानि तत्त्वानि प्रथममीश्वरस्सङ्कल्पादेव तत्तदव्यवहितपूर्वपूर्वतत्त्वशरीरकः उत्तरोत्तर तत्त्वानि सृष्ट्वाव्यष्टिनामरूपव्याकरणं सङ्कल्प्य, तेषां तत्त्वानां पृथग्भूतानां व्यष्टिसृष्ट्यर्थकैः परस्परसंमिश्रणं च सङ्कल्प्य, व्योम्नाऽधिष्ठीयमानाश्चत्वारोवायुतेजः पयोभुवामित्यादिक्रमेणैकैकभूतावशेषेषु भूतान्तराणामष्टमांश चतुष्कैः पञ्चीकरणं कृत्वा तेषु स्वानुप्रविष्टजीवकर्मानुबन्धेन तैस्तैर्वतत्त्वदेशैर्गुणितोत्तरसप्तावरणवेष्टितं हेमकारोपादानभूतमण्डं ब्रह्माण्डमारभ्य तदन्तरं च स्वनाभिपङ्कजप्रभृति सप्तस्थानेष्वन्यतमेनाण्डान्तर्वर्ति सकल चेतनगर्भित विग्रहं चतुर्मुखं प्रसादात् सृजति। क्रोधाच्च रुद्रम्। अत्र श्रुतिः एको हवै नारायण आसीन्नब्रह्मानेशान इत्यारभ्य तत्र ब्रह्मा चतुर्मुखो जायते। अथश्वेतो वराहो जायते इत्यादिकम्। नारायणाद्ब्रह्मा जायते। नारायणाद्रुद्रो जायत इत्यादयश्च। उक्तं च महाभारते,

एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौस्मृतौ। तदा दर्शितपन्थानौ सृष्टिसंहारकारकौ॥

प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम् ॥ इति सच भगवाननन्तरंऋद्दृष्ट ब्रह्मान्तर्यामिरूपेणावस्थित्य स्वप्रहितवेदोपज्ञविज्ञानेन स्वार्पिताभ्यां विचित्रसृष्टि विषयबुद्धे शक्तिभ्यामुपबृंहितेन स्वनिर्धूतमधुकैटभादिविविधापदा चतुर्मुखेन ब्रह्माण्डान्तर्वर्तिचतुर्दश भुवनतदधिकरणकदेवतिर्यङ्मनुष्यस्थावरतद्विशेषदिगादिविविधावैचित्र्यसृष्टिसंज्ञासृष्टिकार्यते। करोति च तच्छरीरकः संहारयति संहरति च हरशरीरकः । ननु नित्यत्वमादिशः कालत्वं कथमितिचेन्न । दिगिति द्रव्यस्यैवासिद्धेः प्राक्प्रत्यग्दक्षिणोदीच्यादिव्यवहारानुपपत्तेश्च पाच्युपहितैस्तैस्तैरेकाकाशादिद्रव्यैरेव वायुतदितरसंयुक्त संयोगपरंपरासूतैस्तत्तत्प्रत्यक्षादे मेरादिसंबन्धं कृत्वाभिमतोपाधिविशेषैरेव वा यथायोगं निर्वाहात् । संप्रतिपन्नाकाशादेपरित्यागेन सर्वत्र सर्वगुणघटन रूपातिप्रसङ्गपरिहारायाधिकदिक् धर्मिकल्पनं पापक्षयवत् पुण्यक्षयाऽपि भयादेति भयान्मन्दाकिनीमपहाय मरीचिकानुधावनम् ।

नन्वाकाशाद्यतिरिक्तं दिक्तत्व स्वीकर्तव्यम् । पङ्क्यां भूमिर्दिशश्रोत्रादेतिचेन्न । अभिमानिदेवतोपाधिसृष्ट्य। निर्वाहात् । तदेकप्रकरणस्यान्तरिक्षस्त्रष्टादिसृष्टिवदुपपत्तेः । अन्यथाऽन्तरिक्षादेरपि तत्त्वान्तरत्वस्वीकारप्रसङ्गात् । किंच व्यष्टिदशायां हि दिक्सृष्टिः श्रूयते । अतोऽण्डबहिर्भूतेषु महदादिष्वावरणाद्यार्यत्व दूरत्वाद्यनत्वव्यवहाराः । त्रिगुणस्याद्यः प्रदेशत्वं शुद्धसत्वापेक्षया, शुद्धसत्वस्य त्रिगुणापेक्षयोर्ध्वत्वव्यवहाराश्च न घटेरन् । तत्रोपाधिभिरुपहितैर्वातैस्तैर्यथानिर्वाह्याः । तदत्रापि समभिव्याहृतसिद्धम् । न दिक्तत्वान्तरमिति । ब्रह्माण्डप्रभृतिस्तम्बपर्यन्तं सर्वमपि पञ्च भूतात्मकंपञ्चीकरणादिवचनात् तासांत्रिवृतंत्रिवृतमेकैकांकरवाणीत्युपलक्षणम्। समानप्रकरणे तैत्तरीयके आकाशादीनांपञ्चानामप्युत्पत्तिश्रवणात् पञ्चीकरणमपि श्रुत्यभिप्रेतमितिगम्यते ननु पञ्चीकरणे न व्यष्टितत्त्वानां सर्वेषां पञ्चभूतमयत्वाद्व्यवहारनियमः कथमितिचेन्न । यस्मिन् संघातेयस्य भूतस्यभूयस्त्वं तत्संघातः तद्भूतत्वेन व्यवहियते । एतदर्थमेव हि संमिश्रणे तत्तद्भूतानामर्धांशस्थापयित्व इतरेषांभूतानामष्टांशेस्संयोजन कृतम्। लौकिकाश्च व्रीह्यादिराशीन् किञ्चित् किञ्चिच्छिलासैकतादियुक्तानपि व्रीह्यादेर्भूयस्त्वात् व्रीहिराशिरयं माषराशिरय इति व्यवहरन्ति । अतो भूयोंशस्यैवव्यवहारनियामकत्वात् नव्यवहारसाङ्कर्यम्। संमिश्रणाभावे भूतानां तत्तत्कार्यासामर्थ्यंच भगवता पराशरेण प्रतिपादितम्।

नानावीर्याः पृथग्भूतास्तत्तत्संहतिविना । नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥

समेत्यान्योन्य संयोगं परस्परसमाश्रयाः । एकसंघातलक्षास्तु संप्राप्यैक्यमशेषतः ॥

महदाद्यविशेषान्ताह्यण्डमुत्पादयन्ति ते । इति । नन्वेकस्मानेकद्रव्योपादानकत्वे जातिसङ्करस्स्यात् । नस्यात् कारणादन्यस्य कार्यस्यावयविनोऽस्माभिरनभ्युपगमात् । ननु न कारणात् कार्यस्यानन्यत्वं संभवति । विलक्षणबुद्धिबोध्यत्वात् कार्यस्य । न खलु तन्तुपटघटमृत्पिण्डादिषु कार्यकारणविषयाबुद्धिरेकरूपा । शब्दभेदाच्च । न हितन्तवः पटा इत्युच्यन्ते । पटो वातन्तव इति । यद्यप्येकत्वेन शब्दभेदः इन्द्रो मरुत्वान् सुन्दरः कुण्डलीत्यादौ चवर्तते । तथाऽपि पर्यायभिन्नोविशेष्यविशेषणभावानर्हश्च शब्दभेद इहविवक्षितः । सच घटपटसिंहव्याघ्रादिशब्दवत् स्वरूपभिन्नत्वात् । कार्यभेदाच्च । न हि मृत्पिण्डेनोदकमाहियते । घटेनवाकुड्यंनिर्मीयते । कालभेदाच्च । पूर्वकालं च कारणम् । उत्तरकालं चकार्यं आकारभेदाच्च । पिण्डाकारं कारणं कार्यं च पृथुबुध्नोदराकारं तथा सत्यवबुद्धिघटोनष्टः इतिव्यवहियते । सङ्ख्याभेदाच्च । पट इति परिमाणभेदाच्च । कारकव्यापारवैयर्थ्याच्च । कारणमेव चेत् कार्यं किं कारणव्यापारसाध्यंस्यात् । सत्यपिकार्ये कार्योपयोगितया कारकव्यापारेण भवितव्यचेत्, कारक व्यापारोपरतिः कदापि न स्यात् । अतः कारणादन्यत् कार्यमवयव्यङ्गीकार्यमितिचेन्न । भवदभिमतसमवायिकारण संयोगरूपावस्थाविशेषाविशिष्टैस्तन्तवादिभिरेव पटादिव्यवहारोपपत्तावतिरिक्तावयविकल्पनस्याप्रामाणिकत्वाद्द्व्यणुकेनावनपत्रतादिद्व्यवयव्यभावेऽपिनिरुक्तावस्थाभिरेव सर्वोपपत्तिर्भवता ऽप्युपपादनीया । पत्रतादिद्व्यवयवसंयोगरूपासमवायिकारणाभावेनावयव्यारम्भाभावात् ।

इतरथाऽऽकुञ्चन प्रसारणार्थं जङ्घाकटीदेशयोर्द्व्यणुकेवैकात्म्यं पक्षादिष्वाकुञ्चित प्रसारित पटादिष्वप्यवयव्यन्तरोत्पत्तिप्रसङ्गात् । नचेष्टापत्तिः । आरूढकपिसंयोगस्तावयव्यन्तरानभ्युपगमात् । अभ्युपगमे सर्वावयविनोविरोधप्रसङ्गात् । न च तत्र पूर्वावयविनो नाशः अवयव्यन्तरस्योत्पत्तिश्चाभ्युपगम्यत इति वाच्यम् । आरम्भकसंयोगस्याविनष्टत्वात् । अवयवान्तरसंयोगरूपासमवायिकारणाभावाच्च । न च दलसंयोगविरोधिविभागजनकक्रिययैवारम्भकसंयोगविरोधिविभागजननात् द्रव्यनाश इति वाच्यम् । द्रव्यनारम्भकसंयोगविरोधिविभागाजनकत्वात् ।

अन्यथा विकसत्कमलकुड्मल भङ्गप्रसङ्गादिति युष्मत्सिद्धान्तविरोधप्रसङ्गात् । किञ्च अवयवाद्यतिरिक्तावयव्यभ्युपगमेगुरुभूतावयवद्वयारब्धघटादौ कारणगुणप्रक्रमेणावयव गुरुत्वेनावयव्यपि गुरुत्वोत्पत्तिरावश्यकी । तथा च द्विफलिकैककपालकन्यायनकपालाद्यवयवगुरुत्वं घटाद्यवयविगुरुत्वं च संभूय घटद्वयोन्मान पतनातिरिक्त कार्योत्पत्तिरस्मन्मत इति चेत् तत्र पृच्छामः किमवयवगुरुत्वस्य प्रतिबन्धः, उतावयविगुरुत्वस्य, न तावदवयव गुरुत्वस्य, निश्चलेऽवयव, विनिश्शाखापर्णफलादीनां पतनाभावप्रसङ्गात् । न चावयविगुरुत्वादेव तेषां पतनमितिवाच्यम् । सर्वेषां शाखापर्णादीनां युगपत्पतनप्रसङ्गात् । सङ्घातवादिनस्तु यथाहेप्रतिबन्धाग्रे आलम्बनोप

पत्तिः। नाप्यवयवि गुरुत्वस्य द्व्यणुकप्रभृतेस्सर्वस्याप्यपतनप्रसङ्गात्। परमाणुगुरुत्वेनैव सर्वत्र पतने घटादेस्साक्षात् परमाण्वारब्धत्वाभावेन प्रत्यक्षसिद्धे तत्पतने गुरुत्वस्यासमवायित्वाभाव प्रसङ्गेन गुरुत्वलक्षणमसम्भविस्यात्। किं च कार्यगुरुत्वादेव द्व्यणुगुरुत्वं कल्पयसि। कार्याणाम गुरुत्वेऽणौ कथ गुरुत्वम्। न च कार्यगुरुत्वमुत्पाद्य कारणगुरुत्वं नश्यतीति वाच्यम्। अपसिद्धान्तादृपादिष्वपि तत्प्रसङ्गात्। न चेष्टापत्तिः। पटादिभक्तानां तन्तूनामरूपित्वे नाचाक्षुषत्वप्रसङ्गात्। अगुरुत्वेनापतन प्रसङ्गाच्च। अतः कपालद्वयतत्कार्यघटोन्माने घटद्वयो न्मानवद्गुरुत्वान्तरकार्यं दुस्त्यजम्। किंचावयवावयविनोर्द्वयोः स्पर्शवत्वात् सप्रतिघत्वविरोधः।

द्वयोरन्यतरस्यस्पर्शशून्यत्वेन विरोधः। इहतूभयोः स्पर्शवत्वादेकावष्टब्धदेशे इतरा-वृत्तित्वरूपसप्रतिघत्वविरोधस्सम्भवत्येव। नन्ववयवावयविनोरेकत्ववृत्तित्वाभावान्नविरोध इति चेन्न। समवायिदेशैक्याभावेऽपि संयोगिदेशैक्यस्य सत्वात्। कपालावष्टब्धनभःप्रदेशे घटस्यापि त्वया वृत्त्यभ्युपगमात्। ननुकपालसंयुक्तनभसि घटसंयोगोमाभूदितिचेन्न। मूर्तामूर्तसंयोगविलोप प्रसङ्गात् तथा हि मूर्तानांघटानामाकाशेनसंयोगोवक्तव्यः। सचकपालावष्टब्ध देशावच्छेदेन न संभवति। अनभ्युपगमात्। अन्यदेशावच्छेदेनत्वसंभावितः। अतोघटादीनां द्व्यणुकपर्यन्तानां मूर्तानां स्वावयवावच्छेदेन गगने संयोगानभ्युपगमात् द्रव्यान्तरावच्छेदेनासंभवाच्च, गगनादे स्सर्वमूर्तद्रव्यसंयोगित्वरूपविभुत्व न स्यात्। उक्तरीत्या मूर्तानां मूर्तैस्सहसंयोगोऽपिनस्यात्। तत्राप्यवयवावष्टब्धदेशावच्छेनावयविनस्संयोगे सप्रतिघत्वविरोधात्। देशान्तरावच्छेदेन तत्संयो गस्यासम्भावितत्वात्। यदिचावयव्यनुत्पत्तिदशायामवयवानां मूर्तैरमूर्तैस्सह संयोगोऽवयव्याधा-रत्वेऽवयवानां न संयोगः। तेषां तत्पारतन्त्र्यात्। एव च विभुत्वमपिरक्षितम्। कालभेदेन सर्वमूर्तसंयोगादित्युच्येत तदा संयोगजसंयोगो दत्तजलाञ्जलिस्स्यात्। हस्तस्यकायाधारत्वे पुस्तकेन संयोगाभावेन तज्जन्यकायपुस्तक संयोगासम्भवात्। अतस्संयोगिदेशेऽवयवावयविनोस्स प्रतिघत्वविरोधोदुष्परिहरः। एवं स्वावयवेऽवयविविभज्य यदावर्तते तदैकावयवदर्शनेप्यवयव्युप-लभ्येत। जातिरिवप्रत्याधारम्। अथाविभज्यवर्तते, तदानवस्था प्रसङ्गः। तथाह्यवयविनः स्वावयवेऽविभज्य वृत्तित्वमपूर्णवृत्तित्वम्। तच्चावयवमादायैव वक्तव्यम्।

तत्र पूर्वावयववृत्तित्वायावयवान्तरस्वीकारे तस्मिन्नप्यवयविसम्बन्धस्य वक्तव्यतया तत्रापि पूर्वोक्तविकल्पेप्रथमकल्पस्य पूर्ववदूषितत्वेन द्वितीयकल्पपरिशेषे तत्रापूर्णवृत्तित्वोपपाद नायावयवान्तरस्वीकारे चानवस्थेति।

न च बलवत्प्रमाणोपनीतावयविनि संप्रतिपन्नवृत्त्यनुपपत्तिस्संयोगादाविवशाम्यतीति चेन्न। प्रमाणप्राबल्यस्य निरस्तत्वात्। एवं पृथुतरपटनिर्माण प्रक्रमेद्वितन्त्वादिसंयोगेद्वितन्तु कत्रितन्तुकादिपटपङ्क्तिकरत्पद्यतेनवा। नोचेत्। बुद्धिशब्दान्तरादिरवस्थाभेदेनेति सिद्धंस्यात उत्पद्यतेचेत् त्रितन्तुकाद्यारम्भदशायांपूर्वंतिष्ठतिवा नवा। पूर्वत्र तदनारम्भस्यात्। आरब्धकार्यैस्तदानीमेवावयव्यन्तरारम्भायोगात्। नचद्वितन्तुकपटादिस्तन्त्वन्तरसहितः त्रितन्तुकपटारम्भकः इतियुक्तम्। इहतन्तुषुपट इत्यादिस्वाभिमतव्यवहारविरोधात्। अत्रचाचार्योक्तसंग्रहश्लोकौ

पूर्वसिद्धपटैस्सार्धं तन्तुभिः पटसम्भवे। पटपङ्क्तिरपमीक्ष्येतक्रमादाधिक्यशालिनी॥
प्राक्सिद्धानांपटादीनामुत्तरोत्तरजन्मनि। अहेतुको विनाशश्च स्थित्यपक्षे न युज्यते॥

नचेदुपलम्भविरुद्धनाशकल्पनाप्रपञ्चः। एवमेकद्वित्रादितन्त्ववकर्षणदशायामपिखण्डपटपरंपरोत्पत्तिनाशप्रसङ्गावलम्बिः क्लिष्टतरा। लाघवशालिनिसंघातमात्रपक्षे राशिन्यायात्सौ दोषो न भवति। नच गौरवादतिरिक्तावयविपरित्यागे सौगतवत्स्वरूपविशेषमालंब्य संयोगविशेषोऽपित्यज्यतामितिवाच्यम्। परैरसमवायितयास्वीकृतस्यावयव संयोगस्य प्रत्यक्षसिद्धत्वेनतत्परित्यागानौचित्यात्। परेणापि हि विभूनामाकाशादीनां नित्यानां शब्दज्ञानसंयोगाद्यवस्थास्तत्तद्धेतुभेदैरङ्गीकृताः। सर्वद्रव्यस्वरूपनित्यत्वमवस्थाभेदमागन्तुकं च वदतामस्माकं किमनुपपन्नम्। संयुक्तावस्थाहि परिणामः। कथं तर्हिनित्यानित्यविभाग इति चेदित्थम्। द्रव्यं नित्यं अवस्थात्व नित्या। तथा च स्वरूपतो द्रव्य नित्यमप्यवस्थाविशिष्टत्वेनानित्यमितिनित्यानित्यविभागः।

ननुतन्तव एव व्यतिषङ्गविशेषविशिष्टाः पट इति भवतां सिद्धान्त पटवचेति सूत्रे दर्शितम्। तथा च दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादितेऽवयविनि कथ पटबुद्धिस्यादिति चेन्न। न वयं तन्तुगतमेकत्वं द्वित्वं वा पटधियोहेतुमिच्छामः। किन्तु व्यतिषङ्गविशिष्टतन्तोरेव पटधीहेतुत्वम्। तच्च यथादर्शनमनेकेषामिनेकस्यापिहेतित्वेपि पटधीहेतुत्वाभ्युपगमात्। एकस्यावयव्यनारम्भकत्वात्तवैव तत्र पटधीबाधः। प्रदर्शितं च पत्रेण ताटङ्कनिष्पत्ताववयव्यनारम्भकत्वम्। अतस्तवैवायदोषः। स्यादेतत्। नन्ववयव्यनभ्युपगमपक्षेऽन्ततः पर्वतादयोत्यणुसंघाताः स्युरिति ते न प्रत्यक्षाः स्युः। अतस्सर्वाग्रहणमवयव्यसिद्धेरित्याक्षपादोक्तमनतिक्रमणीयं स्यादितिचेन्न। प्रत्येकमप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वसंभवात्। यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्। एकस्यापि केशस्यासन्नौ दर्शनयोग्यत्वमस्तीतिचेत् तत्रेणुरूपस्याणोरपि सहकारिसम्भवे प्रत्यक्षयोग्यत्वात्। तदतिरिक्ताणोर्निरस्तत्वात्।

नन्वेवमपि स्थूलोऽयं घट इतिस्थूलत्वधीरणुसंघातस्वरूपघटादिषु कथंस्यात् स्थूलद्रव्याभावाच्चाणुसंहतौ स्थूलत्वाध्यासस्यापि दुरुपपादत्वादितिचेन्न । स्थूलधीरिति परिमाणविशेषधीर्वाप्रत्यक्षयोग्यत्वधीर्वा प्रत्येकदेशाधिकदेशत्वधीर्वानाद्यः संहतेरेवावयविन्यपरिमाणान्तरसृष्ट्युपपत्तेः । अणुष्वेवविरुद्धं स्थूलत्वं कथमितिचेदेकत्वाद्याश्रयेष्वेवकथं तद्विरुद्ध द्वित्वादिकमिच्छसिः अपेक्षाबुद्धिसंगृहीत व्यक्त्यन्तरसम्बन्ध सामर्थ्यादितिचेन्नादृश बुद्ध्यनपेक्षकारणविशेषसम्बन्धादेव परिमाणान्तरमपीति तुल्यम् । न द्वितीयः । संहतौ प्रत्यक्ष योग्यत्वस्योपपादितत्वात् । न तृतीयः । भाषादिराशिषु संहतिभेदैर्देशतारतम्यदृष्टेः ।

ननुन्यूनाधिकपरिमाणद्रव्यावच्छिन्नस्यैवन्यूनाधिकदेशत्वात तत्परिमाणावयविद्रव्याभावे तत्प्रयुक्तदेशन्यूनाधिकत्व दुर्निरूपस्यादितिचेन्न । न ह्यवयविनिरूपणेनैवदेशाधिक्यादि निरूपण सुरभित्वादेरिवसम्बन्धिन्यूनाधिक भावेन तदुपपत्तेः । एतदुक्त भवति । कर्पूरधूलिषु केतककुसुमादिषुवा सौरभ्यमाश्रयाल्पत्वबाहुल्याभ्यां न्यूनाधिकभावेनोपलभ्यते । यथाच श्वेतपटे नीलीद्रव्यसम्बन्धान्नीलिमोत्पत्तौ नीलीद्रव्याधिक्यन्यूनताभ्यांनीलिम्नोऽप्याधिक्यन्यूनता प्रतीति तथाऽत्रापिसंयुक्तद्रव्यन्यूनाधिकभावे अवयव्यभावेऽपिन्यूनाधिकदेशतारतम्यभवतीतिद्रव्येषु नैवमिति चेन्न । द्व्यणुकोत्पत्तेः पूर्वक्षणे संयुक्ताणुद्वयस्य प्रत्येकदेशाधिकदेशत्वाभाव्य भावात् । अन्यथा सर्वपरमाणूनां समानदेशत्वे प्रागुक्तदोषप्रसंगात् ।

समवायिनस्संयोगिनोवादेशस्याभावेकथं तत्र देशाधिक्यमिति चेन्न । आकाशाद्यंशभेदेनतदुपपत्तेः । कथ निरवयवस्याकाशस्यांशभेदादितिचेदात्मानं पृच्छ । कर्णशष्कुल्युपाध्यवच्छिन्ननभांसिनानाश्रोत्राणि कल्पयसि । भेर्यादिशब्देषुश्रूयमाणेषुतरङ्गवृत्त्या तत्तदनन्तरदेशेषु शब्दोत्पत्ति गमने साधयसि । न चाकाशादेरप्रत्यक्षत्वात्तद्देशतारतम्यस्य दुर्ग्रहत्वात्तदधीनदेशाधिक्यं सुतरांदुर्ग्रहमिति वाच्यम् । प्रत्यक्षाकाशवादिनां दोषाभावात त्वयपि भाषाद्यवयविनो महीधरस्याधिकदेशत्व गृह्यत इत्युच्यते । तत्रालोकमण्डलांशभेदैर्देशाधिक्यमितिचेन्न । आलोकस्यापि नभसिन्यूनाधिकदेशवृत्तित्वादृष्टेः परिमाणाधिक्यमात्रमेव पर्वतादिषु गृह्यत इतिचेन्न । अगृह्यमाणं देशाधिक्यमस्तिवा नवा अस्तिचेत् संघातेऽपिकश्चोद्भावकाभ्यः । नचेत्तद्देशेषु चक्षुः प्रसरादिनिषेधकत्वं न स्यात् । अन्यथाऽल्पदेशवर्तिनस्सर्वत्रनिरोधकत्व प्रसङ्गात् अतः परस्परानाक्रान्तदेशावष्टम्भेनसंहन्यमानेषु त्रसरेणुषु सुग्रहमेवदेशाधिक्यम् । देशस्तु आलोकाकाशादिर्वा यः कश्चिद्यथा योग्यमस्तु । अत एवावयव्यभावादणुषुस्थौल्यारोपोपिनस्यादितिचोद्यमपिनिरस्तम् ।

ननुयदिसंसृष्टास्तन्तवः पटस्तदा तन्तुराशिमात्रेऽपिपटधीस्स्यादितिचेन्न । त्वयापिन तन्तुसंयोगमात्रं पटस्यासमवायिकारणमिष्यते । तथा सतिकुविन्दादिव्यापारवैयर्थ्यात् । अतो

यादृशसंसर्गादवयवीतवोत्पद्यते। तादृशसंसर्गविशिष्टास्तन्तवः पट इत्युच्यत इत्यतिप्रसङ्गाभावात्। एवं तन्तुमान् पटइतिमत्वर्थीय प्रत्ययान्तसामानाधिकरण्यव्यवहारश्चशूरवतीसेनावृक्षवदरण्यमित्यादिष्यवहारवत् प्रत्येकसमुदाय भेदविवक्षयोपपन्नतरः। ननवेवमपि घटादीनां संघातात्मकत्वे घटद्वय संयोगेसति तस्याप्यवयवसंयोगरूपतया तयोरप्येकसंघातापत्या एकस्मिन् घट इव संयुक्तावित्यौद्वावितिचबुद्धिर्नस्यादितिचेन्न। संयोगविशेषेण पृथक् संघातवलुप्त्यातादृशसंघातद्वयसंयोगे शशिद्वय संयोग इवसंयुक्तौद्वावितिचबुद्धयुत्पत्तेर्बाधकाभावात्। अन्यथा राश्यादावपि तादृशबुद्धिर्नस्यात्।

न चसंयोगस्यैवघटावस्थारूपतयामहत्त्वैकत्वद्वित्वसंयुक्तत्वादीनांसंयोगविशेषरूपघटादिनिष्ठत्वाभावेन महान् घटइत्यादिविशेषणविशेष्यभावप्रतीतिर्नस्यादितिवाच्यम्। घटादि शब्दानां संयोगविशेषरूपावस्थावद्वाचकत्वेन महदादिशब्दानां च महत्वादिमद्वाचकत्वेनैकार्थवृत्त्या सामानाधिकरण्यसम्भवेन महान् घटइत्यादिविशेषणविशेष्यभाव प्रतीतेर्निर्बाधत्वात्। अन्यथा-घनवनंश्यामं वनमित्यादि प्रतीतिस्तवापिनस्यात्। तत्रावयव्यनभ्युपगमेन वृक्षबहुत्वातिरिक्तवन स्याभावेनघनत्वादीनां वननिष्ठत्वाभावात्। वनशब्दस्यावस्थावत्परत्वेनवोक्तप्रतीतेर्निर्बाधत्वेन तस्यान्यत्रापि समत्वात्।

अत्रेदंबोध्यम्। घटकपालादिशब्दाः घटत्वाद्यवस्थांतदवस्थितद्रव्ये च प्रयुज्यन्ते। यथा शुक्लादिशब्दाश्शुक्लिम्नितद्विशिष्टे च प्रयुज्यन्ते। तथाचैकोमहान् घट इत्यादौघटाद्यवस्थित मृद्विशेषे संयोगमहत्वादीनांसन्वान्नीलोघट इतिवन्महान् घटइतिसमानाधिकरण प्रयोग उपपन्नः। एवंसेनादिशब्दा अप्यवस्थातद्विशिष्टवाचकाः। अतेघनवनंश्यामंवनमित्यादयोऽप्युपपन्ना इति। ननुतथापिसितरक्तनीलादितन्त्वारब्ध पटे चित्रःपट इति धीस्सर्वेषां जायते। तन्तूनामेव पटत्वे प्रत्येकतन्तुव्यतिरेकेणचित्ररूपाधिकरणाभावेनचित्रः पट इतिधीर्नस्यात्। ममत्ववयविनः पटस्य चित्ररूपाश्रयत्वाच्चित्रोपलब्धिर्जायतामितिचेन्न। व्यतिषङ्गवशेन पटावस्थापन्नसितरक्तनीलादितन्तुषुविद्यमाननानारूपसमुदायस्यैवचित्रधीव्यवहारविषयत्वेनानुपपत्त्यभावात्। चूर्णसंहतिचित्रवत् तत्र भवतोऽप्यवयव्यभावेनोक्तरीतेरनुसर्तव्यत्वात्। अतिरिक्तचित्ररूपासम्भवप्रकारमद्रव्ये निरूपयिष्यामः

स्यादेतत्। तथावयव्यनभ्युपगमे एकावयवैधृते आकृष्टे चान्येषामवयवानां धारण माकर्षणं च न स्यात् दृश्यते च मूलेधृते आकृष्टेचाग्रादीनां धारण माकर्षणं च अवयव्यङ्गीकारे तु तस्यैकयात् सर्वावयववृत्तित्वाच्च धारणाकर्षणेयुज्येते। ततोऽवयव्यभ्युपगम आवश्यक इति चेन्मैवम्। धृताकृष्टावयव दृढसम्बन्धादेवावयवान्तराणामपिधारणाकर्षण संभवात्। अवयव्यभ्युप

गमेऽपि कोमळत्वादौ धारणाकर्षणयोरभावेन व्यभिचारात् । अवयवानां दृढतरसंयोग एव धारणाकर्षण प्रयोजक इति वक्तव्यं । स च संघातपक्षेऽपि तुल्यः ।

किञ्चविजातीयेषु जतुतंतुकेषु तृणपर्णकाष्ठादिषु पाशवेष्टित पक्षादिषु च धारणाकर्षणयोरस्वत्वात् तत्रावयव्यभावात् तत्र सर्वत्रावयवानां दृढतरसंयोगस्यैवनियामकत्वेऽन्यत्राप्य विशेषात् । किं च यत्तु पटादीनामन्त्यावयवित्वं तन्तवादीनां मध्यमावयवित्वमिष्यते । तदप्यनुपपन्नम् । तथा हि, तैरनेकैरच्छिन्नावयवैरेक पटादिर्निर्माणेऽवयव्यन्तरमुत्पद्यत नवा । आद्ये तेषामन्त्यावयवित्वव्याघातः । द्वितीये तन्तवादिभिरप्यवयव्यारम्भो न स्यात् । अविशेषात् । तर्हि अन्यः कश्चिद्घटादेरन्त्यावयवोस्त्वादेरिचेन्न । तैरपिकुण्ड्यपोतादिकार्येण सहकारिभेदैरवश्यम्भवात् । सन्तिचास्मदशकार्यनिर्माणचतुराः केचिदन्तत इश्वरश्च ।

एवं योऽसौ गोपुरादिरन्त्यावयवी । तत्र यदिकश्चित् सुधामिश्रावयवान्तरं संघटयेत् । तदा पूर्वगोपुरं विघटतिवा नश्यतिवा । पूर्वत्र कथं तस्यान्त्यावयवित्वमुत्तरत्र स एवायमित्य-नन्यथासिद्धोपलम्भविरोधः, नाशकारणाभावेन नाशासम्भवात् । किञ्चकार्योत्पत्तावयवभेदमात्रात् पूर्वद्रव्यविनाशावयवान्तरोत्पत्तिश्च यदिष्यते तदा महापृथिव्यादिभूतानामपि तत्तत्प्रदेशेष्व श्रान्तचण्डानिलैरिच्छिन्नजलावेगशक्तिनिमित्तदानतेर्दिग्दिग्भागभेदकैरवयवैरणुद्रव्यविघटने द्व्यणुकादि नाशक्रमेण तेषां प्रतिक्षणं नाशे सति पूर्वं पूर्वद्रव्य नाशेनपुनर्द्रव्यान्तरोत्पत्तिपरम्परया च किञ्चि दपि वस्तु किञ्चित्कालमप्येकरूपं न तिष्ठतीतिबौद्धमतप्रवेशप्रसङ्गात् । अतो यथादर्शनं सर्वत्रावयव सङ्घातवाद एव साधीयान् । यदन्यत्कल्पनाजालं द्व्यामवाणुभ्यामार्द्यं कार्यद्रव्यमारभ्यते । एकस्यानारम्भाद्बहुभिरारब्धत्वेमहत्त्वप्रसङ्गेनद्व्यणुकस्य प्रत्यक्षत्वापातात् । एव त्रिभिर्व्यणुकै स्त्र्यणुकमुत्पद्यत । तत्रावयवगतबहुत्वसंख्ययामहत्त्वोपपत्तिः । परमाणुपरिमाणस्यानारम्भकत्वम् । आरम्भकत्व तु द्व्यणुकादरणुतरत्वप्रसङ्गात् । तदीयादित्वसङ्ख्या ईश्वरापेक्षाबुद्धिजन्या । तादृशनाशकाभावेऽपेक्षाबुद्धेरनित्या । अन्यत्रापेक्षाबुद्धेर्नाशेन द्वित्वादीनां नाशः । तादृशस्त्र-सरेणुप्रत्यक्षावयवकः रूपव्याप्यजातिकाप्रत्यक्षगुणकः प्रत्यक्षरूपकः । उत्तरावयविनात्वनियत सङ्ख्याकावयवैरारब्धः । भावकार्यस्य सर्वस्य समवायिकारणेनैव कारणेनोत्पत्तेः । प्रध्वंसस्य कार्यस्य निमित्तमात्रजन्यत्वानित्यताद्यं कल्पनाजालं विद्याबुद्धा न बहुमन्यन्ते ।

एवं यावान्याकल्पना शरीरादिषु पृथिव्याद्यनेक भूतसङ्घावेऽप्येकमेव भूतमुपादान-मन्यत्तत्संसर्गिमात्रं इति । तदप्यनुपपन्नम् । अवयविसङ्घावेऽप्येकमुपादानमित्यनियन्तव्यम् । अवयविनोनिरस्तत्वात् सङ्घातवादे च यथादर्शनं सर्वमुपादानम् । न च विजातीयानां

संहतिर्नास्तीति वाच्यम् । दृष्टविरोधात् । युष्मत्सिद्धान्तविरोधाच्च । कथमन्यथा तेजस्त्वाभिमते काञ्चनादौ गुरुत्वपीतत्वकाठिन्यादिकल्पनाः । पञ्चीकरणोपलक्षकत्रिवृत्करणश्रुत्या नामरूपव्याकरण प्रयोजनकथा, चतुर्विधाहारमयं शरीरमिति गर्भोपनिषदा च पञ्चभूतात्मकं वपुरिति स्मृत्या च देहस्य पञ्चभूतात्मकत्वमात्रं प्रतिपाद्यते । नत्वेकस्योपादानत्वमितरेषां सांसर्गिकत्वं तस्मादविशेषात् सर्वमुपादानम् । न च जातिसंकरःस्यादिति वाच्यम् अवयविनोऽभावेन संघातघटकतत्तदंशवृत्तित्वात्तत्तज्जातेरवयविनमुपगच्छतोऽपि प्रतिनियतकनक रजताद्यंशनिर्मितबिम्बादिवत् नरसिंहादिवच्च निर्वोढुं शक्यत्वात् । न च जातिसांकर्यं दोषः उपाधि सांकर्यन दोष इत्यत्र नियामकमस्ति । तथाच मूर्तत्व कार्यत्वयोः परस्परपरिहारेण मनसि रूपादौ च वर्तमानयोर्घटादौ समावेशेन सांकर्यात् । तथा च घटादेर्मर्तत्व कार्यत्वान्यतरस्य द्वयोर्वा परित्याज्यत्वं स्यात् ।

न च व्याप्यव्यापक भावानापन्नजात्योरसमावेशनियमाभावः जातिसाङ्कर्ये दोष इति वाच्यम् । नील वर्णीतत्वधारण्युराध्योस्तादृशयोरसमावेशोलम्मनियमदर्शनादुक्तदोषतौल्यात् भूतत्वमूर्तत्वयोस्समावेशदर्शनात् । उपाध्योरसमावेशनियमोनास्तीतिचेत् काञ्चनकुण्डलादौ काञ्चनत्वकुण्डलत्वयोः दार्घत्वह्रस्वत्वयोः दीर्घगकारादौ समावेशदर्शनात् । जात्योरपि असमावेश नियमो नास्तीतिचेत् तुल्यम् । यदिकाञ्चनत्वकुण्डलत्वयोरन्यतरस्य जातित्वं परित्यज्यते । अथवा काञ्चनकुण्डलगतकुण्डलत्वजात्यपेक्षया रजतादि कुण्डलगतकुण्डलत्वजातिर्भिन्ना एव । न चानुगतैक जात्यभावे कथमनुवृत्त कुण्डलशब्द प्रयोग इति शङ्कयम् । सदृशसंस्थानवत्वात्तत्सर्वकुण्डलादीनामित्युच्यते, तर्हि घटादीनां सुसदृशसंस्थानादेवानुगत व्यवहारोपपत्तौ जातेरवासिद्धिप्रसङ्गात् । तथा च वृद्धिमिच्छतो मूलहानिस्यादिति न्यायेन जातिसंरक्षणे प्रवृत्तेन जातिपरित्यागस्समर्थितःस्यात् । अतोऽत्यन्त विसजातीयदार्वाद्यसशिलासुधानिर्मित शकटरथ गोपुरादिवत् देहादिरपि विसजातीयभूतमय एवेतियथादर्शनं स्वीकर्तव्यम् ।

न चानेकभूतमयत्वेकथमेकभूतशब्दस्तदर्थक्रियाकारित्वनियमश्चस्यादितिवाच्यम् । तयोस्संघातघटकभूतांशभूयस्त्वनिबन्धनत्वात् । तवाप्यनारब्धावयविकेषुविसजीयमाषादिराशिषु भूयसाव्यवहारोलोकसिद्धएवानुसर्तव्यः । तथास्मिन्सर्वत्रानुसर्तव्य इति न किञ्चिदपहीनम् । अत्र

विभागादविभागाच्च भूतभौतिकभेदधीः । सत्येव यदिवा द्रव्ये सिद्धसाध्यदशान्वयात् ॥
एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् । समष्टि व्यष्टि नीत्येव त्रिगुणेवदतिश्रुतिः ॥
ईदृक्सत्कार्यवादश्च वैदिकैः परिगृह्यते । द्रव्यस्य पूर्वसिद्धस्य साध्यावस्था विशेषतः ॥

इत्यनुगृहीतमाचार्यैः। तदेवमनेकतत्त्वात्मकत्रह्माण्डादिव्यष्टिविश्वमिति। एवं विचित्रब्रह्माण्डानन्त्यतदन्तर्वर्तिलोकविशेष लोकपालनिवासादिभेदतत्तदवस्थानकालादयोऽन्योतिष-पुराणादिषु प्रपञ्चिताद्रष्टव्याः। क्वचिद्विरोधेतात्पर्यभेदेन नेयः।

एषाच प्रतिनियतदेशकालस्वरूपफलभोगतारतम्यनिम्नोन्नतब्रह्मादिस्तम्बपर्यन्ता विषम सृष्टिः स्वरूपानादेर्जीव वर्गस्य प्रवाहानादिकर्मतारतम्यनिबन्धनेति नाकृताभ्यागमकृतविप्रणाश वैषम्य नैर्घृण्यादि प्रसङ्गः। जीवानामाप्रळयावस्थायिपक्षेस्फुटा एते दोषाः। एवं पुण्यपापतार तम्यात् कोचित् द्युलोक प्रभृतिषूत्कृष्टशरीरेन्द्रियज्ञानशक्त्यादिमन्तः केचिन्नरकादिषु घोरदुःख हेतुकर्मणा निकृष्टशरीरादिमन्तः। केचिच्चमिश्रकर्माणः पृथिव्यादिषुमिश्रमध्यमसुखादिमन्तः। इह प्रसङ्गात् सामान्यतश्शरीरलक्षणमुच्यते।

यस्य चेतनस्य यदवश्यं द्रव्यं यावत्सत्त्वमसंबन्धानर्हं स्वात्मकयेनियन्तव्यस्वभावं तदवश्यं तस्य शरीरम्। ननुधर्मभूतज्ञानेऽतिव्याप्तिः। तस्य सिद्धान्तेद्रव्यत्वात् यावत्सत्त्वं स्वाश्रयं प्रतिनि यन्तव्यस्वभावत्वादसम्बन्धानर्हत्वा चेतिचेन्न। यस्य चेतनस्येत्यत्र चैतन्यविशिष्टस्येत्यर्थात् धर्म भूतज्ञानस्य विशेषणीभूतचैतन्यानियाम्यत्वात्। चैतन्यविशिष्टात्मासम्बन्धानर्हत्वाभावाच्च। विशेषणविशेष्योभयासम्बन्धानर्हत्वहिविशिष्टासम्बन्धानर्हत्वं तदत्रनास्ति। चैतन्यस्य चैतन्यावृत्ति त्वात्। तदनियन्तव्यत्वाच्च। भस्मनावस्थितस्य तद्द्रव्यस्यासम्बन्धानर्हत्वाभावादतिव्याप्तिः अतः यदवश्यमिति। क्रियादावतिव्याप्तिवारणायद्रव्यमिति। परकायप्राप्तेन्द्रियकुठारादावतिव्याप्ति-वारणाययावत्सत्त्वमिति। परकायस्य प्रवेशात्पूर्वं प्राणेन्द्रियाणामण्डसृष्टेः पूर्वं शरीरवियोगानन्तरं च सत्त्वात् यावत्सत्त्वमसम्बन्धानर्हत्वाभावान्नातिव्याप्तिः। असम्भवनिवारणाय स्वशरीर इति। न हि विहङ्गमशरीरं विहायसोद्गमनं मानुषादिशरीरकयम्। नच तावतातेन अशरीरत्वम्। स्वशरीरत्वं चान्वयव्यतिरेकादिसमधिगतं यथासंभवं ग्राह्यम्। अत एव शिलाकाष्ठघटपटादेषु जीवशरीर भूतेषु तदधीनत्वाभावादव्याप्तिचोद्यं परिहृतम्। तेष्वपि स्थावरादिवदतिसूक्ष्मस्य नियमन विशेषस्यास्मदादिदुर्ग्रहत्वात्।

यद्यपि स्थावरेषु क्वचिदुन्मेष निमेषादिकं दृश्यते। तथापि न तत् सार्वत्रिकम्। स्मरन्ति च शिलाकाष्ठादिष्वपि स्वरूपतर चैतन्यम्। अप्राणवत्सुस्वरूपाश्च स्थावरेषु ततोधिकमिति। न च शरीरेऽपि क्वचिदनियम्यनियमनाभावादव्याप्तिरितिवाच्यम्। तत्रापि नियन्तुं योग्यत्व-मात्वान्नाव्याप्तिः। व्याघ्रादिदेहासु स्वशरीरेऽपि अशरीरनियमनेषु मानुषादि शरीरेष्वव्याप्तिरथ स्वभावमिति तेषामशरीरनियमनत्वस्यौपाधिकत्वात्। व्याघ्रादिशरीरो यथा पूर्वं नियन्तव्य

स्वभावत्वसत्त्वान्नाव्याप्तिरितिध्येयम्। एवं यस्य चेतनस्य यदवस्थद्रव्यमपृथक्सिद्धं विशेषणं तत् तस्यशरीरमिति वा लक्षणम्। यावत्सत्तमसम्बन्धानर्हत्वमपृथक्सिद्धत्वम्। आधेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरवान्तरभेदा इह विवक्षिताः। दण्डादीनां शरीरत्वव्यवच्छेदायापृथक्सिद्धत्वं शेषव्यावृत्तिः स्फुटैव। ईश्वरतज्ज्ञानव्यतिरिक्तसमस्तद्रव्यं शरीरमिति सामान्यलक्षणम्। पूर्वोक्तं तु विशेषलक्षणमेवेतिध्येयम्।

अन्ये तु चेष्टेन्द्रियार्थाश्रयश्शरीरमिति सूत्रानुसारात् अन्त्यावयवित्वे सति चेष्टाश्रयत्वमेकं लक्षणम्। अन्त्यावयवित्वे सतीन्द्रियाश्रयत्वमन्त्यावयवित्वे सति भोगायतनत्वमिति शरीरस्य लक्षणत्रयमित्याहुः। तदसत्, तत्र चेष्टाशब्देन क्रियामात्रविवक्षायां घटरथादिष्वतिव्याप्तिर्यक्ता। प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियाविवक्षायां प्रयत्नवदीश्वरसंयोगासमवायिकारणक क्रियाविवक्षायां प्रयत्नवदीश्वरसंयोगासमवायिकारणक क्रियाश्रयेषु तच्छरीरतया तैरभ्युपगतेष्वौत्पातिककम्पादिक्रियावत्सु महीपर्वतादिष्वतिव्याप्तिः। प्रयत्नवज्जीवेति विशेषणे प्राणादिष्वतिव्याप्तिः। बुद्धिपूर्वकप्रयत्नेति विशेषणेऽपि प्राणायामकालिकरेचक पूरकादिक्रियावत्सु प्राणादिष्वतिव्याप्तिः। रेचकपूरकयोर्बुद्धिपूर्वकप्रयत्नवदात्मसंयोगासमवायिकारणकत्वात् वायवादेरन्त्यावयवित्वाभावेनान्त्यावयवित्वविशेषणाभावान्नातिव्याप्तिरितिचेन्न। कस्तर्ह्यन्त्यावयवी। घटादिरितिचेन्न। तत्रापि नैकघट पटादिभिर्मित्तिगन्धादिनिर्माणेनान्त्यावयवित्वासिद्धेः। तत्रमित्याद्यारम्भो नास्तीतिचेत् प्राणादिष्वारंभो नास्तीति वक्तुंशक्यत्वात्।

तर्हिघटादयो मध्यमावयविनस्सन्त्विति चेन्न। अन्येषामपि मध्यमावयवित्वेनान्त्यावयवित्वस्याकाशकुसुमायमानत्वात् साधु तद्विशेषितं लक्षणम्। अन्त्यावयवित्वासिद्धयैव लक्षणान्तरे अपि दूषिते। किंच द्वितीयेन्द्रियाश्रयत्वं च नेन्द्रियसमवायित्वमिन्द्रियावयवस्यापि शरीरत्वापत्तेः। शरीरे इन्द्रियसमवायित्वाभावेनासम्भवापत्तेश्च। इन्द्रियसंयोगित्वं तु घटादावप्यस्तीत्यतिव्याप्तम्। यावत् सत्तमिन्द्रियसंयोगित्वं विवक्षितमितिचेन्न। चक्षुरादीन्द्रियविरहिण्यव्याप्तिः। तत्र मात्रया चक्षुरादेरिन्द्रियान्तरस्य च सत्वान्नातिव्याप्तिरितिचेत् तथाप्यनिमेषचक्षुषि प्रेक्षमाणे पुरुषेतदातनोत्पन्नविनष्टबुद्बुदादावतिव्याप्तेः।

नचाद्यक्षणेनिर्गुणत्वाद्बुद्बुदस्य यावत्सत्तमिन्द्रियसंयोगाभावेनातिव्याप्त्यनवकाश इतिवाच्यम्। उक्तरीत्या शरीरादिष्वपि यावत्सत्तमिन्द्रिय संयोगाभावादसम्भवापत्तेः। नित्यमनःपक्षे आत्मनोविभुत्वाभ्युपगमाच्च यावत्सत्तमिन्द्रियसंयोगादात्मादिष्वतिव्याप्तिश्च। मृतशरीरेष्वपि तेश्शरीरत्वाभ्युपगमात् तत्राव्याप्तिश्च। इन्द्रियसंयुक्तकृत्स्न प्रदेशकं शरीरमितिचेन्न। शरीरान्तः प्रदेशेत्वगिन्द्रियासंयोगात्। तत्रापि त्वगिन्द्रियसंबन्धे जाठरजन्तूनां स्पर्शोपलम्भप्रसङ्गः।

मनसोऽप्यणुत्वेनैकदेशसंबन्धात्। तथाचासम्भवः। सर्वेन्द्रियावस्थितिदेशत्वं शरीरत्वमिति विवक्षित मितिचेदवस्थितिशब्देन संयोगमात्रविवक्षायामाकाशादावतिव्याप्तिः। अपृथक्सिद्धसर्वेन्द्रियत्वविवक्षायां मृतशरीरेऽव्याप्तिः। तत्रेन्द्रियाभावात्। उपष्टम्भकत्वविवक्षायां प्राणेऽतिव्याप्तिः। यावत् सत्त मेन्द्रियसंयोगायोग्यं शरीरमितिचेन्न। मृतशरीराव्याप्तेरुक्तत्वादाकाशेश्वराद्यतिव्याप्तेर्दुर्वारत्वाच्च। तन्मते मन इन्द्रियस्यानित्यत्वात्। इन्द्रियमिन्नत्वेऽपति प्राणव्यापाराधीन प्रवृत्तिनिवृत्यादिकं शरीरमितिविवक्षितमितिचेन्न। आत्मन्यतिव्याप्तेः। सर्वप्रवृत्तिषुतादधीन्यविवक्षितं आत्मनस्तु प्राणाधीन जीवनहेतु प्रयत्नसत्वाज्जातिव्याप्तिरितिचेत् तदासम्भवः। नहिवायूदकाद्याकृष्यमाणशरीर प्रवृत्तीनां प्राणाधीनत्वम्। अनइन्द्रियाश्रयत्वलक्षणमसमञ्जसम्।

तृतीयमपि लक्षणं न विचारसहम्। तथाहि। भोगायतनत्वमपि यदि भोगत्वस्थानमात्र तदा गृहारामादिष्वतिव्याप्तेः। यमाश्रित्येवात्मा भोगी तद्भोगायतनमिति विवक्षितमिति चेन्न। अशरीरिणामपिमुक्तानां भोगाभ्युपगमेनासम्भवापत्तेः। भोगशब्देन दुःखात्मकभोगो विवक्षित इतिचेन्न। इन्द्रियेष्वतिव्याप्तेः। आत्माहीन्द्रियाण्याश्रित्येवदुःखीभवति। ईश्वरनित्यमुक्तेच्छागृहीतशरीरेष्वव्याप्तिश्च। आत्मत्वेनभ्रमविषयत्व शरीरत्व मितिचेन्न। तैस्तैर्वादिभिरात्म तयाबुद्धयमानेषु प्राणेन्द्रियादिष्वतिव्याप्तेः।

अथशिरः पाणिपादहस्तादिमयं शरीरमितिचेन्न। शिलापुत्रकादिष्वपितत्सम्भवाद तिव्याप्तेः। प्राणादिमत्वे सतीतिविशेषणाज्जातिव्याप्तिरितिचेन्न। मृतशरीरादावव्याप्तेः। यदाकदाचित् प्राणादिमत्वं विवक्षितमिति नाव्याप्तिरितिचेन्न। स्थावरादिशरीरेष्वव्याप्तेः। तत्रशिरः पाण्याद्यनयवाभावात्। एवं लक्षणान्तराण्यपि। अतो यथोक्तमेवलक्षणं ग्राह्यम्।

तदेतच्छरीरं द्विविधम्। नित्यमनित्य चेति तत्र त्रिगुणकालजीवशुभाश्रयात्मकमीश्वर शरीरं नित्यम्। नित्यानां स्वाभाविकमनन्त गरुडविष्वक्सेनादिरूपं च। अनित्यं द्विविधम्। कर्मकृतमकर्मकृतं चेति। अकर्मकृतं चेश्वरस्य महादादिरूपम्। तथानन्तगरुडादिनित्यानां च ऐच्छिकंतत्तद्रूपम्। कर्मकृतमपि द्विविधम्। स्वर्मकल्पसहकृतकर्मकृतं केवलकर्मकृतं चेति। पूर्वं महतां सौभरिप्रभृतीनां शरीरम्। उत्तरंचान्येषां क्षुद्राणाम्। पुनश्शरीरं द्विविधम्। जङ्गममजङ्गमं चेति। काष्ठशिलावृक्षादिशरीरं अजङ्गमम्। शिलादिशरीरिणोपि जीवा विद्यन्त इति अहल्यावृत्तान्तात् सिद्धम्। यातिस्थावरतां नरः, श्मशानेजायते वृक्षः कङ्कगृध्रनिषेवितः। इत्यादि प्रमाणमिहानुसन्धेयम्। इदं चव्यष्टि नामरूपभाजां सर्वेषां जीवानु प्रवेश श्रुतिबलात् सिद्धम्।

जङ्गमं चतुर्धा । देवमनुष्यतिर्यङ्नारकि भेदम् । असुरयक्षराक्षसादयोऽपि देवयोनयः ॥ भूलोकवृत्तिब्राह्मणक्षत्रियवैश्यशूद्रादयो मनुष्ययोनयः । तेषांश्रुतिस्मृत्युक्तविधिनिषेधविषयता । देवादीनामपि सात्त्येव । प्रायश्चित्ताध्वातपेयोमनस्विद्यादिश्रवणात् । सृमरपक्षिशरीसृपादयः तिर्यग्योनयः । नारकिणस्तु दुःखैकतानादुस्त्यजाध्यविग्रहाः । जङ्गम पुनः त्रिविधम् । योनिजमयोनिज चेति । अयोनिजंतुदेवादिषु त्रिष्वपि सम्भवति । प्रजापतिमधुकैटभधृष्टद्युम्नैरावतस्वेदजादिष्वयोनित्रशरीरदर्शनात् । तत्रयोनिजशरीरेष्वेव पञ्चमाहुत्यपेक्षा । योनिप्राप्तेः पूर्वमाकाशवायु धूमाभ्रमेघवृष्टित्रीह्यरेतस्सिक्षु अन्यशरीरेषु संयोगमात्रम् तत्रत्रीह्यादिप्राप्तेः पूर्वंशीघ्रमेवनिष्क्रमणं ततः परं कृच्छ्रान्निष्क्रमणम् । द्युपर्जन्यपृथिवीपुरुषान्तरं पञ्चमे योषिदग्नौहुतस्यजीवस्यतत्तत्काल प्रतिनियतपरिणामशालिशरीरप्राप्तिः । तत् प्रकारविशेषा आयुर्वेद योगशास्त्रेषुविशदमनुसन्धेयाः ।

एवं जरायुजाण्डजस्वेदजोद्भिज्जादिभेदोऽपिविभाज्यः । एषां व्यष्टिजीवशरीराणामीश्वरं प्रतिशरीरित्वं सद्वारकमद्वारकं चेति एकस्सम्प्रदायः । सद्वारकमेवेत्यन्यः । प्रथमः पक्षः भाष्यकाराभिप्रेतः । द्वितीयस्तु विवरणकाराङ्गीकृतः । अय च विवादः देवमनुष्यादिव्यष्टिदेहविषयः । दिव्यमङ्गळविग्रहाद्यचित्सु सद्वारकत्वायोगात् । एवं समष्टितत्वानां साक्षात् परम पुरुषशरीरत्वम् । अण्डसृष्टिसमनन्तरमाविदेवमनुष्यादिनामरूपव्याकरणमात्र एवानेनजीवेनेत्यादि श्रुत्यनुरोधेन सद्वारकत्वम् । तत्राप्यद्वारकं सद्वारकं चेति न कश्चिद्दोषः । नचैकस्ययुगपदनेकं प्रतिशरीरित्वमनुपपन्नम् । तल्लक्षणसत्वेनानेकशरीरत्वोपपत्तेः । अनेक प्रति शेषत्वादिवत् । न च स्वतन्त्रशरीरभूतत्रिगुणद्रव्यस्य जीवानुप्रवेशमात्रेणेश्वरं प्रति शरीरत्वमपसरति । न च तदान्यद्रव्यं भवति ।

द्रव्यामेदा व्याकृतभूतेन्द्रियादीन् प्रतिचेश्वरस्यान्तर्यामित्वम् । अत एव तेषां तच्छरीरत्वं श्रूयते । सुषुप्तिमूर्च्छाद्यवस्थासुच स्वाभाविकमीश्वरनियाम्यत्वमेव देहदेहिनोर्दृश्यते । अत इदमद्वारकनियमनं द्वितीयपक्षे न स्यात् । जीवसत्तामात्रं च न देहनियमनौपयिकम् । तदानीं ज्ञानेच्छारहिततया गगनादिसत्त तुल्यत्वात् । अतस्सर्वावस्थानां सर्वद्रव्याणामीश्वरं प्रत्येवस्वतः शरीरत्वम् । जीवं प्रतितु भगवत्सङ्कल्पकृतमिति समीचीनोऽयं पन्थाः । इति श्रीवत्सकुलतिलक श्रीकृष्णसूरिचरणारविन्दसेवा सम्पादिते

श्रीनिवासराघवदासेन विरचिते श्रीरामानुजसिद्धान्तसंग्रहे प्रकृति परिच्छेदस्समाप्तः ॥

श्रीः

श्रीमते लक्ष्मीनृसिंह परब्रह्मणे नमः ।

हरिः ओम्

जीवनिरूपणम् ।

अथ जीवो निरूप्यते । अणुत्वे सति चेतनत्व शेषत्वे सति चेतनत्वमित्यादि तल्लक्षणम् । पार्थिवाद्यणुभिरतिव्याप्तिवारणाय चेतनत्वम् । तावन्मात्रोक्तौ ईश्वरेऽतिव्याप्तिः । अतोऽणुत्वे सतीति । यद्यपीश्वरेऽप्यणोरणीयानित्यणुत्वं श्रुत तथापि न तत् स्वाभाविकम् । महतो महानित्यसाङ्कल्यापत्तेः । किन्तूपासकहृदयाल्पस्थानवृत्तिदिव्यपङ्कजविग्रहविशिष्टत्वे पाधिकृतं तत् । यद्वाऽणुदेशेऽपीश्वरस्थित्युपपादनेनविभुव्याप्तिं बोधयतिमाश्रुतिः । नत्वणुत्वम् । आहुश्चार्याः

अणोरणीयान् महतो महीयानित्यनु श्रुतेः । विभुव्यापित्वतात्पर्यान्नमिथो बाधमृच्छति इति । अतो नेश्वरेऽतिव्याप्तिः ।

ननु य आत्मनितिष्ठन् । अन्तः प्रविश्यशास्ता । अन्तर्बहिश्चतत्सर्वमित्यादिभिरणूनामपि व्याप्त्यभिधानात् तदनुगुण्येनाणोरणीयानित्यस्य यथा श्रुतार्थपरत्वेनेश्वरेऽप्यणुत्वं सिद्धयतीतिचेन्न । अणोरन्तः प्रवेशस्य विभोर्बहिः प्रदेशस्य चासम्भवेन तत्रान्तर्बहिर्व्याप्तिप्रतिपादनासम्भवात् । यत्रोक्तप्रदेशद्वयसम्भवः, तत्रैवान्तर्बहिर्व्याप्त्यभिधानात् । यत्र नोक्तप्रदेशद्वयसम्भवस्तत्रव्याप्तिमात्राभिधानस्वीकारान्नाप्यन्तर्व्याप्तिरीश्वरस्य । आहुश्चार्याः,

अन्तर्बहिश्च तद्व्याप्तिः तत्र यत्रोभय भवेत । विभोरणोश्च न बहिर्नान्तस्तस्मान्नसातयोः । इति

ननु श्रीकृष्णावतारे जगदन्तर्गतबालोदरे सर्वजगत्स्थितिदर्शनात् अल्पपरिमाणे पृथूनां ग्रासनावश्यकत्वात् पृथोरीश्वरस्याप्यन्तर्व्याप्तिसम्भव इति चेन्न . अत्राप्यणुभूतबालशरीरेण पृथेर्जगतः ग्रासासम्भवात् । किंतु भगवद्विग्रहादेस्सङ्कोचविकासार्हावस्थाद्वयाभ्युपगमेन तथा दर्शनोपपत्तेः । यदाजगत् बहिष्ठ दृश्यते तदाशरीरस्यसङ्कोचावस्था, यदोदरगत दृश्यते तदाविकासावस्था । यद्वाजालरन्ध्रेणगृह्यमाणरश्मौजालमध्यगतस्थ इवाभासते । तद्वत् सूक्ष्मशरीरग्राह्य सर्वजगतःस्तन्मध्यगतत्वेन भानसम्भवात् परिमितविग्रहकालेऽपरिमितविग्रहेण तच्छरीरान्तर्वर्तित्वं जगतः परिमितापेक्षया बहिष्ठत्वं च । दृश्यते च चक्षुनेत्यादेः रश्मोविशेषसंबादकालतत्कुक्षि प्रवेश कालयोस्स्थूलसूक्ष्मविग्रहत्वम् । अतोऽविरुद्धत्वात् परिमितवस्त्वन्तर्वृत्तित्वं न पृथुवस्तुनः । आहुश्चार्याः ।

यदल्पपरिमाणेन पृथूनांग्रसनं श्रुतम् । अचिन्त्यमिदमित्येकेचिन्तनभ्रममीरवः ॥ इति

नन्वेवमपि ईश्वरस्य सर्वशक्तत्वादणोरन्तर्विभोर्बहिश्च प्रवर्तनं घटताम्। अन्यथा सर्वशक्तत्व भङ्ग प्रसङ्गात्। तथाहि। सर्वशक्तत्वं हि सर्वकार्यनिर्वाहकत्वम्। अत्राणोरन्तः प्रवेश कार्यस्य विभेर्बहिर्व्यापन कार्यस्यचाशक्तत्वेन सर्वनिर्वाहकत्वरूपसर्वशक्तित्वहानिस्स्यात्। ततश्चाणोरन्तः प्रवेश आवश्यक इति अण्वन्तः प्रविष्टस्याणुतरत्वप्रसङ्गेन पूर्वोक्तजीवलक्षणातिव्याप्तिर्दुर्वारेतिचेदुच्यते। विरुद्धकार्यघटनात्तस्य न सर्वशक्तत्वम्। किन्तु यत्कार्यं तत् सर्वङ्करोति ततश्चान्यैरप्यशक्य करोतीतिसिद्धया तादृशमेव तस्याघटितघटनरूपं सर्वशक्तत्वमागमाभिप्रेतमविरुद्धं स्वीक्रियते। नव्याघातघटनात्। तथासतिसप्तभङ्ग्यादिजल्पनजैनमतद्वेषाभावप्रसङ्गात्। आहुश्चाचार्याः।

तस्मादीशोविरुद्धद्वितयमघटयन सर्वशक्तिः कथंस्यात् तन्नव्याघातशून्येष्वनितरसुलभेष्वस्य तादृक्त्वसिद्धेः। इति।

अतस्सर्वव्यापकेश्वरे तद्विरुद्धाणुत्वासम्भवान्नातिव्याप्तिः। एवं शेषत्वमात्रोक्तौ घटादावतिव्याप्तिः। चेतनत्वमात्रोक्तौ ईश्वरेऽतिव्याप्तिः। अतश्शेषत्वेसतिचेतनत्वमुक्तम्। नन्वेवमपि लक्ष्म्यामतिव्याप्तिः। तस्यां ईश्वरशेषत्वाच्चेतनत्वाच्चेतिचेन्न। शेषत्वपदेनेश्वरत्वपर्याप्त्यधिकरणनिरूपितशेषत्वस्य विवक्षितत्वात्। ईश्वरत्वस्य श्रीश्रीशयोः पर्याप्तत्वात्।

आकारेणोच्यते विष्णुस्सर्वलोकेश्वरोविभुः।

ईश्वरस्सर्वभूतानाम्। ईश्वरीं सर्वभूतानाम्। अस्येशाना जगतो विष्णुपत्नी।

त्वया च विष्णुनाचाम्ब जगद्व्याप्तं चराचरम्।

यथासर्वगतो विष्णुस्तथैवेयं द्विजोत्तम।

अस्या मम च शेषं हि विभूतिरुभयात्मिका।

इत्यादि प्रमाणशतैरुभयेरविशेषेण जगत् प्रतीश्वरत्वाभिधानात्।

ईश्वरत्वं श्रीश्रीशयोर्व्यासज्यवृत्ति। अतः लक्ष्म्या अपीश्वरत्वपर्याप्त्यधिकरणत्वेन तन्निरूपितशेषत्वस्य तस्यामभावेन नातिव्याप्तिः। सचजीवोदेहातिरिक्तः। ममगेहं ममक्षेत्रमितिवन्ममदेहः ममशिर इति व्यतिरेकप्रतीतेः। किञ्च, शिरःपाण्यादि संघातातिरिक्तावयविनो निरस्तत्वात् संघातस्य संघातिव्यतिरेकाभावाच्छिरः पाण्याद्यवयवेष्वेव चैतन्यं वाच्यम्। तत्रापि विनिगमकाभावात् सर्वावयवेषुचैतन्यस्य स्वीकार्यत्वेनदेहभेद इवाभिप्रायभेदप्रसङ्गेन विरुद्धाभिप्रायानेकग्रामण्यधिष्ठितग्रामवत् प्रवृत्तिनिवृत्त्यादिकार्यं किमपिनस्यात्। नन्वविरुद्धाभि

प्रायानेकपुरुषाधिष्ठितग्रामवदन्योन्यविरोधप्रसङ्ग इतिचेन्न । अनादौ संसारे कदाचित् विरोधस्यापि प्रसक्त्या परस्पराविवादनियमो नस्यात् । अतो देहातिरिक्तएवात्मा । न चासौ बाह्येन्द्रियाणि । तेषां बहुत्वेन पूर्वोक्तपरस्पराविवादनियमानुपपत्तिप्रसङ्गात् । तेषां प्रतिनियतविषयत्वादन्यानुभूतस्यान्येन प्रतिसन्धानाभावप्रसङ्गाच्च ।

न च तेष्वन्यतमः । नियामकाभावात् । न च तत्समुदायः । समुदायोहमिति प्रत्ययप्रसङ्गात् । अन्ततस्समुदायिषु पर्यवसानेनपूर्वोक्तदोषप्रसङ्गाच्च । स्वप्नदशायां बाह्येन्द्रियो परतो सिंहोऽहं व्याघ्रोहमित्यात्मदर्शनेन बाह्येन्द्रियवर्गाद्व्यतिरेकप्रतीतेश्च । देहेन्द्रियाणामुत्पत्तिविनाशयोगित्वात् कृतहानाकृताभ्यागमप्रसङ्गाश्च । नापिमनः आत्मा । मनसाह्येव पश्यतीति श्रुत्यासुखादिप्रतीतिस्सकरणिकाक्रियात्वादित्यनुमानेन च कर्तुरात्मनः करणतया मनसस्सिद्धेः ।

एकादशं मनश्चात्रदेवा वैकारिकास्स्मृताः ।

इत्याहङ्कारिकत्वेन मनस अनित्यत्वात् कृतहानाकृताभ्यागमप्रसङ्गाच्च ।

नापि प्राण आत्मा । तेष्वपि देहोक्तयुक्तिसाम्यात् । नापि धीः । ज्ञातृधर्मतया नश्वरतयाच धियः स्फुरणात् सएवाहमिति प्रतिसन्धानानुपपत्तेः । न चेदं प्रतिसन्धानं भ्रान्तिरितिवाच्यम् । बाधरहितत्वात् । तथा चात्मासिद्धौ,

देहेन्द्रियमनः प्राणधीभ्योऽयोनन्यसाधनः । नित्योव्यापी प्रतिक्षेत्रमात्माभिन्नस्वतस्सुखी ॥

इति । व्यापी अतिसूक्ष्मतया सर्वचेतनान्तः प्रवेशयोग्य इत्यर्थः । न च घटमहं जानामि पटमहं संवेद्मीत्यादि प्रतीतेरहं प्रत्ययविषय आत्मान्तः करणम् । तस्य परार्थत्वात् बुद्धयैवहि परार्थात् प्रत्यगर्थोविभिद्यते । अतोहमर्थ आत्मा । स एव ज्ञाता । अहं जानामीति ज्ञातृत्वेनैवाहमर्थ प्रतीतेः । आत्मनोऽहं प्रत्ययगोचरत्वप्रतिक्षेपकाणि, आत्मा नहि प्रत्ययगोचरः आत्मत्वात् । अजडत्वान्निर्विकारत्वात् ब्रह्मवदित्यादीनि-प्रत्यक्षागमबाधात् घटादिसपक्षव्यावृत्तत्वेनासाधारणत्वाच्च निरस्तानि ।

ज्ञातृत्वकर्तृत्वादिकं नात्मधर्मः । धर्मत्वाददृश्यत्वादित्यादिकमपि प्रत्यक्षबाधाच्छास्त्रबाधात् विपक्षेबाधकाभावाच्च दुःस्थम् । अतोहमर्थ आत्मा । स एव ज्ञाताकर्ता । ज्ञातृत्वंचास्य स्वाभाविकाकार इति न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति श्रुत्यादिसिद्धम् । भोक्तृत्वहेतुभूतं कर्तृत्वं च भोक्तुर्जीवस्यैव । तच्चसामान्यतः परमपुरुष हेतुकमिति शारीरकमीमांसायां स्थापितम् ।

अस्य च नित्यत्वनानात्वाणुत्वादीनि श्रुत्युपपत्तिभ्यां सिद्धानि। नित्योनित्यानां चेतनश्चेतनानाम्। अजोनित्यश्शाश्वतोऽयं पुराणः॥ वालाग्रशतभागस्य शतधाकल्पितस्य च। भागोजीवस्सविज्ञेयः सचानन्त्याय कल्पते इत्यादि श्रुतिभिर्नित्यत्वनानात्वाणुत्वादीनिसिद्धानि। उपपत्तिश्च - यदि स्थिरत्वं नात्मन्यभ्युपगम्यते तदा मासिकुष्याद्यैहिकफलसाधने, कस्यापि प्रवृत्तिर्न स्यात्। देहपर्यन्तस्थायित्वाभ्युपगमे आमुष्मिकस्वर्गादिफलसाधनयागादौ प्रवृत्तिर्न स्यात्। आकल्पस्थायित्वाभ्युपगमे मुक्तिसाधन भक्त्यादौ प्रवृत्तिर्न स्यात्। आमोक्षस्थायित्वाभ्युपगमे मुक्त्यैश्वर्य प्रतिपादकशास्त्राणां नैष्फल्यं स्यात्। अनुभवितुरभावात्।

ननु विज्ञानघन एवैभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीति जीवनाशश्रूयते इतिचेन्न। म्रियमाणजन समापस्थाना सर्वेषामदर्शनमात्रप्रतिपादकत्वात्तस्याः। विनश्यतीत्यस्य च अदर्शन इतिधातोरुत्पन्नत्वनादर्शनार्थकत्वात्। स्मर्यते च अदर्शनादिहायातः पुनश्चादर्शनं गतः। इति। अन्यथा अविनाशी वा अरेयमात्मा इत्यादिविरोधात्। नन्वेवमपि न प्रेत्य संज्ञास्ती त्यमुक्तस्य निस्सम्बोधत्व श्रुत्या नाशस्सद्धयोदात चेन्न। देहात्मैक्यबुद्धेर्देहानुबन्धनाख्या भेदस्य वा निवृत्तौ तात्पर्यात्। न चैवमात्म यथानद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्तिनामरूपे विहायात निदर्शनात् मुक्तोप्यस्तमयोऽपिचेन्न। तत्र यथा प्राक्षेपजलस्य विद्यमानजलसम्मेळनात्तस्य प्राचीन नामरूपाभाव एव नतु तत्स्वरूपनाशः। तथा मुक्तस्यापिप्राचीननामरूपाविरह एव। नस्वरूपनाशः। तस्यानित्यत्वात्। अन्यथा पयः प्रस्थद्वयसम्मेदे प्रस्थशतत्व प्रसङ्गः। यथोदकमित्यारभ्य तादृगेव भवतीति श्रुत्यन्तरविरोधाच्च।

मुक्तिदशायां जीवभेदानिवृत्तिवादाश्च कर्मकृतदेवादिवैषम्यानिवृत्तिपराः। ननु ब्रह्मवेद ब्रह्मैव भवतीत्यवधारणाज्जीवानावृत्तिर्गम्यते इति चेन्न। इवकारस्येव एवकारस्यपरमसाम्य प्रतिपादकत्वात्[श्लो] स्पर्धमानोविष्णुरेव भूत्वेत्यत्र एवकारस्य साम्यप्रतिपादकत्व दर्शनात्। अतो नित्यः आत्मा। सच सुखदुःख ज्ञत्वाज्ञत्वादिभिः परस्पर भिन्नः। जीवाद्वैत प्रतिपादकवचनानितु प्रकारैक्यविषयाणि। प्रकारैक्यं च सर्वेषामात्मनां ज्ञानमयत्वमेव। प्रकारैक्येचैकादिशब्दाः प्रयुज्यन्ते। यथाऽयमग्नेरेकोवाग्निरेवंतरामसुप्रावरेकयमित्यादेच। सर्वजीवानां संसार्यवस्थायां स्वरूपतः मुक्त्यवस्थायां गुणतोपि च साम्यं श्रुतिस्मृतिसिद्धम्। तत्र जीवभेदनिषेधवचनान्यपि प्रामाणिकस्वरूपभेदव्यावृत्तदेहात्माभिमाननिबन्धनद्वत्वादि भेदानिषेधपराणि। एषां मणुत्वं च निरूपयिष्यते।

सचायमात्मा अहमितिस्वयमेव प्रकाशते। अस्यस्वयं प्रकाशत्वं च स्वस्मा एव। परस्य तु तद्ज्ञानविषयतयैवात्मा प्रकाशते। स्वस्यापि प्रमाणान्तरावसेयाणुत्वशेषत्वनियाम्यत्व

नित्यत्वादिविशिष्टरूपेण शास्त्रजन्यज्ञानविषयत्वमस्त्येवेतिचेन्मनः नित्यत्वादिविशिष्टतया शास्त्रैकसमधिगम्यस्वरूपमात्मप्रकाशस्य सिद्धान्तेऽनभ्युपगमेनात्मनस्स्वयं प्रकाशत्वोक्तिः कथं घटत इति वाच्यम्। जाग्रत्स्वप्नसुषुप्त्यावस्थासु सर्वत्राहमहमेत्यनुभवात्। प्रत्यक्त्वैकत्वादि-विशिष्टत्वमेवार्थसिद्धमित्युपेक्षणेनात्मप्रकाशत्वोक्तेः सम्भवात्।

अथ प्रत्यक्त्वादीनां धर्मिभास्यत्वाभ्युपगमे श्रीमत् सारशास्त्रविरोधः। तत्र हि धर्म भूतज्ञानस्य विषयित्वं धर्मव्यपेक्षया व्यावर्तकनित्यत्वाविषयित्वं च स्वव्यतिरिक्तकिञ्चित् प्रकाशकत्वमित्युक्तम्। धर्मिणोपि प्रत्यक्त्वादि प्रकाशकत्वे स्वव्यतिरिक्त किञ्चित प्रकाशकत्वस्यापि प्रसक्तत्वात् तद्विरोधपरिहाराय धर्मिस्वरूपस्य प्रकाशकत्वस्वीकारे 'सविशेषविषयत्वात् सर्व प्रमाणानां स्वापमदमूर्च्छाद्युपप्लवे सति विशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः' इति श्रीभाष्यविरोधः। अतः उपपन्नः स्याद्गवज्जुरितिन्याय इति चेन्न। श्रीमद्भाष्यानुरोधेन प्रत्यक्त्वादि विशिष्टस्यैवात्मनः प्रकाशकत्वं वाच्यम्।

श्रीमत्सारशास्त्रविरोधस्तु एवं परिहियते। स्वव्यतिरिक्त किञ्चित्प्रकाशकत्वमित्यस्य स्वस्मात्पृथक्सिद्धधर्मव्यतिरिक्तकिञ्चित्प्रकाशकत्वमित्यर्थः। धर्मिणस्स्वव्यतिरिक्त प्रत्यक्त्वादि प्रकाशकत्वेपि तस्य तद्पृथक्सिद्धधर्मत्वेनविरोधाभावात्। यद्वा स्वव्यतिरिक्तेत्यस्य स्वसंयुक्त प्रकाशकत्वमित्यर्थः। तेन प्रत्यक्त्वादेस्संयुक्तत्वेन न दोषः।

न च तथार्थकोचे मानाभावः इतिवाच्यम्। तदीयबहुतरश्रुतिविरोधपरिहाराय तथा संकोचस्यावश्यकत्वात्। न च धर्मिवत् प्रत्यक्त्वादीनामपि स्वप्रकाशकत्वाभ्युपगमेन धर्मिभास्य त्वाभावेनातिप्रसङ्गाप्रसक्त्या तथा संकोचोनकार्य इति वाच्यम्। प्रत्यक्त्वैकत्वादीनामद्रव्यत्वेन तद्वृत्तिधर्मान्तराभावेन स्वमात्रप्रकाशोवाच्य इत्यद्वैतिमतविजव प्रसङ्गात्। ज्ञानव्यतिरिक्त प्रत्यक्त्वादेस्स्वप्रकाशकत्वेसिद्धान्तविरोधाच्च। अन्यथा बुद्धिसरे बुद्धिर्द्रव्यं विकारान्वयात् इतरवद् घटवच्चाजडत्व दित्यादिनाऽजडत्वहेतुनाबुद्धेर्द्रव्यत्वं साध्यते। तत्राजडत्वहेतोरद्रव्ये प्रत्य-क्त्वादौ व्यभिचारादिरोधस्स्फुट एव।

एव मत्रैवान्यत्रनिर्विकल्पस्य विशिष्टविषयत्वसाधनावसरे "धीत्वादेर्वाविशिष्टं प्रथयति जातिमती बुद्धिरादयभेदैः" इत्यत्र प्रथमाक्षणविज्ञातजनिता बुद्धिः विशिष्टविषया धीत्वात् संप्रति-पन्नवत्। आत्मस्वरूप प्रत्ययश्चाहंत्वादिविशिष्ट प्रकाशात्मेत्यङ्गीचकुरिति सर्वार्थसिद्धिविरोधश्च। एवं मतिपरिच्छेद्यधर्मिज्ञानस्यापिविशिष्टत्वात् परमतादतिरेक इति। न्यायसिद्धाञ्जन एवान्यत्र वक्ष्यामः एवं हि सुप्त्युत्क्रान्त्यामर्शयोस्तुल्यत्वस्यापीत्यनेन प्रत्यवमर्शेन नतदानीमेवाह मर्थस्यैवात्मनस्सुप्तित्व ज्ञातृत्वं च ज्ञापत इत्युक्तम्, तत् स्वरूपानुकूल्यविवक्षया प्रत्यक्त्व विवक्षया चेति न विरोध इत्यादिरिहापरिशेषश्च।

एवं प्रकाशश्चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यमिति श्री भाष्य व्याख्यानावसरे उच्यते । व्यवहार कर्मत्वरूपं व्यवहारानुगुण्यं साधारणम् । तद्धि व्यवहार प्रतिसम्बन्धित्वं तदेव भासमानत्वम् । घटः प्रकाशत इति व्यवहारश्च तन्निबन्धनतयाभ्युच्यः । व्यवहारप्रतिसम्बन्धित्वं प्रतिहेतुत्वरूपं व्यवहारानुगुण्यं ज्ञानस्यैव । तत्र प्रत्यक्त्वानुकूलत्वैकत्वलक्षणस्य व्यवहार प्रतिसम्बन्धितां प्रतिहेतुत्वरूपं व्यवहारानुगुण्यं ज्ञातृस्वरूपभूतज्ञानस्यैव । स्वस्वगतैकत्वपरकत्वानुकूलत्वाद्याकारकस्वाश्रयतत्सम्बन्धत्वविषयतत्सम्बन्धानां व्यवहारप्रति सम्बन्धित्वे हेतुत्वरूपं व्यवहारानुगुण्यं तु धर्मभूतज्ञानस्यैव । अतः स्वपरव्यवहारानुगुण्यं ज्ञानासाधारणप्रकाशलक्षणमितियुक्तमिति श्रुतप्रकाशिकाविरोधश्च ।

एवं, 'नन्विदं प्रत्यक्त्वं न तावदात्मस्वरू'पमित्यारभ्य इतरथाधर्मभूतज्ञानवद्विषयित्व प्रसङ्ग इति वाच्यम् । स्वस्वापृथक्सिद्धधर्मव्यतिरिक्तविषयित्वं नास्तीत्यत्रतात्पर्यात् विषयित्वाभावप्रवादस्येत्यादि उत्तरत्राप्युच्यते । अस्यैव सुषुप्तिदशायां मन्दानुकूल्यं भासते इति न चेज्जडपदार्थवत् ज्ञत्वम् । न च तत् स्वाभाविकमिति वक्तुं शक्यते । आत्मनो मन्दानुकूल्य स्वभावत्वानभ्युपगमात् । न च तद्धर्मभूतज्ञानवेद्यम् । तस्येन्द्रियाधीनप्रसरणतत्वेन सुषुप्तिदशायामसम्भवात् । अतःकर्माधीनमन्दानुकूल्यमात्मस्वरूपाद्भिन्नम् । तत्स्वरूपज्ञानेन भासत इत्यकामेनापि स्वीकर्तव्यम् । एवमुत्तरत्रधर्मिज्ञानस्यापि विशिष्टत्वात् परमतादतिरेक इत्येव व्याख्यातम् ।

ननु विषयाश्रयशून्यज्ञानाभ्युपगमे परमतादविशेष इत्याशङ्क्य विषयादिविरहेऽपि परैरिव न सर्वात्मनानिर्विशेषत्वमङ्गीक्रियते । विशेषान्तरस्वीकारादित्यभिप्रायेणाह धर्मिज्ञानस्यापीति मतिपरिच्छेदे । यत्तुभाष्ये एवं हि सुप्तोत्थितस्य परामर्शः । सुखमहमस्वाप्समित्यनेन प्रत्यवमर्शेन तदानीमेवाहमर्थस्वेवात्मनस्सुखत्वं ज्ञातृत्वं च ज्ञाप्यते इत्युक्तम् । तत्स्वरूपानुकूल्यविवक्षया प्रत्यक्त्वविवक्षया चेति न विरोध इति ग्रन्थव्याख्यायां स्वरूपानुकूल्येति । अनुकूलत्वमेवसुखित्वम् । प्रत्यक्त्वमेव ज्ञातृत्वमिति भावः । इत्यादि श्रीरङ्गरामानुजस्वामि ग्रन्थश्च विरुद्ध्यते । एवं सूक्त्यन्तराणि विस्तरभयान्नोदाहृतानि । अतोधर्मी प्रत्यक्त्वादि विशिष्टतयैव भासत इति सिद्धम् ।

यद्यपि सर्वार्थसिद्धिव्याख्यायामानन्ददायिन्यां, ज्ञातुर्ज्ञेयावभासोमितिरितिश्लोके, स्वस्यैवात्मातुसिद्धिर्मतिमनुभवतिस्वान्यबोरिति श्लोके च व्याख्यानपद्धतौ प्रत्यक्त्वादीनामपि स्वयं प्रकाशत्वमस्तीति मतान्तरमित्युक्तम् । तथाप्युक्त श्रीभाष्ये श्रुतप्रकाशिकाविरोधाद्बहुतराचार्यसूक्तिविरोधादुक्तानुपपत्तिपरिहारासम्भवाच्च तदन्यदीयमेवेतिमन्यामहे । इत्यलं विस्तरेण ।

सोऽयमात्मा ज्ञानगुणकः ज्ञानस्वरूपश्च । यद्यपि सत्यं ज्ञानमित्यत्र ज्ञानमित्यन्तोदात्तत्ववलात् ज्ञानाश्रयत्वार्थकत्वमङ्गीकार्यम् । आद्यदात्तात् ज्ञानशब्दात्तदस्यास्तीत्यस्मिन्नर्थे अर्श आद्यजित्यच्प्रत्यये चित अन्तोदात्तत्वमित्यन्तोदात्तत्वात् । ज्ञानशब्दस्य विज्ञानं यज्ञं तनुत इत्यादिषु तद्गुणसारत्वन्यायेन ज्ञानगुणकत्वार्थकत्वं स्वीकर्तव्यम् । तथाऽप्येषहि द्रष्टाश्रोता रसयिता घ्राता मन्ता बोद्धा कर्ताविज्ञानात्मा पुरुष इत्यत्र द्रष्टाश्रोतेति विशेषतो बोद्धेति सामान्यतः प्रपञ्चितस्य ज्ञातृत्वस्य पुनः पुनर्वचने प्रयोजनाभाव च विज्ञानात्मशब्देन ज्ञानस्वरूपत्वं सिद्धम् ।

एवं यथा सैन्धवघन इत्यत्ररसदृष्टान्तत्वात्तद्विज्ञानघन शब्देनाज्ञानात्मकत्वं वाच्यमिति । ज्ञानस्वरूपस्य ज्ञानगुणकत्वं च तेजःस्वरूपदीपस्य तेजो रूपप्रभा गुणवदुपन्यस्तम् । एवंधर्मधर्मिणोर्ज्ञानत्वस्वप्रकाशत्वाभ्यां साम्येपिस्वसंयुक्त प्रकाशकत्वरूपविषयित्वतदभावाभ्यां वैषम्यम् । ज्ञानत्वं तु साधारणम् । तच्च कस्यचित् प्रकाशत्वरूपं तदेवोभयत्रानुवृत्तं ज्ञानशब्द प्रवृत्तिनिमित्तम् । तच्चज्ञानत्वं धर्मिणि प्रत्यक्त्वानुकूलत्वैकत्वादिविशिष्टस्य स्वस्यैव प्रकाशत्व रूपम् । धर्मनिष्ठ तु तावदतिरिक्तघटादिप्रकाशत्वरूपमिति विशेषः ।

आत्माऽणुः । वालाग्रशतभागस्य, आराग्रमात्र, उत्क्रान्तिगत्यागती नामित्यादि श्रुतेरुपपत्तेश्च । ननु आत्मनो विभुत्वं वाच्यम् । एकस्य पुरुषस्य युगपदखिलभुवनेष्वनेककार्योत्पत्तेः । तच्चस्कार्य प्रत्यदृष्टवदात्ममनसंयोगस्य कारणत्वाच्छरीरगमनेन तत्र तत्र सुखाद्युपलब्धेश्च, शरीरेपि, पादे मे वेदना शिरसिमेसुखमिति युगपदनेकावयवेषु सुखदुःखसाक्षात्काराच्च अदृष्टं स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियांजनयति । अन्योन्याभावविरोधि क्रियाहेतुगुणत्वात् । संयोगेऽयमिचार वारणायान्योन्याभावविरोधीति । अन्योन्याभावविरोधित्वं च स्वाश्रय प्रतियोगिक भेदासामानाधिकरण्यम् । संयोग आश्रयान्तरे क्रियाजनकत्वरूपसाध्याभाववति स्वाश्रयप्रतियोगिक भेदासामानाधिकरण्यवत्तद्धेतोरभावान्न व्यभिचार इत्यनुमानाच्च आत्मनोविभुत्वं वाच्यं इति चेन्न ।

जीवस्याणुत्वेऽप्यदृष्टवदात्ममनसंयोगादेशान्तरेषु कार्यसिद्धेर्निष्प्रत्यूहत्वात् । अदृष्टस्येश्वर प्रीतिकोपरूपत्वेन तदाश्रयस्यविभुत्वात् । शरीरगमने च शरीरप्रत्युक्तात्मगमनेन तत्तत्र सुख दुःखाद्युत्पत्तेरिन्द्रियादिवत् । आत्मनश्शरीरैकदेशवृत्तित्वेपि धर्मभूतज्ञानव्याप्त्यासर्वावयवाव च्छेदेनसुखादि प्रतीतेः । अणुत्वे तूपलम्भ श्रुतिस्वारस्यम् । विभुत्वे तु तद्वैराग्यं कल्पनागौरवं च । नित्यस्सर्वगतस्स्थाणु, तथा क्षेत्रज्ञशक्तिस्सावेष्टिता नृपसर्वगा । इत्यादिषु सर्वगतत्वोक्तिः । अग्निर्यथैको भुवनं प्रविष्टः - वायुस्सर्वगतो महान् इत्यादिवज्जीवजातीयानां पर्ववानु

प्रदेशात् धर्म भूतज्ञानद्वारा सूक्ष्मानु प्रवेशसूक्ष्मतयावा निर्वाह्या । अत एव नित्योऽव्यापीत्यात्म-सिद्धिवचनमप्यविरुद्धमप्यतिसूक्ष्मतयाऽचेतनान्तः प्रवेशस्वभावः इति श्रीभाष्ये व्याख्यातम् । उत्क्रान्तिगत्यागतीनामित्यादिसूत्रैश्च क्रियावत्त्वेनाणुत्वं समर्थितम् । हृत्प्रदेशस्थितस्याणोर्जीवस्य ज्ञानद्वारानानाधिष्ठानमुपपन्नम् । अत एव सौमनस्यादीनां नानादेशाधिष्ठानं घटते । अनवस्थितिरपि विद्युन्मण्डलस्थितिः ।

किञ्चविभुत्वाकाङ्क्षादिषु शब्दादीनामव्याप्य वृत्तित्वं युष्माभिरिष्यते । एवमात्मनि ज्ञानेच्छाप्रयत्नादीनामप्यव्याप्यवृत्तित्वं तथा दृष्टमपिस्वाश्रयैकवृत्ति । तच्च स्वाश्रयसंयोगिनिक्रियां जनयत्स्वोत्पत्तयवच्छेदकशरीरसंयुक्त एवजनयेत् प्रयत्नवत् । अन्यथा शरीरावच्छिन्नस्य प्रयत्नेनदूरस्थशिलादिचलनप्रसङ्गात् नचादृष्ट तत्तत्रगच्छति । अमूर्तत्वात् । अतश्शरीरा वच्छिन्नात्मादृष्टादेशान्तरकार्याणामनुत्पत्तिरस्यात् । ननुअन्यात्मनिवर्तान्यनेकान्यदृष्टानि तत्र सन्ति, तैरेव दूरस्थकार्योत्पत्तिरितिचेन्न । देशान्तर भ्रातृव्यशरीरभेदनायामिचारकरणे तज्जन्या दृष्टस्यैतद्देशवृत्तिशरीरावच्छिन्नात्मन्युत्पत्त्या तेन देशान्तरस्थशरीरभेदेनकार्य न स्यात् ।

एवं स्वर्गाद्यर्थकर्मानुष्ठान जनितादृष्टस्य लोकान्तरस्वर्गफलजनकत्वमपि न स्यात् । नच तत्तत्क्रियानुष्ठाने नादृष्टं देशान्तरावच्छिन्नात्मन्युत्पद्यत इति नानुपपत्तिरितिवाच्यम् । असम-वायिदेशावच्छेदेन तदुत्पत्तिस्वीकारात् । अन्यथाव्यिप्रसङ्गात् । अतो विभुत्वकल्पनं निरर्थकम् । किञ्चयदि सर्वेजीवास्सर्वशरीरव्यापिनस्तदा सर्वे देहास्सर्वेषां भोगाय स्युः । निरामकाभावाद्य-द्यदृष्टं स्वावच्छिन्नात्मनि देहादिसृष्ट्या तत्तद्देह एव फलं जनयेत् । नान्यत्र । तदायष्टुः स्वर्गादि-मिहैवस्यात् । देशान्तरे तु प्रयत्नन्यायेन फलजननासामर्थ्यात् । अतस्तत्पक्षे प्रतिनियतादृष्टजन्य त्वस्यैवसम्भवात् व्यवस्थाभङ्गदुर्वारः । नन्वणुपक्षेपिफलानां जीवगतादृष्टजन्यत्वात् ईश्वरगत तत्प्रीतिफलोपादृष्टस्य सर्वसाधारणत्वात् तत्रापि व्यवस्था नसिद्ध्यतीतिचेन्न । तत्तदाराधकादि प्रति-नियतानु ग्रहादि वैचित्र्यात्तदुचितफलदानेनव्यवस्थासिद्धेः । राजादिन्यायात्, । राजा हि लोके तत्तत्सेवकविरचित सेवाविशेषेण परितुष्टस्तत्तत्पुरुषाय तत्तत्सेवानुगुणं फलं ददाति नान्यथा इति ।

एतेन विभोरात्मनस्स्वप्रकाशत्वे सर्वत्र भानप्रसङ्गः । अत आत्माजडइत्युक्तं प्रत्युक्तम् । जीवस्याणुत्वात् । विभुत्वे बाधकस्योक्तत्वाच्च । नन्वात्मनां "एषोऽणुरात्माचेतसा वेदितव्यः । बालाग्रशत भागस्य शतधा कल्पितस्य च । भागो जीवस्सविज्ञेयः" इत्या द्यणुत्वबोधकप्रमाणानिसन्ति । सन्तिचतथा, सचानन्त्यायकल्पते ।

नित्यस्सर्वगतःस्थाणुश्चलोयं सनातनः । तस्मात्सपरदेहेषु सतोप्येकमयं हि तत् ॥

लोके सर्वमावृत्य तिष्ठतीत्यादीनि विभुत्वबोधक प्रमाणानि । तथेश्वरस्यापि "एष आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा "अणोरणीयान्" इत्यादीन्यणुत्वग्राहकाणि "नित्यं विभुं सर्वगतं सुसूक्ष्मम्, महतोमहीयान्,

त्वया च विष्णुना चाम्ब जगद्व्याप्तंचराचरम्। इत्यादीनि विभुत्वग्राहकाणि बहूनिप्रमाणानिसन्ति।

एवस्थिते जीवस्याणुत्वमेवस्वभावः । ईश्वरस्यविभुत्वमेवस्वभाव इतिकथं निर्णेतुं शक्यमितिसौहार्देन पृच्छाम इति चेत् । उच्यते । तमुत्क्रामन्त प्राणोऽनूत्क्रामति। तेऽर्चिष मभिसम्भवन्ति । अर्चिषोऽहः ।

शुक्लकृष्णे गतीह्येते जगतश्शाश्वती मते । एकया यात्यनावृत्तिमन्यथावर्तते पुनः ॥

इत्यादिभिर्जीवस्योत्क्रान्तिगत्यागति प्रतिपादनात् । एवमासु तदा नाडीषु सुप्तोभवति ताभिः प्रत्यवसृप्यपुरीततिशेते । सर्वेषु लोकेषु कामचारो भवतीत्यादिभिश्च जीवस्यस्वरूपेण सञ्चरण प्रतिपादनात् हृदेशावच्छेदेनाहमितिप्रत्ययाच्च अणुरूप एवजीव इतिनिश्चीयते । जीवाणुत्व प्रतिपादकवाक्ये उपाधिविशेषाश्रवणाच्च । एतैर्वलीयोभिर्वाक्यैर्जीवव्याप्तिवचनानामन्यपरत्वं तत्प्रकारश्च (श्लो) तस्यात्मपरदेहेषु वेष्टितानूप सर्वगा । इत्यादौ सर्वगशब्दः प्रतिवस्तु जीव जातीयस्य यस्य कस्यचित् वृत्तिं प्रतिपादयति। सचानन्त्यायकल्पत इत्यादावानन्त्यशब्दः धर्मभूतज्ञानस्य सर्वविषयकत्वरूपविकासविशेषं प्रतिपादयति । नित्योव्यापीत्यत्रव्यापिशब्दः सर्वाचेतनान्तः प्रवेशयोग्यातिसूक्ष्म स्वभावपरइत्यतो व्याप्ति वचनानामन्यपरत्वाज्जीवाणुत्वं सिद्धम् ।

ईश्वराणुत्वपरवाक्ये अन्तर्हृदय इत्युपाध्युक्त्या औपाधिकमणुत्वं तस्य । विभुत्वं तु स्वाभाविकम् । 'सत्यं ज्ञानमनन्तम् । सर्वगतं सुसूक्ष्मं' इत्यादिपूपाध्यनुक्तेः ईश्वरस्य विभुत्व स्वाभाविकम् । न च जीवात्मनोणुत्वे पृथिव्याद्यणुवदप्रत्यक्षत्वं स्यादिति वाच्यम् । विभुत्वेपि कालादिवदप्रत्यक्षत्वापत्तेः । न चास्माकं पृथिव्याद्यणूनां प्रत्यक्षत्वम् । सचाय मात्मा उपाधिवशात् संसरति । स च द्विविधः । संसार्यसंसारी चेति । पुण्यपापादिमान् संसारी । तच्छून्य असंसारी । पूर्वोऽपि द्विविधः । नित्यसंसारी भाविसंसारविरहवांश्चेति । इतः पूर्वमनन्तकालेषुभाविकालेषु च हेत्वनागमनेन संसाराविच्छेदसम्भवान्नित्यसंसारी। तत्र प्रमाणं तु लीलाविभूतिनित्यत्वोक्तिः ।

"क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । नक्षमामिकदाचन" इत्यादिकमपितदुत्तम्भकम् ।

ACADEMY OF SANSKRIT RESEARCH
MELKOTE LIBRARY
Acc No 19511
Date 01.2.96

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । इति वीप्सयापि नित्यत्वं सूच्यते ।

ननु नित्यसंसार्यभ्युपगमे मोक्षोपाये कस्यापि प्रवृत्तिर्न स्यात् । अहं सकिमितिनित्य संसारित्व सन्देहादिति चेन्न । नित्यसंसारित्वनिश्चयाभावेनाहं स किं वानवेति सन्देहात्शास्त्रिक-फलभूयस्त्ववाञ्छया सांयात्रिकवत् प्रवृत्तिसम्भवात् । अन्यथा क्वचिन्निष्फलयत्नपुरुषदर्शनेन सकिमहमितिकृष्यादावपि न प्रवर्तेत । उपायविधायक शास्त्रार्थ निश्चयात् स्वस्य च तदानु गुण्यदर्शनान्निस्संशयं क्वचित् प्रवर्तते । एवमनभ्युपगमे सर्वेषां मुक्तियोग्यत्वेऽप्यहमन्त्यमुक्त इदानीं मुक्तःस्यानवेति संशयादद्य मुक्तौ कोऽपि न प्रवर्तेत । कृतांशः फलिष्यत्येवेति शास्त्र निश्चयात् प्रवर्तत इति चेदेवं नित्यबन्धपक्षावेऽपि स्वस्मिन्नित्यनिश्चयाभावात्, कृतं चेत फलिष्य तीति कोऽपि न प्रवर्तेत ।

लोकेऽपि हि भाविकाले द्वितीयादिक्षणप्रभृति यस्मिन् कस्मिंश्चित्क्षणे मरणनिश्चयेऽपि स्वस्मिंस्तदनिश्चयाद्विवाहादौ सर्वोऽपि प्रवर्तते । एवं नित्यबन्धे सम्भवति (श्लो) "अविच्छिन्नास्ततस्त्वेते संसरन्त्यन्तसंयमाः" इत्यादिशास्त्रस्यार्थवत्त्वं सिद्ध्यति । अतोनित्यसंसारिसद्भावं केचिदाहुः । इतरेतुस्वरूपयोग्यानां शुक्लादेवत्सहकार्यागमनान्मुक्तिःस्यादेव । क्षिपाम्यजस्रं, मामप्राप्यैवकौन्तेय, अविच्छिन्नास्ततस्तस्तः, मूढाजन्मनि जन्मनीत्यादीनि विलम्बातिरेक पराणि,तदासंसारिपान्थस्य यातिमोहःश्रमशमे इत्यादेस्संकोचा भावात् । अतोनित्यसंसारीनास्तीत्याहुः । ननु विशेषात्मापवर्गे कदाचिदीश्वरस्य विहरणविरतिस्स्यात् तन्निर्वाहाय नित्यसंसर्यभ्युपगमेतस्यनिरुपाधिकृकारुण्यभङ्गस्स्यात् । अतः पक्षद्वयेऽपिदोषस्स्यादितिचेन्न । पूर्वस्मिन् पक्षे विहरणविरतेःस्वेच्छायत्तत्वान्नदोषः । पुरुषान्तरप्रतिरोधादिना विहरणविरतौ हि दोषः । स्वेच्छायत्तत्वे तु प्रवृत्तिरपिनिवृत्तिरपिलीलात्वं युज्यते । स्वच्छन्दाचरणस्यैवलीलात्वात् ।

उत्तरस्मिन् पक्षे क्वचिन्नित्यं दयारोधोऽपि तत्तज्जीवकर्मवशात् । अतः प्रतिबन्धाहितेषु सावकाशःकृपा अल्पव्याजेनान्तापरं सहते । ततस्मनकादिदुर्लभं फलं सुनां पुरोडाशशब्दविभाण्डशबरीमालाकारादीनामपिदातुमीष्टे । अतः पक्षद्वयेऽपि नानुपपत्तिः । एते च संसारिणः कर्मपाशपाशिताः ब्रह्माण्डकुहरपरिवर्तमानकालघटीयन्त्रकुण्डिकायमानास्तस्मिन् बद्धाः । द्युलोकेषु-फलोपभोगक्षीणपुण्याः पुनरिहलोकेकर्मभिः पूर्यमाणाश्चसन्तः परिभ्रमन्ति । तत्रपुण्यकृतो धूमरात्र्य परपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेणस्वर्गलोकमधिरोहन्ति । तत्र पुण्यक्षयेऽवरोहन्ति च । चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघादिक्रमेण । तत्र श्रद्धासोमवर्षान्नरेतोमयीनामाहुतीनां होम्यस्थानानि विद्युत्पर्जन्य पृथिवीपुरुषयोषितः । प्रायिकीच पञ्चमाहुत्यपेक्षा । द्रौपदीधृष्टद्युम्न प्रभृतिष्वदर्शनात् ।

एवमपुण्यकृतामपि स्वेदजादिशरीरेषु पञ्चमाहुत्यभावाच्चन्द्रप्राप्त्यभावाच्च तेषामनि घोरा निरयसरणिर्निरयदुःखानुभूतिश्च पुराणादिषु प्रपञ्चिता वेदितव्या। द्वितीयोऽपि द्विविधः। संसारात्यन्ताभाववान् प्रध्वस्तसंसारश्चेति। तत्रकदाचिदपि संसारहेत्वभावात् पूर्वस्य नित्य मुक्तेरीश्वरवत्तदत्यन्ताभावः। उक्तास्तूपपादितो मुक्त एव। अनादावपिकाले प्रतिदिवसं सहस्रमुक्ता-वपि न लीलाविभूत्युच्छेदः। अनन्तस्यास्याप्येवंस्वभावात्। एवं भागविभूतेरप्यनन्तत्वम्। अनन्तेष्वपि संसार्यसंसारिषु पादोऽस्यविश्वाभूतानि। त्रिपादस्यामृतं दिवि इत्याद्युक्तमेकपादत्व त्रिपादत्व तारतम्यमापेक्षिकम्। यथा च मुहूर्ताहोरात्रसंवत्सराद्यनन्तेषु मद्द्रव्यपार्थिवघटादिषु त्यापेक्षिकं तारतम्यं दृष्टम्।

अत एव नित्यानां समस्त बद्धमुक्तापेक्षया पुनरनन्तत्वमुपपन्नम्। केचित्तु नित्यसूरि-वर्गं नेच्छन्ति। तन्न। सदापश्यन्तिसूरय इत्यादिभिः सदापश्यदनेकद्रष्टृविशिष्टस्थानविधानात्। अत एव न मुक्तप्रवाहेणान्यथासिद्धिः। तेषां सदा सार्वज्ञ्याभावात्। सर्वेषां जीवानां संसारित्व साधकानि जीवत्वादिलिङ्गानि निरुक्तश्रुतिबाधादुपेक्ष्याणि। एतेनांनित्यसूरिणामानन्त्यावान्तर भेदादिकं श्रीशाण्डिल्यसंहितायां विशदमनुपन्धेयम्। अथ क्षीणक्षेत्रः। भक्तिरूपापन्नोपासन-वेदनध्यानादिशब्दवाच्यः असकृदावृत्तः आप्रयाणादन्वहमनुवर्तमानोज्ञानविशेषः। न पुनः केवलं तत्त्वज्ञानं तस्याध्ययनविधिसिद्धसाङ्गषशिरस्काध्ययनगृहीताक्षरराशिविशेषापातप्रतीत निरतिशयपुरुषार्थसाधनार्थनिर्णयरागप्राप्तश्रवणमात्रेण निष्पन्नस्यावधेयत्वात् तत्त्वज्ञाने सत्यपि मोक्षादर्शनाच्च। "ननुब्रह्मविदाप्नोतिपरम्। तमेवं विद्वानमृत इह भवति। ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादिषु परम पुरुषवेदनमात्रस्य मोक्षोपायत्व श्रवणात् कथं ध्यानादिशब्दवाच्य ज्ञानविशेषस्य मोक्षहेतुत्वमुच्यत इति चेन्न।

"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। ध्यात्वा मुनिर्गच्छति भूतयोनिम्। ध्यायान उपासीत" इत्यादिषु विशेषशब्दश्रवणात्। सामान्यवाचिनां सति विशेषे तत्रपर्यवसानस्यच्छागपशुन्यायलभ्यत्वात्। वेदनज्ञानशब्दानां ध्यानरूपविशेष परत्व युक्तम्। दृश्यतेऽत्र। अग्नीषोमीयं पशुमालभेत इत्यत्र श्रुतस्य सामान्यवाचिनः पशुशब्दस्यच्छागस्य वपाया मेदस इति मन्त्रवर्णे श्रुतेच्छागरूपविशेषे पर्यवसानम्। तद्वदिहापिध्यानं हि विजातीय प्रत्ययान्तरव्यवहितानन्तरत्व भावनात्मकं ज्ञानम्। अतोऽस्य गुरुशास्त्रपुरुषेण केवलज्ञानेन न विकल्पः। गुरुशास्त्रपुरुषैकल्यासम्भवात्। अथास्तुविशेषपर्यवसानम्। तथापि, भत्वा धीरो न शोचति। पृथगात्मानं प्रेरितारं च मत्वा। जुष्टस्ततस्तेनामृतत्वमेति। भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्व-संशयाः। क्षीयन्तेचास्य कर्माणितस्मिन् दृष्टे परावरे॥ इत्यादौ विशेषतः श्रुतेमननेदर्शनेवा पर्यव-

सानं कुतोनेष्यत इति चेदुच्यते। श्रुतार्थं प्रतिष्ठापनरूपमननस्य ध्यानोपकारकत्वेन साक्षादुपायत्वाभावात् तत्र न पर्यवसानम्। अत एव श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रवणमनने अपि निदिध्यासनप्रणाडीरूपे आम्नायेते। दर्शनं च न चाक्षुषं परमपुरुषे संभवति।

"न चक्षुषा पश्यति कश्चनैनम्। नचक्षुषागृह्यतेनापिवाचा। यत्तदद्रेश्यमग्राह्यम्। अदृश्येनात्म्येनिरुक्ते" इत्यादिभिश्चाक्षुषज्ञानाविषयत्व प्रतिपादनात् किन्तुनिदिध्यासनान्वयि दर्शनसमानाकारत्वमेव तस्मिन् दृष्ट इत्यनेनोच्यते। अनुभूयतेह्यनवरतभावनाविशेषवशाद्ध्यानस्य दर्शनसमानाकारकत्वं "वृक्षे वृक्षे च पश्यामि" इत्यादौ। तथा च तस्मिन्दृष्ट इत्यादौ। दर्शन समानाकारध्यानविधिपर्यवसानेनकेवलदर्शनस्य परमपुरुषविषयस्यासम्भवेन तत्रपर्यवसानासङ्गतेः। अथात्र द्रष्टव्य इत्यनेन दर्शन समानाकारत्वं निदिध्यासितव्य इत्यनेनध्यानं च विधीयत इत्युच्यते? उत। उभाभ्यां पदाभ्यां दर्शनसमानाकारत्वविशिष्टध्यानं विधीयते? नाद्यः, दर्शनसमानाकारत्वध्यानान्वये हि दर्शनसमानाकारध्यानलाभः स्यात्। तथान्वये तयोराकाङ्क्षादिविरहात् विधिप्रत्ययप्रकृत्यर्थस्यविधिप्रत्ययान्तरप्रकृत्यर्थेन सहभेदेनवाऽभेदेनवान्वयासम्भवात्। न द्वितीयः। तव्यप्रत्ययद्वयश्रवणविरोधात्। 'नचाग्नये पथिकृतेपुरोडाशं' इत्यत्रचतुर्थीद्वयश्रवणेऽपि पथिकृत्व विशिष्टाग्निदेवत्व प्रतिपत्तिवदिहापि पदद्वयेनविशिष्टलाभसम्भवइतिवाच्यम्। तत्रविशेष्य चतुर्थ्यैव विशिष्टदेवताविधानेऽपि विशेषणवाचकपदस्यविशेष्यवाचकपदसमानविभक्तिकत्वस्य साधुत्वार्थकत्वेन तथा प्रयोगसम्भवेऽपि प्रकृतेतव्य प्रत्ययद्वयोपादानवैयर्थ्यं दुर्वारमेवेति चेन्मैवम्।

अर्धमन्तर्वेदिमिनोति अर्धं बहिर्वेदि 'इत्यत्र वाक्यद्वयेन देशविशेषलक्षणावक्तव्याः तव्य प्रत्ययान्त पदद्वयेनविशिष्टलक्षणयाविशिष्टविधिसम्भवेन विरोधाभावात्। एवमार्षेयं वृणीते लीन् वृणीते इत्यत्रत्रित्वविशिष्टार्षेयवरणस्यैकस्यविधानेऽपिवाक्यद्वयश्रवणवदत्रा पतव्यप्रत्ययद्वय श्रवणोपपत्तेः। अथ तत्रैकमेवलक्षणयाविशिष्टविधायकमितरदनुवादकमितिचेदिहापि तथैवस्यात्। अथ एवम्मृतिलम्भेसर्वग्रन्थीनां विप्रमोक्षः। तस्मिन् दृष्टे परावरे इत्यादिनाऽव्यवहितोपायतया श्रुत्यनुस्मृतिदर्शनयोर्निर्देशेन विरुध्यते। अन्यथाऽष्टदोषदुष्टविकल्प प्रसङ्गात्। अतोदर्शनसमानाकारध्यानस्यैवमुक्त्युपायत्वेनतत्रैव वेदनज्ञान दि शब्दानां पर्यवसानमितिसिद्धम्।

यद्यपीदमात्मावाऽर इति वाक्यं मैत्रेयीब्राह्मणगतं, तथापि सर्वविद्याप्रत्यक्कारणब्रह्मविषय ध्यानस्य दर्शनसमानाकारत्व प्रतिपादकमेव। आत्मनिखल्वरेदृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं भवतीतितत्रत्येनैव वाक्येन कारणविषयध्यानमात्रस्यदर्शनसमानाकारताप्रतिपादनात्। कारणमेव हि सर्वविद्याध्येयम्। कश्चध्येय इत्युक्त्वा कारणं तुध्येय इत्युपसंहारात्। कारणविषयकं

दर्शनसमानाकारमिति गम्यते । तस्मात् सर्वविद्यावेद्याकारणविषयध्यानं दर्शनसमानाकारमिति लब्धम् ।

केवलंकर्म ज्ञानसमुच्चितंवा न मुक्तिहेतुः । तमेवविदित्वातिमृत्युमेति-नान्यः पन्था अयनाय विद्यते इत्यनेन वेदनमेव विधाय उपायान्तरनिषेधात् । कर्मणःविद्याङ्गत्वेतु न विरोधः । तथासति तयोपायान्तरत्वाभावात् । परमात्मसाक्षात्कारोदयविरोधिरजस्तमो-मूलसांसारिक पुण्यपापरूपप्राचीनकर्मनिर्मथनकृतचित्तशुद्धिद्वारेणहि तदातदुपयोगः । एतेन विशिष्टदेशवासव्रतविशेषवैष्णवसंश्रयादेर्ज्ञानयोग कर्मयोगयोश्च परम्परामोक्षहेतुत्वमिति सिद्धम् । यजमानेनसहिताःस्वर्गं यान्ति नराधिपेति महाभारतवचनमपि परम्परयामोक्षसाधनपरम् । कर्मयोगज्ञानयोगयोश्च वक्तव्यमखिलश्रीमद्गीताभाष्येव्यक्तमुक्तम् । अथाप्यत्र निष्कृष्टांश उच्यते । भक्तियोगः परमात्मप्राप्त्युपाय भूतः । तदशक्तस्य भक्तियोगसिद्ध्यर्थमात्मावलोक-नमपेक्षितम् । तस्य च ज्ञानयोगकर्मयोगौद्वौ पृथगुपायौ ।

तत्र ज्ञानयोगस्यात्मावलोकनेऽन्तरङ्गः । तथापि प्रथमं सदुष्करः । तदनधिकरण-स्तुत्यफलकर्मयोग एव कार्यः । तदधिकरणेनापि व्यपदेश्यस्यलोकसंग्रहार्थं कर्मयोग एव कार्यः । अशक्तस्य ज्ञानयोगशक्ति कर्मयोग एवोत्पादयति । ज्ञानयोगाशक्त्या कर्मयोग मनुतिष्ठत अन्तःकरणशुद्धिवशात्मध्ये ज्ञानयोगशक्तिप्रादुर्भावे सत्यव्यपदिष्टस्य कर्मयोगं परित्यज्य ज्ञानयोगमनुतिष्ठतोऽपि न दोषः । इमौ च योगौ कस्यचित्कामनाभेदेन कैवल्यमात्र साधकौ । यथा । भगवदुपासनमेव कस्यचिदैश्वर्यादिकं साधयति । त्रयाणामपि योगानामाश्रम धर्माङ्गत्वं तु तुल्यम् । प्रवाहानादिपुण्यपापरूपकर्मतारतम्येनशक्त्यशक्तिकामनादितारतम्य-मितिनकश्चिद्दोषःस्यात्ः सिद्धं भक्तिरेव साक्षान्मोक्षोपाय इति । महनीयविषयेप्रीतिर्भक्तिसैवा-वस्थाभेदात्परभक्तिपरज्ञानपरमभक्ति भेदं भजते । पर भक्तिर्नामनिरुक्तमोक्षोपायः परज्ञानं नाम

योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् । इत्येवं रूपोत्कटदिदृक्षापर्यवसायिध्यानविशेषः ।

परिपूर्ण साक्षात्कारलाभे सति तादृशनिरतिशय भोग्य भगवत्स्वरूपसाक्षात्कारजनित भगवत्प्राप्तित्वराहेतुभूतः प्रीतिविशेषः परम भक्तिः । नमस्कारादिषु भक्तिशब्दप्रयोगः

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

इत्यादेर्भक्तिकार्यत्वद्गौणः । सा च भक्तिस्सदक्षरमधुदहरभूमवैश्वानरादिविद्याभेदाद्बहुविधा गुणोपसंहारपादेनिपुणमनुसन्धेया । एतास्सर्वविद्यास्तत्तच्छास्त्रोदित तत्तद्वर्णाश्रमधर्मनिष्ठत्रैवर्णिक

मनुष्यदेवासुरादिसाध्याः। स्त्रीणां विदुराणामपि जपोपवासाद्यङ्गाधिकृतानां ब्रह्मविद्याधिकारो ऽस्त्येव। अनाश्रमीनतिष्ठेत्तुदिन मेकमपि द्विज इत्यादिकं त्वनाश्रमित्वादा श्रमित्वस्य ज्यायस्त्व परम्। नैष्ठिकादि परिभ्रष्टानामनधिकार एव।

आरूढोनैष्ठिकं धर्मं यस्तु प्रच्यवते नरः। प्रायश्चित्तं न पश्यामि येन शुद्ध्येत् स आत्महा॥

इति स्मृतेः। शिष्टबहिष्कारादितः कृतप्रायश्चित्तानामपि तेषां ब्रह्मविद्याधिकारो नास्त्येव। किन्तु प्रायश्चित्तेन तेषां नरकादिप्राप्तिर्निवार्यते। न कर्मान्तरारम्भयोग्यता। ननु संवर्तादि महायोगिनां सर्वाश्रमबहिष्कृत नग्नचर्यास्मरणात्, अत्याश्रमिभ्यः परमं पवित्रमिति श्रुतेश्चा श्रमधर्माणां विद्यानङ्गत्वमिति चेन्न। तेषामुन्मत्तचर्यायाः जनेनावमतो योगी योगसिद्धिं सविन्दति। इति जनावमाननजनितयोगसिद्धयेस्तोत्कर्ष प्रच्छादनार्थत्वात्। यद्वायोगदशायां बहिरप्रसृतमनसां न धीपूर्वककर्मत्यागः। तेषां भगवदनुभवव्यतिरिक्तकालाद्यपरिज्ञानेनतन्निमित्तकर्तव्यकर्मणोधीविषय त्वाभावात्। अबुद्धिपूर्वकंत्वारम्भकालेऽपि न लिम्पतीति नियमितम्। किमुत समाधौ।

किंचकर्मणांविद्याङ्गत्वादङ्गाङ्गिविरोधे अङ्गिनाङ्गोपमर्दो न दोषायेति तेषांकदाचित् कर्मत्यजनं न विद्याङ्गत्वविरोधि। अत्याश्रमिभ्य इति श्रुतिर्नाश्रमधर्मत्यागपरा। किन्त्वति शयिताश्रमयोगपरा। तथा सत्यत्याश्रमेभ्य इत्यनेन सामञ्जस्ये मत्वर्थीय प्रत्ययवैयर्थ्यं स्यात्। अतः कर्मणां स्वरूपत्यागासम्भवात् फलसङ्गत्यागपरमेव कर्मत्यागपरवचनानां वाच्यमिति। तत्र केचित् तुर्याश्रमस्यैव विशेषतो मोक्षाश्रमत्वाभिधानात् तद्वतां वेदानुवचनयज्ञादिरूप प्रवृत्तिधर्मा भावात् शमादिरूपनिवृत्तिधर्मसम्भवाच्च प्रव्राजिनामेव मुक्तिस्तत्साधनी विद्याच नान्येषामित्याहुः। तदसत्। त्रयो धर्मस्कन्धा इत्यत्रबह्वाश्रमप्रस्तावे ब्रह्मसंस्थोऽमृतत्वमेतीत्युच्यते। ब्रह्मसंस्थत्वं ब्रह्मनिष्ठत्वम्। तच्चाधीतवेदान्तेषु सर्वेषु आश्रमिषुर्पभवति। तच्च गृहस्थानामप्युषस्तियाज्ञवल्क्य प्रभृतीनामुपनिषत्सु प्राचुर्येणदृश्यते।

नच प्रवृत्तिनिवृत्योर्विरोधः। भिन्न विषयत्वात्तयोः नित्यनैमित्तिकेषु प्रवृत्तिः निषिद्ध काम्यनिरर्थकेषुकर्मसुनिवृत्तिः। अन्यथा प्रव्राजिनां प्रवृत्तिरूपस्वाश्रमधर्मेणापि विरोधस्स्यात्। किंच छान्दोग्ये कुटुम्बे शुचौ देश इत्यादिनागृहस्थं प्रक्रम्य 'स खल्वेवं वर्तयन् यावदायुष ब्रह्मलोकमभिसम्पद्यत' इत्युक्त्वा नच पुनरावर्तते इतिचोक्तम्। 'कर्मणैव हि संसिद्धिमास्थिता-जनकादयः, गृहस्थोऽपि विमुच्यते' इत्यादिस्मृतेः। जनकदिलीपादयश्च गृहस्था मुक्ता इतिहासा दिषु उच्यन्ते। अत एव न सोपानवत् क्रमनिबन्धोऽपि। प्रव्राजिनां मोक्षाश्रमित्वकीर्तनं

योग्यताधिक्यमात्रादिति नानुपपत्तिः। अतस्सर्वाश्रमिणां ब्रह्मविद्याधिकारः। अतःनित्यानामाश्रमधर्माणां कथं काम्यरूपविद्याङ्गत्वम्। नित्यत्वे ह्यकरणे दोषः। काम्याङ्गत्वे तु सनास्ति। अतो विद्याया आश्रमधर्माङ्गकत्वमनुपपन्नमितिचेदुच्यते।

एकस्यैव कर्मणः विनियोजकवाक्यभेदेननित्यकाम्यस्वरूपत्वमविरुद्धम्। 'यथा यावज्जीवमग्निहोत्रं जुहोति, अग्निहोत्रं जुहुयात स्वर्गकाम' इतिविनियोजक भेदेनाग्निहोत्रस्य नित्य काम्यस्वरूपत्वम्। यथा संध्यावन्दनादेर्नित्यस्य प्राजापत्यादिलोकफलकत्वेन काम्यत्वं नित्यत्वं च तथाश्रमधर्माणां 'यज्ञेन दानेन तपसाऽनाशकेन ब्राह्मणाविविदिषन्तीति विद्यायां विनियोगाद्विद्याङ्गत्वमप्युपपन्नम्। तर्हि विदुषामाश्रमार्थंविद्यार्थंचाश्रमधर्माणां द्विरनुष्ठानं प्रसज्यत इतिचेन्न। अत्रैक लाघवेदेतन्त्रेणानुष्ठानस्यैकादशेस्थापितत्वात्। उभयार्थं सकृदनुष्ठानं तन्त्रमतो विदुषामेके नानुष्ठानेनार्थद्वयसिद्धिः।

अत्रेदं तत्वम्। तन्त्रानुष्ठान प्रसक्तौ विद्यारूपफलोद्देशेनानुष्ठानेऽकरणनिमित्तदोषाभावेनाश्रमधर्मस्सिद्ध्यत्येव। आश्रमधर्मस्यानुष्ठितत्वात्। दोष परिहाराय करणे तु विद्याफलं न सिद्ध्यति। तदुद्देशेनाकरणात्। काम्यं कर्म हि तत्तत्फलोद्देशेनानुष्ठितं सदेव फलं जनयति। अत एव सर्वफलसाधनज्योतिष्टोमादेः स्वर्गार्थमनुष्ठितस्यापि न पुत्रादिफलजनकत्वम्। तदुद्देशेनानुष्ठानाभावात्। अतः फलार्थमनुष्ठाने तन्त्रेण नित्यं सिद्ध्यति। अयमर्थ आचार्यैः,

फलार्थं क्रियमाणेऽपि नित्य भवतितन्त्रतः। नित्यकाम्यस्वरूपैक्ये विनियोगपृथक्त्वतः॥

यन्नित्यं तन्नकाम्यं तदपिनतदितिस्थापितेकर्ममेदे
ऽप्येक विद्याश्रमाङ्गं भवतिहिविनियुक्त्यन्तरेणोपपत्तेः।
अत्र नुष्ठानतन्त्रं विदुषिहिघटतेकर्तुकालाद्यभेदात्
प्राजापत्यादिलोकार्थिनिचतदितरोऽनर्थरोधाय तद्वान्॥

इत्यन्वग्राहि। तथाच य एवाग्निहोत्रदर्शपूर्णमासपश्वयनसहायज्ञादय आश्रमधर्मास्त एव विदुषां विद्यानिष्पादकाः। अतएव सकृदनुष्ठानेनार्थद्वयसिद्धिरिति। अथैवमपि ब्रह्मणैकान्त्यभाजामेव मोक्षधर्मेऽपवर्गः कथ्यते; ऐकान्त्यं चानन्यदेवताकत्वम्।

तेषामेकान्तिनः श्रेष्ठास्तेचैवानन्यदेवताः। इति स्थापनत् तत्रैव प्रतिबुद्धस्तु मोक्षभागिति नियमितम्।

ब्रह्माणं शितिकण्ठं च याश्चान्यादेवतास्स्मृताः । प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम् ॥ इत्यनेन च तत्सिद्धम् । पञ्चमहायज्ञादयस्तु अग्नीन्द्रादिनानादेवतेज्यारूपाः अतस्तेषामैकान्त्य भङ्गकत्वात् तदङ्गकविद्यानुष्ठानं कथमितिचेदुच्यते ।

अग्नीन्द्रादिशब्दानामैन्द्रीन्यायेन, प्रतर्दनविद्यान्यायेन च परमात्मपरत्वेनैकान्त्य-विरोधाभावात् । ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति विनियोगादिन्द्र प्रकाशकमन्त्रस्य कदाचनस्तरीरसीत्यस्य गार्हपत्योपस्थापनाङ्गत्वे सिद्धे मन्त्राणामनुष्ठेयार्थप्रकाशकत्वेनोपयोगस्य वक्तव्यतयेन्द्र शब्दस्यावयवशक्त्यागार्हपत्यपरत्वं स्वीकृतम् । तद्वत्पञ्चमहायज्ञादिष्वग्नीन्द्रादिशब्दानामवयवार्थपौष्कल्येन परमात्मपरत्वम् । तत्रैवानन्यथासिद्धजीवलिङ्गबोधकेऽग्नयेस्विष्टकृत इन्द्राय वज्रिण इत्यादाववयवशक्त्या परमात्मपरत्वेस्विष्टकृत्त्वादिविशेषणान्वयात् श्रुतहान प्रसक्त्या प्रतर्दन न्यायेनस्विष्टकृदग्न्यादिविशिष्टपरमात्मपरत्वं स्वीक्रियते । तत्र विशेषणेऽग्न्यादौस्विष्टकृत्त्वादिविशेषणान्वयात् । तथा च क्वचिदवयवशक्त्याक्वचिदपर्यवसानवृत्त्या चाग्नीन्द्रादिशब्दानां परमात्मपरत्वान्नारायण एव सर्वकर्मसमाराध्य इत्यनन्यदेवताकत्वं निरङ्कुशमित्यश्रमधर्माङ्गकत्वंविद्यायाअविरुद्धम् । अधिकं मत्पितामहपादैः श्रीकृष्णदेशिकैः कृताया नित्यानुष्ठानदीपिकायामनुसन्धेयम् । आहुश्चाचार्याः

परविद्यासुजीवोक्तिर्निरुक्त्यादेः पराश्रया । तल्लिङ्गानन्यथासिद्धौतद्विशिष्टावलम्बिनी ॥

क्वचिदगतिहता रूढिरैन्द्रीनयेन

"तल्लिङ्गानन्यथासिद्धयधिगमनवस्थात्तद्विशिष्टे विवक्षा" इति एतेनैकान्तिनां विदुषामग्नीन्द्रादिनानादेवताकवर्णाश्रमधर्मानुष्ठानं न सम्भवति । ऐकान्त्यविरोधात् । तेतुधर्माः केवलाश्रमिभिरेवानुष्ठेयाः । एकान्तिभिस्तु भगवदभाधारणमन्त्रैरेव सर्वकर्मानुष्ठेयमितिकैश्चिदुक्तं निरस्तम् । * तथा सति कर्मणां द्वैरूप्येण सकृदनुष्ठानेनार्थद्वयासिद्धेः । चतुर्विधा श्रमातिरिक्तैकान्त्याश्रमस्यानुक्तत्वात् । तेषामाश्रमधर्मानुष्ठाने यज्ञेनदानेनेत्यादिना विनियुक्तयज्ञाद्याश्रमधर्माङ्गकत्वं विद्यायां अधिकारो नस्यादिति सर्वसंन्यासप्रसङ्गात् । तच्चोपासनं त्रिविधम् । चिद्विशिष्टब्रह्मोपासनम् । अचिद्विशिष्टब्रह्मोपासनम् । परिशुद्धब्रह्मोपासनं चेति । ब्रह्मणश्चिद्विशिष्टत्वं चिच्छरीरकत्वम् ।

तत्रजीवात्मनो ब्रह्मशरीरत्वेन ब्रह्मणश्चेतनशरीरित्वेन चोपासनं चिद्विशिष्टब्रह्मोपासनम् । विशेषणविशेष्य भावव्यत्यासेऽपि द्वयोः ब्रह्मोपासनत्वेनद्विविधत्वापि मोक्षहेतुत्वात् एतान्येवाप्रतीकोपासनानीत्युच्यन्ते । प्रतीकोपासनं तु न मोक्षहेतुः । तच्चस्वातन्त्र्येणचिदुपासनम् ।

ब्रह्मदृष्ट्यादिदुपासनम्। स्वातन्त्र्येणादिदुपासनं चेत्यादि। एषामर्वाचीनफलसाधनत्वमेवेतिद्रष्टव्यम्। आहुश्चाचार्याः "विश्वान्तर्यामितत्वं स्वयमिह" ननुगोपिकादेरपिमोक्षः श्रूयते। तत्कथं त्रैवर्णिकत्वनियमोविद्याया इति चेत् न। प्राचीनेषु ब्राह्मणादिशरीरेष्वेवकृतोपायत्वात्तेषां प्रारब्धकर्मणानिकृष्टशरीर प्राप्तेः। प्रारब्धस्यकर्मणःविद्ययाऽनिवृत्तेः प्रारब्धावधिकत्वाद्बन्धस्य। ततः यस्मिन् कस्मिन्नपिशरीरेफलं भवतीति न दोषः। एवं विदुरादयोपि भवान्तरसम्पादितोपायास्तत्संस्काराहितज्ञानिनश्चेति नापशूद्राधिकरणविरोधः। स्मरन्तिच,

धर्मव्याधादयोप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते। वर्णावरत्वे संप्राप्तास्संसिद्धिं श्रमणीयथा॥ इति

शुश्रूषोर्वा। श्रुतेश्शूद्रेत्यामन्त्रणं सञ्जातशोकत्वात्। न शूद्रत्वादिजातियोगात् शुचेर्दश्चेत्यौणादिकरप्रत्ययेनशूद्रशब्दस्य शोचितृपरत्वात्। अत्रेदं बोध्यम्। अग्निविद्यासाध्य यज्ञादिवर्णाश्रमधर्माङ्गकत्वाद्विद्यायास्त्रैवर्णिकाधिकारत्वमेव। अतोब्राह्मणादिशरीरेष्वेवारम्भः। विद्यायोनिशरीरावसानपर्यन्तम्। साऽहरहरभ्यासाधेयातिशयासती अन्तिमप्रत्ययमुत्पाद्यफलं जनयति कस्यचित् प्रारब्धकर्मबद्धावे तस्यभोगेनैवक्षपयितव्यत्वाद्यावताजन्मना प्रारब्धस्यकर्मणो नाशस्तावता जन्मना भोगेन तन्नाशयित्वा ततः अन्तिम प्रत्ययमुत्पाद्य फलं जनयति। विद्याया आरम्भ शरीर एव निष्पत्तावपि प्रारब्धेन कर्मणा प्रतिबन्धात् फलं विलम्ब्यते। प्रतिबन्धकाभावस्य फलोत्पत्तावपेक्षितत्व त्।

अत एव निष्पन्नस्यापि पुत्रेष्ट्यादेः पुत्रोत्पत्ति प्रतिबन्धक सत्वे कालान्तरे पुत्रोत्पत्तिः फलमिति तान्त्रिकैः सिद्धान्तितम्। प्रारब्धनाशे सति विद्याऽन्तिम प्रत्ययमुत्पाद्य फलं जनयतीति। अत्रकेचित् विद्यायोनिशरीर एव निष्पत्तिरिति न नियमः। तच्छरीरावसाने प्रारब्धकर्मणसति अन्तिमप्रत्ययादर्शनात् अन्तिमप्रत्ययावधिकत्वाद्विद्यायाः प्रारब्धावसान एवान्तिम प्रत्ययजननात्। अतोऽन्तिम प्रत्ययानन्तरमेवविद्यानिष्पत्तिः, ततः फलमितिवदन्ति। तेषां पक्षे, "अथ च जन्मादिहेतुरेव कर्मविशेषः शापादिर्वोपनिपतितः। तदा तेन तत प्रसज्यत एव। तथापि निष्पन्नोपायस्य न शैथिल्यम्। सतुःप्रारब्धकर्मण इवैतस्यापिपर्यवसाने संसारान्निवर्तयति। नच पुनरुत्तरोत्तरकर्मकरणात् संसारविच्छेद इति वाच्यम् शास्त्रविरोधात्। निष्पन्नस्योपासनस्यनिष्फलत्वप्रसङ्गादितिन्यायसिद्धाञ्जन श्रीसूक्तयस्वारस्यम्। एवम्,

प्रारब्धकर्मावधिको मोक्षस्तत्यमुपासितुः। दृष्टस्य देहावधिक आर्तस्यार्त्यवधिर्मतः॥

इत्युत्तरग्रन्थाखारस्यं च। तत्र निष्पन्नोपायानामेव हि त्रयाणां फलविळम्बहेतुरुच्यते। न तूपाय निष्पत्यवधिः। उपायस्यैवानिष्पत्तौकारणाभावेन मोक्षरूपकार्यासम्भवेन तद्विहाय फलप्रतिबन्धकविशेषाभिधानासङ्गत्यापत्तेः। एवं पक्षावृत्तित्वव्याप्त्योरन्यतरस्यापि सन्देहे संदिग्धोपाधिः। तत्राद्यो यथा। विप्रतिपन्नोजीवः एतच्छरीरावसाने मुक्तिमान् निष्पन्नसमाधित्वात् शुकादिवदित्यत्र कर्मात्यन्तपरिक्षयः उपाधिः। सचनिष्पन्नसमाधौ विप्रतिपन्ने जीवेऽपि नास्तीति सन्दिग्धत्वाच्छङ्कितोपाधिः। यद्यपि योगिनामुत्तरपूर्वाघयोरश्लेषविनाशौ भवतः तथापि प्रारब्धकर्मणामेकशरीर एव पर्यवसानमिति न नियमः। निष्पन्नोपायस्यापि प्रतिबन्धक कर्मविशेषादनेकदिवसस्थितिवदनेकशरीरपरिग्रहोपपत्तेः।

तथा च सूत्रितम्। 'भोगेनत्वितरेक्षपयित्वाथ संपद्यते' इति, 'यावदधिकारमवस्थितिराधिकारिकाणा'मिति च। विनिष्पन्न समाधेस्तु मुक्तिस्तत्रैव जन्मनीत्यादिस्मृतिस्त्वनिष्पन्नसमाधे रशरीरान्तरयोगनियमपरतया प्रायिकविषया। अतोनास्य साधनव्यापकत्वमिति श्रीन्याय परिशुद्धि विरोधश्च। ऐहिकमप्रस्तुत प्रतिबन्धे तदर्शनादित्यनेनाभ्युदयफलविद्यायाः स्वसाधनभूतपुण्यकर्मान्तरोत्पत्तिमाशङ्क्यबलकर्मान्तराप्रतिबन्धे ,सत्यनन्तरं,प्रतिबन्धे सतिकालान्तर इत्यनियममभ्युपगम्य 'एवं मुक्तिफलानियमस्तदवस्थावधृतेरित्यनेन मुक्तिसाधनविद्याया अपि स्वसाधनीभूतातिशयितकर्मभिरुत्पत्तौ प्रतिबन्धकसद्भावासद्भावाभ्यामनियमः श्रीभाष्ये प्रतिपादितः सोऽपि विरुध्यते। साधननिष्पत्तौ सत्यामपि प्रतिबन्धकवशात् फलविळम्बाभ्युपगमात्।

नन्वत्र विद्योत्पत्तौ निष्पन्नानामपिस्वसाधनानां प्रतिबन्धकाधीनविद्येत्पत्तिविळम्बः स्वीकृतः, न तु निष्पन्नायाः फलविळम्ब इति न विरोध इति चेन्न। न्यायसिद्धाञ्जने निष्पन्नोपासनस्य निष्फलत्व प्रसङ्गात्। सूत्राभिप्रेतं चैतत्। एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः। इदं सूत्रं विद्याङ्गकर्म विषयमपि विद्यायामपि तुल्यन्यायतयाऽनुसन्धेयमत्युक्तयानिष्पन्नोपासनस्यापि प्रतिबन्धकवशात् फलविळम्बप्रतिपादनात्। तथाच, पुत्रेष्टय दिवत् विद्योत्पादक कर्मवच्चनिष्पन्नविद्याया अपि प्रारब्धकर्माधीनफलविळम्बस्सह्यः। सूक्त्यन्तरं च विस्तरभयान्न प्रदर्श्यते। अतः पूर्वोक्त एवार्थः। अनधिकृतविद्यानां शूद्राणां प्रपत्त्येव मोक्षः। तस्यास्सर्वाधिकारत्वात्।

शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः। तेपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम्॥

मां हि पार्थव्यपाश्रित्य येऽपिस्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपियान्ति परां गतिम्॥ इत्यादिप्रमाणात्।

एवं फलाभिसन्धिरहितस्वकर्मानुष्ठानेन ब्राह्मणादिजन्मप्राप्त्या तत्रविद्योत्पत्त्या वा क्रमेण मोक्षो भवति। विदुरगोपिकादीनां तु पूर्वजन्म प्राप्तविद्यया मोक्षः इत्युक्तम्। अध्यवसायादिविशेषविशिष्टा न्यासविद्या। तस्या अपिबुद्धिविशेषत्वात्। भक्तिविशेषत्वाच्च। "नान्यः पन्था अयनायविद्यते" भक्त्यावनन्यया शक्य" इत्यादिभिर्नविरोधः।

साधनं भगवत्प्राप्तौ स एवेतिस्थिरामतिः। साध्यभक्तिस्तथा सैव प्रपत्तिरिति गीयते॥
उपायो भक्तिरेवेति तत्प्राप्तौ यातु सा मतिः। उपायभक्तितरेषाः पूर्वोक्तैव गरीयसी॥
उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी। साध्यभक्तिस्तु साहन्त्री प्रारब्धस्यापि भूयसी॥

इत्यादि प्रमाणमप्यनुसन्धेयम्।

साध्याभक्तिः यया सा साध्यभक्तिः प्रपत्तिरित्यर्थः। एतस्या अपि मन्त्रान्तरादिभिस्तद्विद्याभेदवद्भेदसिद्धे सर्ववेदान्तप्रत्ययन्यायात्। सर्वप्रपत्तिप्रकरणपठितगुणोपसंहारेण पौष्कल्ये सिद्धे विकल्पोऽविशिष्टफलत्वादितिन्यायेन विद्यान्तरसमुच्चयप्रसङ्गाभावः। सर्ववेदान्त प्रत्ययन्यायो हि एकस्या वैश्वानरविद्यायाः नानाशाखास्वाम्नातायाः फलसंयोगरूपचोदनासंज्ञाद्यविशेषेण सर्वत्रैकस्या एव प्रत्यभिज्ञायमानतयैकयावगमेन नानाशाखागताङ्गोपसंहारेण सर्वाङ्गोपेत तद्विद्यानुष्ठापकः। ननु फलवैषम्यामावे लघूपाये सति गुरूपाय विधानमनर्थकमितिचेन्न। तादृशाध्यवसायादेर्दुष्करत्वेन गौरवाविशेषात्। तथोक्त प्रपत्तिप्रकरणे

उपायस्सुकरस्सोऽयं दुष्करश्च मतोममेति। यथा च कश्चिन्महता प्रयासेन राज्ञ अर्थं सम्पादयति। स्खलने च यथोचितं दण्ड्यते। अपरस्त्वन्तरङ्ग सेवाक्षमः। अल्पायासेन तावदधिकं वार्थं संपादयति। किञ्चस्खलने सह्यते। महत्स्वप्यपराधेष्वल्पदण्ड्यो भवति। तत्रापि मन्दमध्यानामन्तरङ्गसेवा दुर्लभेति चेदिहापि तथैव। यथोपायभक्तिष्वेव तत्तच्छाखाभेदेनवर्णाश्रमभेदेनचाङ्गभूतानां कर्मणां गुरुलघुतारतम्येऽपि फलमविशिष्टं तथेहापि। उपायभक्तौ नित्यनैमित्तिकरूपाणां फलाभिसन्धिरहित काम्य कर्मणां चाङ्गत्वेनानुष्ठानं, न पुनस्त्वा तन्त्र्येण। निषिद्धवर्जनं द्वयोरपि भक्त्योस्समानम्। साध्यभक्तौ तु काम्यानां स्वरूपतोऽपि त्यागः। न तु नित्यनैमित्तिकानाम्।

नन्वङ्गिनः प्रहाणात्तदङ्गानां तेषामपि परित्याग एवेति चेन्न। अङ्गत्वेनाननुष्ठानेऽपि विहितत्वाच्चाश्रमकर्मापीतिन्यायेन यावदाश्रमं तत्परित्यागासम्भवात्। तदेतत् नियतस्यतु सन्यासः कर्मणो नोपपद्यते। इत्यादिना विवृतम्। यत्तु परित्यक्तसकलवर्णाश्रमधर्माः केचिद् संवर्तमरुत

विदुरादयः ब्रह्मविदस्सञ्चरन्तीति यथेष्टकरणकौतुकिनां प्रलपितम्। तदसत्। तत्तत्प्रकरणेष्वेव जडवदाचरणेन ज्ञानं सिद्धयतीत्यभिसन्धिमात्रेण ते तथाकुर्वन्तितिस्फुटप्रतीतेः।

बाल्येनतिष्ठासेत् जडवल्लोकमाचरेत्। सतां मार्गमदूषयन्नित्यादीनां पर्यालोचनात्।

बाल्यं च शक्तिविद्याभिजनाद्युत्कर्षाणां सतामनाविष्करणमेव। न तु कामचाराभक्ष्यभक्षणादि। अन्यथा नाविरतो दुश्चरितात्। वर्णाश्रमाचारवता इत्यादि प्रमाणव्याकोपप्रसङ्गात्।

अथ ब्रह्मविद उत्तर पूर्वाघयोरश्लेषविनाश प्रकारस्सुहृत् द्विषत्संक्रमणप्रकारश्चोच्यते। समधिगतविद्यानां भुक्तफलकृतप्रायश्चित्तप्रारब्धकर्मव्यतिरिक्तं प्राचीनकर्म उपायप्रभावादेवाग्नि प्रोतेषिकातूलवत् प्रदह्यते। उत्तरं चा बुद्धिपूर्वकं पुष्करपलाश आप इव न श्लिष्यति। पुण्येऽपि विद्यानुकूलव्यतिरिक्ताश्शस्य मोक्षविरोधित्वाविश्लेषादनिष्टफलतया पापशब्दाभिलप्यस्याश्लेष विनाशावेव। नाभुक्तं क्षीयतेकर्म कल्पकोटिशतैरपि। इत्यादिकं तु विद्यामाहात्म्य जनिताश्लेष विनाशविषयकर्मव्यतिरिक्तविषयम्। प्रारब्धं तु भोगेनैव क्षीयते। प्रारब्धकर्मणश्च न तद्देहपाता वधिकत्वनियमः कर्मणां विचित्रफलत्वात्। अस्माच्छरीरात्समुत्थायेत्यादेरन्तिमशरीरविषयत्वात्। तत एवान्तिमशरीरनिवृत्तौ देशकालनियमाभावोऽपि सिद्धः। एवं बुद्धिपूर्वमुत्तरमपिभोगेन प्रायश्चित्तेनवा क्षीयते। न चैवं प्रायशः विद्यानुकूलं पुण्यपापं च बुद्धिपूर्वं करोति फलाभिसन्धि युक्तकर्मणः विद्याविरोधित्वात् फलान्तरेषु च विरक्तत्वात्। पापेत्वीश्वराज्ञोल्लङ्घनभयान्न प्रवर्तते। यदि च बुद्धिपूर्वं प्रवर्तते तदाभीतः स्वयमेव तदुचितं प्रायश्चित्त करोति। यदि न करोति तदा तत्फलं प्रारब्धावसानात् पूर्वमेव यथा कथञ्चित फलति। न तु जन्मादि प्रयोजकं भवति। तथा च भुक्तफलकृतप्रायश्चित्तव्यतिरिक्ताः प्राचीनपापपुण्यराशयः विनाशविषयाः। अबुद्धिपूर्वोत्तरपापपुण्यराशयः अश्लेषविषयाः। इति निष्कर्षः।

नन्वेवं समस्तकर्मप्रळये साधुपापकृत्ययोर्हानं सुहृद्द्विषदुपायनं च कथ घटते? तथा हि, न तावत् पूर्वं कृतयोः पापपुण्ययोः। तत्र केषाञ्चिन कर्मणां दत्तफलत्व त्। केषाञ्चित् प्रायश्चित्तविद्याभ्यां विनष्टत्वात्। फलवत्तयोरपिकर्मस्वरूपनिवर्तकत्वात्। केषाञ्चिन प्रारब्धफल कर्मणां भोगेनैवक्षपितत्वात्। एवमुत्तरकृतानामबुद्धिपूर्वकानां चाश्लिष्टत्वात् विद्यानुकूलानां च विद्ययैव फलभूतया निवृत्तत्वादिति चेदत्रोच्यते। दत्तफलमदत्तफलं चेति पूर्वाघं द्विविधम्। अदत्तफलमपि प्रायश्चित्त विनष्टमविनष्टं चेति। अविनष्टमपि प्रारब्धफलमप्रारब्धफलं चेति। अन्तिमं विद्याविनाश्यम्। एवमुत्तरमपि विद्यानुकूलमननुकूलं चेति द्विविधम्। अननुकूलमपि बुद्धिपूर्वं अबुद्धिपूर्वं चेति।

तत्राबुद्धिपूर्वस्य विद्यामाहात्म्यादश्लेषः। एवं ययोः कर्मराश्योः प्रबलकर्मान्तर प्रतिरोधाददत्तफलयोरश्लेषविनाशौ भवतः। तयोर्हानं सुहृदाद्युपायनं चोच्यते। अश्लेषविनाशौ च कर्मशक्ति प्रतिबन्धतन्नाशावेव। सा च शक्तिः भगवत्प्रीतिकोपविशेषात्मिका। तादृशौ च प्रीतिकोपौ सुहृद्-द्विषद्गोचरौ भवत इति तावतैवोपायनमुच्यते। अत्रायं विशेषः। विद्यानुगुणानामदत्तफलानां कर्मणां शरीरपातादूर्ध्वं विनाश उपायनं च। इतरेषां तु विद्याविगमदशायामेवाश्लेषविनाशौ। उत्क्रमणदशायां च हानमुपायन चेति विभाग इति। न्यासविद्या तु प्रारब्धमपि निश्शेषं विनाशयितुं शक्ता। तथाऽपि रागविषयमस्यं तदनुबन्धि-दुःखं च स्थापयति। निश्शेषवैराग्ये तु निश्शेषं निवर्तयति। अत एवार्तदृप्तभेदः। राग-विषयांश्च एतद्देहावसानिकः देहान्तरावसानिक इति-दृप्ते न परिच्छेतुं शक्यम्। विचित्र-त्वात्पुंसामभिप्रायपद्धतेः। अस्यां च विद्यायामन्तिम प्रत्ययापेक्षापि न विद्यते। अत आचार्याः।

प्रारब्धकर्मावधिको मोक्ष इत्युपासितुः। दृप्तस्य देहावधिक आर्तस्यार्त्यवधिर्मतः॥ इति

उत्क्रमिष्यतस्सर्वस्य पूर्वं वागिन्द्रियं तदनु च शेषाणि नवेन्द्रियाणिमनसा सहाविभागं गच्छन्ति तच्च सर्वेन्द्रियसंयुक्तमनः प्राणेन। सचैकादशेन्द्रियसंयुक्तोजीवेनाविभागं गच्छति। स चजीवात्मा इन्द्रियप्राणसंयुक्तं सूक्ष्मैः पञ्चभूतैरप्यविभागं गच्छति। तानिपञ्चभूतानि इन्द्रियप्राणजीव संयुक्तानि परमात्मनाऽविभागं गच्छन्ति। एतावच्चविद्वदविदुषोस्साधारणम्, अविदुषस्तुविशेषः प्रागेवोक्तः। विद्वांस्तु सर्वोर्ध्वन्यया ब्रह्मनाड्या सुखेन शरीरान्निष्क्रामन्नर्चिरादिनास्मिन् पक्षेदगय नाब्दमरुदर्केन्दुवैद्युतवरुणेन्द्रप्रजापतिसंज्ञैरातिवाहिकैः पुरुषैः क्रमाद्यथास्वं देशमतिवाह्य ततो वैद्युतेनामानवनाम्ना तेनैव क्रमाद्वरुणादिममीपंनीतः तेनब्रह्ममीपमुपनीयते। उत्क्रम्य गच्छत-श्चास्य सर्वकर्मक्षयेऽपि विद्यामाहात्म्यादेव सूक्ष्मशरीराभिलप्य किंचिन् त्रिगुणद्रव्यमुष्टम्भक-मनुवर्तते। निश्शेषाविद्याविनाशश्च विशिष्टदेशगतिमपेक्ष इति गतिशास्त्रादेवाध्यवसीयते।

यथा च तमेतं वेदानुवचने नेत्यादिशास्त्रेणविद्योत्पत्तेर्वर्णा श्रमधर्मशौचाचारदेश काला द्यपेक्षावगम्यते, तथा निश्शेषाविद्यानिवृत्तिरपि विशिष्टदेशगतिमपेक्षेति शास्त्रादवगम्यत। उत्क्रमणप्रभृतिचोत्तरोत्तरमतिशयितज्ञानानन्दश्चालि जायते। प्राणेन्द्रियादिम वाच्च मध्ये भोगविहारसंपादाद्युपपत्तिः। अमानवकरस्पर्शादारभ्य चासौमुक्तः ततः पूर्वस्मर्वोऽप्युपायस्या पारः। फलं प्राप्तापदपेक्षारोहणादिकम्। तथाह्ययमीश्वर इवापहतपाप्मत्वसत्यसङ्कल्पत्वादि विशिष्टो भवति। तच्चास्य समस्त प्रतिबन्धक्षात्यन्तिकलयादाविर्भूतं स्वाभाविक रूपम्। ततः परं कदाचिदप्यस्य न संसारात्मिकापुनरावृत्तिः। तत्रस्थान्तरमपुरुष सङ्कल्पाद्वा स यदि

पितृलोककामो भवति मातृलोककामो भवतीत्यादिना मातृपितृलोककामनायाः श्रुतत्वात् पित्रादिलोककामनायत्तस्वसङ्कल्पाद्वा तादृशस्थानस्य स्वर्गादिवन्नश्वरत्वेन वापुनरावृत्तिसंभावनात्वात्। न स्यात्। परमपुरुषस्यत्यसङ्कल्पोऽत्यन्तप्रियतमं ज्ञानिनं प्राप्य कदाचिदपि नावर्तयिष्यति।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानस्संसिद्धिं परमांगताः॥

प्रियो हि ज्ञानिनोऽत्यर्थं अहं स च ममप्रियः। इत्युपक्रम्य बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते॥ इत्यादि प्रमाणात्। निश्शेषक्षीणकर्मबन्धस्यासङ्कुचितज्ञानस्य परब्रह्मानुभवैकस्वभावस्य तदात्यन्तहेयापुरुषार्थतत्साधनारम्भादिषु कामनानुदयान्न स्वसङ्कल्पात् पुनरावृत्तिशङ्का। पितृलोककामोभवतीत्यादिकं तु स्वसङ्कल्प, भगवत्संकल्पान्यतरसृष्टपरमपुरुषभोगनिमयाप्राकृत पित्रादिभोगरूपत्वेन भोगविभूत्यनुभवविशेषप्रतिपादकमिति नानुपपत्तिः। "कालं स पचते तत्र नकालस्तत्रवेप्रभुः" इत्यादिना कालाकाश्यत्वाजरत्वाक्षरत्वादि प्रतिपादनात्। स्थानानित्यत्व प्रयुक्ता न पुनरावृत्तिशङ्का। अतो मुक्तः पुन र्न निवर्तन इति।

अथ कोऽसौमोक्षः। निश्शेषाविद्यानिवृत्तिरूपपरिपूर्णब्रह्मानुभवः स एव यथाधिकारं भक्तिप्रपत्त्यन्यतरोपायेन साध्यते। सचानुभवस्सर्वविषयकस्वसङ्कोचकानां कर्मणां निश्शेषक्षयात्। "सर्वं हृपश्यः पश्यति निरञ्जनः परमं साम्यमुपैति"। मम साधर्म्यमागता इत्यादिप्रमाणैः सचायमनुभवः पुनः कदापिन क्षीयते; कारणाभावात्। अतोमुक्त ईश्वरवत सर्वज्ञः। नन्वसौ मोक्षः नित्यो वा आगन्तुकोवा। नाद्यः। साधनानुष्ठानवैफल्यात्। न द्वितीयः। मोक्षस्य नश्वरत्व प्रसङ्गाज्जातस्यविनाशध्रौव्यादितिचेन्न। पूर्वावधिमतो ध्वंसस्योत्तरावधिराहित्यवदस्याप्युत्तरावधिराहित्यात्। भावान्तराभाववादिनो धीसङ्कोचध्वंसरूपत्वात् परिपूर्णब्रह्मानुभव रूपमोक्षस्येतिनानुपपत्तिः।

अत्रेदमवधेयम्। धर्मभूतज्ञानं तु द्रव्यं, नित्यं च द्रव्यत्वादेवविकारयोगि। तच्च सर्वविषयकत्वस्वभावमपि कर्मणा प्रतिबद्धं सत् तत्तत्कर्मतारतम्येनविषयप्रकाशनतारतम्यवत्। यथा प्रकाशस्वभावस्यापि प्रभाद्रव्यस्य घटमित्यादयवधारणाधीन प्रकाशप्रतिबन्धस्तदभावेचस्वाभाविकः प्रकाशः। तथा प्रतिबन्धककर्मणां निश्शेषक्षये सति स्वाभाविकसर्वविषय प्रकाशनरूपावस्थाजायते। सैव सङ्कुचितावस्थावस्थितस्य ज्ञानस्यस्वारयाथात्म्यानवगाहिनः अविद्याशब्दवाच्यस्यध्वंसः। यथाघटत्वावस्थावस्थितस्य मृद्द्रव्यस्यकपालावस्थाप्राप्तिर्ध्वंसः। तद्वत्। तथाचा-

विद्यानिवृत्तिरूपपरिपूर्णब्रह्मानुभवस्य जातत्वेऽपितस्यतद्विरोध्यवस्थायास्तदुत्तरभावात् तस्यनित्यत्वमिति । आहुश्चमहर्षयः ।

यथा न क्रियतेज्योत्स्ना मलप्रक्षाळनान्मणेः । दोषप्रहाणान्नज्ञानं आत्मनः क्रियतेतथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् । सदेवनीयते व्यक्तिमसतस्सम्भवः कुतः ॥
तथाहेयगुणध्वंसादवबोधादयो गुणाः । प्राकाश्यं तेन जन्यन्ते नित्या एवात्मनो हिते । इति ।

ननु यदिमुक्तस्सर्वज्ञस्सकथं न दुःख्येत । प्रतिकूलविषयविशेषसंदर्शनस्यैवदुःखहेतुत्वात् । लोकेतथैवदृष्टेः । नचानुकूल मात्रविषयामुक्तधीरितिवाच्यम् । सर्वं ह पश्यः पश्यतीतिश्रुतेस्सङ्कोचकामावात् । न च न पश्योमृत्युं पश्यति न रोगंनोतदुःखतामितिश्रुत्या संकोचस्सोढव्य इति वाच्यम् । संकोचककर्मणां निश्शेषक्षीणत्वात् । न च बद्धदशायां केनचिद्धेतुनानुकूलेषु प्रतिकूल बुद्धिव देदानीं प्रतिकूलेष्वप्यनुकूलबुद्धिरितिवाच्यम् । तथासतीदानीमप्युपाध्यनुवृत्या कर्मबन्धानुवृत्तिरितिमुक्तेरेवाभाव प्रसङ्गात् । तथा च मुक्तबुद्धिस्सङ्कोचासङ्कोचविकल्पासहतया पाषाण कल्पपक्ष एवज्यायानितिचेन्मैवम् । सर्वस्यापि वस्तुजातस्य वासुदेवविभूतितयास्वतोऽनुकूलत्वात् । वासुदेवस्य च निरुपाधिकस्वामित्वान्निरुपाधिकस्वामिविभूतितयापरिदृश्यमानं सर्वं स्वतोऽनुकूलमेव भवेत् ।

न च स्वतोनुकूलस्वभावं सर्वं बद्धैरनुकूलतया कथं न गृह्यत इतिवाच्यम् । कर्मसंवृतधिया तेषां कर्मानुगुण्येनानुकूल प्रतिकूलोदासीनतया भानात् । प्रतिबन्धकनिवृत्तावेव स्वाभाविकानुकूल्यप्रतीतेः । यथापित्तापहतस्य क्षीरादेरभोग्यत्वेऽपि पित्तशान्तौ तस्यैवभोग्यत्वम् । आहुश्चमहर्षयः,

वस्त्वेकमेव दुःखाय सुखायेर्ष्यानवायच । कोपाय च यतस्तस्माद्वस्तुवस्त्वात्मकं कुतः ॥ इति ।
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते ॥ इति च ।

अतस्सर्वोपाधिविगमे स्वाभाविकानुकूल्यादिष्कारः उच्यत इति, स्यादेतत् । ननु संसारित्वादस्यासिद्धं निरयाणां प्रातिकूल्यं स्वानुभूतं प्राचीनं च दुःखं मुक्तः पश्यतिवा नवा । आद्ये (श्लो)

"गन्धाश्मरजसास्पृष्टो नष्टोदीपः पुनर्ज्वलेत्" इतिन्यायेन पुनरपि दुःखमन्ततिः स्यात् । उत्तरत्र मुक्तानां धीसङ्कोचप्रसङ्गः । तदाहि दुःखमपिस्यात् । तत्रधीसङ्कोचव्याप्यत्वात् । अतो

बद्धावस्थायां कतिपयदुःखानुभवः। मुक्तावस्थायामनन्तदुःखानुभव इत्यायातमितिचेन्न स्ववृत्तिवर्तमान दुःखसाक्षात्कारस्यैव दुःखित्वरूपत्वात् स्वीय प्राचीनदुःखानांस्ववृत्तित्वेपि वर्तमानत्वाभावात्। अन्यदुःखानांवर्तमानत्वेपिस्ववृत्तित्वाभावाच्च न मुक्तस्य दुःखानुभवः। न हिराज्ञाभिषेकं राजकुमारं प्राचीनकारागृहवासधीर्दुःखाकरोति। अत एव प्राप्तानि दुःखान्यपि-दण्डकेषुसञ्चिन्त्यमानानिसुखीबभूवुः इत्युक्तम्।

निरयाणामपि वासुदेवविभूतित्वेनानुकूलत्वात कर्मिणां वासुदेवविभूतिभूतानां केषांचित् प्रातिकूल्यं कर्मकृतमेव, तन्निवृत्तौ कथं तेषां प्रातिकूल्यम्। एवं तर्हीश्वरस्य सर्वाधारत्वात् स्ववृत्तिवर्तमानदुःखसाक्षात्कारवत्वात् तस्य दुःखित्वं स्यादितिचेन्न। तस्य जीवद्वारा-दुःखाश्रयत्वेपि साक्षात् (सम्बन्धेन) तदनाधारत्वात्। विकारित्व दुःखित्वादेस्साक्षादाधारत्व-एव हि दोषः। अत एव प्रपञ्चान्तर्यामिणस्तद्दोषास्पर्श उपपद्यते। न चैवमपीश्वरस्य सर्वशरीरत्वात् तत्तच्छरीरसम्बन्ध प्रयुक्त दुःखित्वं जीववत् साक्षात् सम्बन्धे नस्यादिति वाच्यम्। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्योऽभिचाकशीति। इति श्रुत्या कर्मकृतशरीरसम्बन्धस्य दुःखहेतुत्वाप्रतिपादनेन शरीरसम्बन्धस्य दुःखं प्रत्यप्रयोजकत्वात्। दण्ड्यदण्डकयोरेककारागृहसम्बन्धेऽपि दुःखतदभावयोर्दर्शनात्। राजतद्भृत्ययोश्शरीरसम्बन्धसाम्येपि दुःखतदभावयोर्दर्शनाच्च।

न चैवमपिमनुष्याणां, "व्यसनेषुमनुष्याणां भृशं भवति दुःखितः।' इत्यनेन भगवत्स्साक्षाद्दुःखाधारत्वं प्रतीयत इतिवाच्यम्। तस्य दुःखाभिनयमात्ररत्वात्। अन्यथा दुःखस्यात्यन्तहेयतया तदभ्युपगमे तस्यहेयप्रत्यनीकत्वभङ्गप्रसङ्गात्। न च दुःखवत् क्रोधस्यापि हेयतया रावणादिविषये क्रोधदर्शनात्तद्दोषतादवस्थ्यमिति वाच्यम्। दुष्टनिग्रहदुरन्धरस्य प्रभोर्निग्रहौपयिकस्य क्रोधविशेषस्य सुगुणत्वात्। तथाहि क्रोधोद्विविधः सुनिरसविषयोऽसुनिरसविषयश्चेति। तत्राद्योनहेयः। तस्यविषयनिरसनद्वारासन्तोषजनकत्वात्। लोके हि राजानश्शत्रुषु क्रुद्धास्तान् शत्रून् निरस्य तुष्यन्ति। द्वितीयस्तु हेयः। तस्य शोकजनकत्वात्। शत्रुजयप्रवृत्ताहिराजानः अशक्त्या शत्रुजयान्निवृत्ताः खिन्नाभवन्ति। अतस्तस्यहेयत्वान्नेश्वरवृत्तित्वम्। अशक्यविषयकोपस्य शोकहेतुत्वेनहेयत्वम्। द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषकौ। यश्चालभ्यं कामयते यश्चकुप्यत्यनीश्वरः॥ इत्यनेनाप्यभिधीयते।

अथैवंरीत्या दुःखित्वमपि द्विविधम्। परदुःखदुःखित्वं चेति। तत्राद्यस्यदयारूपतया ऽहेयत्वात् तस्येश्वरवृत्तित्वे बाधकाभावेन व्यसनेष्वित्यादेर्मुख्यार्थस्वीकार उचित इतिचेन्न।

परदुःखापचिकीर्षैव दया न तु परदुःख दुखित्वम्। तस्यहेयगुणत्वात्। अतस्तदर्थंशक्तस्यपरदुःख दुःखित्वाभ्युपगमः अनुचित एव। परदुःख प्रतीकारेऽशक्त एव हिस्वयमपि दुःखितोभवति। न तु शक्तः। तथा च दुःखस्य सर्वात्मनाहेयत्वात्। भृशं भवतीत्यस्य दुःखाभिनय परत्वमेवाश्रयितुं युक्तम्। सर्वशक्तस्यतथाभिनयोप्यासुरोपप्लवलीलायै युज्यत इत्यलं प्रसक्तानुप्रसक्त्या। आहुश्चाचार्याः।

यत्तुस्वेच्छावतारेष्वभिनयतितदप्यासुरोपप्लवार्थम्।
यादुःखापाचिकीर्षापरहितमनसस्सैवभक्तानुकम्पा।
रोषोऽपि प्रीतयेस्यात् सुनिरस्तविषयस्तस्यनिस्सीमशक्तेः इति। ... .

अतस्साक्षात्सम्बन्धेनस्वगतवर्तमान दुःखादिदर्शनस्यैव दुःखानुभवरूपत्वान्मुक्तानां दुःख नुभव गन्ध इति। स्यादेतत्। ननु मुक्तानामानन्दे तारतम्यं वक्तव्यम्। तद्धि साधनतार तम्यायत्तं मुक्तिसाधनं हिमानम्। तत्तारतम्यं च लोकत एवावगम्यते। मनुष्यापेक्षया देवानां ऋषीणां च बहुतरतपश्चर्याऽऽदि शयित शक्तिमत्त्वं च पुराणादिषु प्रसिद्धम्। प्रयत्नाधिक्यं च फलाधिक्यगमकम्। अन्यथा प्रयत्नानर्थक्य प्रसङ्गः। साधनानुष्ठानवैषम्ये सत्य पे तुल्यफलदाने ईश्वरस्य वैषम्य प्रसङ्गश्च। तथा सैषानन्दस्यमीमांसा भवतीत्यारभ्य मनुष्यादि चतुर्मुख पर्यन्तानां मुक्तानामानन्दतारतम्य प्रतिपाद्य श्रोत्रियस्य चाकामहतस्येति तत्तन्मुक्तेष्वपि तत्तदानन्दतारतम्यमतिदिश्यते। अतस्तत्तन्मुक्तानामानन्दतारतम्यं सिद्धम्।

परमसाम्य श्रुतिश्चासङ्कुचितार्था नत्वयापिव्यवस्थापयितु शक्यते। जगत्कारणत्व-लक्ष्मीपतित्वादेर्मुक्तेष्वसम्भवात्। शेषत्वशेषित्वाणुत्व महत्त्वादि प्रयुक्ततारतम्यस्यदुरपह्नवत्वाच्च। अतो निर्दोषत्वमात्रेणैवेश्वरसाम्यपरापरमसाम्य श्रुतिः। ततश्च मुक्तानां यथा साधनानुष्ठानमानन्द तारतम्यसिद्धिरिति चेदुच्यते। अस्तुसाधनतारतम्यं न तत् स्वाभाविकम्। अपितुकर्मकृतमिति अविद्या कर्म संज्ञान्या तृतीया शक्तिरिष्यते। इति कर्मस्वरूपमभिधाय, तयातिगोहितत्व च शक्तिः क्षेत्रज्ञसंज्ञिका। सर्वभूतेषु भूपाल तारतम्येन वर्तत इति महर्षिवचनादवगम्यते।

मुक्तोचनिश्शेषकर्मक्षयेणकुतस्तत्प्रयुक्तं ज्ञानतारतम्यम्। कुतस्तरां तत्प्रयुक्तमानन्द-तारतम्यम्। अस्तुविज्ञाने तारतम्यम्। तथापितत्प्रयुक्तं न साध्यतारतम्यम्। स्नान मप्तविधं प्रोक्तमित्युक्तवारुणाग्नेयादिस्नानतारतम्येपि तत्साध्यशुचित्वे तारतम्यादर्शनात्। शक्ताशक्त वे-भागेन प्रायश्चित्ततारतम्येपि दुरितनिवृत्तितारतम्यादर्शनात्। बुद्धिमदबुद्धिमत्कौ तुरगैकपतार-

तम्येपिक्रीततारतम्यादर्शना च। ऊषरानूषराक्षेत्रनिक्षिप्तबीजतारतम्याभावेपि तत्साध्यफलतारतम्यदर्शनाच्च। मन्दामन्दपुरुष कर्तृक श्रवणतारतम्याभावेपि तत्साध्यज्ञानतारतम्यदर्शनाच्च। स्वर्गापवर्गकामपुरुषानुष्ठितज्योतिष्टोमावैषम्येऽपितत्साध्यफलतारतम्यदर्शनाच्च। हिताहित पुरुषकृतसेवासाम्येपि तत्फलराजानुग्रह तारतम्यदर्शनाच्चतार्णतार्णरूपसामग्रीवैषम्येपितज्जन्यवह्निवैरूप्याभावाच्चान्वयव्यतिरेकाभ्यां व्यभिचारात्।

न च प्रयत्नानर्थक्यम्। उपासनकालीनानन्दविशेषसम्पादनेननत्वार्थकत्वात्। अत एव न वैषम्यमीश्वरस्य। अतो न साधनतारतम्यमानन्दतारतम्ये प्रमाणम्। अप्रामाणिकश्चायमानन्दतारतम्यवादः। तथा हि। न तावत् प्रत्यक्षं प्रमाणम्। तस्य वैषयिकानन्दविषयत्वात्। अत एव नानुमानम्। तस्य प्रत्यक्षावगतव्याप्तिग्रहणमूलकत्वात्। अप्रयोजकत्वाच्च नापिश्रुतिः। अदर्शनात्। परमसाम्यश्रुतिविरोधाच्च। न चासौ निर्दोषत्वेन साम्यपरा। सङ्कोचेमानाभावात्। पारम्यविशेषणस्वारस्य भङ्गाच्च। तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमित्यत्र विधूयेतित्वाप्रत्ययेन निर्दोषत्वस्य साम्ये हेतुत्वप्रतिपादनेन, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता, रसं ह्येवायं लब्धानन्दी भवति, एष ह्येवानन्दयाति, ब्रह्मणोमहिमानमात्मानीति श्रुतिभिर्भोगमात्रसाम्यलिङ्गाच्चेतिसूत्रेण चावगतस्य भोगसाम्यस्यैव तत्साध्यत्वेन वक्तव्यत्वात्॥

अतः एव ब्रह्मवेद ब्रह्मैव भवतीति व्यपदेशः उपपद्यते। यथाराज्ञः समानभोगेऽधिकारिणि राजैवायमित्युच्यते। न च किञ्चित् साम्ये। एतेन सैषानन्दस्य मीमांसा भवतीत्यादिनामुक्तानामानन्दतारतम्यप्रत्याशापि प्रत्युक्ता। परमसाम्यश्रुतिविरोध तु यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति इति दृष्टान्तेन शुद्धोदकस्यासक्तस्य रूपरसादिसाम्यवदत्रापिनिर्दोषयोर्मुक्तब्रह्मणोरानन्दसाम्यस्यैववक्तव्यत्वाच्च। आनन्दमीमांसायामपि मुक्तानन्दतारतम्यानुक्तेश्च। तत्र हि मनुष्यगन्धर्वानारभ्य ब्रह्मपर्यन्तानाममुक्तानामेवोत्तरोत्तरमानन्देशतगुणितत्वं प्रतिपाद्यते ननु मुक्तेभ्यो मुक्तानाम्।

किञ्च, सैषानन्दस्यमीमांसाभवतीति वाक्यमानन्दमयत्वेनावगतब्रह्मानन्दपरिपूर्णतापरिच्छिन्नत्वप्रतिपादनाय प्रवृत्तमिति सैषेतिनिर्दिष्टप्रतिनिर्देशकृतच्छन्द समभिव्याहारादवगम्यते। यतो वाचो निवर्तन्ते। इति श्लोके आनन्दं ब्रह्मणो विद्वानिति ब्रह्मानन्दोपसंहारस्तदेवावगमयति। तत्र कथं मुक्तानन्दतारतम्येपि तात्पर्यं कल्प्यते। तथा सति तात्पर्यभेदाद्वाक्यभेदापत्तेः। तर्हि प्रतिपर्यायं श्रोत्रियस्येत्यभिधानं किमर्थमितिचेदुच्यते। उपक्रमेतावत् सोऽश्नुते

सर्वान् कामान् सह ब्रह्मणा विपश्चितेति मुक्तस्य ब्रह्मणः सर्वं सर्वकामत्वं प्रचुरानन्दयोगस्य संग्रहेणोक्तस्य तद्विवरणतया सैषानन्दस्येत्यादेः प्रवृत्तत्वात्। तत्र श्रोत्रियस्येत्यनभिधाने मनुष्यगन्धर्वादीनाममुक्तानामिव तन्मुक्तानामपि तेनैव पदेन संग्रहप्रसङ्गेन तदानन्दस्याप्यन्योन्यमपकर्षप्रयुक्तेनाभिमतब्रह्मानन्दसाम्यं न सिद्ध्येत्। तदभिधाने तु सर्वानन्दानां ब्रह्मानन्द इव मुक्तानन्देष्वन्तर्भावसिद्ध तदपकर्षो न सिद्ध्येत्। अतोऽवश्यं तद्वक्तव्यम् ॥

सर्वत्रश्रोत्रियस्येति पदमेकं मुक्तपरमेव। तथा च स एको ब्रह्मण आनन्द इत्यनेन मनुष्यगन्धर्वानन्दप्रभृति चतुर्मुखानन्दपर्यन्तानामुत्तरोत्तरशतगुणितानामानन्दानां शतेपञ्चाशन्न्यायेन ब्रह्मानन्दान्तर्भावेन ब्रह्मानन्दस्यापरिच्छिन्नत्वप्रतिपादनवत् श्रोत्रियस्य चाकामहतस्येत्यनेन मुक्तानन्देपि तेषामन्तर्भाव प्रतिपादनात् ब्रह्मतुल्यानन्दयोगित्वं चेत्येकत्र मुक्तस्यापीत्यभिमतसिद्धेः। नन्वेवमपि स एको ब्रह्मण आनन्द इति ब्रह्मानन्दे परिच्छेदराहित्यं प्रतिपाद्य श्रोत्रियस्येति मुक्तानन्देऽतिदेशेन मुक्तस्य ब्रह्मतुल्यानन्दसिद्धौ प्रतिपर्यायं श्रोत्रियस्येति तत्तदानन्दातिदेशः किमर्थं क्रियत इति चेन्मैवम्। रसो वै सः। रसं ह्येवायं लब्धानन्दी भवति। एष ह्येवानन्दयाति। यतो वाचो निवर्तन्ते। आनन्दं ब्रह्मणो विद्वानित्यादिभिर्ब्रह्मणो निरतिशयानन्दत्वं संप्रतिपत्या अमुक्तदेवमनुष्यादिजीवानन्दानां तारतम्यदर्शनेन तद्वन्मुक्तदेवमनुष्याद्यानन्दानां अपि तारतम्यं पश्यतां केषाञ्चिन्मन्दानां संप्रतिपत्त्यर्थं मनुष्यगन्धर्व प्रभृत्यानन्दानामपि शतेपञ्चाशन्न्यायेन मुक्तानन्देऽन्तर्भाव प्रतिपादनाय प्रतिपर्यायं श्रोत्रियस्य चेत्युक्तम्। अतस्सैषानन्दस्येत्यनेन मुक्तस्य ब्रह्मानन्दतुल्यानन्दत्वं प्रतिपाद्यत इति न मुक्तानन्दतारतम्यसिद्धिः। न चैवमपि मुक्तस्य जगद्व्यापारवर्जमित्यनेन जगत्सृष्ट्यादि लीलासम्भवेन तत्प्रयुक्तानन्दाभावेन न ब्रह्मतुल्यानन्दसिद्धिरितिवाच्यम्। जगद्व्यापाराभावेपि तद्व्यापाराधीनानन्दानां मुक्तेष्वपि पित्रादिव्यापाराधीनफलभोगजनितानन्दानां तद्व्यापारशून्य पुत्रादिष्वव सम्भवात्। मुक्तानामीश्वरेण भोगसाम्यं भोगमात्रसाम्यलिङ्गाच्चेति सूत्रेणप्रतिपादितम् अतो मुक्ता ईश्वरेण समानभोगा इति सिद्धम्।

हरिः ओं शुभमस्तु ॥

॥ श्रीः ॥

अथ कैवल्यवादः

ननु स्वात्मानन्दानुसन्धानमात्ररूपकैवल्याख्योऽपि मोक्षो भगवद्यामुनमुनिभिरुक्तः।
ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनाम्। वेद्योपादेयभावानामष्टमे भेद उच्यते॥
संसृत्यक्षरवैष्णवाध्वसु नृणामिति। अनुसृतश्चायं मोक्षो भाष्यकारैरपि। तथा हि,

चतुर्विधा भजन्ते मां जना इत्यादौ जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुरित्युक्तम् तथा चाष्टमाध्याये,

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्। मद्वाचकं व्याहरन् वाच्यं मामनुस्मरन् आत्मनः प्राणं मूर्ध्न्याधाय देहं त्यजन् यः प्रयाति। स याति परमां गतिम्। प्रकृतिवियुक्त मत्सम्मानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थ इति चोक्तम्। अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिञ्चाहेत्युक्त्वामामुपेत्यादिकं 'प्रभवत्यहरागम' इत्यन्तं व्याख्याय कैवल्यं प्राप्तानामपि पुनरावृत्तिर्नविद्यत इत्याहेत्युक्त्वा परस्तस्मादित्यादिकमपि तद्धाम परमं मम इत्येतदन्तं व्याख्यातम्। अनन्तरं चात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीं गतिमाहेत्युक्तम्। अथ तदुत्तरं द्वयोरप्यर्चिरादिकागतिः श्रुतौ श्रुता। सा च पुनरावृत्तिरुक्ता। यथा च पञ्चाग्निविद्यायामित्युपक्रम्यमहताग्रन्थेनाक्षरनिष्ठस्याप्यर्चिरादिकागतिरुक्ता। द्वादशाध्याये च येत्वक्षरमित्यत्र तेऽपि मां प्राप्नुवन्ति। ध्रुवं मत्सम्मानाकारममंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थ इत्युक्तम्। अतस्साम्प्रदायिक एवायं कैवल्याख्यो मोक्ष इति केचित्। अत्रोच्यते। न तावदयं मोक्षो भाष्यकाराभिमतः। शारीरकभाष्ये व्यक्तमुक्तत्वात् तथा हि, वाक्यान्वयादित्यधिकरणे तावदमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनादित्युक्त्वापरमपुरुषविभूतिभूतस्य प्राप्तुरात्मनस्स्वरूपयाथात्म्यवेदनमपवर्गसाधनभूतपरमपुरुषवेदनोपयोगितयावश्यकम्। न स्वत एव उपायत्वेनेत्युक्तम्। तथा येयं प्रेते विचिकित्सा मनुष्य इति व्याख्याने तत्तद्वाद्यभिमतमोक्षविकल्पानुपन्यस्य त्रय्यन्तनिष्णातास्तित्यादिना जीवपरयोः स्वरूपस्वभावानन्यभिधाय जीवस्यानादिकर्मरूपाविद्यातिरोहितस्याविद्योच्छेदपूर्वकं स्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षत इत्युक्तम्। सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिर्हि भगवत्प्राप्तिगर्भा इति च। एव वरदविष्णुमिश्रैरपि, नन्वेवं निश्शेषकर्मक्षयाभावात् कैवल्यप्राप्तौ न मुक्तस्यादित्याशङ्क्य सत्यममुक्त एव सः मोक्षस्य परमात्मानन्दानुभवरूपत्वात्। तस्य ब्रह्मानन्दानुभवाभावात्। स्वानन्द-

मात्रानुभवात्। स्वानन्दमात्रानुभवश्च, योगिनामप्यमृतं स्थानं स्वात्मसन्तोषिणश्च ये। इति भगवत्पराशरवचनात्। मुक्तिव्यतिरिक्तमनपायियोगसाध्यमैश्वर्यमिति भट्टपराशरपादैरध्यात्मखण्डद्वयव्याख्यायामैश्वर्याक्षरयोरपवर्गव्यतिरिक्ततयातुल्यत्वं दर्शितम्। यदिचासौ मोक्षः, तदा स्वाभाविकरूपप्राप्तिमन्तरेण न पर्यवसानम्। यदिपर्यवसानं, तदानित्यसंसारिविशेष एवायमिति मन्तव्यम्। उक्तं च, संगतिमालायां श्रीविष्णुचित्तैः। ननु ब्रह्मप्राप्तीच्छयोपक्रान्तस्योपासनस्य कथं कैवल्यप्रापकत्वम्। उच्यते। यथा स्वर्गकामस्यैव यागे प्रक्रान्तस्यायथावदनुष्ठाने ब्रह्मराक्षसत्वादिर्भवति इति। ननु कस्यैवं विधे स्वाभाविक भगवदनुभवयोग्यतागन्धविधुरतया दग्धबीजपर्याये स्वात्मन्यभिलाषस्यादितिचेद्धन्त। नैवंविधेष्वपिस्वर्गपशुपुत्रभिक्षोदनादिष्वभिलाषिणो दृश्यन्ते। किं पुनरशेषानन्दशालिन्येवंविधे। प्रसिद्धं च प्रियास्पदत्वं स्वात्मनः। अत्रमप्रश्च —

आश्चर्यवत् पश्यति कश्चिदेनमिति। कथं तत्रमोक्षव्यपदेश इति चेत्, दुःखभूयिष्ठदेहेन्द्रियात्यन्तलयात्। केन मार्गेण केवलं गच्छति कुलतिष्ठतीतिचेत्। येन केनापि मार्गेण गत्वा कुलापि। न त्वावदर्चिरादिगतिः। प्रकृतेः परस्ताद्वासश्च न युज्यते। परमात्मोपासनप्रकरणेष्वेव तयोः श्रवणात्। तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते इति विद्यामात्रस्यापि परमात्मानुसन्धानभेदमूलत्वात्। यदिचास्यार्चिरादिमार्गेण गतिस्यात्, तदाविशिष्टदेश प्राप्त्या निःशेषाविद्यानिवृत्तिः ब्रह्मप्राप्तिश्चस्यादेव। स एनान् ब्रह्मगमयतीति श्रवणात्। एवं च ज्ञानसङ्कोचहेतु भूताविद्यात्यन्तविलयात् सर्वज्ञत्वादि प्रसङ्गो दुष्परिहारः। भगवद्यामुनमुनिभिरपि संसृत्यक्षरवैष्णवाध्वस्वतिवैष्णवाध्वापृथगुपदिष्टः।

श्रुतोपनिषत्कैतिसूत्र भाष्ये चाधिगत परमपुरुषयाथात्म्यस्यानुपयोगतया श्रुत्यन्तर प्रतिपाद्यमानाऽर्चिरादिकागतिः या तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलाविद्यापुरुषं श्रुतवत इत्यादि। अतोऽपि केवलात्मानुसन्धायिनोऽर्चिरादिगतिर्नास्ति। अन्यथा तयापरमात्मनिर्णयायोगात्। एतत् सर्वंमप्रतीकालम्बनान्नयतीति सूत्रे व्यक्तमुक्तम्। भाष्ये पञ्चाग्निविद्यानिष्ठस्यापि प्रकृतिविनिर्मुक्तब्रह्मात्मकस्वात्मानुसन्धायित्व तत्रैव तत्कृतन्यायादिनानिर्णीतम्। भूमविद्यानिरत प्राणशब्दवाच्यकेवलजीवोपासकस्यार्चिरादिगतिः कण्ठोक्त्या प्रतिपिद्धा। एवं दहरकोणोपसंहारे च तस्मादचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते न तान् नयति। आपितु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानर्चिरादिको गणो नयतीतिसिद्धमिति। एवं सारे दीपे चोक्तम्। एवं स्थिते श्रीमद्गीताभाष्यवाक्यान्यपि तदनुरोधेन वर्णनीयानि। तत्प्रकारस्तु श्रीमत्तात्पर्यचन्द्रिकायां विशदमनुसन्धेयः। अत्रापि तत्प्रकारविशेषः किञ्चिदुच्यते।

यस्त्वात्म याथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाहेत्यादि-ग्रन्थस्तु कैवल्यनिष्ठपरमपुरुषनिष्ठयोर्विषय इति न मन्तव्यम्। किंतु परमात्मशरीरत्वात्मानुसन्धात् स्वात्मशरीरकपरमात्मानुसन्धातृभेदमिव ब्रह्मनिष्ठविषय एव। तथा सत्यात्मयाथात्म्यविच्छब्दोऽप्यत्यन्तानुगुणः। एकग्रन्थशकलास्वारस्यं बहुग्रन्थस्वारस्याय ग्राह्यम्। न चात्रकश्चित् भगवद्याम्मुन मुनिवचनविरोधगन्धोऽपि श्रीमद्गीताभाष्येऽपि पञ्चाग्निविद्यानिष्ठस्य ब्रह्मात्मकस्वात्मानुसन्धानं तत्क्रतुन्यायात् ब्रह्मप्राप्तिश्च स्फुटतरं प्रत्यपादि। अतः कैवलात्मानुभवितुर्नार्चिरादिनागमनमपुनरावृत्तिश्च।

किन्तुपञ्चाग्निविद्योक्तजीवात्मशरीरकपरमात्मोपासितुः परमात्मशरीरकजीवात्मोपासितुश्चार्चिरादिगमनमपुनरावृत्तिश्चेति। आहुश्चाचार्याः,

सर्वकर्मविनिर्मोके मुक्तिभेदः कथं भवेत्। कर्मैकदेशयोगे तु नमुक्तिर्मुक्ति भेदवत्॥

न च कैवल्यवचसा मुक्तिरेषेति युज्यते। स्वमात्र मुक्तितात्पर्यात् तस्य तत्र प्रयोगतः॥ इति, एवं, विश्वान्तर्यामित्वं स्वयमिहचिदचिद्विग्रहैर्वाविशिष्टंयस्यामालम्बनं सामव भवशमनी वीतरागस्य विद्या। यस्तूपास्तेयथोक्तं तदितरदथ तथा ब्रह्मदृष्ट्या स्वतोवानैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरादिर्न मोक्षः॥ इति च।

चतुर्विधा मम जना भक्ता एव हि ते श्रुताः। तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः॥
अहमेव गतिस्तेषां निराशीः कर्मकारिणाम्। येतुशिष्टास्त्रयोमक्ताः फलकामा हि तेमताः॥
सर्वेच्यवनधर्माणः प्रतिबुद्धस्तुमोक्षभाक्। इति प्रमाणान्यनुसन्धेयानि।

किं बहुना। केवलात्मनः ब्रह्मात्मकत्वेनोपासने तस्य चिद्विशिष्ट ब्रह्मोपासनत्वात् यथाक्रतुन्यायात् ब्रह्मप्राप्तिरवर्जनीयेति। न तस्य कैवल्यमात्रानुभवः। किन्तुकैवल्यानुभवपूर्वक ब्रह्मानुभवः। स तु नित्यः। अनुभवितार्चिरादिकया गत्या गच्छति। गत्वा च न पुनर्निवर्तते। केवलात्मानुभवकामस्तु प्रकृतिविनिमुक्तमात्मानं स्वातन्त्र्येणोपास्त इति वक्तव्यम्। तथैव यथाक्रतुन्यायात् केवलात्मानुभव एव फलं भवति। तथा च तस्य प्रतीकोपासनत्वात् तत् फलमनित्यम्। तदुपासकश्च नार्चिरादिमार्गेणगच्छति पुनर्निवर्ततेच। सर्वेच्यवनधर्माणः प्रतिबुद्धस्तुमोक्षभाक् इत्युक्तेः।

एतत् सर्वमभिप्रेत्य श्रीवत्साङ्कमिश्राः॥

भोगा इमे विधिशिवादिपदं च किञ्च स्वात्मानुभूतिरिति या किलमुक्तिरुक्ता ।
सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ तवदास्यमहारसज्ञाः ॥

इत्यनुजगृहुः । अतः केवलात्मानुभवः प्राजापत्यैश्वर्याद्यनुभववन्नश्वरः । तत्स्थानमपि प्रकृतिमण्डल एव यत्र कुत्रचित्, मार्गश्च देवयानाद्यन्य इति सिद्धम् । अधिकमस्मत् पितामहपाद श्रीकृष्णसूरिकृतसारस जीविनीग्रन्थेऽनुसन्धेयम् ।

इति श्रीरामानुजसिद्धान्तसंग्रहे जीवपरिच्छेदस्समाप्तः ॥
श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥
हरिः ओं शुभमस्तु ॥

॥ श्रीः ॥
॥ श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥

अथेश्वरपरिच्छेदः

अथेश्वरश्चिन्यते । सर्वेश्वरत्वं सर्वव्यापकत्वे सतिचेतनत्वम् । सर्वशेषित्वं सर्वकर्मसमाराध्यत्वं स्वज्ञानस्वेतरसर्वद्रव्यशरीरकत्वं स्वतस्सत्यसङ्कल्पत्वादिक तल्लक्षणम् । एवं जन्मादि सूत्रे जगज्जन्मस्थितिलयकारणत्वं ब्रह्मलक्षणमुक्तम् । तत्र जन्मकारणत्वादेः प्रत्येकलक्षणत्वपक्षे एकैकस्य लक्षणत्वेपि बुद्धिवैशद्यार्थं लक्षणत्रयमिति बोध्यम् । संभूयलक्षणत्वपक्षे जन्मकारणं चतुर्मुखः । स्थितिकारणं विष्णुः । लयकरण रुद्र इति कुमतिशङ्काव्यावर्तकं प्रयोजनमिति बोध्यम् । एवं सत्यादिवाक्येष्यनन्तपदेनैव सर्वव्यावृत्तिसिद्धौ ब्रह्मणोविकारित्वव्यावर्तनाय सत्यपद जडत्वव्यावर्तनाय ज्ञानपदमिति शङ्कितक्रमेण व्यवच्छेदलाभः प्रयोजनं मार्ग्यम् । अनन्त पदेन सर्वव्यावृत्तिः कथमिति चेदित्थम् । अनन्तपदमसङ्कोचादेशतः कालतोवस्तुतश्च परिच्छेदरहितमाह ।

तत्र देशतः परिच्छेदस्तुदेश विशेषनिष्ठाभावप्रतियोगित्वम् । तच्च तत्रघटोऽस्ति अत्र नास्तीतिप्र तीत्यादेशविशेषमात्रवृत्तिघटादिषु वर्तते । ब्रह्मणि तन्नास्ति, तस्य सर्वदेशवृत्तित्वात् । अतो देशतः परिच्छिन्नव्यावृत्तं ब्रह्म । कालतः परिच्छेदोपि कालविशेषनिष्ठाभावप्रतियोगित्वम् । तच्चास्मिन् कालेऽस्ति न कालान्तर इति प्रतीत्याकालविशेषमात्रवृत्तिष्वेववर्तते । न त्रैकालिक ब्रह्मणीतिकालपरिच्छिन्नव्यावृत्तं ब्रह्म । वस्तुतः परिच्छेदस्तु एकवस्त्वनुयोगिकवस्त्वन्तरप्रति-

योगिकभेदः। स च घटः पटोनेत्यादि प्रतीत्यावस्त्वन्तरानात्मकघटादिवस्तुष्वेव। न तु ब्रह्मणि ब्रह्मणस्सर्ववस्त्वात्मकत्वात्। ब्रह्मणितादृशनिषेधासंभवात्। अतो वस्तु परिच्छेदरहितं ब्रह्म। यद्वा सर्ववस्तु सामानाधिकरण्यार्हत्वं वस्तुपरिच्छेदराहित्यम्। तच्च ब्रह्मण्येव सर्वं खल्विदं ब्रह्म। सब्रह्मा सशिवस्सेन्द्रस्सोक्षरः परमस्स्वराट्। ज्योतींषिविष्णुर्भुवनानि विष्णुरिति सामान्यतो विशेषतश्च ब्रह्मणस्सर्ववस्तुसामानाधिकरण्यदर्शनात्। अतोऽनन्तपदेनैव सर्वव्यावृत्तिसिद्धिः।

एकमेवाद्वितीयं एकोहवै नारायण आसीदित्यादिश्रवणादसावेकः निस्समाभ्यधिकश्च नत समश्चाभ्यधिकश्च दृश्यत इति प्रमाणात्। स एव ब्रह्मशब्दवाच्यः। तस्यैव त्रिविधपरिच्छेद रहितस्य सर्वात्मकत्वेननिरतिशयबृहत्वब्रह्मणत्वश्रवणात्। निरतिशयबृहत्वब्रह्मणत्वयोरेवब्रह्मशब्द-रूढ्यर्थतावच्छेदकत्वात्। अत्रेदं बोध्यम्। ब्रह्मशब्दो योगरूढः, सच बृहबृहिबृद्धाविति धातोः बृहेरश्चोपधाया इत्यौणादिकसूत्रेणकर्तरिमनिन् प्रत्ययेन निष्पन्नः। तेन योगशक्त्या बृहद्वाचकः। तथा च बृहत्ववत्सु घटादिषु बृहच्छब्दवत् ब्रह्मशब्दः प्रयुज्येत। तथा प्रयोगनिवृत्यै रूढिरपि स्वीक्रियते। तन्निमित्तं च निरतिशयत्वविशेषितं बृहत्वं ब्रह्मणत्वं च। घटादिषु तादृशरूढ्यर्था भावान्नप्रयोगः। न च योगार्थं सत्वाद्घटादिषु ब्रह्मशब्दप्रयोगस्स्यादितिवाच्यम्। योगरूढस्य रूढ्यर्थापरित्यागेनैव योगार्थस्य प्रयोगनियमदर्शनात्। अत एव पङ्कजपदस्य पङ्कजनिकर्तृ-रूढ्योगार्थमात्रेण कुमुदादौ न प्रयोगः। प्रकृत्यादिषु ब्रह्मशब्दप्रयोगस्तु बृहत्वगुणलेशयोगादौपचारिकः। न च प्रकृत्यादिषु परमपुरुषे च वैदिकप्रयोगतौल्यात् प्रकृत्यादौ गौणत्वं ब्रह्मणि मुख्यत्वमित्यत्रकिं विनिगमकमितिवाच्यम्। बृहतिब्रह्मयति तस्मादुच्यते परंब्रह्म।

बृहत्वात् ब्रह्मणत्वाच्च तत् ब्रह्मेत्यभिधीयते। वेदेभूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि॥

तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने। इत्यादि प्रमाणानामेम विनिगमकत्वात्। ब्रह्म परिवृढं सर्वतः इति यास्कोक्तेः। देवताकाण्डान्ते सविष्णुराहहि तं ब्रह्मेत्याचक्षत इति विष्णौ ब्रह्मशब्दप्रयोगाच्च। परमपुरुषे मुख्यत्वनियामकभूयस्त्वात्। अत एव सर्वत्र बृहत्वगुण-योगेन हि ब्रह्मशब्द इत्युपक्रम्य, "अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः, तस्मादन्यत्रतद्गुणलेशयोगा-दौपचारिक" इत्यभाष्यतेत्यधिकमस्मत्तातपाद श्रीकृष्णसूरिकृतब्रह्मशब्दार्थनिरुक्तावनुसन्धेयम्। स एव सदसदव्याकृतब्रह्मात्माकाशप्राणशिवनारायणादिशब्दैः करणत्वकथनतैस्सामान्यतोविशेष-तश्चव्यपदिश्यते।

न च वृश्चिकोत्पत्तौ क्वचिद्गोमयस्य क्वचिद्वृश्चिकस्य यथा हेतुत्वं, तथा जगदुत्पत्तिः क्वचित् ब्रह्मणः क्वचित् प्रकृत्यादेरिति कारणानियमस्स्यादितिवाच्यम्। तथा भेदकप्रमाणान्तरा-

सिद्धेः। एकमेवाद्वितीयमित्यादिशास्त्रेण कारणैक्यसिद्धौ भेदकल्पनायोगात्। अतो न प्रधानादेः कारणत्वम्। नापि चतुर्मुखरुद्रादेः। तेषां सृज्यत्वसंहार्यत्वकर्मवश्यत्वादि श्रवणेनजीवत्वसिद्धेः। सप्रजापतिरेकः पुष्करपर्णे समभवत्। यो ब्रह्माणं विदधाति पूर्वम्। त्र्यक्षः शूलपाणिः पुरुषोऽजायत। ललाटात् क्रोधजोरुद्रोऽजायत। एको ह वै नारायण आसीत् न ब्रह्मानेशानः।

आभूतसम्प्लवे प्राप्तेप्रलीने प्रकृतौ महान्। एकस्तिष्ठति विश्वात्मासतुनारायणस्स्मृतः॥

ब्रह्मणा सहते सर्वेसम्प्राप्ताः प्रतिसञ्चरे। क इतिब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्।

आवां तवाङ्गि सम्भूतौ तस्मात् केशवनामवान्।
तै ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥

आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः। प्राणिनः कर्मजनितसंसारवर्त्मवर्तिनः॥

युगकोटिसहस्रेण विष्णुपाराध्यपद्मभूः। पुनस्त्रैलोक्यघातृत्वं प्राप्तानिति शुश्रुम॥

इत्यादि प्रमाणान्यनुसन्धेयानि। अतोन चतुर्मुखादेर्ब्रह्मत्वम्। ननु ब्रह्मविष्णुरुद्रास्ते सर्वेसम्प्रसूयन्त इत्यथर्वशिखायां भगवतोऽप्युत्पत्तिः श्रूयते। एवमवतारेषु शास्त्रानुष्ठानतत्फलभोगादिश्च श्रूयत इति भगवतोऽपि ब्रह्मत्वं नास्तीतिचेन्न। तत्र कर्मकृतोत्पत्त्यभावात्। अजायमानोबहुधाविजायते न मे पार्थास्ति कर्तव्यं त्रिषुलोकेषुकिञ्चन। नानवाप्तमवाप्तव्यम्। इच्छ गृहीतामिमतेरुहेः। न भूतसङ्घसंस्थानः देहोऽस्य परमात्मनः। धर्मसंस्थापनार्थाय संभवामि युगे युगे।

इत्यादि प्रमाणैर्लीला जगद्रक्षणाभ्यामेव तथोक्तेः। अत एवापहतपाप्मा दिव्यो देव एको नारायण इ युच्यते। ननु हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। आकाशो ह वै नामरूपयोर्निर्वहिता सर्वाणि ह वा इमानिभूतानि आकाशादेव समुत्पद्यन्ते। शम्भुराकाशमध्येध्येय इत्यादिकारणवाक्येषूशासनवाक्येषु च देवतान्तरस्यापि जगत्कारणत्वमुक्षूणास्यत्वप्रतिपादनान्नारायणस्यैव ब्रह्मत्वं कथंस्यादिति चेदुच्यते। कारणवाक्यगतानां उशासनवाक्यगतानां हिरण्यगर्भाकाशशम्भ्वादि शब्दानां नारायणपरत्वात्। हिरण्यस्य हिरण्मयस्य परमव्योम्नोगर्भभूतस्तत्रस्थितः परमपदनिलयस्सन् सृष्टेः प्राक् समवर्तत इत्यर्थः। तथा शम्भु शब्दोऽपिशं सुखं भवतीतिशम्भुः। सुखरूपो भवति यद्वा शंसुखं भावयतीत्यन्तर्भावितण्यर्थोऽयं सर्वेषां सुखजनक इत्यर्थः। एवमाकाशशब्दोऽप्याशमन्त त् काशत इतिव्युत्पत्त्या परमात्मपरः अतस्तेषां योगार्थसौष्कल्याद्भगवत्परत्वान्नोक्तदोषः।

नन्वेवमपि प्रतर्दनविद्यायां प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतं मामुपास्व त्रिशीर्षाणं त्वाष्ट्रमहनमितीन्द्रस्यैवोपास्यत्वकथनादिन्द्र एव कारणं न ब्रह्म । नचात्रेन्द्रशब्दः अवयवशक्त्या परमात्मपरः । त्रिशीर्षाणमितिविशेषणानन्वय प्रसङ्गादिति चेन्मैवम् । अनेनजीवेनात्मनानु प्रविश्य नामरूपेव्याकरवाणि । अन्तः प्रविष्टश्शास्ता जनानां यस्यात्मा शरीरमित्यादिभिः इन्द्रादि जीवात्मनोऽपि परमात्मशरीरत्वेन शरीरवाचकानां शरीर्यभिधायकत्वादिन्द्रशरीरकपरमात्माभिधानात् इन्द्रशरीरकपरमात्मन उपास्यत्वेनोक्तदोषा भावात् । अत्रेदंबोध्यम् । यत्र हिरण्यगर्भादिजीवविशेषवाचकाः आकाशाद्यचेतनविशेषवाचकाश्च शब्दाः श्रूयन्ते । तत्र परमात्मा साधारण धर्मयोगः परमात्माभिधायि शब्दसामानाधिकरण्यं वादृश्यते ।

तत्र जीव विशेष वाचकानां । माकाशाद्यचेतनवाचकानां च शब्दानां परमात्मपरत्वं वक्तव्यम् । तत्रचेतनाचेतनासाधारणलिङ्गादर्शनेकेवलयोगशक्त्या तेषां परमात्मपरत्वम् । अनन्यथासिद्धचेतनाचेतनासाधारणलिङ्गदर्शनेतु चेतनाचेतनशरीरकपरमात्माभिधायित्वं, चेतनाचेतन विशेषवाचिनां शब्दानां पूर्वस्मिन् कल्पे परमात्मन एवोपास्यत्वम् । उत्तरस्मिन् कल्पे तु चेतनविशिष्टपरमात्मन उपास्यत्वमितिभेदः । अत एव त्रिविधोपासनं सिद्धमित्याहुश्चार्याः । परविद्यासु जीवोक्तिः निरुक्त्यादेः पराश्रया ।

तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी ॥ इति, उक्तंचतत्वसारे,

कस्त्वन्तत्वविदस्मिवस्तुपरमंकंतर्हिविष्णुः कथं तत्वेदम्परतैत्तरीयकमुखत्रय्यन्तसन्दर्शनात् ।
अन्यास्तर्हिगिरः कथं गुणवशादत्र हरुद्रः कथं तद्दृष्टयाकथमुद्भवत्यवतरत्यन्यत् कथं नयामः ॥
इति

एवं च नारायणस्यैव परमकारणत्व मुमुक्षूणास्तत्वसर्वान्तर्यामित्वसिद्धेस्त्रिमूर्तिसाम्यैक्ये र्ण विष्ण्वन्यव्यक्तिपरत्वपक्षाश्चत्वारोऽपिनिर्मूलावेदितव्याः । तिसृषु मूर्तिषु परिपूर्ण एवेश्वरस्तिष्ठति तत्र विष्णुमूर्तौ साक्षात् । प्रजापतिपशुपतिमूर्त्योस्तुजीवद्वारेतिविशेषः । एवमेव पिपीलकादि चतुर्मुख पर्यन्तं सर्वत्रपूर्ण एवेश्वरः । पूर्णत्वं च ज्ञानशक्तिबलैश्वर्यादिसमस्तकल्याणगुणविशिष्टत्वम् । अत एवनिर्गुणवादोऽपि निरस्तः । ननु विरुद्धौ गुणविधिनिषेधावनौपाधिकौ कथमेकस्मिन् ब्रह्मणिसमन्वेतुं शक्यावितिचेत् विचारयामः । न तावदत्र समुच्चयोयुक्तः । विरोधात् । अत एवनोभयत्यागः । गुणत्वनिर्गुणत्ववत् । तद भावयोरपि विरोधात् । नच विकल्पः । अनुष्ठाने विकल्प सम्भवेऽपि वस्तुनोद्वैरूप्यासम्भवात् । न वान्यतरत्यागः । किंत्याज्यमिति नियामका भावात् । अपच्छेदनयात् पूर्वत्याज्यमितिचेन्न । तस्यानियतविरोधपौर्वापर्यविषयत्वात् । तथा हि

पञ्चर्त्विजस्तमन्वारब्धाः प्रसर्पन्ति अध्वर्युं प्रस्तोतान्वारभते। प्रस्तोतारं प्रतिहर्ता। प्रतिहर्तारमुद्गाता। उद्गातारं ब्रह्मा। ब्रह्माणं यजमान इति विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्त मुच्यते। बहिष्पवमानं प्रसर्पतामुद्गातुरपच्छेदे सति, यद्युद्गातापच्छिद्येतादक्षिणं यागं कृत्वा तेन पुनर्यजेतेति श्रुतिनिरीक्षणेन जाता उद्गात्रपच्छेदनिमित्तप्रायश्चित्तकर्तव्यताबुद्धिः, पश्चात् प्रतिहर्तृपच्छेदे सति यदि प्रतिहर्तापच्छिद्येत सर्ववेदसंदद्य दिति श्रुतिनिरीक्षणेन जातया द्विरुद्गप्रतिहर्तृपच्छेदनिमित्त प्रायश्चित्तकर्तव्यताबुद्ध्याबाध्यते इतिह्यपच्छेदन्यायः। तत्रोद्गातृ प्रतिहर्तोरुभयोरपच्छेदनियमोनास्ति। तत्रापिक्रमेणापच्छेदोऽनियतः। क्रमिक वेऽप्युद्गात्रपच्छेदः पूर्वभावी इतरश्चरम भावीतिवा विपर्ययेणेतिवानियमोनास्ति। अतो विरोधस्य पौर्वा पर्यस्य वायत्र नियमः तत्र नापच्छेद नयः। तत्रापि तन्न्याय प्रवृत्तौ पूर्वशास्त्रस्य सर्वथाऽप्रामाण्य प्रसङ्गात्। तदुक्तम्,

पौर्वा पर्यविरोधश्च पूर्वं प्रामाण्यमेव च। नियमान्नास्ति तत्रासावपच्छेदनयो भवेत्॥ इति।

तथाचानियतपौर्वापर्यविषयोऽपच्छेदन्याय इति। नियमे हि विरोधनबात् परानुपपत्तिरेव। तन्न्यायेहि पौर्वापर्य नियमो विरोधनियमश्चविद्यते। तथाह्यौदुम्बरीस्पृष्टोद्गायेदिति प्रत्यक्ष श्रुतिः। औदुम्बरी सर्वावेष्टयितव्येतिस्मृतिः। तत्र श्रुतिः प्रथमत एव प्रमितिं जनयति निरपेक्ष प्रमाणत्वात्। स्मृतिस्तु स्वमूलभूत श्रुत्यनुमानसापेक्षतयाविलम्बित प्रवृत्तः। अतस्तत्र पौर्वापर्य नियतम्। औदुम्बरीस्पर्शन वेष्टनयोर्विरोधश्च नियतस्तत्र प्रमित्यां जातायां तद्विरुद्धार्थः कालात्यया पदिष्टस्स्यात्। अतोविलम्बितधीहेतोरशीघ्रधीहेतुः बलीयानितिन्यायात् पूर्वस्याः श्रुतेः बलीयस्त्वमित्युत्तरशास्त्रानुदय एव। तथा च प्रकृतेनिर्गुणशास्त्रानुत्पत्तिरेव विषयव्यवस्थया विरोधपरिहारे सति नान्यतरात्यन्त बाधकापच्छेदन्यायावतारोयुक्तः। गुणनिषेधन वचसामुत्सर्गापवादनयेन विहितमङ्गळव्यतिरिक्त श्रूयमाणहेय गुणनिषेधपरत्वात्। उक्तंचतत्त्वसारे।

यद्ब्रह्मणोगुणशरीरविकारजन्म कर्मादिगोचरविधिः प्रतिषेधवाचः।
अन्योन्यभिन्नविषयानविरोधगन्ध महेन्तितन्नविधयः प्रतिषेधवाच (याः॥)

इत्यादि। एवस्थितेपिनिषेधस्य प्रतियोगि प्रसक्तिपूर्वकत्वरूपार्थस्वभावप्रयुक्तपरत्वमात्रेणयदिनिर्विशेषवचसापूर्वबाधः, तदासर्वशून्यवचसातस्यापिबाधान्माध्यमिकमतविजय प्रसङ्गात्। अतः उभयलिङ्गः एव ईश्वरः। उभयलिङ्गत्वं च हेयप्रत्यनीकत्वेसति कल्याणगुणगणवत्वम्। एतेन निर्विशेषस्यापि ब्रह्मण आच्छादिकयाऽविद्यया तिरोहितस्य, विक्षेपिकया तया प्रपञ्चाध्यास एव सृष्टिरित्यपि प्रत्युक्तम्। तस्याविद्यादिदोषगन्धायोग्यत्वात् निर्विशेषस्यतिरोधेयधर्मविशेषाभावात् स्वरूपमात्रतिरोधाने तस्यैवहानि प्रसङ्गात्। किंच यदिस्वरूपज्ञानमविद्यानिवर्तकं तदा

स्वरूपज्ञानस्य नित्यनिवृत्तिप्रसङ्गः। यद्यतिरिक्तं प्रमाणज्ञानं ब्रह्मविषयकं तदा सविशेषत्वमभ्युपगमनीयम्। किञ्च ब्रह्मणोनिर्विशेषत्वधर्मोऽस्तिवानवा। अस्तिचेत् तेन सविशेषत्वम्। नास्ति चेत्तदभावरूपधर्मेणसविशेषत्वमिति। आहुश्चार्याः।

ब्रह्मणो निर्विशेषत्वमितिधर्मोऽस्तिवा नवा। द्विधापि सविशेषत्वं तद्योगतदयोगजम्॥ इति

ननु विमतं मिथ्या दृश्यत्वात् शक्तिरूप्यवदित्यनुमाने ब्रह्मव्यतिरिक्तस्यमिथ्यात्वेन बाधितत्वाद्विशेषाभावेन निर्विशेष ब्रह्मस्वरूपमेव वस्त्विवतिचेन्न। साध्यभूतमिथ्यात्वेमिथ्यात्वमस्तिवा नवा। अस्तिचेत् जगतस्सत्यत्वम्। नास्तिचेत्तद्व्यभिचारः। साध्याभाववति तत्र दृश्यत्वहेतोस्सत्वात्। आहुश्चार्याः।

मिथ्यावादि प्रतिज्ञार्थं स्वप्रतिज्ञास्पृशेन्नवा। आद्येस्वस्यैवविघ्वम्भः द्वितीये व्यभिचारिता॥

मिथ्यात्वस्य तुमिथ्यात्वेमिथ्यात्वं बाधितं भवेत्। सत्यत्वस्य तु सत्यत्वे सत्यत्वंस्थापितं भवेत्॥

इति। उपहितानुपहितवेषेण ब्रह्मणोऽपिदृश्यत्वात् तत्रानैकान्त्यं तस्य मिथ्यात्वं वास्यात्' नन्वनुभूतिरवेद्यानुभूतित्वादित्यनुमानेन ब्रह्मण अनुभूतिस्वरूपत्वात् वेद्यत्वाभावेन तत्रव्यभिचारो मिथ्यात्वं वा न प्रसजतीति चेन्न। निरुक्तानुमानवेद्यत्वादनु भूतिस्वरूप ब्रह्मणः। अवेद्यत्वेत्वनुभूतेर्ब्रह्मणः वेद्यत्वा भावासाधकत्वात्। उभयथाऽपिव्यभिचारस्य दुर्वारत्वात्। आहुश्चार्याः अनुभूतिरवेद्येति वचनं बोधकं नवा। आद्येतेनैव वेद्यत्वं नोचेत् किन्नुविधीयते॥ इति।

ब्रह्मणश्चात्यन्तावेद्यत्वे अथाऽतो ब्रह्मजिज्ञासा ब्रह्मविदाप्नोतिपरम्। आत्मावाऽरे-द्रष्टव्यइत्यादिव्याकोपश्च। किञ्च शिष्याचार्ययोरूपदेश्योपदेष्टृभावोऽप्यनुपपन्नः। तथाहि वक्तुः श्रोताकिमप्रतीतः उत प्रतीतः। प्रतीतोऽपि भ्रान्तिसिद्धः प्रमितिसिद्धोवेति विकल्पः। आद्ये अप्रतीत्यशिष्यं कस्मै उपदिशेत्। द्वितीये भ्रान्तिसिद्धंशिष्यं भ्रान्तिसिद्धत्वेनाजानन्नुपदिशति उत जानन्? यद्यजानन् तदाऽतत्ववित् कथं तत्वोपदेष्टास्यात्। यदि जानन्, तदा भ्रान्तिसिद्धस्य कथमुपदेशार्हता। नह्यनुन्मत्तः स्वयं प्रतिविम्बाय प्रभूते। प्रमितोऽपि किं स्वस्माद्भेदेन प्रमितः। उताभेदेन। आद्येस्वस्माद्भेद प्रमितौ सत्यां शिष्याया भेदनुपदिशन् कुहकस्स्यात्। द्वितीयेऽद्वैत प्रमितिदशायां स्वभ्रान्तिसिद्धशिष्यासिद्धयास्वस्मादेवोपदेशः कर्तव्यः इति स्वयं स्वात्मान प्रतिनित्यमुपदिशेत्। अतश्शिष्यस्य स्वतादात्म्यं पश्यतस्तस्यापि तववित्वादुपदेशवैयर्थ्यमिति। अतस्सर्वेश्वरोनारायण एवापहतपाप्मा कल्याणगुण गणो जगत्कारणं ब्रह्मेति तदेव जगतो निमित्तमुपादानं च।

नच ब्रह्मणः उपादानत्वे निर्विकारत्व श्रुतिविरोध इतिवाच्यम्। सूक्ष्मचिदचिद्विशिष्ट-ब्रह्मण उपादानत्वेन विशेषणीभूतचिदचितोरेव विकाराश्रयत्वेन ब्रह्मणोनिर्विकारत्वात् यथा देवमनुष्यादि शरीरविशिष्टेस्वरूपतो निर्विकारे पुम्सि शरीरगत बालत्वयुवत्वस्थविरत्वाद्यस्पर्शेन निर्विकारत्वं तद्वत्। विशिष्टवैषेण ब्रह्मणो विकाराश्रयत्वं त्विष्टमेव। ननु निमित्तत्वमुपादानत्वं च एकस्मिन् न सम्भवति। तयोर्भिन्नाश्रयवृत्तित्व नियमात्। अत एव हि समवायिकारणभेद घटितं निमित्तकारणलक्षणं न्यायविदोवदन्ति। समवाय्यसमवायिभिन्नं कारणं निमित्त कारणमिति समवायिकारणोपादान शब्दयोरेकविषयत्वं प्रसिद्धम्। घटादिनिमित्तकारण दण्डादेस्तदुपादान भूतमृदादेश्चभेदः प्रत्यक्षेणावगम्यते। अत एव श्रुतेरपि न तत्सिद्धिः प्रत्यक्षविरुद्धेतासां तात्पर्ययोगात्। अत एवह्यादित्यो यूपो, यजमानः प्रस्तरः, कृष्णल श्रपयेदित्यादौ प्रतीतार्थादर्थान्तरे लक्षणास्वीकृतामीमांसकैः। एवं ब्रह्म न निमित्तमुपादानत्वात् मृदादिवत् ब्रह्मनोपादानं निमित्तत्वात् दण्डादिवत् इत्यनुमानाभ्यां तयोर्भिन्नाश्रयत्वमपिनिश्चीयते श्रुतिश्च "मायां तु प्रकृतिविद्यान्मायिनं तु महेश्वर"मिति मायामायिनोरुपादाननिमित्तयोर्भेदं वदति। अतो न ब्रह्मोपादानं निमित्तं चेति।

अत्रोच्यते। निमित्तोपादानयोर्भेदः प्रत्यक्षानुमानाभ्यामवगन्तुं न शक्यते। घटादे निमित्तस्यापिदण्डादेः स्वीयरूपाद्युपादानत्वस्य प्रत्यक्षसिद्धत्वात् अतः समवायिकारणभेदघटित निमित्तकारणलक्षणमपिन्यायविदामयुक्तम्। समवायिकारणत्वावच्छिन्न प्रतियोगिताकभेदविवक्षायां दण्ड द्रव्याप्तिः। यत्किञ्चित्समवायिकारणभेदविवक्षया ब्रह्मणित्सम्भवात्। ननु तदुपादानभेदः तन्निमित्ते विवक्षितः। अतो न दण्डाद्यतिव्याप्तः। नवा ब्रह्मणित्सम्भवः। तस्यैकं प्रत्येवोपादानत्वनिमित्तत्वयोः स्वीकारादितिचेन्न। तथासतिघ्नभ्रंशं प्रतिदण्ड देर्निमित्त वाभाव प्रसङ्गः। तदुपादानाप्रसिद्धया तद्भेदघटितलक्षणा प्रसिद्धेः कालघटसंयोगं प्रतिकालस्य निमित्तत्वादुपादानत्वाच्च तत्रातिव्याप्तेश्च।

अथोपादानकारणतदभिन्नकारणत्वं निमित्तत्वमि-येव विवक्षितम्। द्रव्यस्य तदवच्छेदकभेदात् अस्तिचावच्छेदकद्वयं कालघटसंयोगादिस्थलेऽपि समवायेनकार्यं प्रति तादात्म्येन द्रव्यत्वेन हेतुत्वेन द्रव्यत्वस्यैवोपादानतावच्छेदकत्वात् कार्यतावच्छिन्नं प्रतिकालत्वेनकारणस्य हेतुतयाकालत्वस्य निमित्ततावच्छेदकत्वात्। उपधेरपङ्गुत्वेनोपाधे रङ्गुत्वेन च अतो न कालाद्यव्याप्तिः। अत एव न दण्डाद्यव्याप्तिरपि। तत्रापि द्रव्यत्वदण्डत्वयोरुपादानतावच्छेदकनिमित्ततावच्छेदकयोर्भेदेन तदवच्छिन्नत्वबुद्धतोपादानत्वनिमित्तत्वयोर्भेदादुपादानतावच्छेदकधर्मावच्छिन्नकारणत्वं निमित्तत्वमितिस्वीकाराच्च नघ्नभ्रंशं प्रतिदण्डादेर्निमित्तत्वानुपपत्ति दण्डत्व

स्यापि उपादानतावच्छेदकत्वादित्युच्यते। तर्हि ब्रह्मण्यपि नोपादानत्वनिमित्तत्वयोर्विरोधः। तस्य सूक्ष्मचिदचिद्विशिष्टत्वरूपेणोपादानत्वात्। स्वरूपेणनिमित्तत्वाच्च। तत्तदवच्छेदक भेद प्रयुक्त तद्भेदस्य तत्रापि सत्वात् इति।

अत्रेदं बोध्यम्। उपादानत्वं हि न ब्रह्मणः स्वरूपेण सम्भवति। निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अविकारायशुद्धायेत्यादिभिःनिर्विकारत्वेनब्रह्मस्वरूपप्रतिपत्तेः। किन्तु चिदचिद्विशिष्टत्वरूपेण। तद्वैशिष्ट्यं च शरीरशरीरिभावेन। शरीरगतविकारादिदोषाःशरीरिणि न स्पृश्यन्ते। यथा मनुष्यादिशरीरविशिष्टात्मनि शरीरगत बालत्वयुवत्वादिरूपावस्था न संयुज्यन्ते। तद्वत् चिदचितोः। ब्रह्मशरीरकत्वं च यस्य पृथिवी शरीरं यस्यापःशरीरमित्यारभ्ययस्यात्माशरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्यमृत्युःशरीरमित्यन्तेनान्तर्यामिब्राह्मणेनावगम्यते। जगत् सर्वं शरीरं ते। तानि सर्वाणि तद्वपुः तत्सर्वं वै हरेस्तनुः। यदम्बु वैष्णवः काय इत्यादि महर्षिवचनैरपि इदमेवोपष्टभ्यते। अतस्सूक्ष्मचिदचिद्विशिष्टं ब्रह्मजगदुपादानमिति। अथाशरीरं शरीरेषु। सपर्यगाच्छुक्रमकायमव्रणं, अपाणिपादो जवनो गृहीता। पश्यत्यचक्षुस्सशृणोत्यकर्णः। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादमस्थूलमनण्वहस्वमित्यादिभिः - साक्षात् परम्परया च ब्रह्मणश्शरीरनिषेधात् कथं पृथिव्यादीनां ब्रह्मशरीरत्वमुच्यत इति चेदुच्यते।

प्रतिषेधस्तावत् प्रतियोगि प्रापक प्रमाणमपेक्षमाणोयदि शास्त्रादन्यत् प्रापकं - पश्यति तदातन्मात्रमादायविश्रान्तो न शास्त्रप्राप्तं उपरुणद्धि। यथा नहिंस्यात् सर्वाभूतानीत्यादिकं रागप्राप्तहिंसामादाय विश्रान्तं सत् न वैधाग्नीषोमीयहिंसामुपरुणद्धि। तथा अशरीरत्वादेश्रुत्यवगतशरीरादिनिषेधोऽपिलोकप्रतिपन्नकर्मकृतशरीरादिकमादायविश्रान्तो न श्रुतिप्राप्तं पृथिव्यादिशरीरनिषेधाय यतत इति। न तद्विरोधाद्यस्य पृथिवी शरीरमित्यादेस्तत्र तात्पर्याभावादशङ्क्य। नह्यलौकिकार्थं प्रतिपादनैदम्पर्येण प्रवृत्तं शास्त्रं मानान्तरागोचरं विषयं स्वयमेव प्रतिपाद्योन्मत्तवत् स्वयमेव प्रतिषेधतीति युक्तमाश्रयितुम् अतोनिषेधश्रुतीनां कर्मकृतशरीरनिषेधपरत्वेनाकर्मकृतपृथिव्यादिशरीरकत्वं ब्रह्मण उपपन्नतरम्। नच नह वै सशरीरस्य सतः प्रिया प्रिययोरपहतिरस्ति। अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत इति शरीरसम्बन्धस्य हेयसम्बन्धानना भावबोधनात्, सर्वशरीरस्य तत्तत्प्रयुक्तहेयसम्बन्धोऽपिदुर्वार इति वाच्यम्। तत्र ह वै शब्दनिर्देशेनलौकिक प्रसिद्धकर्मकृतशरीरवत्वस्यैव हेयप्राप्यत्व प्रतीतेः। नन्वेवमपिहेयजीवशरीरान्तर्यामित्वेन तत्तत्प्रयुक्त दुःखानुभवस्यादितिवाच्यम्। दण्ड्यदण्डकयोरेककारागृहवर्तिनोरपियातनाहेतुभूतपातकसद्भावासद्भावाभ्यां दुःख तदभावयोर्दर्शनेन तत्रकारागृहसंबन्धस्येव शरीरसंबन्धमात्रस्या प्रयोजकत्वात्। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयो-

रन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति इति शरीरसंबन्धाविशेषेऽपि जीवपरमात्मनोः कर्मफलभोक्तृत्वतदभावयोः श्रुत्यैव प्रमितत्वेन कर्मकृतशरीरसम्बन्धस्यैव हेयसम्बन्धव्याप्यत्व निश्चयेनतद्विरोधेन शरीरसम्बन्धमात्रे हेयव्याप्यतायास्तद्वाक्यतात्पर्यविषयत्वायोगाच्च। एवञ्च आत्मान्तर्याम्यमृत इति पृथिव्यादिशरीरतात्प्रतिपादकवाक्येषु प्रतिपर्यायपठितान्तर्यामिणश्शरीरसंबन्ध प्रयुक्तहेयसम्बन्धगन्धव्यावृत्तिफलकामृतत्व प्रतिपादन विरोधाच्च।

अथस्यात् अस्तु निमित्तत्वोपादानत्वयोरविरोधः। तथाऽपि ब्रह्मणस्तदुभयत्वबद्धावेमानाभावः। तत्र न तावत् प्रत्यक्षम्। अतीन्द्रिये तदप्रवृत्तेः। अत एवानुमानमपि न मानम्। तस्य प्रत्यक्षावगतव्याप्तिज्ञानादिमूलकत्वात्। आगमोऽपि तदुपादानत्वग्र हकोऽनन्यथासिद्धोऽसिद्धः यतोवेत्यादेर्निमित्तत्वेनाप्युपपत्तेः। न हिपञ्चमी उपादानत्वमात्राभिधायिनी। दण्डाद्घटो जायत इत्यादौ दण्डमिवारादिति चेदुच्यते। यतोवा इमानि भूतानीत्यादिषु यत इत्येषापञ्चमी नतावत् कारणत्वमात्रपरा। तत्र तद्विधायक शास्त्राभावात्। हेतावितिसूत्रेण तत्र तृतीयाविधानात् ध्रुवमपायेऽपादानमित्यारभ्य भ्रुवः प्रभवइत्यन्तानां सूत्राणां सर्वेष्वपक्षाद्ध्रुवमपा विश्लेषासम्भवेनापादानसंज्ञाविधायकानां तत्रासम्भवाच्च। अतो जनिकर्तुः प्रकृतिरिति सूत्रेणैव लाभाच्या। प्रकृतिशब्दश्चापादानार्थकः। मृद्घटादिषु प्रागुत्तरावस्थापन्नेष्वेव प्रकृतिविकारभावप्रसिद्धेः। दण्डघटादिषुतदप्रसिद्धेश्च सर्वविकारकारणे प्रधाने प्रकृतिशब्द प्रसिद्धेश्च। यद्यपिविभाषा गुणेस्त्रियामितिसूत्रादस्त्रियामितियोगविभागेन पुंस्त्वात् प्रमोदोजायते धूमाद्वह्निमानित्यादिवत् यतो वेत्यत्रापि निमित्त पञ्चम्युपपादयितुं शक्या। तथाऽपियत्प्रयन्त्यभिसंविशन्तीति उत्तरवाक्येलयाधिष्ठान-व प्रतिपादनेननिमित्तकारणे तदसम्भवेन उपादानपञ्चमीत्वमिश्चयात्।

यत्प्रयन्त्यभिसंविशन्तीति नैरुक्तिडन्तं पदद्वयम्। तथा सति पूर्ववाक्यद्वय इव यच्छब्दद्वयश्रवणापत्तेः। किन्तु प्रयन्तीत्येतत्पुंस्त्वक प्रथमाबहुवचनान्तं जातानीतिवत् इमानीत्येतस्य विशेषणम्। तथा च प्रयन्ति प्रलीयमानानिपद्यन्ते भूतानि यदभिसंविशन्ति यदवस्थां प्रपद्यन्तीत्यर्थः। कारणावस्थां प्राप्नुवन्तीतियावत्। पृथिव्यप्पु प्रलीयत इत्यारभ्य तपः पदेव एकीभवतीत्येकत्वावस्थापत्तेरेवलयरूपत्वाभिधानात्। अग्नयवस्थेच प्रलिले वाय्ववस्थेच तेजस इति विष्णुपुराणोपबृंहणाच्च। अतः कारणावस्थापत्तिरूपलयप्रतिपादकाभ्यां प्रयन्त्यभिसंविशन्तभ्यां पदाभ्यां यत इत्युपादानपञ्चम्यन्तादेवायन्तसिलितिनिश्चीयते। युक्त चैतत्; प्रति दवि हतत्सिलन्तत्वसंभवेऽप्यणिकारमिलन्तत्वश्रवणासम्भवात्। अतो यत इत्येव उपादानतामेवा भधीयत इति।

एवं कस्मिन्नुखलुभगवो विज्ञाते इदं सर्वं विज्ञातं भवति। आत्मनिखल्वरेदृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं भवति। तमादेशमप्राक्ष्योयेना श्रुतं श्रुतं भवत्यमत मतमविज्ञात

विज्ञातं भवतीत्येक विज्ञानेन सर्वविज्ञानप्रतिज्ञानमपि ब्रह्मणस्सर्वोपादानत्वे प्रमाणम्। नहि निमित्तकारण ज्ञानात् कार्यज्ञानं सम्भवति। दण्डादि ज्ञानेऽपि ततोऽत्यन्तविलक्षणस्य घटादेर्ज्ञानासम्भवात्। उपादानज्ञानेतु तदुपादेयज्ञानं सम्भवति। पूर्वाह्णेयं मृत्तिका दृष्टा-सैवेदानीं घटशरावादिरासीदित्येकत्वाध्यवसायेन तयोरेकज्ञानविषयत्वनिश्चयात्। यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मय विज्ञातं स्यादितिदृष्टान्त प्रदर्शनेनास्यैवार्थस्य दृढीकरणाच्च। वाचारम्भणं विकारोनामधेय मृत्तिकेत्येव सत्यमिति व्यवहारोपयोगितया घटशरावादि नामधेयतन्नियित्त घटत्वावस्थाभेदेऽवस्थावतो द्रव्यस्यैकतयातज्ज्ञानस्यलोकसिद्धत्वोपपादनाच्च। ननु यद्युपादानोपादेययोरभेदस्तदा सर्वविज्ञान प्रतिज्ञानमेवानुपपन्नम्। सर्वाऽसम्भवात्। स्वज्ञाने स्वज्ञानहेतुत्वस्यात्माश्रयेणासम्भव च। अथ पूर्वकालत्वोत्तरकालपिण्डाकारत्वघटाकारत्व जलाहरणाद्युपयोगित्व तदनुपयोगित्वनामभेदादिभिर्भेद इष्यते। तयोस्तथापि त नुपपत्तिरेव। अन्यज्ञानेनान्यज्ञानासम्भवात्। अतः प्रधान भूते ब्रह्मणि ज्ञाते ज्ञातव्यान्तरा भावादितरस्य ज्ञात प्रायत्वं सर्व वज्ञान प्रतिज्ञान विषय इति युक्तमाश्रयितुमिति चेदुच्यते।

उपादानोपादेययोर्वास्तवाभेदेऽपि प्रागुत्तरकालकार्याकारभेदादि प्रयुक्तभेदव्युदासाय सर्वविज्ञानं नावदावश्यक, प्रागवस्थाविशिष्टस्वज्ञानस्योत्तरावस्थाविशिष्टस्वज्ञानं प्रतिहेतुत्वं चाविरुद्धम्। विशेष्यैकपेऽपि प्रकारभेदेन तज्ज्ञानयोरपि विलक्षणत्वात्। कारणैकयेऽपि कार्यभूतघटशरावादेः परस्परविलक्षणत्वेन सर्वशब्दार्थ सम्भवाच्च। न च कालाकारादि भेदात्तयोर्भेदः शङ्क्यः। अवस्थाभेदाश्रयेणानन्यथासिद्धस्य तस्य वस्तुभेदं प्रत्यप्रयोजकत्वात्। अन्यथाबालत्वयुवत्वादि प्रयुक्तकालाकारादिभेदेन देवदत्तादेरपि भेदप्रसङ्गात् कार्यकारणयोरत्यन्तभेदसर्वविज्ञानप्रतिज्ञानानुपपत्तेश्च।

अथैवमपि प्रागवस्थाविशिष्टतज्ज्ञानादुत्तरावस्थाविशिष्टतज्ज्ञानमस्तु। नैतदेवविज्ञानेन सर्वविज्ञान प्रतिज्ञाविषयः प्रागवस्थाविशिष्टचिदचित् ज्ञानेन उत्तरावस्थाविशिष्टतज्ज्ञानसम्भवे पि न ब्रह्मज्ञ नेन कृत्स्न विज्ञानम्। तदनन्तर्भूतत्वात्। अत एव न तद्ज्ञात् ब्रह्मण उपादानत्वसिद्धि। कार्यज्ञानहेतुज्ञानविषयत्वस्य चिदचितोरेव पर्यवसानेन ब्रह्मणि तत्प्रयुक्ति ग धाभावात्। ब्रह्मण्यवस्थ द्वयासम्भवेनोपादानोपादेय भावासम्भवात्। परिणम्यमाणचिदचित्संबन्धमात्रेणोपादानत्वे पारिभाषिकं तत्स्य दिति। अत्रोच्यते। यस्य पृथिवी शरीरं यस्याव्यक्तं शरीरमित्यादिभिरुक्तन्यायेन चिदचितोर्ब्रह्मशरीरत्वं दुरपह्नवम्। शरीरवाचिनश्शब्दास्तद्विशिष्टात्मपर्यन्ता इति ब्रह्मणोऽग्निमादधीत, देवदत्तो गच्छतीत्यादि लौकिकवैदिकव्यवहारबलादवगम्यते। कारणवाक्य गताश्चमद्ब्रह्मात्मशब्दा विशिष्टपरा इति सदेवसोम्येदमग्र आसीत् ब्रह्मवा इदमेक एवाग्र आसीदिति शास्त्रान्तरैकवाक्यान्निर्णीयते।

उपादेयत्वमपि स्थूलावस्थचिदचिद्विशिष्टस्यैवेति सामर्थ्यात् किंस्विद्वनं क उसवृक्ष आसीदित्युत्तरादवगम्यते । वनवृक्ष शब्दयोः स्थूल सूक्ष्मावस्थोपलक्षणार्थत्वात् । अत एव तत्तेज ऐक्षत ता आप ऐक्षन्तेत्यादौ तेज आदेः सङ्कल्प श्रवणं तत्कार्योपादानत्वं च वर्ण्यमानं तच्छरीरकब्रह्मपरतया सम्यगुपपद्यते । अन्यथा तेजः प्रभृतेरचेतनस्य बहुभवनसङ्कल्पतदनुगुणकार्यारम्भकत्वयोरयोगात् । अतः प्रागवस्थापन्नद्रव्यविशिष्टं स्वं प्रत्येवोपादानमिति औपनिषदतात्पर्यमवगम्यते । अत एव हन्ताहमिमास्तिस्रोदेवता अनेनजीवेनात्मनाऽनु प्रविश्य नामरूपे व्याकरवाणीत्यत्रव्याक्रियमाणयोर्नामरूपयोस्स्वपर्यवसानायैवानुप्रवेशोऽपिव्याकरणार्थमभिधीयते । अन्यथा पित्रादिवदनुप्रविश्यैवनामरूपव्याकरणं कुर्यात् । अत एव तत् सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाभवदित्यादावनु प्रवेशफलभूतस्वस्वरूपसङ्कोचोऽपि श्रूयते । अत एव तदैक्षत बहुस्यां प्रजायेयेति । तदात्मान स्वयमकुरुत । इत्यादौस्वात्मन एव बहुरूपतासङ्कल्पः तदाकरण च श्रूयते । स्यामित्युत्तम पुरुषश्चश्रूयते । अतो विशिष्टमेव ब्रह्मोपादानमुपादेयं चेत्येकविज्ञानेन सर्वविज्ञानमपि तद्विषयमेवेति ।

अत्रविशिष्टमिति किमेतत् । विशेषणविशेष्याभ्यामनतिरिक्तं अतिरिक्तं वा । आद्ये न ब्रह्मण उपादानत्वसिद्धिः । अन्त्येत्वचेतनस्येव चेतनयार्जीवब्रह्मणोरपि उपादानत्वं वक्तव्यम् । नच तद्युक्तं; विकारवत् कारणन्वं हि उपादानत्वम् । नच परिणामिनोस्तयोः स्वरूपविकारस्सम्भवति यद्यपि ज्ञानसङ्कोचविकासात्मकस्वभावविकारोजीवे सम्भवति । तथाऽपि ब्रह्मणि न तत् सम्भवः । तस्यासङ्कुचितज्ञानत्वात् । सङ्कोचविकासात्मकविकारस्य ज्ञानरूपधर्मगतत्वेन धर्मिणि जीवेकथञ्चिदपितदसम्भवाच्च । परम्परया विकारा श्रयत्वमादाय उपादानत्वेकुलालादेरप्युपादानत्व प्रसङ्गात् । एतेनचिदचिद्द्वारा विकाराश्रयत्वमादाय ब्रह्मण उपादानत्वाशापि प्रत्युक्तेतिचेदत्रब्रूमः । विशिष्टमुपादानं तच्चविशेषणविशेष्याभ्यामनतिरिक्तमेव । तथाऽपि अवस्तुतः उत्पत्त्यसम्भवात् ।

प्रळयकालेऽपि सूक्ष्मावस्थापन्नचिदचितोरवस्थितिः स्वीकर्तव्या । तदानीमपियस्याव्यक्त शरीरं यस्याक्षरं शरीरमित्यादिना विमुक्तावस्थयोश्चिदचितोर्ब्रह्मशरीरत्वं प्रतिपाद्यते तच्च विशिष्टस्य भाव्यवस्थालक्षणोपादेयत्वोपयोगि प्रागवस्थार्तंत्यर्थमुच्यते । तत्र च विशेषणीभूतस्याचेतनस्य सूक्ष्मावस्था प्रहाणेनस्थूलावस्थापत्तिरूपस्वरूपान्यथाभावेनकार्यत्वम् । तथाविधस्य चेतनस्य तु नित्यनिरवयवस्य स्वरूपान्यथाभावासम्भवात् स्वासाधारणस्वरूपनिरूपकधर्मभूतज्ञानद्वारकान्यथा भावेनकार्यत्वम् । सङ्कुचितस्य ज्ञानस्यतस्य तद्विकासापत्तिरेव हि कार्यत्वम् । मृद्घटो जातः । आत्माभिज्ञो जात इति तुल्यव्यवहारात् । तथ च शरीरभूतचिदचिद्द्वारकं परमात्मनोऽप्युपादानत्वम् । तच्चमुख्यमेवास्ति च । तत्र साक्षादप्यवस्थ द्वयं सूक्ष्मचिदचिन्नियमनं स्थूलचिद

चिन्नियमनं चेति। अतः स्वासाधारणधर्मभूतनियमनरूपस्वभावान्यथाभावः परमात्मन्यपि सुलभः। न च परम्परया तदाश्रयणेऽति प्रसङ्गः। अपृथक्सिद्धत्वतदभावाभ्यां वैलक्षण्यात्। देवदत्तो यजत इत्यादौ शरीरद्वारक कायशोषणादिकं तदवयवद्वारकं च मन्त्रोच्चारणादिकमद्वारकं च सङ्कल्पादिकमादाय देवदत्तादेर्यागकर्तृत्वं तत्फल भोक्तृत्वं च मुख्यम्। यथा वा ग्राहकप्रमाणेन सन्निधिसमाम्नेतेषु वस्तुषु परमात्मपूर्वशेषतयावगतेषु यागव्रीह्यादेरद्वारक शेषत्वं प्रोक्षणादेस्स द्वारकशेषत्वं मुख्यमेवावगम्यते। तथा बहुस्यामितिग्राहकग्रहणेन सर्वावस्थासु परमात्मीयतयाव गतासुस्वरूपान्यथाभावज्ञानसङ्कोचरूपसद्वारकावस्थायास्तन्नियमनरूपाद्वारकावस्थायाश्च परमात्मी यत्वं मुख्यमेव।

नचैवं युवत्वावस्थायुक्त शरीरविशिष्टात्मानं प्रति बालत्वावस्थायुक्तशरीरद्वारकं देवदत्ता देरुपादानत्वं स्यादितिवाच्यम्। इष्टत्वात्। तत्रापिविशिष्टपरिणामानपायात्। नचैवं बालोयुवा जात इति प्रयोगापत्तिः। मृद्घटो जायत इतिवत् बालोयुवा जात इति प्रयोगाव्यतिरेकात्। उपादानपञ्चम्यप्रयोगस्तु तदुत्तरावस्थोत्पत्त्युपयोगि-प्रागवस्थद्रव्यतत्परिणामयिन्नात्मगतव्यापार विशेषकालविशेषापरिज्ञानात्। यत्तुविशिष्टस्यविशिष्टं प्रत्युपादानत्वेचिदचिदीश्वराणां परस्परं स्वरूपसाङ्कर्यादितित्तु शुक्लकृष्णतन्तुसंयोगेन शबलतन्तुरूपेणोपादानत्वा श्रयणात् न शौक्ल्यादिसाङ्कर्यं तद्वत् परिहृतम्। तथा च प्रकृतेऽपि विशिष्टस्य विशिष्टोपादान त्वेऽप्यौचित्यात्चिदंशेचिदंशस्याचिदंशेऽचिदंशस्य ब्रह्मांशे ब्रह्मांशस्योपादानत्वाङ्गीकारात् न स्वरूपस्वभावसाङ्कर्यप्रसक्तिः।

न चैवं ब्रह्मणो ब्रह्मप्रत्येवोपादानत्वात् प्रपञ्चोपादानत्वं न सिद्ध्यतीतिवाच्यम्। तस्य स्वशरीरभूतसूक्ष्मावस्थचिदचिदात्मक प्रपञ्चं प्रत्युपादानत्वात्। देवदत्तोगच्छतीत्यादौ शरीर-द्वारकगमनाद्याश्रयत्वस्य देवदत्तात्मनीव चिदचिद्द्वारा अवस्थाश्रयत्वस्य ब्रह्मण्यपिसुलभत्वात्। न च व्यवधानमात्रादुपादानमात्रस्यगौणत्वं देवदत्तो गच्छतीत्यत्र गन्तृत्वस्य शरीरद्वारकत्वेऽपिदेव-दत्ते गन्तृत्वस्येव जलं वहतीत्यत्रघटादिद्वारकत्वेऽपि जलवहनस्येवच मुख्यत्वोपपत्तेः। अतो ब्रह्म जगत उपादान निमित्तं चेति सिद्धम्। ननु अनेन जीवेनेति श्रुत्यानु प्रवेशव्याकरणयोरीश्वरैक-कर्तृत्वमभिधीयत इत्युक्तम्। तदनुपपन्नम्। आत्मनेति तृतीयानुपपत्तेः। व्याकरवाणीति, तिङा कर्तुरभिधानेनानभिहिताधिकारतृतीयाया अप्राप्तेः।

न च व्याकरणकर्तृस्तिङाभिहितत्वेऽपि अनुप्रवेशकर्तुरनभिधानात् तृतीयाभविष्यतीति वाच्यम्। तथा सति मया भुक्त्वा व्रजानीति प्रयोगस्य साधुत्वापत्तेः। व्रजिक्रियाकर्तुः अभि-हितत्वेऽपि भुजिक्रियाकर्तुरनभिधानात्। नच जीवस्यैवानुप्रवेशकर्तृत्वं व्याकरणक्रियाकर्तृत्वं

त्वीश्वरस्येतितिङाऽभ्याकरणकर्तुरभिधानेऽपि अनुप्रवेशकर्तुरनभिधानात् तृतीयोपपत्तिरितिवाच्यम्। तदनुप्रविश्येति त्वाप्रत्ययानुपपत्तेः। समानकर्तृत्व एवत्वा प्रत्ययविधानात्। अन्यथा देवदत्तकर्तृकभोजने यज्ञदत्तकर्तृकव्रजने च भुक्त्वा व्रजतीति प्रयोगस्य साधुत्वापातात्। यदितिङन्तक्रियायास्तु अप्राधान्यं तत्क्रियास्थानयोरपिकारकशक्त्योस्तद्द्वारागुणप्रधानभावः। तथा चात्रतिङन्तव्रजिक्रियाकर्तुस्तिङाभिहितत्वेन तदप्रधानभुजिक्रियाकर्तुश्चाभिहितत्वात्। मयेत्यस्याप्यसाधुत्वं गुणानांप्रधानानुवृत्तिन्न्यायादित्युच्यते। तर्हि व्यकरवाणीत्यत्रापि प्रधानभूतव्याकरणक्रियाकर्तुरभिहितत्वेना प्रधानभूतानुप्रवेशक्रियाकर्तुश्चाभिधानात् तृतीयानुपपत्तिस्यादेवेतिचेन्मैवम्। आत्मनेत्यस्यस्वरूपेणेत्यर्थः। जीवेनेत्यस्य जीवशरीरकेणेत्यर्थः। यस्यात्माशरीरमितिश्रुतेः। तदनुप्रविश्येत्यचेतन इव चेतनेऽप्यनु प्रवेश श्चरीरात्मनि शब्दस्य शरीरपर्यन्तत्वस्य मुख्यतया प्रतिपन्नत्वाच्च। जीवशरीरकेणस्वरूपेणानु प्रविश्यव्याकरवाणीत्यर्थः।

यद्यपि जीवशरीरकंस्वरूपं व्याकरणकर्तुर्नाभिद्यते तथापि व्यपदेशिवदेकस्मिन् बुद्ध्यानानात्वकल्पनेतिन्यायेनकल्पत मेदमादायानभिहिताधिकारविहिततृतीयोपपत्तेः। घटःस्वेन रूपेणेतरव्यावृत्तिङ्करोतीत्या देप्रयोगदर्शनात्। ननु तत्करणार्थेतृतीया करणत्वं च न तिङाऽभिहितमितिचेत् प्रकृतेऽपि आत्मनेतिकरणे तृतीयास्तु

तेनेशस्तद्विशिष्टत्वकरणकतयाऽनु प्रवेशेऽपिकर्ता इत्यधिकरणसारावल्युक्तेः।

व्याकरणकर्तुः स्वस्यानुप्रवेशे साधकतमत्वविवक्षयाकरणत्वोपपत्तेः। अत्रकरणत्वकर्तृत्वयोरेकस्मिन्नपिविवक्षाधीनत्वेन सम्भवात्। स्वेनरूपेणेत्यत्रतथैवदर्शनात्। तथा च जीवशरीरकं स्वात्मानं साधनीकृत्य हानुप्रविश्यनामरूपे व्याकरवाणीत्यर्थस्सम्भवते। अतोऽनुप्रवेशस्याकरणक्रियायास्समानकर्तृकत्वादात्मनेत्यस्य करणत्वाच्च नत्वाप्रत्ययतृतीययोरनुपपत्तिरितिसङ्क्षेपः। एतेनशैवपातञ्जलकाणादादीनां निमित्तमात्रेश्वरवादोनिरस्तः।

ननु क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात्। घटादिवदित्यनुमानेन निमित्ततयैवेश्वरसिद्ध्यतीतिचेन्न। सपक्षे घटादौकर्तुःकुलालादेः कार्यकरणकर्मादीनां दर्शनात्। पक्षेऽपिकार्यकरणादिमान् कर्तैवसिद्ध्यतीति ततो विलक्षणस्याशरीरिणो सम्भवेन बाधात्। न च घटादिजनककुलालकृतेर्जन्यतया शरीरादिसापेक्षत्वेऽपि क्षित्यादिकृतेरजन्यतया कर्तुश्शरीरापेक्षाद्यसम्भवादशरीर्येव तत्कर्तेतिवाच्यम्। तथासति घटादिकृतेर्जन्यतयाज्ञानचिकीर्षापूर्वकत्वेऽपिक्षित्यादिकृतेर्नित्यतया ज्ञानचिकीर्षयोरनपेक्षणात्। क्षित्यादिकर्तुरशरीरवत् ज्ञानचिकीर्षयोरपित्याग प्रसङ्गात्। ननु प्रयत्नस्य स्वतस्स्वविषयकत्वे ज्ञानत्व प्रसङ्गेन ज्ञानेच्छाधीनमेवसर्वविषयकत्वं वाच्यमितियोरप्यव-

श्यकत्वमितिचेन्न। जीवनयोनियत्नस्य ज्ञानाद्यनधीनस्यसर्वविषयकत्ववदेतस्यापि सर्वविषयकत्वे बाधकाभावात्। जीवनादृष्टवशात्तस्य सर्वविषकत्वाङ्गीकारे क्षित्यादिकर्तृप्रयत्नस्यापि भोज्यकादृष्टवशात् सर्वविषयत्वमितिवक्तुं शक्यत्वात्। त्वयाप्येतदङ्गीकार्यम्। अन्यथा नित्यज्ञानेच्छा प्रयत्नानां सर्वदासर्वगोचरत्वेन विषयनियमाभावे युगपत्सर्वकार्योत्पत्तियुगपदनायाससर्वमोक्षादि प्रसङ्गात्।

सहकारिक्रमात् क्रमिककार्योत्पत्तिवचनं न युक्तिसहम्। सहकारिणामपि कार्यत्वाद्युगपदेव तदुत्पत्तिनिवृत्योः प्रसङ्गात्। प्रयत्नस्य च समस्तवस्तुगोचरज्ञानसमानविषयत्वेनित्यवस्तूनामपि तत्प्रयुक्तविषयत्व प्रसङ्गेन तेषामपिसृष्टिसंहारादि स्यात्। तेषां नित्यत्वेन स्रष्टुं संहर्तुं वा शक्यत्वादशक्य प्रयत्नवतः ईश्वरस्यानीश्वरत्वं वास्यात्। अस्तु तर्हि एवमदृष्टैकनियत प्रयत्नवानीश्वर इति चेज्जीवस्यैवानित्यप्रयत्नवतस्तथाविधनियमोपपत्तेर्नतदतिरिक्तकर्तृसिद्धिः। नन्वङ्कुरगोचरप्रयत्नो नकेनाप्युपलभ्यत इतिचेन्न। जीवन-पूर्वकप्रयत्नेऽपि समत्वात्। कार्यादेवतत्रकल्प्यत इति चेत्तत्रापिसमम्। अदृष्टस्य च सर्वकार्यनिमित्तस्य नियमकत्वे किमदृष्टनित्यप्रयत्नकल्पनप्रयत्नेन।

आहुश्चाचार्याः —

सर्वगत्वादनियमो नित्यगत्वादुपद्रवः। अदृष्टान्नियमेनित्यप्रयत्नोऽलाजागळस्तनः॥

स्यादृष्टपरतन्त्रस्यादपरात्माक्वचित् क्वचित्। परादृष्टपराधीनस्सर्वत्रैव भवेत् परः॥ इति।

किञ्चनित्यज्ञानादिकं किंदृष्टं उतकल्पितम्। नाद्यः। असिद्धेः। न द्वितीयः। दृष्टविजातीयकल्प्त्ययोगात्। मूर्तद्रव्यवद्विभूनां विभुनासंयोगे कल्प्यमाने संयोगकारणानामन्यतरकर्मोभयकर्मसंयोगोनाम भावात्तन्निषेधोयथास्वीकृतः। तथाज्ञानकरणानामिन्द्रियलिङ्गादीनामसम्भवात्तदभावस्स्यात्। नित्यत्वात्तत्रैरपेक्ष्येविभुद्वयसंयोगस्यापि नित्यत्वेन तन्निरपेक्ष्यनित्यसंयोगोऽपिस्वीक्रियताम्। विभूनां मिथस्संयोगाभावे न किञ्चिद्बाधकमिति चेन्नित्यज्ञानाभावेपि न किञ्चद्बाधकम्। अस्मदाद्यशक्यकार्यानुत्पत्ति प्रसङ्गरूपबाधक मस्तीतिचेन्न। कारणान्तरैरेवतदुत्पत्युपपत्तेः। कर्तृनिरपेक्षकारणान्तरैः कार्योत्पत्तिर्नदृष्टेतिचेदन्यत्रादर्शनेप्यन्यत्रतथास्यात्। कार्यान्तराणां कारणत्रयजन्यत्वेपि प्रध्वंसस्यनिमित्तमात्रजन्यत्वदर्शनात्। तथा च कल्पितस्य ज्ञानादेः कारणैरपेक्ष्यकल्पनं सिद्धस्य हेतुवर्गस्य क्वचित् कर्तृनैरपेक्ष्याङ्गीकार उचितः। किञ्चान्यत्रज्ञानं सर्वैकारणकं तत्प्रामाण्यं च गुणजन्यमितिस्थापयद्भिरीश्वरज्ञानं तत्प्रामाण्यं च निष्कारणकमितिदृष्टविपरीतं कल्प्यते। अत्रज्ञानचिकीर्षारूपधर्मान्तरकल्पनमपहाय प्रयत्नमात्रे निरपेक्षं विषयित्वकल्पनमेवयुक्तम्। किञ्च तच्च ज्ञानं प्रत्यक्षकारणाभावान्न प्रत्यक्षम्। लिङ्गाद्य-

जन्यत्वान्नानुमित्यादिः। स्मृतिकारणाभावान्नस्मृतिः। प्रमाकारणाभावान्नप्रमा। भ्रमकारणाभावान्नभ्रमः। अतो ज्ञानवर्गेषु नान्तर्गत इति तत्त्वाभ्युपगन्तव्यः। आहुश्चाचार्याः —

नित्येश्वरबुद्धिस्ते नानुभूतं न च स्मृतिः न च प्रमाभ्रमत्वस्यात् तत्तत्कारणवर्जनात् ॥

अनुभूत्यादिहेतूनामभावेऽपि तथायदि। स्मृतिहेतोरभावेऽपिस्मृतिरेषान किं भवेत् ॥

इति।

तत्र यथा किञ्चित् प्रत्यक्षत्व प्रमात्वादिकल्प्यते, तद्वदेव यत्नस्य विषयित्वेऽन्यनैरपेक्ष्यमपिकल्पयितुं युज्यते। ननु चेतनत्वमेवात्मलक्षणम्। चैतन्याभावे आत्मत्व न स्यादिचेन्मैवम्। यत्नवत्त्वस्यैव तल्लक्षणत्वात्। अस्तुतर्हि यत्नमात्रवानीश्वरः सएवानुमानेन सिद्धयतीतिचेन्न। यस्सर्वज्ञस्सर्ववित्। तदैक्षत बहुस्यां प्रजायेय। सोऽकामयत बहुस्यां प्रजायेयेत्यादि श्रुतिश्रुतविरोधेन तद्विरुद्धानुमानोदयासम्भवात्। किञ्च जीवनपूर्वक प्रयत्नन्यायेनादृष्टविशेषजनितयत्नवद्भिर्जीवैः क्षित्यादेस्सकर्तृकत्व संभवे किंनित्य प्रयत्नवदाधारकल्पनगौरवेण। यादृशैरेवादृष्टैरशरीरादिनिरपेक्षैस्सहकृत ईश्वरः सृष्टेतिमन्यसे। तादृशैरेव तत्फल भोक्तृष्वेव यत्नकल्पनेर्लघुत्वात्। अतोऽदृष्टवद्भिर्जीवैरेवजगदुत्पत्तिसिद्धिरितिसिद्धसाधनता दुर्वार। अतिरिक्तकर्तृकल्पनेकर्तृरव्यवस्थ प्रसङ्गश्च। तथाहि, क्षित्यादिकं सकर्तृकं कार्यत्वात्। घटादिवदित्यत्र एककर्तृकतया प्रसिद्धे सपक्षे घटेद्विकर्तृकत्वं स्यात्। उनेककर्तृकाथगोपुरादाव - प्रतिपन्नकर्तृतिरिक्तकर्तृकत्व प्रसङ्गश्च। कल्प्यमानोऽहकर्ता न केवलं क्षित्यादिमात्रकर्तृत्वेनकल्पनीयः। तत्प्रयत्नस्य परिच्छेदकाभावेन सर्वविषयत्वात् तेन घटादेर्द्विकर्तृकत्वमापादनम्। ततस्तद्दृष्टान्तेन पक्षस्य द्विकर्तृकत्वमापतेत्। ततस्सपक्षस्याद्विकर्तृकत्वं स्यात् एवं क्रमेणापर्युपरिकल्पनानन्तेश्वरापत्त्या द्यावापृथवी जनयन् देव एकः न द्वितीयोऽस्तीतिव्यवस्था भज्येत।

यद्येकेनेश्वरेणविश्वकार्यसिद्धौ द्वितीयकल्पनेर्निष्फलत्वेन गौरवात् तत्परित्याग इति। तत्रापिगौरवभयेन एकस्यापित्याग इति प्रकृष्टादृष्टैर्जीवैरेव जगदुत्पत्तिसिद्धिरितिसिद्धसाधनतैवानुमानस्य। किञ्च सकर्तृकमित्यत्रोपादानादिसमस्तकारणविषयज्ञानादिमान् कर्तृत्वाविवक्षितः, उत कतिपय विषयज्ञानादिमान्, उत सामान्यतोवा। पूर्वस्मिन् व्याप्त्यसिद्धेः। नहि कुलालादयोघटादिहेतुभूतमदृष्टेश्वरपरमाण्वादिक जानन्ति। उत्तरयोः पक्षयोरीश्वरासिद्धिः। द्व्यणुकप्रभृतिजगदुपकरणयागादिवेदिभिर्जीवैरेव सिद्धसाधनत्वात्। एतेन द्व्यणुकादिकर्तृत्वमपिजीवस्यैवादृष्टद्वारा घटत इति सिद्धम्।

ननुव्याप्त्या सकर्तृकत्वे सिद्धेऽनन्तरं पक्षधर्मतावलात् नित्यत्वसार्वज्ञ्यादिसिद्धिरिति-चेन्मैवम्। व्याप्यदर्शनेन पक्षधर्मतया व्यापकस्य प्राग्विदितधर्मिविशेषसम्बन्धमात्रं सिद्ध्यति। नतुसपक्षदृष्टवैजात्यम्। अन्यथा धूमानुमितेवह्नौतारणातारणादिविशेषविलोप प्रसङ्गात्। सपक्षदृष्टान्यतामात्रमपि नानुमेयनियतम्। पृथिवी द्रव्यं गुणवत्त्वात् जलादिवत् इत्यनुमानेन सपक्षदृष्टान्यस्वाभावात्-अतोऽत्रन पक्षधर्मतया विवक्षित विशेषसिद्धिः। तर्हिपरिशेषात् तत् सिद्धिरितिचेत् न परिशेषानुमानमपि हि क्षित्यादिकं पक्षीकृत्यस्यात्। तत्रकिञ्चिद् सकर्तृकत्वनिषेधो वा स्वतस्सर्वज्ञ कर्तृकत्वं वा साध्यते। नाद्यः। तत्सम्भवस्य स्थापितत्वात्। न द्वितीयः। तादृशस्य व्याप्त्य सम्भवात्। दृष्टान्तासिद्धिश्च। न च क्षित्यादिकर्तृत्वस्य जीवेष्वसम्भवात् तद्विलक्षण कर्तृसिद्धिरेव परिशेषानुमानसाध्येति वाच्यम्। प्रकृष्टादृष्टवशाद्विचित्रशक्तिमद्भिर्विश्वामित्रादिभिः क्षित्यादिकार्यसम्भवेन तद्विलक्षणकर्तृसिद्धेः।

नन्वेवमपिघटादिकर्तृष्यावृत्तो विशेषः क्षित्यादिकर्तुःस्वीकार्यः। तदुत्पत्त्यासन्नपूर्वकाले अस्मदादिजीवानां तदनुगुण बुद्ध्यादिराहित्यात्। अतोदृष्टविपरीतकल्प्त्यविशेषेकिमीश्वरकल्पि-प्रद्वेषेणेतिचेन्न। निश्वासादावधीपूर्वक प्रयत्नेनापि कर्तृत्वं त्वयेष्यते। कालविप्रकृष्टधियापि पुरुषस्य कर्तृत्वमामिचारिकपरपीडादौलोकवेदसिद्धम्। अत उत्पत्त्यासन्नकाले तादृशबुद्ध्यभावेऽपि विप्रकृष्टकालान्तरीयबुद्ध्यावा अधीपूर्वक प्रवृत्त्यावाकर्तृत्वसिद्धेः न जीवविलक्षणकर्तृसिद्धिः। अथकुम्भादिकृदसम्भावितोगोपुरादिकर्तृबुद्धि शक्ति प्रकर्षो दृश्यते। एवं मनुष्यासम्भावितश्शकुन्त लूतादिजन्त्वन्तरेषु च मनुष्येष्वपि विश्वामित्रादिष्वेवं देवासुरसिद्धादिषुपितामहपर्यन्तेष्वितिस्थिते बुद्धिशक्तितारतम्यस्य क्वचिद्विश्रमोवाच्य इति। एवमीश्वरस्सेत्स्यतीतिचेद्दृश्यते।

कर्ममेदाधीनमेव शक्तितारतम्यं त्वया निदर्शितम्। जन्मौषधि मन्त्रतस्समाधिजाश्च सर्वास्सिद्धयः तत्तददृष्टेष्वायत्तन्ते। एवञ्चादृष्टाधीन शक्तिप्रकर्षतारतम्यं कालभेदेन कर्मवश्येष्वेव केषुचित् सम्भवति। अतोन विश्रमस्थानान्तरकल्पनं युक्तम्। ननु कारणाभावेकार्याभावः उभयाभ्युपेतः। कारणानिचकर्त्रधिष्ठितानि कार्यं जनयन्ति। कर्त्रभावे कथं व्याप्रियेरन्। अतः कार्यस्य साङ्ख्यसौगतचार्वाकवर्तिन्या, नित्यत्वमसत्त्वमाकस्मिकत्वं वा स्यादितिचेन्न। कारणाभावे कार्यं न स्यात्। न तु कारणविशेषाभावे। अन्यथाक्वचिददृष्टस्यकर्मकारकादेरभावेऽपि क्रियानुत्पत्तिप्रसङ्गात्। दृश्यतेहिछिदिक्रियायाः कर्मापेक्षत्वेऽपि भवनध्वंसनादिक्रियायास्तन्निरपेक्षता। अतः कर्तृभावेऽपि कारणान्तरैः कार्यसिद्धेर्निष्प्रत्यूहत्वात्। अथकालोयथा सर्वकार्यनिमित्तं तथेश्वरोऽपि। तत्परित्यागे समानन्यायेन कालोऽपित्यज्यतामितिचेन्मैवम्। कालस्यतादृशस्यलोकवेदसिद्धत्वेनतत्परित्यागासम्भवः। तत्तत्काल प्रतीक्षया हि कर्षकाः कृष्यादौ प्रवर्तन्ते।

उदितेसूर्ये प्रातर्जुहोति । वसन्तेऽग्नीनादधीतेत्यादिशास्त्रेण हि तत्तत्कर्मणि प्रयतन्ते । तर्ह्यत्रापि द्यावापृथिवी जनयन् देव एक इत्यादि शास्त्रेण कर्तृसिद्धिरितिचेत् सिध्यतुनाम । अलमनुमानस्थापन प्रयत्नेन ।

ननु तथाऽपिकारणान्तराणामचेतनानां चेतनाधिष्ठितत्वे प्रवृत्तिर्नस्यात् । वास्यादीनां तक्षणानधिष्ठाने प्रवृत्त्यदर्शनात् । तथाचकर्त्रनुपहितत्वे कारणान्तरैरप्यङ्कुरादिर्नस्यादतः तत्कर्तावश्यक इति चेन्न । अदृष्टप्रेरितैरेव कारणान्तरैः कार्यसम्भवेनकर्तृव्यापारापेक्षाभावात् । अदृष्टस्याप्यचेतनस्य चेतनाधिष्ठानमपेक्षितमितिचेन्न । विषयतासम्बन्धेन कर्तृव्यापारस्यैव चेतनाधिष्ठितत्वपदार्थत्वेन तत्राप्यचेतनस्य तद्व्यापारस्य चेतनान्ताराधिष्ठितत्वापेक्षायामनवस्थापत्तेः । ननु च कार्यबलात्तत्तव्यापेक्षसङ्कोचाभ्युपगम इतिचेत् प्रत्युक्तत्वात् प्रयत्नानधिष्ठितत्वमितिचेन्न । नित्यानामपि परमाण्वादीनां तदपेक्षायास्तत्वयैवोपपादितत्वात् । तथाऽप्यन्वयव्यतिरेकवतां कारणानामन्यतमस्यत्यागे सर्वहेतुत्यागोऽपिस्यादिति चेन्न । सर्वकार्यानुत्पत्तिप्रसङ्गरूपबाधकसद्भावात् । तर्ह्येकस्यापित्यागोन सम्भवतीति चेत् तदाध्वम्सकार्यं निरूपय । ध्वम्सोहि स्वोत्पत्तौ हेतुमपेक्षमाणस्समवाय्यसमवायिनोरभावात् निमित्तमात्रमपेक्षत इति स्वीकृतः । तथा पक्षेऽपि जीवातिरिक्तस्यकर्तुः कल्पयितुमशक्यत्वात् कथञ्चिज्जीवकर्तृकत्वं कर्तृनिरपेक्षत्वं वास्वीक्रियताम् । तथ च हेत्वभावेकार्यं नस्यात । ननु कार्यत्वसामान्यानपेक्षितहेतुविशेषाभाव इति कर्त्रभावेकार्यं न स्यादितिविपक्षे बाधकतयोक्तं न संघटत इति कारणान्तरैरेवध्वम्सादिवत् क्षित्यादिकार्यसिद्धौ कार्यत्वात् कर्त्रनुमानं न सिध्यति ।

किं च क्षित्यादिकं कर्तृजन्यं शरीरादिजन्यत्वादात्मवदित्यनुमानेनकार्यत्वहेतोः प्रतिरोधः । नच शरीरेतिव्यर्थविशेषणं, स्वरूपासिद्धिपरिहारस्वेन सार्थत्वात् । नच हेतुविशेषणं, सर्वमनैकान्त्यपरिहारायेति शास्त्रमस्ति । ननुतर्हिव्यर्थविशेषणं सर्वत्रादूषणं स्यादितिचेन्न । यत्किञ्चिद्दोषपरिहारानुपयुक्तस्यैव वैयर्थ्यानुगुणत्वात् । तथाच व्यभिचारावारकत्वेऽपि असिद्धिवारणेन शरीरपदस्यप्रयोजनत्वात् । नचाजन्यत्वस्यैवाकर्तृकत्वाव्याप्त्या तत्र शरीरपदनिवेशे नीलधूमवद्व्याप्यत्वासिद्ध्यापत्त्या एकामसिद्धिं परिहरतोद्वितीयासिद्धिरितिवाच्यम् । शरीरजन्यत्वाभावयोर्विशिष्टाविशिष्टप्रतियोगिकयोः प्रतियोगि भेदमिन्नयोस्समानाधिकरण्येऽपि शरीरजन्यत्वाभावत्वकेवल जन्यत्वाभावत्वयोर्गुरुलघुधर्मभूत व्याप्यतावच्छेदकयोरेकत्रासमावेशेन धूमत्वधूमप्रागभावयोरिवव्याप्यतावच्छेदकत्वे बाधकाभावेनव्याप्यत्वासिद्ध्यभावात् ।

एतदुक्तं भवति । स्वसमानाधिकरण व्याप्यतावच्छेदक धर्मान्तराघटितस्यैव व्याप्यतावच्छेदकतया नीलधूमत्वस्यस्वसमानाधिकरणव्याप्यतावच्छेदक धूमत्वघटितत्वान्ननीलधूमत्वं

व्याप्यतावच्छेदकं, तदवच्छेदेन व्याप्त्यभावात्। नीलधूमो व्याप्यत्वासिद्धः। धूमप्रागभावत्वस्य धूमत्वरूपव्याप्यतावच्छेदकान्तरघटितत्वेऽपि तस्यसमानाधिकरण्याभावाद्धूमप्रागभावत्वं व्याप्यतावच्छेदकम्। तदवच्छेदेन व्याप्त्याधूमप्रागभावो न व्याप्यत्वासिद्धः। तथा शरीराजन्यत्वस्याजन्यत्वत्वघटितत्वेऽपि तयोर्व्यधिकरणत्वात् शरीराजन्यत्वत्वावच्छेदेनापि व्याप्त्याशरीराजन्यत्वमपि न व्याप्यत्वासिद्धम्। अन्यथा कळबीजवदिदं कळमाङ्कुरवत्त्वादित्यनुमानेऽन्वयव्यतिरेकिणिव्यतिरेकव्याप्तौ बीजाभावेनकळमाङ्कुराभावसिद्धौ कळमपदवैयर्थ्यं प्रसज्येत। यदि कळमबीजाभावबीजाभावयोर्विशिष्टाविशिष्टप्रतियोगिकयोः प्रतियोगिभेदभिन्नयोस्समानाधिकरण्येऽपि तत्तदभावत्वयोर्व्यधिकरणत्वात् स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितत्वात्तदवच्छेदेनव्याप्तिग्रहसम्भवान्न व्याप्यत्वासिद्धिरित्युच्येत। तदाप्रकृतेऽपि तुल्यमिति। एवं श्वित्यादिकं सकर्तृकमित्यत्रापिव्यर्थविशेषणं सुलभम्। तथाहि, सकर्तृकमित्यत्रकर्तुस्सम्बन्धमात्र वा कर्तृव्यापार पूर्वकत्वं वा विवक्षितम्। आद्ये सिद्धसाधनत्वम्। सन्ति हि त्वत्पक्षे कुम्मादिकर्तारश्चेतनाः स्वरूपतस्सर्वत्र विभुतया सम्बद्धाः। अस्मत्पक्षेऽपि।

अङ्गुळस्याष्टमागोऽपि नसोऽस्तिद्विजसत्तम। न सन्तिप्राणिनो यत्र कर्मबन्धनिबन्धनाः॥

दारुण्यग्निर्यथातैलं तिलेतद्वत् पुमानपि। इति। सर्वमचेतनं पुण्यपापकर्तृचेतनमिश्रमिति सर्वस्यापिकर्तृसम्बन्धित्वात्। द्वितीयेव्यापारपूर्वकत्वनिवृत्तिमात्रेणकार्यत्वनिवृत्युपपत्तौ कर्तृविशेषणवैयर्थ्यम् व्याप्त्युपयोगाभावेऽपि सिद्धसाधनत्वनिवृत्यैतदुपादानमितिचेत् तर्हि शरीराजन्यत्वेऽपि असिद्धिपरिहारेण सप्रयोजनत्वादेकामसिद्धिं परिहरतो द्वितीयापत्तिरित्युक्तिर्वितथास्यात्। किञ्च शरीरजन्यत्वं सकर्तृकत्वादनुमाने उपाधिः। जन्येषुघटपटादिषुसर्वत्र शरीरजन्यत्वसत्वात् सकर्तृकत्वव्यापकम्। पक्षे शरीरजन्यत्वाभावात् साधनाव्यापकत्वं चेत साध्यव्यापकोपाधिनिवृत्त्या पक्षे सकर्तृकत्वरूप साध्यनिवृत्तेस्साधनात्। व्यापकाभावस्यव्याप्याभाव प्रयोजकत्वात्। न च जन्यत्वस्यैव साध्यव्यापकत्वेन उपाधौ शरीरपदवैयर्थ्यमितिवाच्यम्। उपाधेस्साधनाव्यापकत्वसंप्रतिपत्तये च शरीरपदावश्यकत्वेन सार्थक्यात्। अन्यथ ऽयोगोळकं धूमवद्वह्नेरित्यत्र आर्द्रेन्धन संयोग उपाधिरित्युच्यते। तत्र इन्धनसंयोगमात्रस्य धूमव्यापकत्वादार्द्रपदवैयर्थ्यं स्यात्।

यदित्रार्द्रपदानुपादानेऽयोगोळकेऽपीन्धन संयोगसत्वात् साधनाव्यापकत्वासम्भवः। एवं पक्षे उपाधिनिवृत्त्या साध्यनिवृत्तिरपि दुश्शका पक्षे इन्धनसंयोगसत्वात्। अत आर्द्रपदम्। तदानेतु अयोगोळके आर्द्रेन्धनसंयोगाभावात् साधनाव्यापकत्वं उपाधिनिवृत्तिश्च पक्षे सिद्धयतीति

एतत् प्रयोजनायैवार्द्रपदमित्युच्येत । तदा शरीरपदमपितर्यैवेतितुल्यम् । एवं गौरमित्रातनये अयं श्यामः मित्रातनयत्वात् श्याममित्रातनयवदिति साधने शाकाहारपरिणतिजत्वमुपाधिः । तत्र साधनावच्छिन्नसाध्यव्यापकत्वस्य वक्तव्यतया मित्रातनयत्वविशिष्टश्यामत्वव्यापकत्वस्याहार-परिणतिजन्यत्वेसत्वात् शाकपदवैयर्थ्यम् । तावन्मात्रोक्तौ पक्षेऽप्याहारपरिणतिजत्वसत्वात् साधन-स्यापि व्यापकत्वादुपाधित्वं न स्यात् । उपाधिनिवृत्त्या साध्यनिवृत्तिश्च न सिद्ध्यतीति शाकपदम् । तत्प्रवेशेतु पक्षे गौरमित्रातनये शाकाद्याहारपरिणतिजत्वाभावेन साधनाव्यापकत्वोपाधिनिवृत्त्यो-रसम्भवेन तस्योपाधित्वमक्षतम् । तथा प्रकृतेऽपि । अतः उक्तानुमानं शरीरजन्यत्वेन सोपाधि कत्वमेव ।

एवं सर्वकार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वात् । यत् सर्ववित्कर्तृपूर्वकंन भवति न तत् कादाचित्कम् । यथाऽऽत्मादिरित्यादिकेवलव्यतिरेकिण्यपि व्यर्थविशेषणत्वमर्थान्तरत्वं च सुलभम् तत्र कर्तृपूर्वकत्वनिवृत्त्यैवकादाचित्कत्वनिवृत्तावुपपन्नायां सर्ववित्त्वविशेषणं व्यर्थम् । सिद्धसाधनत्व-निवृत्त्या सप्रयोजनमितिचेन्न । शरीराजन्यत्वहेतावसिद्धिपरिहाराय शरीरपदमिति वदन्तं प्रति एकाप्रसिद्धिपरिहरतोद्वितीयापत्तिरित्युक्तेरत्रापि दुर्वारत्वात् । तर्हिकर्तृपदं हित्वा सर्ववित्पूर्वकत्वमेव उच्यते । तथाच न वैयर्थ्यमितिचेन्न । वित्पूर्वकत्वनिवृत्त्यैव व्याप्तिसिद्धौ सर्वपदवैयर्थ्यात् । एवं सर्वेतिविशेषणेऽपि न सिद्धसाध्यतापरिहारः । सर्वेषां चेतनानां सर्वशब्द र्थवेदिनामसर्ववित्वायो-गात् । अन्यथा सर्ववित्साधनस्यापि दुश्शकत्वात् । विशेषतस्सर्वं न सर्वेजानन्तीतिचेन्न । विशेषाणामपि सर्वशब्दार्थत्वात् । सर्वसाक्षात् कर्तृपूर्वकत्वं साध यामः इति चेन्न । योगिभिरर्था-न्तरत्वापातात् । नित्यसाक्षात्कारिपूर्वकत्वं साधयामः इतिचेन्न । एवमपि व्याप्तौनित्यत्वविशेषण-वैयर्थ्यमेव । प्रकारान्तरेण विशेषसाफल्ये शरीराजन्यत्वहेतावपि साफल्यं सिद्ध्यत्येव । एवं वेदास्सर्वज्ञ प्रणीताः वेदत्वादित्यत्रापि विशेषणवैयर्थ्यार्थान्तरत्वे बोध्ये प्रणीतत्वनिवृत्तिमात्रेणज्ञ-प्रणीतत्व निवृत्तिमात्रेण वा व्याप्तिग्रहोपपत्तेः । एतेन,

कार्ययोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्चसाध्योविश्वजिदव्ययः ॥

इति । न्यायाचार्यसंगृहीतानां सर्वेषामनुमानानांस्थालीपुलाकन्यायेन निरासोबोध्यः । नन्वस्माक मीश्वरानुमाननिरासेन किं प्रयोजनम् । नच प्रयोजनाभावमात्रम् । अनुमानत एव ईश्वरं प्रति पद्य, तं भजमानानां नास्तिकत्व शङ्कापादनेन,

विद्याचोरो गुरुद्रोही वेदेश्वरविदूषकः । त एते बहु पाप्मानः सद्योदण्डया इति श्रुतिः ॥

इति शास्त्रेणमहत् पापंस्यादितिचेन्न। अनुमानदूषणेऽप्यागमतस्तत्सिद्धिमप्युपगच्छतामीश्वर दूषकत्वाभावात्। अन्यथाऽस्मदादिप्रत्यक्षवेद्यत्वनिषेधेनानुमानिकेश्वरवादिनोऽपीश्वरदूषकत्व प्रसङ्गात्। प्रयोजनं च यथावस्थित तत्त्वावबोधः। ईश्वरानुमाने आभासतां पश्यतां तीव्रबुद्धीना मीश्वराविश्वासपरिहारश्च मन्दमतीनां तीव्रबुद्धिभिः प्रक्षोभाभावश्च अप्राप्तप्रापकस्यागमस्यानुवाद-त्वप्रसङ्गपरिहारश्च। अतः प्रयोजनसद्भावात् पापाभावाच्चानुमाननिरासोयुक्तः। नन्वनुवादस्वेऽपि वेदस्येश्वरस्तुत्येवेति न कश्चिद्दोष इति चेन्न। निमित्तोपादानभूतेश्वरासिद्धेः निमित्ततयानुमान-सिद्धमीश्वरमनूद्य श्रुत्या उपादानत्वादिर्विधीयताम्। प्रत्यक्षसिद्धं पृथिव्यादिकमनूद्य उपादानत्व-निषेधकानुमानोदये तत्रधर्मिग्राहतश्रुतिविरोधस्यैव दूषणत्वावश्यकतयास दुर्वचः।

अनुमानस्यैव धर्मिग्राहकत्वात्। उपादानत्वविशिष्टतयागमेनैव सिद्धौ तूपादानत्वनिषे धकानुमितौ धर्मिग्राहकविरोधस्य वक्तुं शक्यत्वात्। नन्वेवमपि प्रत्यक्षसिद्धशरीरत्वादिनिषेधानु-मानात्तदपिदुष्यतामितिचेन्न। तत्रानुमानस्याप्यशरीरत्वनिषेधस्य शरीरत्वग्रहाधीनत्वात्। तद्ग्रहस्य श्रुत्यतिरिक्तप्रमाणशक्यत्वेनशरीरत्वश्रुतेरेवोपजीव्यतयातद्विरुद्धानुमानाप्रवृत्तेः। नर-शिरःकपालशुचित्वानुमानवत ईश्वरो न पृथिव्याद्युपादानं चेतनत्वात् कर्तृत्वाद्वा कुलालवदित्यादि-प्रयोगे निषेध्यभूतपृथिव्याद्युपादानत्वस्यसिद्धयसिद्धिभ्यांविरोधस्त्वनुपपन्नः। पृथिव्याद्युपादान-त्वस्य प्रत्यक्षानुमानाभ्यामन्यत्रसिद्धस्येश्वरे निषेधस्य सुशक्यत्वात्। अतस्तदनुमानस्य धर्मि-ग्राहकविरोध एव दूषणत्वेन वक्तव्यः।

सचेश्वरस्य शास्त्रैकप्रमाणत्वे तदनुवादेनागमस्योपादानत्वादिविधानेऽभ्युपगम्यमाने-तस्यानुपादानत्वमेव भवेत्। ईश्वरस्यानुमानिकत्वात् अनुमानोपजीव्यजातीयस्योपादानत्व-निषेधकानुमानस्य धर्मिग्राहक प्रमाणानुगृहीतस्य प्रबलत्वेन तद्विरुद्धतयोपादानत्व बोधकागमस्य-यूपादित्यकयवाक्यस्य प्रत्यक्षविरुद्धत्वेनान्यपरत्ववदन्यपरत्वापातात्। अतोऽनुमाननिरासाभावे ब्रह्मजगदुपादानं नस्यात्। अत एव सूत्रकारोऽपिजन्माद्यस्य यत इत्यनेन ब्रह्मणोऽभिन्ननिमित्तो-पादानत्वं प्रतिपाद्य तन्निर्वाहाय तदनन्तरमेव शास्त्रयोनित्वादित्यनेन ब्रह्मणः प्रमाणान्तरगोचरत्वं निराचकार। इदमत्रावधेयम्। ब्रह्मणोऽनुमानगोचरत्वं प्रतिक्षिप्य शास्त्रैकप्रमाणक-वेद्यापिते सति शास्त्रमेवधर्मिग्राहकप्रमाणं भवेत्। नत्वनुमानम् तदैव हि ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं सिद्धयति। ब्रह्मणोऽनुमानवेद्यत्वेतस्य धर्मिग्राहक प्रमाणत्वात् तदविरोधेन ब्रह्म न जगदुपादानं जगन्निमित्तत्वादितिसाधनेनानुपादानमेव ब्रह्मस्यात्।

उपादानत्वबोधकश्रुतिवाक्यं तु धर्मिग्राहक प्रमाणोपोद्बलितानुमानसिद्धानुपादानत्व-विरुद्धार्थं प्रतिपादनासमर्थं सद्यूपादित्यवाक्यवदन्य परमेवस्यात् अतोब्रह्मणोऽभिन्ननिमित्तोपादानत्व सिद्धयै उपादानत्वनिषेधकानुमानं दूषणीयम्। दूषणं च धर्मिग्राहकप्रमाणविरोध एवान्यथा ऽसंभवात्। सच शास्त्रस्य धर्मिग्राहकत्व एव सम्भवति। अतोऽनुमानगोचरत्वं प्रतिक्षिप्यशास्त्रैक-प्रमाणकत्वं स्थापितम्। अथ यस्य पृथिवीशरीरमित्यादिषु प्रत्यक्षसिद्ध पृथिव्याद्यनुवादेनभगव-च्छरीरत्वनिषेधानुमानेधर्मिग्राहकप्रमाणविरोधाभावेऽपि तदनुमानदूषणवदुपादानत्व निषेधकानु-मान दूषण सम्भवात् ईश्वरानुमाननिषेधपूर्वंकशास्त्रैक प्रमाणकत्व समर्थनमफलमितिचेदुच्यते। भगवच्छरीरत्वस्य शास्त्रव्यतिरिक्तप्रमाणगोचरत्वाच्छरीरत्वसिद्धिमुपजीव्य शरीरत्वनिषेधकानु-मानस्यनिषेध्यसिद्धयसिद्धिभ्यां व्याघातेन निषेधेन सिद्धयतीति अप्रसिद्धसाध्यकत्वदूषणदूष्यत्वं तदनुमाने संभाव्यते। उपादानत्वनिषेधकानुमाने तुनिषेध्यजगदुपादानत्वस्य परमाणुद्व्यणुक-कलापतन्त्वादिषु प्रसिद्धस्येश्वरनिषेधे सिद्धयसिद्धिव्याघाततो प्रसक्त्याताद्दशानुमान प्रवृत्तौ ब्रह्मण उपादानत्वं न सिद्धयेत्। अतोधर्मिग्राहक प्रमाणविरोधेन तस्य बह्वयनुष्णत्वानुमानवत् बाधि-तत्वसंपत्तये शास्त्रैकवेद्यत्वं समर्थितमिति।

ननु तथापि शास्त्रयोन्यधिकरणे नानुमानस्येश्वरसाधकत्वमुक्तम्। रचनानुपपत्तेश्चेत्य-धिकरणेऽचेतनानां चेतनाधिष्ठितत्वमावश्यकमितिव्याप्त्याचेतनविशेषत्वेनेश्वरस्माधितः। अतस्त योर्विरोध इतिचेदुच्यते। शास्त्रयोन्यधिकरणे ईश्वरो नानुमानेन साधयितुं शक्यत इत्युक्तम् रचनानुपपत्तेरित्यधिकरणे म एव नानुमानेनबाधितुं शक्य इत्युक्तम्। अतोद्वयोरप्यधिकरणयोः परस्परं नविरोधः। एतदुक्तं भवति। यद्वस्तु येन प्रमाणेन साधयितुं योग्यं तदेव वस्तु तेन प्रमाणेन बाधयितुं, शक्यते। यथा प्रत्यक्षसिद्धो घटादिस्तेनैव प्रत्यक्षेण बाध्यते। न पुनः प्रत्यक्षाविषयः परमाण्वदृष्टादिः प्रत्यक्षेण बाध्यते। एवमनुमानागोचरत्वादीश्वरस्तेनैवानुमानेन साधयितुं बाधयितुंवा न शक्यत इति सूत्रकाराभिप्रायः इति। अथनिमित्तोपादानयोर्लक्षणविरो-धान्निमित्तोपादानैक्येवाक्यस्य यूपादित्यैक्य वाक्यवद्यथा श्रुतार्थबोधकत्वाभावेन ब्रह्मणोऽनु-पादानत्वमितिचेन्मैवम्। नह्युपादानासमवायिव्यतिरिक्तं निमित्तमितिनिमित्तलक्षणं (नापि निमित्तासमवायेभिन्नं उपादानमिति लक्षणम्) येन विरोधस्स्यात्। किन्तूपादानत्वं परिणामाश्रयत्वम्।

परिणामः अगन्तुकावस्थाविशेषः। विशेषस्तूत्तरोत्तरावस्थाविशिष्टस्वरूपापेक्षयातदनु-गुणनियतपूर्वभाव्यवस्थाविशिष्टं तदेव वस्तूपादानम्। यथा घटत्वावस्थाविशिष्टमृद्द्रव्यापेक्षया-पिण्डत्वावस्थाविशिष्टं तदेवमृद्द्रव्यं परिणामौन्मुख्यातिरिक्ताकारविशिष्टं कारणं निमित्तम्। असम वायीतिकारणावान्तरविभाग अनुपपन्नः। तस्य पारिभाषिकत्वात्। अन्यथानिमित्तकारणप्रत्यासन्नं

कारणमनिमित्त कारणमिति चतुर्थमपि पारिभाषिकलक्षणंस्यात् । ततश्च लक्षणविरोधाभाव निमित्तोपादानैक्यं यथाश्रुतार्थकमेव । तथाचाविभक्तनामरूपचिदचिच्छरीरकत्वापेक्षयोपादानत्वसिद्धेः । अविभक्तचिदचिच्छरीरकत्वातिरिक्तेन कुलालादि साधारणसङ्कल्पविशेषत्वाद्याकारेण निमित्तत्वसिद्धेश्च । ईश्वरस्यैव चिदचिद्विषयेकर्तृत्वमुपादानत्वं च परैरपिस्वीकार्यम् ।

सन्निहितसंयोगादयो घटादिभिरीश्वरस्य । ततश्चेश्वरस्तेषां समवायित्वात् सर्वकार्यकर्तृत्वाच्च उपादानं निमित्तं च । तत्कर्तृत्वानभ्युपगमेकार्यत्वात् सकर्तृकमित्यनुमानं दशमदशापन्नत्यात् चेतनेष्वपि बुद्धपूर्वकस्वज्ञानसुखाद्युत्पादनेनिमित्तोपादानत्वसमुच्चयः सिद्धः । ज्ञानसुखाधिकं प्रति तेषां समवायित्वात् । तदनुकूलकृतिमत्त्वेनतन्निमित्तत्वाच्च । अतस्सिद्धं सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैवस्थूलचिदचिच्छरीरकतयापरिणमतीतिवेदान्ताः प्रतिपादयन्तीति । तेनच तद्व्यतिरिक्तं च निखिलस्यजगत अ धाराधेयभावशेषशेषिभावशरीर शरीरिभाव कार्यकारण भावादयो यथाप्रमाणं संबन्धाः स्वीकार्याः । अत्र जगतः नारायण इव लक्ष्मीरपीश्वरी । ईशानो भूतभव्यस्येतिवत ईश्वरी सर्वभूतानाम् । अस्येशाना जगतो विष्णुपत्नीति लक्ष्म्यामपीशान शब्दश्रवणात् यद्यप्यस्य पत्न्यैश्वरीतिपुंयोगादाख्यायामितिङीपि पत्न्यामीश्वरत्वं न सिद्ध्यति । तथाऽपि सर्वभूतानामिति षष्ठ्यर्थान्वयदौर्बल्यप्रसंगेन तथा विवक्षानुपपन्ना । अस्येशाना जगत इति वाक्यान्तरेण लक्ष्म्या एव साक्षादीश्वरत्वस्य प्रतिपादनात् । तदैकार्थ्येन ईश्वरीमित्यत्रापिपुंयोगविवक्षाया अयुक्तत्वात् । अत एवजीवकोटौ तस्यान प्रवेशः ।

यथा सर्वगतो विष्णुस्तथैवेयंद्विजोत्तम । आक्रम्य सर्वांस्तु यथात्रिलोकीं तिष्ठत्ययं देववरोऽसिताक्षी । तथास्थितात्वं वरदे तथापीत्यादिना तस्यापि तत्तुल्यव्यापित्वबोधनात् नचेश्वरद्वैत्वाङ्गीकारे जगतोद्वैराज्यप्रसङ्ग इति वाच्यम् । अत्यन्तपारतन्त्र्येनद्वैराज्यप्रसक्तेः एव शेषित्व शरण्यत्व प्राप्यत्वादिकमपि अस्याः प्रमाणप्रतिपन्नं स्वीकार्यम्

शेषित्वे प्रमाणम् ।

अस्याममच शेषं हि विभूतिरुभयात्मिका । अकारेणोच्यते विष्णुस्सर्वलोकेश्वरो हरिः ॥
उद्भूताविष्णुना लक्ष्मीरुकारेणोच्यते तथा । मकारस्तु तयोर्दात्र इति प्रणवलक्षणम् ॥ इति ।

शरण्यत्वे प्रमाणम् ।

"लक्ष्म्यासहहृषीकेशो देव्याकारुण्यरूपया । रक्षकस्सर्वसिद्धान्ते वेदान्तेषु च गीयते ॥
वाचः पारं प्रार्थयिता प्रपद्येन्नियतः श्रियम् ।" "संसारार्णव तारिणी ।"

आत्मविद्या च देवित्वं विमुक्तिफलदायिनी। यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम्॥
निस्तरन्त्यचिरेणैव व्यक्तध्यान परायणाः। श्रुणोति निखिलान् दोषान् इत्यादिकम्। प्राप्यत्वे
वैकुण्ठेतु परेलोके श्रियासार्धं जगत्पतिः। आस्ते विष्णुरचिन्त्यात्मामक्तैर्भागवतैस्सह॥

इत्यादिकम्। अतो लक्ष्म्या शरण्यत्वादि सामान्येऽपि पुरुषकारत्वं त्वधिकम्। ननु पुरुषकारस्य साक्षादुपायत्वं न दृष्टमितिचेन्न। साधारणधनत्यागेऽन्यतरस्याननुमतौ अन्यतरेण वल्लभेनाननुमतोऽप्यनुकूलीक्रियते। ततस्ताभ्यां दीयते तत्र पुरुषकारत्वसाक्षादुपायत्वयो र्दर्शनात्। ननु हरिरेकस्सदाध्येयः।

आलोड्य सर्वशास्त्राणिविचार्य च पुनः पुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा॥

ऋते तमेकं पुरुषं, न संपदां समाहारो वियदां विनिवर्तने। समर्थो दृश्यते कश्चित्तं विना पुरुषोत्तमम्।

इत्यादिभिरेकस्यैवध्येयत्वमोक्षप्रदत्वादिबोधनाल्लक्ष्म्या अपि साक्षादुपायत्वस्वीकारे विरोध इतिचेन्न।

श्रुणूपाय चतुर्थं मे सर्वत्यागसमाह्वयम्। सर्वधर्मान् परित्यज्य सर्वानुचावचाङ्गकान्।
संसारानलसंतप्तः मामेकं शरणं व्रज। मां प्रपद्येत वै गतिम्। ईशे वा पुरुषोत्तमम्।

इत्यादिनोभयोरुपायत्वे उपायद्वित्वपरिहाराय सर्वेषां प्रमाणानां विशिष्टोपायतापरत्वमेवाश्रयणीयमिति न विरोधः। उभयत्राप्येकशब्दः विशिष्टव्यतिरिक्तनिषेधपर इतिस्फोरयति।

लक्ष्यासहहृषीकेशो देव्याकारुण्यरूपया। रक्षकस्सर्वसिद्धान्ते वेदान्तेषु च गीयते॥ इति

प्रमाणम्। अत एव कारणवाक्ये उपपत्तिवाक्ये च सर्वत्र लक्ष्म्या अनुक्तिमाशङ्क्य तदनन्यभावत्वान्नपृथगभिधत्तेश्रुतिरपीति भट्टपराशरपादैस्समाहितम्। किंबहुना। अकारेणोच्यते विष्णुरिति "कठश्रुत्या" तथापि, साधारणमीक्षितृत्वं श्री श्रीशयोर्द्वौच सदैकशेषत्वेतु बृम्हितया प्रतिपादितम्। उभयाधिष्ठानं चैकं शेषित्वमिति श्रीराममिश्रैर्विवृतम्। अतोजगच्छेषित्वाल्लक्ष्म्या अपीश्वरत्वं सुस्पष्टमिति। भगवद्यामुनाचार्यैश्च लोकैकेश्वरीत्यनेन सर्वलोकेश्वरत्वं, "यस्यास्ते महिमान" मित्यनेनापरिच्छिन्नमहिमत्वं, कान्तात्प्रसादादृते संसृत्यक्षर वैष्णवाध्वसुनृणामित्यनेन मोक्षप्रदत्वं च संयगुपपादितम्। श्री भट्टपराशरपादैश्चलक्ष्मीकल्याणग्रन्थे

अनन्याधीनकल्याणमन्यमङ्गळकारणम्। जगन्निदानमद्वन्द्वं द्वन्द्वं वन्दामहे महः॥

इति च श्लोकेऽन्यमङ्गळकारणमित्यनेनात्यन्तसामरस्यं चाभिहितम्। एवं स्वयं वस्तूकुर्वन् जननि मम कस्मात् सरसिजप्रकारौ पद्मायास्तव च चरणौ नश्शरणयन्निति श्लोकेऽयार्थविवरणभूते

भगवतासमं लक्ष्म्याः अपि साक्षादुपायत्वं स्पष्टमभिहितम्। एतेनद्वये पूर्वखण्डे श्रीमच्छब्देश्रिय उपलक्षणत्वं विशेषणत्वं वा। अथाभिश्रियोनोपायत्वं इतिकैश्चिदुक्तं प्रत्युक्तम्। एवं श्री गुणरत्न कोशे च लक्ष्म्या भगवतश्च जगदीश्वरत्वमुभयविभूतिमत्वं प्राप्यत्वमुपायत्वादिकं साधारणम्। असाधारणं लक्ष्म्याः पुरुषकारत्वं प्रत्युत देवतान्तरव्यावर्तकत्व मङ्गळावहत्व परब्रह्मत्वापादकत्वादिकं चेतिस्पष्टमभिहितम्।

तथा हि देवि श्रुतिमित्यनेन श्रुत्यैकगम्यकल्याणगुणवत्वमाहुः वेदेत्यनेनयथावस्थित तत्वज्ञानहेतुकटाक्षवत्वम्। अस्येशाना जगत इत्यनेन सर्वेश्वरत्वम्। तं च त्वत्कृपतिमित्यनेन-पत्युर्दैवतान्तर व्यावर्तकं, उद्धाहुस्त्वामित्यनेन सर्वोपनिषत् प्रतिपाद्यपर्वजगन्नियन्तृत्वम्। इदं सदसदात्मेत्यनेन निम्नोन्नतजगत् सृष्टिहेतुकटाक्षवत्वं, हेलायामित्यनेन उभयविभूतिमन्वं ते साध्येत्यनेन शेषशेषाशनादिनित्य सूरिपरिचर्यायोग्यत्वं, यददूर इत्यादिभिः कृत्स्नभोगविभूति नियन्तृत्वं स्वरूपं स्वातन्त्र्यं मित्यनेन निखलवेदवेद्यत्वं तव स्पर्शादित्यनेनपत्युर्मङ्गळावहत्व अपाङ्क्त्यनेन पत्युः परब्रह्मत्वहेतुकटाक्षवत्वं स्वतः श्रीस्त्वमित्यनेन पत्युः स्वायत्तातिशयवत्वेऽपि अनन्याहितत्वं प्रशकनेत्यनेन भगवच्छब्दमुख्य प्रत्यौपयिकपूर्णषाड्गुण्यवत्वं प्रणतवरणेत्यनेन-मोक्षयिष्यामीति सङ्कल्पाश्रयत्वरूपमुपायत्वं क्षेमङ्करत्वेत्यनेन मोक्षप्रदत्वं युवत्वादात्यित्यनेन ऐच्छिकस्त्रीत्वासाधारणगुणवत्व यदिमनुजेत्यनेनावतारादि सर्वैश्यापारेऽप्यैकरस्यं मातर्मैथिलीत्य-नेन साक्षाद्रक्षकत्वं पितेवेत्यनेन पुरुषकारत्वं नेतुं नीत्येत्यनेन पत्यातुल्यं निरङ्कुशैश्वर्यं औदार्येत्यनेनौदार्यादिगुणगणवत्वमैश्वर्येत्यनेनैश्वर्यादिवन्मोक्षप्रदत्वं ज्ञानक्रियेत्यनेन सर्वलोक भरत्वं च स्पष्टमुपपादितम्।

न च स्तोत्रादौ श्रियं त्वत्तोऽप्युच्चैरिति भगवतोऽप्युच्चैस्त्वेन स्तौमीति प्रतिज्ञानात् स्तुतेरारोपितगुणकथनरूपत्वादस्येशानेत्याद्युक्तेश्वरत्वादिकं सर्वमारोपितं न वास्तविकमिति-वाच्यम्। तत्वेन यस्य महिमार्णवशीकराणुरित्युपक्रम्य बहुविधगुणकथनेन हि स्तुतित्व, गुणा-नामसद्भावेस्तुतित्वमेवहीयेत। न ह्यसतागुणेन कथितेन प्रीतिर्जायते। अतःकर्म प्रीच-यन्तो गुणसद्भावं बोधयन्त्येवार्थवादा इति कथमसतागुणेनकथितेनरुचिर्भवति।

स्तोत्रं नाम किमानन्ति कवयोयद्यन्यदीयान् गुणानन्यत्रत्वसतोऽधिरोप्यफणितिस्तात हिंवंध्यात्वयि। इत्याचार्यसूक्तिभिः विद्यमानगुणकथनस्यैवस्तुतित्वात्। एतद्ग्रन्थे च स्तोतु के वयमित्यदश्च जगृहुः प्राञ्चो विरिञ्चादयः इत्यारभ्यस्तोतारं तमुशन्तिदेविकवयोयोविस्तृणीते गुणान् इति विद्यमानगुणविस्तारकथनं स्तुतिरित्युक्तेश्च। नहि चतुर्मुखादीनामारोपितगुणकथनाशक्तिः। न च सर्वकल्याणगुणाकरे भगवत्यसंभावितागुणा अन्यत्र सन्ति। अत्र आरोपितगुणकथनंस्तुति-

रित्यसङ्गतमेव । तर्हिश्रियः भगवतोऽप्युच्चैस्त्वकथनं वास्तविकं कथमिति चेदुच्यते । अनाद्याज्ञाति लङ्घनापराधेन भगवद्विमुखानामाश्रितानामदृश्यत्वधूननाभिगम्यत्वसंपादनेन पुरुषकारत्वं देवतान्तरव्यावर्तकत्वं पत्युर्मङ्गळावहत्वमरविन्दौपयिककटाक्षवत्वमित्यादीनां वास्तविकानां सद्भावादुच्चैस्त्वकथनमुपपन्नम् । न तत् सनश्चेत्यादेरपिलक्ष्मी वैशिष्टमगवत एव निरवद्यमाभ्यधिकत्वप्रतिपादनेन विरोधाभावात् । अतोलक्ष्म्या अपि शरण्यत्वेश्वरत्व प्राप्यत्वादिकं प्रमाणैराचार्यसूक्तिभिश्चाभ्युपगन्तव्यमितिसिद्धम् ।

इतीश्वरपरिच्छेदः

॥ श्रीः ॥

॥ श्रीमते श्रीलक्ष्मनृसिंह परब्रह्मणे नमः ॥

अथ नित्यविभूतिपरिच्छेदः ।

ईश्वरनिरूपणानन्तरं तस्य नित्यविभूतिर्निरूप्यते । त्रिगुणद्रव्यव्यतिरिरिक्तत्वेसति-सत्ववत्त्वं तमोरहितत्वेसति सत्ववत्त्वं स्वयं प्रकाशत्वेसतिसत्ववत्त्वमित्यादि तल्लक्षणम् । उक्तलक्षणेषु जीवेश्वरयोरतिव्याप्तिवारणायविशेष्यदळम् । त्रिगुणेऽतिव्याप्तिवारणायविशेषणदळम् । एवंचेतन तद्धर्मभूतज्ञानान्यत्वे सति स्वप्रकाशकत्वमपि तल्लक्षणं; त्रिगुणेऽतिव्याप्तिवारणायविशेष्यदळम् । शेषंस्पष्टम् । आदित्यवर्णंतमसः परस्तात्, तेहनाकं महिमानस्सचन्ते । यत्र पूर्वेसाध्यास्सन्तिदेवाः, क्षयं तमस्यरजसः पराकेयो अस्याध्यक्षः परमेव्योमन्, सहस्रस्थूणेबिभितेदृढ उग्रे । यत्र देवानामधिदेव आस्ते । हिरण्मये परमेलोके विराजं ब्रह्मनिष्कलम् । पादोऽस्यविश्वाभूतानि, त्रिपादस्यामृतं दिवि । विज्ञानसारथिर्यस्तुमनः प्रग्रहवान् नरः । सोऽध्वनः पारमाप्नोतितद्विष्णोः परमं पदम् । स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते नचपुनरावर्तते न च पुनरावर्तते । तदेकमव्यक्तमनन्तरूप विश्वं पुराणं तमसः परस्तात् ।

रम्याणि कामचारणि विमानानि सभास्तथा । आक्रीडाविविधा राजन् पद्मिन्यश्चामलोदकाः ॥

एते वै निरयास्तास्तस्थानस्य परमात्मनः । दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यम् ।

गच्छ प्रभो रक्षचास्मान् प्रपन्नान् कल्पेकल्पेजायमानस्वमूर्त्या ।

देवाहि यं न पश्यन्ति दिव्यं तेजोमयं पदम् । अत्यर्कानलदीप्तं तत् स्थानं विष्णोर्महात्मनः ॥

स्वयैव प्रभयाराजन् दुष्प्रेक्ष्यं देवदानवैः ।

इत्यादि श्रुतिस्मृतिभिस्तत्सिद्धिः । सा चविभूतिरधः प्रदेशेनावच्छिन्ना । ऊर्ध्वप्रदेशानवच्छिन्ना च । आनन्त्यतमः परत्वयोः श्रुतयोश्चर्जनीयत्वात् । आनन्त्यमात्रसाम्येऽप्यनन्तत्रिगुणादपीयमधिकतरा । पादोऽस्य विश्वाभूतानित्रिपादस्यामृतं दिवीतिश्रुत्या न्यूनाधिकभाव प्रतिपादनात् । अनन्तत्वेऽपि यथाद्रव्यपृथिवीघटादीनां संवत्सरमासपक्षदिनलवादीनां च न्यूनाधिकभावः । तथा - देशेऽप्यादित्यादूर्ध्वमपि गगनदेशोऽनन्तो भूमण्डलादनन्तरः । पाताळादनन्ततम इतिन्यूनाधिकभावदर्शनात् ।

यद्यपिपादोऽस्येत्यनेनतत्स्थवस्तूनामेवन्यूनाधिकभावः प्रतीयते । तथापि तेषांन्यूनाधिकभावेतदधिकरणदेशन्यूनाधिकभावोऽर्थसिद्धोभवति । स च समचतुर्भागाभिप्रायः । बुद्धयर्थः पादवदित्युक्तत्वात् अचेतनाचेयं जीवेश्वरकोटि विलक्षणत्वात् । अथापिस्वयं प्रकाशा ।

तत्रानन्दमया भोगा लोकाश्चानन्दलक्षणाः । आनन्दं नामतल्लोकं परमानन्दलक्षणम् ॥

तयोर्नौपरमव्योमन् निर्द्वन्द्वं सुखमुत्तमम् । षाड्गुण्यप्रसरो नित्यः स्वाच्छन्द्याद्देशतांगतः ॥

इत्यादिप्रमाणबलात् । तथाकिमात्मकैषाभगवतोव्यक्तिरिति प्रश्नेयदात्मकोभगवानिति सामान्यतः उत्तरेकृते पुनः किमात्मको भगवानितिप्रश्ने ज्ञानात्मक इत्युत्तरमुक्तम् । श्रुतौव्यक्तिश्शरीरमित्यर्थ अतोदिव्यमङ्गळविग्रहस्य ज्ञानात्मकत्वात् तद्द्रव्यात्मिकायास्सर्वस्या नित्यविभूतेर्ज्ञानात्मकत्वमुचितम् । ज्ञानात्मकत्वमत्रस्वय प्रकाशत्वमेव । तच्चस्वगोचरज्ञाननिरपेक्षप्रकाशाश्रयत्वं - तदेव ज्ञानपदप्रवृत्तिनिमित्तम् । तेन निमित्तेनात्मनोनित्यविभूतावपिज्ञानपदं मुख्यमेव । ज्ञानत्वेऽप्यात्मवदस्यानिर्विषयकत्वाकर्तृकत्वेयुक्के परस्मैभासमानत्वाच्चधर्मभूतज्ञानवत् पराक्त्वम् ।

ननुनित्यविभूतेः स्वयं प्रकाशत्वे संसारिणां शास्त्रनिरपेक्षंतत्प्रकाशप्रसङ्ग इतिचेन्न सर्वात्मनां स्वरूपस्य स्वयं प्रकाशत्वेऽपि निखिलधर्मभूतज्ञानानामपिस्वयं प्रकाशत्वे चात्मस्वरूपं स्वस्मै स्वयं प्रकाशते । नान्यस्मै । धर्मभूतज्ञानमपिस्वाश्रयायैव प्रकाशते । नान्यस्मै प्रकाशत इतिवन्नित्यविभूतिरपि नित्यमुक्तेश्वरेभ्यः प्रकाशते । न संसारिणामितिनियमेबाधकाभावात् । अथस्वगोचरज्ञान विगमदशायां प्रकाशमानत्वं यस्य तदेवतस्यस्वयं प्रकाशत्वम् । यथा सुषुप्तावात्मगोचरज्ञानाभावेऽप्यहमहमितिधर्मिस्फुरणादात्मनः स्वयंप्रकाशत्वम् । तथानित्यविभूतेस्स्वयं प्रकाशत्वंवक्तव्यम् । तच्च न संभवति बद्धान् प्रतिनित्यविभूतेः स्वयमप्रकाशात् । नित्यमुक्तेश्वराणां निरङ्कुशसर्वसाक्षात्कारवतां तद्गोचरज्ञानविरहासम्भवात् । न तान् प्रत्यपिस्वयं प्रकाशत्वम् । अतस्तस्याः कथं स्वयं प्रकाशत्वमितिचेदुच्यते । न तावत् स्वगोचरज्ञानविगमदशायां प्रकाशमानत्वं स्वयं प्रकाशत्वम् । तथासति दिव्यात्मस्वरूपस्यदिव्यमङ्गळ विग्रहस्य नित्यानां स्वरूपस्य च

स्वयं प्रकाशत्वं न स्यात्। तत्रापि बद्धानां तदप्रकाशात्। नित्येश्वराणां तद्गोचरज्ञान विगमा भावात्। किन्तुस्वगोचरज्ञानतत्वनिरपेक्ष प्रकाशमानत्वमित्युक्तम्। तच्चदिव्यात्मस्वरूपादौवर्तते। तन्नित्यविभूतावपि तुल्यम्।

ननु तथापि बद्धान् प्रतियदाकदाचिदपिवा नित्यविभूतिः कुतोन प्रकाशत इचिचेन्न विषयप्रकाशन विरहकालेधर्मभूतज्ञानवृत्तिस्वयम्प्रकाशनशक्तेः प्रतिबन्धबद्धदशायांनित्यविभूति वृत्तिस्वयं प्रकाशत्वशक्तेः प्रतिबन्धात्। अतो बन्धरहितानां मतिविभवे सत्यप्येषां ननिरपेक्षात्मस्वरूपवत्स्वयं प्रकाशत इतिसिद्धम्। नित्यविभूतेर्निरतिशयदीप्तियोगात् स्वयम्प्रकाशत्ववादः, ज्ञानावारकत्वाभावादेश्च ज्ञानत्वव्यपदेशः, अत्यन्तानुकूलरूपरसगन्धादियोगादानन्दसुखादिव्यपदेश इतिकेषांचित् कल्पनम्। पूर्वोक्तभगवच्छास्त्रवचनार्थसारस्यानभिज्ञताकृतमिति तन्नश्रद्धेयमिति प्रामाणिका आहुः। किञ्च जीवेश्वरादिष्वपेस्वयं प्रकाशानादिव्यपदेशानामुक्तरीत्या गौणत्वसम्भवेन तत्रापि ज्ञानादिशब्दानां अमुख्यत्वमितिकल्पयितुं शक्यत्वाच्च। अतः पूर्वोक्त एव प्रामाणिकार्थ इति वक्तव्यम्।

नन्वयं प्रकाशः स्वविषयबुद्धिधर्मोवा उत धर्मोवा। पूर्वत्र स्वप्रकाशत्वहानिः। उत्तरत्रानादिरागन्तुकोवा। आद्येबद्धान् प्रत्यपिभानप्रसङ्गः, द्वितीये कारणानिरूपणादसम्भव इति चेन्मैवम्। न ह्यागन्तुकानां सर्वेषां विशेषकारणमस्माभिर्विविच्यते। नचास्मदविवेचितत्वेकारणं नास्तीतिवक्तुं शक्यम्। विशुद्धादेराकस्मिकत्वप्रसङ्गात्। सामान्यकारणं तु विश्वकर्तुरिच्छादिकं श्रुतमेव। अत एव हि नित्यानां मुक्तानां च स्वच्छन्दविकीर्षासन्तति भेदसिद्धिरिति। इयं च पञ्चोपनिषत्प्रतिपाद्यपञ्चभूतेन्द्रियमयी नित्यमुक्तेश्वराणामिच्छानुरूपशरीरेन्द्रियप्राणविषयरूपेणावतिष्ठते। त्रिगुणत्वदेयमपिचतुर्विंशतित्वात्मिकेति केचित्। तथाऽपि न तत्त्वानां प्रकृतिविकृतिभावः। दिव्यमङ्गळविग्रहादेर्नित्यत्वश्रवणादप्राकृतानामपि महदादीनां सद्भावः आकाशादिवत्। नह्याकाशाद्युपादानकावाद्यवयवादयः। तत्र च शरीरादीनां संस्थानानि प्रायशः प्राकृततुल्यानि। शुभाश्रयाणां शरीरादीनां पुण्यादिमत्वश्रवणात्। तत्रेन्द्रियसद्भावसिद्धिः। चक्षुरादिशब्दानां च प्रयुक्तानां गोळकादावमुख्यत्वात्। इन्द्रियच्छिद्रविधुरा द्योतमानाश्च सर्वशः।

इत्यादिवचनमुत्सर्गापवादनयेनकर्मकृतेन्द्रिय प्रतिक्षेपपरम्। अशरीरं वावसन्तमित्यादौ कर्मकृत शरीरादि प्रतिषेधवदभावं बादरिरित्यधिकरणेमुक्तस्य देहेन्द्रियाणि सन्तीति चिन्तितत्वात भूतेन्द्रियतत्फलसद्भावो भाष्यकारैरेव सूचितः। भट्टपराशरादैरीश्वरादीनां मनस्सद्भावोऽपिदर्शितः मनसैतान् पश्यन् रमते मनसोऽस्यदिव्यं चक्षुः सोन्यं कामं मनसाध्यायीत मनसैव जगत् सृष्टम्। एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिचेत्येवमादि प्रमाणात्। विषयाश्चास्त्र भूषणायुधासन-

परिवारायतनोद्यानवापीकूपतटाककीडापर्वतादयोऽपि विचित्रा नित्याः केचन कृतकाः पदार्थाः केचननित्याश्च सन्तिहि। तत्रापि तरुषु पल्लवकुसुमफलादयः परिणामाः। नदीषु फेनतरङ्गबुद्बुदादयः विग्रहे च व्यूहविभवादयः। कालकृतपरिणाम मात्रं हि तेषुनिषेध्यम्। ननु भगवत्सङ्कल्पमात्रकृतमपि। एव शरीराण्यपि कानिचिन्नित्यानामीश्वरस्य च नित्येच्छापरिग्रहान्नित्यानि। मुक्तानां तु कृतकान्येव। तेहि कदाचिदशरीराः कदाचित् सशरीरा इति भाष्ये प्रदर्शितम्।

इन्द्रियाणि सर्वाण्यपि नित्यानि तत्रत्यव्योमादिवत् उपादान निरपेक्षत्वात्। कानिचिन्नित्यैरीश्वरेण च परिगृहीतानि। कानिचित् कदाचित परिगृहीतानि मुक्तैस्तत्परिग्रहः कादाचित्क एव। शरीरवन्नित्यमुक्तानां शरीरादिपरिग्रहो भगवदमिमनकैङ्कर्यरूपभोगाय। भगवतोऽपि तत्परिग्रहः स्वभोगाय स्वशेषभूतनित्यमुक्तानन्दाय मुमुक्षूपास्यत्वसिद्धये च। सच परिग्रहः भगवतः स्वसङ्कल्पादेव। नित्यमुक्तानां तु कदाचित् परमपुरुष सङ्कल्पात् कदाचित् परमपुरुष सङ्कल्पानुविधायि स्वसङ्कल्पाच्च। ननुनित्यस्यैकस्यैव ज्ञानस्य संसारदशायां कर्मणा सङ्कोचविकासभेदात् सुखदुःखेच्छ द्वेषादिरूपावस्थाभेद उपपन्नः। विषाकदशापन्नजीवकर्मसहकारितारतम्यात् ईश्वरस्य विषमत्रिगुणपरिणामहेतु सङ्कल्पारपन्तुनाम। अप्राकृतविचित्रदेहादिपरिणामेषु कर्मकाल द्युपाधिविधुराणां सङ्कोचविकासरहित समस्तवस्तुगोचरज्ञानानां नित्यमुक्तेश्वराणां कथ क्रादाचित्केच्छासङ्कल्पतत्कृतानन्दादि ज्ञानावस्थाविशेषाघटन्ते।

उच्यते; सर्वज्ञसंविदः कर्माद्युपाध्यभावेऽपिक्रमश ऐच्छिकोल्लेखभेदारपन्त्येव। अन्यथाभूतकार्येषु भूतत्वस्य वर्तमानकार्येषुवर्तमानत्वस्यभविष्यत्कार्येषु भविष्यत्वस्य चाग्रहणे भ्रान्तित्व प्रसङ्गत् अत आगन्तुकोल्लेख भेदाश्चसर्वज्ञसंविदि ऐच्छिका आवश्यकाः। एवं मुक्तानां नित्यानामपीच्छासंकल्प भोगादिरपीश्वरेच्छाविशेषत् भवति। तथाऽप्राकृतविचित्रार्थसिसृक्षाऽपि प्रवाहानादित्वात उपपन्ना। इच्छासङ्कल्पसृष्ट्यादयश्चोत्तरोत्तरभोगाय ऐच्छिकाः प्रवर्तन्ते। अतस्सिद्धं नित्यानित्य भेदादीश्वरादेर्नित्यानित्यशरीरादिमत्त्वम् ईश्वरशरीरे च सूक्ष्मव्यूहविभवादि भेदाः श्रीमत्पाञ्चरात्रादिभिः प्रपञ्चिता अवगन्तव्याः। संग्रहस्तु सूक्ष्मं केवलं षाड्गुण्यविग्रहं वासुदेवाख्यं परब्रह्मपूर्वोक्तम्। परस्मिन्नेवशान्तोदितनित्योदितविभागोऽपि भाव्यः। नित्योदितात् संबभूव तथा शान्तोदितोहरिरित्युक्त प्रकारेण मुक्तानुभाव्य नित्योदित संज्ञकपरवासुदेवोत्पन्नश्शान्तोदितसंज्ञकः व्यूहत्रयहेतुभूतो वासुदेवः। तेन चतुर्व्यूहत्रिव्यूहपक्षावपि न विरुद्धौ। परवासुदेवव्यूहवासुदेवयोरभेदेत्रिव्यूहः। भेदाश्रयणेन शान्तोदितवासुदेवस्य व्यूहघटनेचतुर्व्यूहः। अयं पक्षः,

गुणैष्षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तवबभौ ततस्तिस्रस्तेषां त्रियुगयुगळैर्हित्रिभिरभूः ।
व्यवस्थायाश्चैषां त्वं ननुवरदसाविष्कृतिवशात् भवान् सर्वत्रैवत्वगणित महामङ्गळगुणः ॥

इतिश्लोकेन संगृहीतः ।

षाड्गुण्याद्वासुदेवः पर इति भगवान् मुक्तभोग्यबलाढ्यात्
बोधात्सङ्कर्षणस्त्व हरसिविततुषे शास्त्रमैश्वर्यवीर्यात् ।
प्रद्युम्नस्सर्गधर्मौ नयसि च भगवान् शक्तितेजोनिरुद्धो
बिभ्राणः पासि तत्वं गमयसि च तथा व्यूह्य रङ्गाधिराज ॥

इति श्लोकेन त्रिव्यूहपक्षस्संगृहीतः ; वासुदेवसङ्कर्षण प्रद्युम्नानिरूद्धरूपोव्यूह उत्तरोत्तरः पूर्व पूर्वकारणकः । तत्रवासुदेवेज्ञानादिगुणाष्पड्व्याविर्भूताः । सङ्कर्षणादिषु त्रिषुशास्त्रप्रवर्तन महाराद्यौपयिक गुणद्वन्द्वत्रयोन्मेषः सामपीतरेषां गुणानामनाविष्कारः ।

तत्रज्ञानबलाद्विद्यात् रूपं सङ्कर्षण हरेः । शास्त्रप्रवर्तनं चापि संहारं चैव देहिनाम् ॥

बलेनहरते लोकं स्वगुणेनतथा मुने । ज्ञानेन तनुते शास्त्रं सर्वसिद्धान्तगोचरम् ॥

बलज्ञानेगुणौ तस्यस्फुटौ कार्यवशान्मुने । इति सङ्कर्षणस्य

ऐश्वर्यवीर्यसंभेदाद्रूपं प्राद्युम्नमुच्यते । गुण वैश्वर्यवीर्याख्यौ स्फुटौतस्यविशेषतः ॥

ऐश्वर्येणगुणेनासौ सृजते तच्चराचरम् वीर्येण सर्वकर्माणि प्रवर्तयति सर्वशः ॥ इति

प्रद्युम्नस्य-शक्तिस्तेजस्समुत्कर्षादनिरुद्धतनुर्हरेः । शक्तितेजो गुणौतस्यस्फुटौकार्यवशान्मुने ॥

शक्त्याजगदिदं सर्वं सब्रह्माण्डं निरन्तरम् । विभर्ति पाति च हरिर्मणिसानुरिवाणुकम् ॥

तेजसानिखिलं तत्वं ज्ञापयत्यात्मनोमुने ॥

इत्यनिरुद्धस्य च गुणकार्य प्रकारोऽनुसन्धेयः । ननुवासुदेवसङ्कर्षणादिव्यूहावतार इत्युक्तम् । तत्रसंभवति वासुदेवात् सङ्कर्षणोनाम जीवोजायते । सङ्कर्षणात् प्रद्युम्नसंज्ञकं मनोजायते । तन्मनसोऽनिरुद्धाख्योऽहङ्कारो जायते । इति पाञ्चरात्रे उक्तत्वादितिचेन्मैवम् । अत्रहि जीवमनोऽहङ्कारशब्दाः जीवमनोऽहङ्काराभिमानिरूपान् सङ्कर्षणप्रद्युम्नानिरुद्धनामकान् भगवद्व्यूहभेदानेव कथयन्ति तेषांतु जननं प्रादुर्भाव एव । अतानविरोधः । न चजीवादि शब्दैस्सङ्कर्षणादीनां व्यत्ययेनाभिधानमापस्यादतिवाच्यम् । सङ्कर्षणो जीवमेवाभिमनुते, प्रद्युम्नोमनस्तमेवानिरुद्धोऽहङ्कारमेवाभिमनुते । इतिनियमात् एषां च प्रत्येकमवन्तरावतारा अनन्ताः । श्रीमान्

दिषुवेदितव्याः । मत्स्यादयोविभवभेदाः । स्वयंव्यक्तदेवार्षादयस्त्वर्चावतार भेदाः । दैवादिष्वपि विशिष्टप्रतिष्ठानन्तरं प्रसादोन्मुखेश्वरसङ्कल्पाधीनमप्राकृतत्वमनुसन्धेयम् । प्राकृता प्राकृतसंसर्गोऽपि नानुपपन्नः । अन्यथा प्राकृतलोकेषु भगवदवतारः परमपदेऽर्चिरादिमार्गेण सूक्ष्मशरीरकस्यवैदिक पुत्रादेर्वा गमनं कथं घटेरन् ? सर्वप्रपञ्चव्यापि भगवद्विग्रहातिरिक्ततत्तद्धृदयपद्मकर्णिकामध्यवर्ति सूक्ष्मरूप्यन्तर्याम्यवतारः । दिव्यात्मस्वरूपस्येव विग्रहस्यापि विचित्राव्याप्तिशक्तित्वयैवधर्मिग्राहक सिद्धया विपरीततर्काणां प्रतिक्षेपः । श्रीमद्गीतायामेकादशाध्याये विग्रहस्य व्यापकत्वादिकं व्यक्त-मेव भाष्यकारैः प्रतिपादितम् ।

इहैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा । अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥

इत्यत्र पृथिव्यन्तरिक्षस्वर्गपातालं वितलसुतलादिभोगोपकरणभोगस्थानभिन्नं प्रकृति पुरुषात्मकं कृत्स्नं जगत् इहैकस्थमेतद्विग्रहैकदेशस्थमित्युक्तम् । तथा,

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम । देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥

इति ममेदं सर्वप्रशासने चस्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद्दृष्टवानसि तत् सुदुर्दर्शं न केनापिद्रष्टुं शक्यमित्याद्युक्तम् तथाच शुद्धसत्वस्याधः प्रदेशपरिच्छेदकथनमेतद्विग्रहविशेषव्य-निरिक्तविषयं द्रष्टव्यम् । भगवता पराशरेणाप्युक्तम् ।

समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥

इति सर्वेष्वेतेषु भगवद्विग्रेषु सांसारिक फलप्रदान एव शैघ्र्यमान्द्यादितारतम्यम् ।

निःश्रेयसफलं तुव्यापकानुसन्धायिनां सर्वत्र हस्तापचेयम् । यच्चविभवार्चनाद्व्यूहं प्राप्येति

यच्चार्योपासनक्षीणे कलुषेऽधिकृताभवेत् । विभवोपासने पश्चात् व्यूहोपास्तौततः परम् ॥

तत्सूक्ष्मेननु शक्तस्यादन्तर्यामिणमीक्षितुम् । इत्यादि प्रमाणं तद्व्यापकानुसन्धान-विधुराधिकारि विशेषविषयमिति मन्तव्यम् ।

इति नित्यविभूतिपरिच्छेदः ॥

शुभमस्तु

॥ श्रीः ॥

No 1 9 5

श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥

बुद्धि परिच्छेदः ।

अथमतिर्निरूप्यते । सकर्मकावभासत्वं सकर्तृकावभासत्वं वा तल्लक्षणम् । आत्मन्यति याप्तिवारणाय सकर्मकेति । सकर्मकत्व च स्वान्यसंयुक्त प्रकाशकत्वं स्वान्य-प्रत्यक्त्वैकत्वादि-प्रकाशकेधर्मिण्यतिव्याप्तिवारणाय संयुक्तेति । प्रत्यक्त्वादीनामद्रव्यत्वेन संयुक्तत्वाभावात् स्वात्मकसंयुक्त प्रकाशकेधर्मिण्यतिव्याप्तिवारणाय स्वान्येति । एवं सकर्तृकत्वमपिस्वाश्रयविषय-कत्वम् । तेन कर्तृभूतस्वविषयके धर्मिणिनातिव्याप्तिः । एषा स्वतस्सिद्धा । विषयेन्द्रियसंयोगा-नन्तरं घटमहं वेद्मीते सर्वेषामनुभवात् । ननुविषयेन्द्रिय संयोगानन्तरं अयं घट इति ज्ञानं जायते । ततोघटमह जानामीत्यनुव्यवसायस्तेन पूर्वज्ञानप्रकाश इति चेन्न । इन्द्रियसंयोगानन्तरं घटमहं वेद्मीत्येव सर्वेषामनुभवात् । व्यवसायस्यैवासिद्धेः । परप्रकाश्यानुव्यवसायेन व्यवसाय प्रकाशासम्भवात् । स्वरूपेऽपीतिन्यायात् । विप्रतिपन्न ज्ञानं मानस प्रत्यक्षत्वेद्यं आत्मविशेष-गुणत्वात् सुखादिवदित्यानुमानमपिधर्माधर्मयोर्व्यभिचरित्वादुपेक्ष्यम् । सुखस्य ज्ञानावस्था-विशेषस्य दृष्टान्तासद्धिश्च एव मानसागोचरजीवनयोनियत्ने व्यभिचाराच्च । किञ्च घटादिनिष्ठ धारावाहिक प्रत्यक्षानन्तरमेतावन्तं कालमिममर्थमद्राक्षमिति परामर्शात्तेषां प्रत्यक्षत्वं वाच्यम् । न च तत्तदनुव्यवसायेन चेद्धारावाहिकत्वभङ्गः । विजातीयानुव्यवसायेनव्यवधानात् ।

न च धारानन्तरजातानुव्यवसायेन धारावाहिकज्ञानसन्ततीनां प्रत्यक्षत्वमितिवाच्यम् । तदानीं धारावाहिकज्ञानानां विनाशेन विषयाभावात् । प्रत्यक्षेविषयस्यवर्तमानत्वेन हेतुत्वात् । न च चरमव्यक्तेव प्रत्यक्षत्वमितरेषामनुमेयत्वमितिवाच्यम् । एतावन्तं कालमिममर्थमद्राक्ष-मित्यनुभवेन तेषामनुमेयत्वासम्भवात् । न च धारावाहिकविज्ञानानामैक्यमितिवाच्यम् । अपे-क्षाबुद्धिभेदज्ञानाद्विक्षणवृत्तित्वमपेक्षाबुद्धेश्चत्रिक्षणवृत्तत्वमिति युष्मत्सिद्धान्तविरोधप्रसङ्गात् । अतोधारावाहिकधीरुक्तिःस्वेनैव प्रकाशत इत्यङ्गीकार्यम्युपगन्तव्यम् । एवमीश्वरज्ञानमेक कृत्स्नविषयकामतिर्वास्तुद्धान्तः । तत्र स्वज्ञानमीश्वरो जानाति वा न वा । आद्ये ज्ञानान्तरा भावेन स्वेनैव प्रकाशानुपपत्तिभावेन तस्य स्वयं प्रकाशत्वासिद्धिः । द्वितीये तस्य सर्वज्ञत्वहानिः । किञ्च स्वज्ञानज्ञानतत्तेनस्य तदाधारत्व, अन्येषां तदाधारत्व, अन्यदीयज्ञानस्य कतिपयविषय-कता, स्वीयज्ञानस्य सर्वविषयकेत्वमित्यादिस्वज्ञानविशेषाश्चदुर्ग्रहाः स्युरिति अनन्ताज्ञानस्याप्या-श्रयत्वेन तस्यानीश्वरत्वप्रसङ्गश्च ।

किञ्च ज्ञानमस्तीतिविज्ञानं स्वात्मानं साधयति नवा। पूर्वत्र स्वप्रकाशत्वम्। उत्तरत्र सर्वासिद्धि प्रसङ्गः, तथाहि, निखिलज्ञानास्तित्वज्ञानस्यस्वात्मविषयकत्व भावेऽनिश्चितेसत्ताकस्यतस्य ज्ञानस्यासत्व प्रसङ्गेनतद्विषयस्य सर्वज्ञानास्तित्वस्य प्यसत्वेनज्ञानासत्वे ज्ञेयासत्व प्रसङ्गेन सर्वासत्वप्रसङ्ग इति। यथाहुराचार्याः।

स्वधीविशेषसर्वज्ञोऽप्यध्यक्षमतिवानवा आद्येसिद्धास्ततस्तिद्विरन्यत्रासर्ववेदिता॥

ज्ञानमस्तीतिविज्ञान स्वात्मान साधयेन्नवा। पूर्वत्रस्वप्रकाशत्वं सर्वासिद्धिरतोऽन्यथा इति।

एवमनुमानान्यपिस्वप्रकाशत्वसाधकानि। तथा हि, विमता मतिःस्वयं सिद्धा धीत्वात् सर्वज्ञधीवत्। एव बुद्धिरस्तीति बुद्धिः स्वात्मविषयिणी बुद्धित्वसामान्याश्रयसर्वबुद्ध्यन्यत्व प्रकाशकत्वात्। शब्दशब्दवत्। बुद्धिलक्षणधर्मिं लक्ष्य भूतकृत्स्नबुद्ध्यन्यत्वसाधारणधर्मविषयामती तद्योगेनस्वात्मानमपिविषयीकरोति। एवं विप्रतिपन्नाबुद्धिःस्वगतव्यवहारं प्रतिस्वाधीनकिञ्चित्कारे सजातीयसम्बन्धानपेक्षा। व्यवहारहेतुत्वात्। अर्थेन्द्रियदीपादिवदित्यादीनि। ननुङ्गुळ्यग्रं न स्वात्मानं स्पृशति न कुठारः स्वात्मानं भिनत्ति। न वह्निः स्वात्मानं दहति। तद्वद्बुद्धिरपि स्वात्मानं न विषयीकरोतीति बुद्धेर्नस्वय प्रकाशत्वमितिचेन्न। पूर्वोक्तदीपादि दृष्टान्तवत् स्वपरनिर्वाहकत्वमभ्युपगम्यात्। यथा विशेषः स्वयमेव व्यावृत्त इतरेषां व्यावर्तकश्च भवद्भिरभ्युपगम्यते यथाचात्मा ग्राह्यः ग्राहकश्च। यथा च प्रत्यक्षे विषयस्वगोचरबोधजनकाबोधश्च। एवं यथा दर्शनं बुद्धरपिस्वय प्रकाशमती स्वान्यप्रकाशजनिकेतिधियः स्वयं प्रकाशायती स्वान्यप्रकाशजनिकेतिधियः स्वयं प्रकाशत्व सिद्धम्। केचित्तु बुद्धेः स्वयं प्रकाशत्वं वर्तत एव। तच्च स्वेतरवेद्यत्वे सतिस्ववेद्यत्वरूपं, ततश्च स्वेतर वेद्यत्वेऽनुभूतेर्घटादिवज्जडत्व प्रसङ्ग इत्याहुः तदसत्

स्वसिद्ध नस्त्वद्वचनविरोध प्रसङ्गात्। तथाहि, अनुभूतेर्जडत्ववादिनं प्रत्यनुभूतिरनन्याधीनस्वधर्मव्यवहारास्पदस्वसम्बन्धाद्धर्मान्तरे स्वधर्मव्यवहारहेतुत्वादित्यनुमानेनस्वयं प्रकाशत्वं साध्यतेतैः। तत्रानुभूतेरवेद्यत्वेनानुभवेद्यत्वेन वा, एतदनुभवेद्यत्वेन किञ्चिदपिसाधनमित्यनुभूतेः स्वय प्रकाशत्वसिद्धिः। अनुभूतिरूपब्रह्मणश्शास्त्रवेद्यत्वविरोधश्च। अनुभूतिर्वेद्येतिप्रतिज्ञयाऽनुभूतिसामृद्धस्तस्या अवेद्यत्वसाधन जननी मे वन्ध्येतिवद्व्याहतार्थत्वम्। परबुद्धयश्च तत्तत्प्रवृत्त्यादिभिरनुमीयन्ते स्वबुद्धिं च भविष्यन्तीमनुमाय शृणोति। एवमाचार्य ज्ञानमनुमायशिष्यः श्रवणे प्रवर्तते आचार्योऽपि पूर्वोपदिष्टार्थकर्तयक्त शिष्येणपरिज्ञात इति जानन्नेवोत्तरोत्तरमुपदिशति एव यदि प्रतिवादिनोऽपि मिथोबुद्धिं बुद्ध्यमाना एव विवादं कुर्वन्ति। एतत् सर्वमनुभूतेरवेद्यत्वे कथं घटत इति सङ्क्षेपः।

अत्रेदमवधेयम्। धर्मी धर्मश्च ज्ञानस्वरूपः। ज्ञानस्वरूपत्वादेवस्वप्रकाशः विशिष्ट विषयश्च। तत्र धर्मी प्रत्यक्त्वानुकूलत्वैकत्व विशिष्टस्वरूप प्रकाशरूपः। धर्मस्तुस्वस्वापृथक्सिद्ध धर्मवर्गघटादिद्रव्यतत्समवेतवर्ग तत्तत्सम्बन्धानां प्रकाशरूपः। धर्मिप्रकाशस्तु सर्वकालिकः। अहमहमिति सर्वदा सर्वेषां स्वेनैव प्रकाशमानत्वात्। धर्मस्य तु कादाचित्कमेवेदं प्रकाशत्वं घटमहं जानामि पटमहं संवेद्मीतिघटादिविषय प्रकाशसंवेदनायामेव धर्मभूज्ञानस्य प्रकाशमानत्वात् एवं पुरुषविशेषनियतं च, स्वाश्रयं प्रत्येव प्रकाशमानत्वात्; अन्यं प्रत्यन्यज्ञानस्यानुमानादिवेद्यत्वात्। एवं च घटचक्षुस्संयोगानन्तरं जायमानो घटमहं जानामीत्यनुभवः स्वविषयकं घटं तद्वृत्तिघटत्वादिकं स्वस्वरूपं स्ववृत्तिज्ञानत्वादिकं स्वाश्रयमात्मानं च प्रकाशयतीति। कौमारिलास्तु न स्वय प्रकाशाबुद्धिः नापि मानसप्रत्यक्षगोचरा। किन्तुस्वफलेन विषयगत प्राकट्ये नानुमीयते। प्राकट्यं च विषयगत ज्ञानतैव।

तथा हि, घटचक्षुस्संयोगानन्तरं घट इति ज्ञानं यज्जायते तदतीन्द्रियम्। तेन घटे ज्ञातता जायते। ततो घटोमयाज्ञात इति ज्ञातता प्रत्यक्षः तया तज्जनक ज्ञानमनुमीयते तत्प्रकारः इयं च ज्ञाततापटविशेष्यकघट प्रकारकज्ञानजन्य घटवृत्तिघटत्व प्रकारज्ञाततात्वात्। यद्वृत्तित्वप्रकारिकाज्ञातता सातद्विशेष्यकतत्प्रकारकज्ञानसाध्या। यथा घटत्वप्रकारकज्ञानतेत्यनुमानेन ज्ञानप्रकाश इत्यहुः। तदपत्। अर्थप्रकाशस्यैव प्राकट्य स्वरूपतया बुद्धेरप्यर्थ प्रकाशरूपत्व च साध्य हेत्वोरविशेषात्। यद्यर्थ प्रकाशोलिङ्गम्। पुरुषगत प्रकाशस्साध्यः। अतो नोक्तदोष इत्युच्यते। तदा पुरुषगत प्रकाशात्मकबुद्धिजनकत्वेनाभिमतसामग्येवलाघवादर्थगत प्रकाशहेतुरितिकल्पनां मध्येबुद्धिकल्पनावृथा। तथा च बुद्धेर्नित्यानुपेयत्वेबुद्धित्वापलाप प्रसङ्ग इतिबोध्यम्। नैयायिकैरीश्वरज्ञानमेव नित्यं जीवज्ञानान्यनित्यानीत्युच्यन्ते तदसत्। न विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यत इतिश्रुतिविरोधात् न चेयं श्रुतिरीश्वरज्ञान विषया। प्रकरणवैषम्यात्। न च धीप्रवाहाविच्छेदपरा। सुषुप्त्यादौतद्विच्छेदस्य युष्माभिरभ्युपगतत्वात् न चार्थगतविज्ञानजनक शक्तिनित्यत्वपरा। मुख्ये संभवतिगौणार्थकल्पनायोगात्। नापरात्मस्वरूपनित्यत्वपरा, विज्ञातुर्विज्ञातेरितिव्यतिरेकनिर्देशवैयर्थ्यात्।

न च विज्ञातेरित्यस्य विज्ञातरि सामानाधिकरण्येनान्वयादात्मनित्यत्वबोधकत्वमेव श्रुतिरिति वाच्यम्। न विज्ञातुर्लोपो विद्यत इत्येतावतैव तल्लाभेन विज्ञातेरित्यस्य वैयर्थ्यापत्तेः। अतो जीवबुद्धेरपि स्वाभाविकत्वपरेयं श्रुतिः। उपबृंहणेनाप्येतत् सिद्ध्यति। तदाह भगवान् शौनकः।

यथा न क्रियतेज्योत्स्नामलप्रक्षालनान्मणेः। दोषप्रहाणाज्ज्ञानमात्मनः क्रियते तथा॥

यथोदपानकरणात् क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसत्तस्मन्मतः कुतः ॥

तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनोहि ते ॥ इति ।

एवं तर्हि प्रतिपुरुषं स्मृत्यनुभवप्रत्यक्षपरोक्षभेदेन दर्शनादिभेदेन च सर्वलोकविदितोधी-भेदः कथं निर्वाह्यत इति चेदिन्द्रियलिङ्गादिसामग्रीभेदाधीन प्रमरणभेदेनधीभेदोपपत्तेः । प्रसरणं च ज्ञानस्यावस्थाविशेषः सचेन्द्रियादिसामग्र्यधीन इतिवक्ष्यते । ननु सुषुप्त्यादिषुस्वतो-ऽन्यतो बुद्धेरुपलम्भाभावेन नित्यत्व श्रुतिरादित्यवदूयूपरागतिवदन्य परास्यादितिचेन्न तदानीं विषय प्रकाशनरहिताया बुद्धेस्सत्वेऽपितस्या अयोग्यत्वेनोपलम्भाभावात् । विषयप्रकाशनदशायामेव हिधीरुपलभ्यते । तथा च सुषुप्तौ विषय प्रकाशरहिताया बुद्धेस्सत्वेऽप्ययोग्यत्वादुपलम्भाभावः ननु विषयाभावादतस्तन्नित्यत्व श्रुतेर्नान्यपरत्वम् । आदित्योयूप इत्यत्रतु यूपादित्य भेदग्रहिप्रत्य-क्षेणविषयापहारादन्य परत्वम् । अतः क्षेत्रबुद्धयोऽपि नित्याः । तेषामुत्पत्यादिव्यवहारस्तु प्रमाणा धीनः । अयमर्थः तमिममिन्द्रियद्वाराप्रसरणमपेक्ष्य उदयास्तमयव्यपदेश इति श्रीभाष्येऽनुगृहीतः ।

अद्वैतिनस्संविदैक्यमनुमानेनसाधयन्ति । तद्यथा संविन्न नाना अनुत्पन्नत्वात् । अविनष्टत्वाद्वा । यन्नानातदुत्पन्न विनष्ट च, यथा घट दि इति । तदनुपपन्नम् अत्र संविदि किं परमार्थभेदः निषिध्यते उतापरमार्थभेदः । प्रथमे घटादौ परमार्थभेद नभ्युपगमेन दृष्टान्तासिद्धिः द्वितीये संविद्यपरमार्थभेदनिषेधेऽपि परमार्थ भेदस्सुथ इति अस्मदिष्टसिद्धेः । आत्मावाऽरेद्रष्टव्यः श्रोतव्यो मन्तव्यो निधिध्यासितव्यः । एषहिद्रष्टा श्रोता मन्ता विज्ञाता घाता इत्यादिभिस्संविद्भेदग्रहि श्रुतिभिर्बाधः । घटज्ञानं मेजात तन्नष्टमित्यादिभिस्संविदुत्पत्तिविनाशयोः प्रत्यक्षसिद्धत्वाद्धेतोः स्वरूपासिद्धिः । किंचानुत्पन्नत्वं प्रागभावेऽप्यस्तीति नाशरहितत्वं च ध्वंसे । समुदितत्वरूपानु-त्पन्नस्वस्यहेतुत्वोक्तावत्यन्ताभावेऽप्यस्तीति व्यभिचारः । सद्यनादिर्नाशरहितश्च । एवं संविद्भेदा भ्युपगमे जडपण्डित शिष्याचार्यवादि प्रतिवादिव्यवस्थापि भज्येत । ततश्च पुरुषभेदनियतस्सलोकप्रतिपन्न बुद्धिभेदापलापः प्रसजेत् ।

एवं संविद्भेदनिषेधकाः भेदादयोधर्मा न संविदिवर्तन्तेदृश्यत्व दूरवदित्यनुमानान्ताः मुक्तं तदप्यपेशलम् । भेदादय इत्यादिपदेन नित्यत्वस्वयं प्रकाशत्वादि धर्मा अपिसंगृह्यन्ते नवा । नचैतेषां संविदवृत्तत्वरूपसाध्य विरहिणां दृश्यत्वहेतुत्वात्तत्रव्यभिचारः । संगृहीताश्चेन्नित्य-त्व स्वयं प्रकाशत्वादीनां संविदवृत्तित्वेन सौगतवैशेषिक मत प्रवेशस्स्यात् । ततश्च नित्यत्वयम्प्रकाश संविद्वादिनस्ते सिद्धान्तव्याघातः एवमनुमानान्तरमपिदृश्यम् । अहंविज्ञाना नित्या स्वयं प्रकाशत्वादिधर्मवती च । पूर्वं बुद्धेर्द्रव्यत्वमभ्युपगम्यद्रव्यवर्गेऽन्तर्भाव उक्तः । तत् कथमिति

चेदुच्यते । बुद्धिर्द्रव्यं विकाराश्रयत्वात् मृदादिवत् । नच दृष्टान्तासिद्धिः मृदिघटत्वाद्यवस्थायाः प्रत्यक्षत्वात् । न च विकारित्वस्यैव द्रव्यत्वाद्धेतोरसाध्याविशेष इति वाच्यम् । द्रव्यशब्द वाच्यत्वसाधनेनोक्तदोषाभावात् ।

एवं बुद्धिर्द्रव्यं स्वयं प्रकाशत्वात् बोदृधृवत् । बोदृधुरात्मनः स्वयं प्रकाशत्वस्य जीवपरिच्छेदेस्थापितत्वेनदृष्टान्तासिद्धिः । एतत् परिच्छेदे आदौ बुद्धेः स्वयं प्रकाशत्वसमर्थनात् न स्वरूपासिद्धिश्च । नचाद्रव्ये प्रत्यक्त्वादौ स्वयं प्रकाशत्वप्रत्वाद्व्यभिचार इति वाच्यम् । तेषां धर्मिमात्रत्वेनस्वयं प्रकाशत्वाभावादित्युक्तत्वात् । न च बुद्धिर्विकारशून्या गुणत्वात् रूपवदित्यनुमानेनविकाराभावसिद्धौविकारित्वहेतोः स्वरूपासिद्धिरितिवाच्यम् । वासनारेणुकुण्ठितः । आवृतं ज्ञानमेतेन । ज्ञानमावृत्यतुतमः । मायया पहृतज्ञाना इत्यादि प्रमाणैस्सङ्कोचावस्थायास्सचानन्त्याय कल्पत इत्यादिभिश्च विकासावस्थायाश्च प्रतिपन्नत्वेन स्वरूपासिद्धयभावात् । आवृततत्वं च बुद्धेस्सङ्कुचितत्वम् । आनन्त्यं च विकसितत्वम् । सङ्कुचितत्वं च कतिपयविषय प्रकाशनम् । विकासावस्थाचाधिकविषयप्रकाशनम् । इदमवस्थाद्वयमावारककर्मतारतम्येनबुद्धेर्जायते । निश्शेषकर्मक्षये सतिकृत्स्नप्रकाशनरूपस्वाभाविकावस्था जायते । ततः परमावारकाभावात् स्थानित्यमेवावतिष्ठते ।

दृष्टं चैतत् प्रभाद्रव्येभित्याद्यावारकेणकिञ्चित् प्रकाशकत्वम् । तदभावेऽधिक प्रकाशकत्वम् । प्रभायाद्रव्यत्वं तु रूपवत्वात् स्वाश्रयादन्यत्र गमनाच्च सर्वसम्मतम् । तस्माद्द्रव्यत्वेऽपि गुणत्वव्यवहारः नित्यतदाश्रयत्वतच्छेषत्वनिबन्धनः । एवं बुद्धेर्द्रव्यत्वेऽप्यात्मानं प्रति गुणत्व व्यवहारः नित्यतदाश्रयत्वतदेकवृत्तित्व तच्छेषत्वनिबन्धनः । तच्छेषत्वाच्चद्गुणत्वं तान्त्रिकैरभिधीयते । यश्चादभ्राजुहोतीत्यत्रदव्यादेर्द्रव्यस्य होमं प्रति गुणत्वम् । तथालोकेऽपि पुत्रशिष्यादेः पित्राचार्यशेषत्वात् पुत्रशिष्यादयः पित्राचार्यगुणभूता इति व्यवहियन्ते । अतोद्रव्यस्यापि विवक्षावशाद्गुणत्वव्यवहार उपपन्नः । तथाचात्मविशेषणभूतबुद्धेरपि विशेषणत्वप्रयुक्तो गुणत्वव्यपदेश इति नतावता बुद्धेर्द्रव्यत्वहानिः । इयं च प्रमाऽप्रमाभेदेनद्विधा । ननु नतावत् सर्वं ज्ञानं प्रमाण, परपक्षप्रयुक्तसिद्धान्तस्यापकवाक्य जन्यज्ञानस्यापि प्रमात्वेन प्रमाविषयसाधकत्वात् तत्सिद्धान्ताभ्युपगम प्रसङ्गात् । नापिसर्वं ज्ञान प्रमाणम् । स्ववचनसिद्धान्तसर्वलोकधीविरोधप्रसङ्गात् । तथाहि सर्वं ज्ञानमप्रमाणमिति वाक्यजन्यज्ञानस्य प्रामाण्ये सर्वाप्रामाण्यभावाद्व्याघातः तादृशवाक्य जन्यज्ञानस्याप्रामाण्ये एतदन्यसर्वप्रामाण्याद्व्याघातः इति स्ववचनविरोधः । अत एव स्वसिद्धान्तविरोधश्च ।

घाताद्विभज्योपादातुमशक्यत्वम् । तत्तत्संघातानामनेकभूतसंसृष्टत्वेऽपितत्तद्भूतभागाधिक्य निबन्धनस्तत्तद्व्यवहारनियमइतिवैशेष्यात्तुतद्वादस्तद्वाद इति सूत्रेण । नानाजातीयराशिव्यपदिशतिजनो भूयसोंशस्य नाम्नेत्याचार्यसूक्त्या च स्थापितः । उक्तन्यायादेवलौकिका अपिशिलासिकतमुद्गमाषादिभिः किञ्चित् किञ्चिन्मिश्रिते व्रीहिराशौव्रीहिराशिरयमितिव्यवहरन्ति । तत्रव्यवहार नियमः तत्तत्कार्यकरत्वतदर्थ प्रवृत्तितत्साफल्याबाधितत्वानामप्युपलक्षकः । तेनव्यवहारनियमवत्तत्कार्यप्रवृत्त्यादीनामपिभूयस्त्वनिबन्धनत्वं सिद्धम् । एवं सदृशे सदृशान्तरावयवसद्भावस्सोमाभावे पूतीकानभिषुणुयात् , व्रीहिभिर्यजेतेत्यादिशास्त्रादवगम्यते । तत्रापिभूयोंशनिबन्धनोक्तव्यवहारादि माह्यम् । तथाच जलव्यवहारविषये संघाते जलांशाधिक्यात् जलव्यवहारविषयत्व सेकादि साधनत्व तदर्थि प्रवृत्तितत्साफल्याबाध्यत्वादयो वर्तन्ते । तत्संसृष्टमृदाद्यवयवेतद्व्यवहाराद्यबाध्यत्वपर्यन्तधर्माभावः । जलेमृदवयवसद्भावश्चकृतकादिघर्षणादुपलभ्यते । एवं शुक्त्यादौरजतसादृश्याद्रजतावयवसद्भावेऽपि तस्याल्पत्वात् शुक्त्यंशाभिभूतत्वाच्च रजतादिव्यवहारकटकादिसाधनत्वरजतार्थिप्रवृत्तितत्साफल्याबाध्यत्वाद्यभावः ।

नन्वत्यल्पजलबिन्दोर्वह्निकणस्यचसेकस्यदाहकत्वस्यचदर्शनादल्पां शस्य तत्कार्य करत्वाद्यभावसाधनमनुपपन्नमितिचेन्न । भावानभिज्ञानात् । संघातान्तराल्पत्वं नाल्पत्वेन विवक्षितम् । किंतुस्वघटितसंघातघटकापेक्षयाल्पत्वम् । उक्तस्थलेऽग्निकणजलबिन्दोस्संघाते बहुत्वात् । अन्यथा तद्व्यवहारानुपपत्तेः । न च चक्षुस्संयोगस्य शुक्तिवन्मरीचिकादिवच्च तदन्तर्गतरजतजलादौ सत्वात् । सर्वदा शुक्त्यादिवत् तद्व्यवहारादिकं स्यादितिवाच्यम् । क्षीरान्तर्गतजलस्येव ताम्रान्तर्गत रजतस्येवचामि भूतत्वेन तद्व्यवहाराद्यभावस्य च सुवचत्वात् । अभिभवहेतुत्वं च भूयांशाना मेवेतिक्षीरादौ दर्शनात् । तर्हिकदाचित्कस्य चिन्मरीचिकायां जलस्य शुक्तौरजतादेश्चकथं ग्रहण मितिचेदुच्यते । काचादिदोषस्य भूयोंशप्रतिबन्धकत्वेन तस्मिन सतिभूयोंश ग्रहणाभावात् तत्संसृष्टाल्पांशग्रहणम् । दोषापगमे भूयोंशग्रहणेसति तदपि भूतरजतांशाग्रहणमितिसुवचत्वात् । दोषरहितपार्श्वस्थैर्दोषापगमे स्वेनापि शुक्तिमात्रग्रहणात् सिद्धम् ।

नन्वेवमपि पुरोवृत्तिशुक्त्यादावेव इद रजतमित्यादिबुद्धि । अन्यथाख्यात्यभ्युपगम इतिचेन्नैवम् । दुष्टचक्षुषश्शुक्त्यंशग्रहणप्रतिबन्धात् तल्लीनरजतांश एवेदं रजतमितिबुद्धयाऽन्यथाख्यात्यभ्युपगमप्रसक्त्यभावात् । दोषहानौ शुक्त्यंश एवेयं शुक्तिरितिबुद्धया तस्या अपि याथार्थ्यात् । तर्हिशुक्तिरजतमरीचिकाजलज्ञानादेरप्रमात्व प्रपादः कथमितिचेत्तत्रेदं द्रष्टव्यम् ।

शुक्तिरजतं मरीचिकाजलमितिकिमभिप्रेतं विलक्षणं रजतजातीयं विलक्षणं जलजातीयमिति उत शुक्तिकारजतं मरीचिकालीनं जलं मरीचिकाजलमिति । नाद्यः । तादृशस्यप्रमाणा

भावेनगगनकुसुमायमानत्वात् । नद्वितीयः । तस्यकटकसेकाद्यनर्हत्वेन तदर्थिने विफलप्रवृत्ति जनकत्वात् । तत् ज्ञानस्याप्रमात्ववादात् । सफल प्रवृत्तिजनकत्वं प्रमात्वम् । विफलप्रवृत्तिजनकत्वमप्रमात्वमितितल्लक्षणात् इदं लक्षणद्वयं यथावस्थितवस्तुविषयज्ञानस्यैव विषयगबहुत्वाल्पत्वाभ्यामुपपन्नम् । तर्हिभूयोऽपज्ञानयोः कथं बाध्य बाधकभाव इति चेदुच्यते । तत्संघातघटकावयवज्ञानं प्रतितत्संसृष्ट भूयोऽवयवज्ञानस्य प्रतिबन्धकत्वम् । तत्संसृष्टत्वं च यावत्सत्त्वं तत्संयोगनाशजनकविभागानाश्रयत्वम् । तेन तत्संयुक्तभूयस्तरभूतलादिज्ञानप्रतिबध्यत्वम् । तत्प्रकारकतद्विशेष्यकज्ञानं प्रतितत्संसृष्टतद्विरोधिज्ञानत्वेन प्रतिबन्धकत्वमितिफलितम् । तद्विरोधित्वं तद्भेदः । भावान्तराभावपक्षे शुक्तित्वादिकमेव रजतभेदः । तच्चकदाचित् स्वरूपतः । कदाचित् भेदत्वेन च भासते । तथा च शुक्तिरितिवा न रजतमितिवा भवतु । ज्ञानद्वयस्यापि प्रतिबन्धकत्वमिति । एतत् सर्वम् ।

यथार्थं सर्वविज्ञानमितिवेदविदां मतम् । श्रुतिस्मृतिभ्यस्सर्वत्रसर्वात्मत्व प्रतीतितः ॥

इत्युक्त्वा । सूत्रकारोऽपि भूतानां त्रिरूपत्वं तथावदत् ।
त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधाभिदा ॥

सोमाभावे तु पूतीकग्रहण श्रुतिचोदितम् । सोमावयव सद्भावादिति न्यायविदोविदुः ॥

व्रीह्यभावेऽपि नीवारग्रहणं व्रीहि भावतः । तदेवमदृशंतस्य यत्तद् द्रव्यैकदेशमक् ॥

शुक्त्यादौ रजतादेश्च भावः श्रुत्यैवचोदितः । रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः ॥

रूप्यादिसदृशश्चायं शुक्त्यादिरूपलभ्यते । अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ॥

कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः रजतांशोगृहीतोऽतो रजतार्थी प्रवर्तते ॥

दोषहानौतु शुक्त्यंशे गृहीते तन्निवर्तते अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ॥

बाध्यबाधक भावोऽपि भूयस्त्वेनोपपद्यते । नातोमिथ्यार्थसत्यार्थ विषयत्वनिबन्धनः ।
एवं ऋषेस्य सर्वत्वे व्यवहारव्यवस्थितिः ॥ इति ।

भगवता भाष्यकृताऽनुगृहीतम् । अतस्सर्वमुपपन्नमिति । नन्वेवमपि वास्तविकरक्षि बुद्बुदादिज्ञानस्यापामाण्यापत्तिः । पक्षिणोऽन्यत्रगमनात् । बुद्बुदस्यक्षणिकत्वेन विनाशाच्च तदादानप्रवृत्तेर्निष्फलत्वादितिचेन्न । विषयापक्रमाभावेसति विफलप्रवृत्तिजनकज्ञानस्यैवाप्रमात्वेनोक्तदोषाभावात् । विषयापक्रमश्च प्रकृतेपक्षिणोऽन्यत्र गमनात् बुद्बुदस्यनाशाच्च भवति एवं

निवार्या। किं च शुक्तिशकलांशे रजतज्ञानविषयत्वस्यासम्भवात् बाधः। तदसम्भवस्य उपपादितत्वात्। एवं सत्प्रतिपन्नितं च। तथा हि विगीताशुक्तिः न रजततयाभाति शुक्तित्वात्। अरूप्यत्वाद्वा। विगीतावुद्धिर्यथार्था बुद्धित्वात् संप्रतिपन्नबुद्धिवत्। न च पूर्वोक्तेनैतस्यैव सत्प्रतिपक्षितत्वमितिवाच्यम्। रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वहेतोर्व्यतिरेकव्याप्तौ ज्ञानाविषयत्वमात्रस्यैवव्याप्यतयेतरांशस्यव्यर्थत्वेन व्याप्यत्वासिद्धयातस्यदुर्बलत्वेन तस्यैवानेन प्रतिरोधसम्भवात्। अतोऽनुमानेनाप्यन्यथाख्यातिर्नसिद्धयति।

तर्हि शुक्तौ रजतज्ञानात् कथं प्रवृत्तिः प्रवृत्तिं प्रतीच्छाया इ छां प्रतिज्ञानस्य च कारणत्वात्। ज्ञानेच्छाप्रवृत्तीनां समानविषयकत्वनियमात्। यद्यपि शुष्के पतिष्यामीतीच्छयाकर्दमे पतति तथाऽप्यवश्यागतप्रवृत्त्याहि कर्दमपतनं न बुद्धिपूर्वकप्रवृत्त्या। प्रकृते इद रजतमित्यत्र इदमर्थभूत भास्वरद्रव्यजिघृक्षयैव प्रवृत्तेः। अतः प्रवृत्तिहेतुतया पुरोवृत्तिविशेष्यकरजतत्वप्रकारक ज्ञानावश्यकतयाऽन्यथाख्यातिरभ्युपेयेति चेन्मैवम्। रजतभेदाग्रहस्यैवप्रवृत्तिहेतुत्वात्। ननु यदि निवृत्तिकारणीभूतभेदग्रहाभावात् प्रवृत्तिः। तथा प्रवृत्तिकारणभूताभेदग्रहाभावान्निवृत्तिरपिस्यात्। यथा भेदग्रहस्य निवृत्तिकारणत्वं नेद रजतमित्यत्र दृश्यते। तथाऽभेदग्रहस्य प्रवृत्तिकारणत्वमिद रजतमित्यभ्रान्तबुद्धौ दृष्टमेव। ततश्चाभेदग्रहरूपप्रवृत्तिकारणाभावात् प्रवृत्तिप्रतिपक्षभूतानिवृत्तिरपि भवत्येवेतिचेन्न। निवृत्तिं प्रतीष्टरजताभेदाग्रहो न कारणम्। किन्त्वनिष्टरजतभेदाग्रहः। अरजताद्भेदोरजतत्वं तदग्रहादेवहि तवाऽपि तदर्थिनो निवृत्तिः

ननु प्रवृत्तिनिवृत्ती उभे अपि कथं भेदाग्रहतस्स्यातामितिचेन्न प्रतियोगिविशेषाधीनसामग्रीभेदादिष्टभेदाग्रहात् प्रवृत्तेः अनिष्टभेदाग्रहान्निवृत्तेश्चाभ्युपगमात्। किं चोपादानवद्धानमपि प्रवृत्तिविशेषः। तत्र भेदाग्रहः प्रवृत्तिसामान्यप्रयोजकः। तद्विशेषस्य तु तद्विशेष इति न सङ्कटं किञ्चित्। नन्वधिकरणप्रतियोगिनोरुभयोरन्यतरस्य वा ग्रहणाभावेऽपि भेद ग्रहसिद्धया तत्रापि प्रवृत्तिस्स्यादितिचेन्न भेदाधारे वस्तुनि भेदमन्तरेणाकारान्तरेण भासमाने सत्यभिमतेष्ट भेदाग्रहात् प्रवृत्तिः तथा भासमाने अनभिमतेऽनिष्टभेदाग्रहान्निवृत्तिरित्युक्तदोषा भावात्। अन्यथाख्यातिपक्षेऽप्यधिकरणज्ञानभेदाग्रहदोषविशेषादीनां सामग्र्यन्तरेणाधिकरणाद्यग्रहकाले उक्तातिप्रसङ्गस्यदुर्वारत्वात्। ननु तथाऽपि यदा शुक्तौ रजतभेदाग्रहः, तदातत्र शुक्तिभेद ग्रहोऽपि विद्यते। अतोऽनिष्टशुक्तिभेदाग्रहात्तत्र निवृत्तिः किं न स्यादिति चेद्भवतोऽपि तदानीं शुक्तिभेदाग्रहादन्यत्रशुक्तिभ्रमवच्छुक्तावपि शुक्तिभ्रमस्स्यात् शुक्तौशुक्तिभ्रमो न घटत इति चेच्छुक्तौ रजतधीरप्यघटितैव त्वयाकथमङ्गीक्रियते। न हि रजतोल्लेखिनीधीररजतविषया दृश्यते। अदृष्ट-

मपि भेदाग्रहविशेषो घटयतीति चेदिहापि शुक्तौशुक्तिभ्रमं घटयतु। दर्शनादर्शनाभ्यां विशेष इति चेन्निवृत्तिहेतुत्वेऽपि दर्शनादर्शनाभ्यां समाधातव्यमिति भावय।

अथ मतत्पक्षे शुक्तिकादावपि रजतसद्भावादिदं रजतमितीष्टावच्छेदक प्रकारकज्ञान-संभवात्तेऽप्रवृत्युत्पत्त्यभेदाग्रहात् प्रवृत्तिरिति किमर्थमुच्यत इति चेत् शृणु। कटकादियोग्य रजतस्यैवेष्टत्वं न रजतमात्रस्य, शुक्तिकीनरजतस्य कटकाद्यसाधनत्वादनिष्टत्वमेव। अतो भेदाग्रह एव प्रवृत्तिकारणमनुगतत्वात् नन्वन्यथाख्यातिं निरस्य सर्वज्ञानयाथार्थ्यं वदतस्तव भ्रान्ति शब्दः क्वचिदपि व्यवहारविषयो न स्यात्। न ह्यसावसाधुः। किन्तु प्रत्ययान्तत्वेन साधुत्वात्। साधोरप्यर्थशून्यत्वे दृष्टदृष्टबोधानुपलम्भादिति चेन्न। शुक्तिकीनरजतादिज्ञानस्यविफलप्रवृत्ति-जनकत्वेन तत्रैव भ्रान्तिशब्दप्रयोगसम्भवात्। यद्वाऽन्यथाख्यातिहेतुतयाऽभ्युपेतमधिष्ठानादि-गोचरं भेदाग्रहविशेषसहकृतं युष्मदभिमतं किञ्चित् ज्ञानम्। तदेव भ्रान्ति शब्दव्यवहार्य मित्युच्यते। संप्रति तत्रैव भ्रान्ति व्यवहारोपपत्तौ मध्ये न किञ्चित् कल्पनीयमिति लाघवं च। अतोऽर्थसद्भावात् भ्रान्ति शब्दव्यवहारोपपत्तिः।

ननु विरुद्धनियतकोटिद्वयगोचरं संशयात्मकं ज्ञानं सौरनुभूयते। वस्तुनि विकल्पस्य विरुद्धानियताकारत्वस्य वाच्यत्वात्, अन्यथाख्यातिरूपमेवतदिति वक्तव्यम्। तादृशसंशया-नभ्युपगमे सन्दिग्धेन्याय प्रवृत्तिरित्यस्य विषयो विशयश्चेवेतिपूर्वोत्तरमीमांसाव्यवहारस्य च विरोधस्यादितिचेन्न। तादृशसंशयस्यापि यथार्थत्वेनान्यथाख्यात्यनभ्युपगमात् तथाहि पुरो-वर्त्यूर्ध्वं द्रव्येस्थाणौ पुरुषोवेति संशयः। तत्र पुरोवृत्तिद्रव्यं स्थाणुश्चेत् स्थाणुरिति भासतै न पुरुष इति। पुरुषश्चेत् पुरुषइति भासेत न स्थाणुरिति। तथैवान्यत्र दृष्टः। तथा चानुभीयते। विप्रतिपन्न स्थाणुपुरुषभान मिन्नाधारस्थाणुत्वपुरुषत्वे प्रकाशयति। स्थाणुपुरुषभानत्वात् स्थाणु-पुरुषाविति भानवत्। तथा च पुरोवृत्तिभानं स्थाणुपुरुषभानं च मिथोभिन्नमिति सिद्धम्। तत्रपुरोवृत्ति भानमनुभवः स्थाणुपुरुषभानं स्मृतिः।

नन्वेकस्मिन् पुरुषे साक्षादनुभवस्मृत्योर्विरोध इतिचेन्न। अख्यातिपक्षे शुक्तिरजत भ्रान्तौ ग्रहणस्मरणयोर्यौगपद्याभ्युपगमेन विरोधाभावात्। अन्यथाख्याति पक्षेऽपि सुरभिचन्द नखण्डमित्यनुभवेस्मृतिविषय सौरभसंशये स्मृतिविषयकोटिद्वयस्य रज्जौ सर्पभ्रमेस्मृतसर्पत्वस्य घटाभाववद्भूतलमित्यनुभवेस्मृतघटस्य च प्रकारतेवस्मृत्यनुभवयोर्यौगपद्याभ्युपगमात् अत-स्संशयोऽपि यथार्थ एव एवं तर्कादावप्यूह्यम्।

यद्वापुरोवृत्त्यनुभवजनितसंस्कारेण कोटिद्वयस्मृतिहेतुसंस्काराभ्यां च सम्भूयैर्युगपदे-कस्मृतिसम्भवात् तदुल्लिख्यमान विषयद्वययुगपत् प्रकाशरूपस्मृतिविशेषस्संशयः। संशय-

विशेषोक्त्यापिकाविप्रतिपत्तिः । सा चागृह्यमाणवस्तुतारतम्यविरुद्धानेकज्ञानकोपस्थानरूपा । सा च सजातीय विजातीयाभासरूपज्ञापकभेदाद्द्विधेत्या । प्रत्यक्षतदाभास विप्रतिपत्तेस्त्रयोयथा चक्षुषा-सन्मुखं भाति । दर्पणतलस्पर्शेनान्यथाकिमदं सन्मुखं निर्मुखं वेति । अनुमानतदाभास विप्रति-पत्तेयथा । धूमात् पर्वतोवह्निमानिरालोकादनग्निमान्वेति । श्रुतिविप्रतिपत्तेर्यथा । भेदाभेदव्यप-देशाभ्यां जीवो ब्रह्मणाभिन्नोवेति । प्रत्यक्षानुमानविप्रतिपत्तेर्यथा । चक्षुष पीतशङ्खभ्रमशङ्खत्वा-त्यैत्यानुमाने किमयं शङ्खः पीतोवाश्वेतोवेति । प्रत्यक्षागमावविप्रतिपत्तेर्यथा । किमहमर्थः स्थूलो-ऽणुर्वेति चन्द्रः प्रादेशिको विपुलोवेति । अनुमानागमविप्रतिपत्तेर्यथा । किं परमाणूपादानकं जगद्ब्रह्मोपादानकं वेतिदृक् ।

अत्रप्रामाकाराः । शुक्तिरजतत्वयोरसंसर्गाग्रहाच्छुक्तिरजतयोर्भेदाग्रहः । स एव भ्रान्तिः तथाचाख्याति भ्रान्तिरितिवदन्ति । योगाचारास्तु । ख्यातेव बाह्यत्वेन बुध्यत इत्या-त्मख्यातिरेव भ्रान्तिरिति प्रलपन्ति । मायिनस्तु सदसद्विलक्षणानिर्वचनीयख्यातिमाचक्षते । शुक्तिप्रदेशनियताविद्याशकल शबलितात् ब्रह्मण आनिर्वचनीयं रजतंतदानीमुत्पन्नं तद्वदं रजतमाति भातीतितेषा सिद्धान्तात् । रजततया शुक्तेर्भानादन्यथाख्यातिरेव भ्रान्तिरिति नैयायिकाः । विपरीतज्ञानस्य विषय एव नास्तीति निर्विषयख्यातिरेव भ्रान्तिरितिबौद्धैकदेशिनः । निराधष्ठानख्या तिरेव भ्रान्तिरितिबौद्धविशेषाः । सौत्रान्तिकास्त्वसन्निहितनीलादयस्त्वविषयबुद्धीस्वाकार समर्प-यन्ति । आरोपितनीलादेर्ज्ञानं भ्रान्तिरित्याहुः एतेषां पक्षाणामन्यथाख्यातिगर्भतत्वेन तद्दूषण नैवदूषणं बोध्यम् ।

तद्भिन्नत्वेतत्वख्यातिपक्षे इदं रजतमिति किमेकज्ञानमुतज्ञानद्वयम् । आद्येऽन्यथाख्याति प्रसङ्गः । शुक्तौरजतत्वप्रकारकज्ञानाभ्युपगमात् । द्वितीय ज्ञानद्वयानित्यत्व प्रतीतिः । तदा भ्रान्तित्वबाध प्रवृत्त्यादयोनस्युः । एकमित्यत्वप्रतीतिः । तदाऽन्यथाख्यात्यभ्युपगम इति । असत्ख्यातिपक्षेऽसत असादित्यत्व प्रतीतिः उतसादिति । प्रथमे भ्रान्तित्वबाध प्रवृत्त्यादया न स्युः । द्वितीये अन्यथाख्यातिः आत्मख्यातिपक्षेऽपि आत्मशब्दो ज्ञानपरः । कितत् ज्ञानानित्यत्व प्रतीतम् । तदा प्रवृत्तिबाधभ्रमादयोनस्युः । यद्यर्थ इति प्रतीतिस्तदाऽन्यथाख्यातिः । अनिर्वचनीयख्यातिपक्षेऽनिर्वचनीयमित्येव प्रतीतावनिर्वचनीय शब्दनिर्वचनीयत्वाद्बाधः । निर्वचनीयत्वेन प्रतीतावन्यथाख्यातिः । एवं ख्यात्यन्तरेऽपि दूषणमूह्यम् । विस्तरस्तु श्रीसर्वार्थसिद्धौद्रष्टव्यः ।

सिद्धान्ते तु शुक्त्यादौ रजतावयवसद्भावाद्रजतावभासोयथार्थः । शुक्ति भूयस्त्वरज-तालपत्वयोर्धर्मविशेषेणाग्रहणात्तदंशेऽख्यातिः । तथाचाख्यातिसंवलितयथार्थख्यातिर्भ्रान्तिः । यादृशद्रव्ये द्रव्यान्तरसद्भावो नास्ति, देहात्मादौ, तत्रभेदाग्रहो भ्रान्तिरित प्रामाकरास्करीत-

नुमर्तव्येति दिक्। तादृग्विषयः प्रमात्वं स्वाभाविकम्। अप्रमात्वमौपाधिकम्। विपर्ययेऽतिव्याप्ति परिहाराय यथावस्थितेति। स्मृतेरपि प्रामाण्याज्ञातिव्याप्तिः। अस्मदीया एवकेचित् स्मृतेः प्रामाण्यमिच्छन्तस्मन्यमनुभवः प्रमेतिलक्षयन्ति। श्रीन्यायपरिशुद्धौ 'वयं तु ब्रूम' इत्यादिना यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमेत्यनुगृहीतम्। तस्मिन्नेवग्रन्थेऽनन्तरं

तथा मानान्यथात्वाभ्यां प्रमाभ्रान्तिव्यवस्थितिः। विपर्ययादेर्व्यावृत्तेरेवमेव हि सिद्ध्यति॥

यत्किञ्चिदन्यथा त्वं हिवैपरीत्यमितीष्यते। आत्मख्यात्यादिवादेष्वप्यन्यथात्वमवारितम्॥

भ्रमप्रवृत्तिबाधादेरन्यथा न हि सम्भवः। एवं सत्यथाधीस्तत्सामग्रीतापिलाघवात्॥

अन्यथाव्यवहारस्य हेतुत्वेऽवशिष्यते। स्वैरप्यन्यथाख्यातिर्दुस्त्यजत्वाद्दुधीरसौ॥

तद्बाधादिनाऽप्यवर्जयत्वात् ततोऽप्यख्यातिलाघवम्। स्वारस्यमन्यथाख्यातावख्यातौ लाघवं स्थितम्॥

इति दर्शयितुं भाष्ये द्वितयं तदनूदितम्। यन्नाथमुनिमिश्राद्यैर्यथार्थख्यातिसाधनम्॥

तल्लेकबुद्धयनारोहाद्भ्रमं केचिद्वदे।

इत्यादिमिर्भाष्यकाराणामपिख्यातित्रयमिष्टमित्यनुगृहीतम्। साचधीश्चतुर्विधा। प्रत्यक्षानुमिति शाब्दस्मृतिभेदात्। श्रूयते हि।

स्मृतिः प्रत्यक्षमैतिह्यं अनुमानश्चतुष्टयम्। इति। ऐतिह्यमिह शाब्दज्ञानम्। मनुरपि,

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता॥ इति

प्रत्यक्षादिजन्यत्वेन स्मृतेस्तच्छेषत्वात् पृथगनुक्तिः। तत्प्रत्यक्षं साक्षात्कारूपाधीः धियस्साक्षात्व च लैंगिकत्वशाब्दत्वस्मृतित्वरहितज्ञानत्वम्। नत्वैन्द्रियज्ञानत्वम्। तेन नित्यमुक्तेश्वरेषुजीवस्वरूपे च नाव्याप्तिः विशदाव भासत्वं साक्षात्वमित्यपिन सत्। स्वापादाव विशदाभस्वरूपावभासे विषय प्रकाशरहिते धर्म भूतज्ञानेचाव्याप्त्यापत्तेः। परोक्षज्ञानेष्वपि प्रकाशशेषैकशेषस्य भाषितत्वेन तत्र तिव्याप्त्यापत्तेश्च। विशदाभासशेषस्साक्षात्वमिति तु दुर्वचम्। ननुजीवस्वरूपज्ञानस्यनित्यमुक्तेश्वरादिज्ञानानां च प्रत्यक्षत्वे किं मानमिति चेदुच्यते।

अत्रायं पुरुषः स्वयं ज्योतिर्भवति। सर्वेह पश्यति। नैवकिंचित् परोक्ष ते प्रत्यक्षेण सदास्वतः। इत्यादेर्मानत्वात्। तच्चप्रत्यक्षं द्विविधम्। ईश्वरप्रत्यक्षमनीश्वर प्रत्यक्षंचेति। तत्राद्यं सर्वविषयकम्। यस्सर्वज्ञस्सर्ववित्तिति श्रुतेः। स्वरूपभेदेनकतिपयविषयकं च। सोऽकामयत।

तत्तेजोऽसृजत इति श्रुतेः। तत्रेश्वरज्ञानस्यापि वस्तुभेदास्सन्ति। तेच न कर्मकृताः। अवाप्तसमस्तकामस्यापि लीलयाऽऽगन्तुकसङ्कल्पः। एव नित्यमुक्तज्ञानानामपि भगवत्सङ्कल्पादि प्रयुक्ता अवस्थास्सन्ति। बद्धानां चतुर्मुखपर्यन्तानां कर्मकृता एव ज्ञानावस्थास्सर्वविषयक-ज्ञानाभावश्च। यद्यपिचतुर्मुखादीनां सार्वज्ञ्यमस्ति तथापितदपि प्रकृष्टादृष्टहेतुकर्मकृतमेवेति न नित्यादि तैल्यम्। अत एव तेषां ज्ञान प्रमोषः पुनर्नारदादिभ्यो ज्ञानसंपादनं च दृश्यते। द्वितीय च द्विविधम्। योगिप्रत्यक्षमयोगिप्रत्यक्ष चेति। तत्र योगाभ्यासजन्य प्रकृष्टादृष्टजन्यं योगि प्रत्यक्षम्। योगाभ्यास इवास्पष्ट प्रत्यक्षेण प्रकाशत इति मानात्।

पुनः प्रत्यक्ष द्विविधम्। निर्विकल्पकं सविकल्पक चेति। तत्रसंस्कारसहकृतेन्द्रियजन्यं ज्ञान सविकल्पकम्। निर्विकल्पक विशिष्टविषयमेव। प्रथमाक्षसन्निपातसमनन्तरमय घटः घटमह मेदृमीत्यनुभव मेदेऽपि सर्वेषां विशिष्टानुभवदर्शनात्। नहि प्रथमाक्षसन्निपातसमनन्तरमविशिष्ट-विषयाबुद्धिर्म जातेति पण्डितः पामरोवा सावधानोऽनवहितोवाकश्चिज्ज्ञानन व्यवहरन् वा दृश्यते। नचनिर्विकल्पकान्तरेण तद्ग्रह इति वाच्यम्। तथा तरस्युपगमात्। न च सविकल्पेनतद्ग्रहण-मितिवाच्यम्। सविकल्पकस्य तद्विषयविषयकत्वेऽपितद्ग्राहकत्वानभ्युपगमात्। प्रत्युत तस्यातीन्द्रियत्वाभ्युपगमाच्च।

किं च निर्विकल्पक विशेषणविशेष्यतत्सम्बन्धेन्द्रियसम्बन्धाज्जायते न वा पूर्वत्र-सविकल्पकवन्निर्विकल्पकमपिविशिष्टविषयमेवस्यात्। अन्यथा सविकल्पकस्यापि विशिष्टविषय-कत्वं न स्यात्। साम्ग्र्याविशेषाभावात्। उत्तरत्रनिर्विकल्पकस्य प्रत्यक्षान्तर्भूतत्वं न स्या-दिन्द्रियाजन्यत्वात्। मा भूदुपलम्भः। अविशिष्टज्ञानसिद्धिस्तु युक्तिसस्यात्। युक्तिश्च। विशिष्टज्ञानस्य सर्वत्र विशेषणविशेष्यज्ञान पूर्वकत्वं दृष्ट तथा प्रथममविकल्पकमपि तादृशज्ञान-पूर्वकमिति वाच्यम्। तच्चज्ञानमविशिष्टविषयकमेव। तस्यापि विशिष्टत्वेविशिष्टज्ञानान्तरपूर्व-कत्वम्। एवं तस्यापीत्यनवस्था प्रसङ्गात् अतोनिश्चीयते प्रथमाक्षसन्निपातसमनन्तरभाविज्ञानम-विशिष्टविषयकं तदेव निर्विकल्पकमितिचेन्मैवम्। भिन्नसामग्रीवेद्यवस्तु गोचरे सुरभिकुसुम मधुरं गुडं शब्दवती भेरीत्यादिविशिष्ट प्रत्यये विशेषणज्ञान पूर्वकत्वावश्यकत्वेऽपि सर्वत्र विशिष्टज्ञानस्य न तत्पूर्वकत्वापेक्षा यत्र विशेषण विशेष्य सम्बन्धानां युगपदेकेन्द्रियसम्बन्धः। तत्रैकदैवदण्डी-पुरुषः रूपवान् घट इत्यादि विशिष्ट बुद्ध्युत्पत्तेः तत्रन विशेषणज्ञानापेक्षा। तत एव तत्राप्यनु-मीयत इति चेन्न। भिन्नसामग्रीवेद्यविषयकत्वोपाधेरनिस्तारात्। विशेषण ज्ञान पूर्वकत्वेन संप्रति-पन्ने सुरभिकुसुममित्यादि विशिष्टज्ञानेभिन्नसामग्रीवेद्यत्वसत्वात् साधनाव्यापकत्वम्। अतस्सोपा-धिकत्वान्न साध्यसिद्धिः। ईश्वरज्ञानेव्यभिचाराच्च।

आदिमत्वे सतीति विशेषणमितिचेत् कस्यहेतोः । अनादेर्हेत्वनपेक्ष्यादितिचेन्न । सादेरप्येकसामग्रीवेद्यनिरुक्तविशिष्टज्ञाने व्यभिचाराच्च । प्रतिप्रयोगश्च,प्रथमाक्षसन्निपातसमनन्तरजाबुद्धिः विशिष्टविषया धीत्वात् संप्रतिपन्नसविकल्पकवत् । नचात्मस्वरूप प्रकाशस्याविशिष्टविषयत्वात तद्धीत्वहेतोस्सत्वाद्व्यभिचार इतिवाच्यम् तस्याप्यहत्वादिविशिष्टत्वेन प्रकाशस्यभ्युपगमात् साध्यवत्वेनव्यभिचाराभावात् । न च विशिष्टविषयकत्व विधाने सिद्धयसिद्धिभ्यां व्याघातेन विशिष्टपदव्यावृत्यसिद्धिरितिवाच्यम् । सर्वत्रविधौ व्यवच्छेद्यावश्यं प्रमाणाभावात् । केवलान्वयि प्रमेयत्वादिविधौ व्यवच्छेद्यासिद्धेः । अत्रत्व विशिष्टविषयकत्व सविकल्पके । तदभावः घटे । तदभावो निर्विकल्पक इति न सिद्धयसिद्धिव्याघातः । पुनोनिर्विकल्पकमपि विशिष्टविषयमेव । तस्य निर्विकल्पकत्वसमाख्यान्वल्पधने दरिद्रव्यवहारवदविशदविकल्पभावमात्रादुपपन्ना । अभिमतविकल्पश्चानुवृत्तादिः । अनुवृत्तिश्च संस्थानरूपजात्यादेरनेकद्रव्यवृत्तिता । साचसविकल्पके भासते ।

तथाचाय गौरितिगोत्व विशिष्टज्ञानं निर्विकल्पकम् । अयमपि गौरित्यनुवृत्तिविशिष्टज्ञानं सविकल्पकमिति तयोर्भेदः । तच्चप्रत्यक्षं पञ्चविधम् श्रौतस्पार्शनचाक्षुषरासनघ्राण भेदात् । मानसप्रत्यक्ष तु नास्त्येव । आत्मनस्तद्धर्मभूतज्ञानस्यैव स्वप्रकाशत्वेनेन्द्रियानपेक्षत्वात् । सुखदुःखेच्छादीनामपिज्ञानावस्थाविशेषत्वात् मनसोज्ञानेन्द्रियव्यवहारस्तुमर्वज्ञानकारणत्वप्रयुक्त इति गृहाण । प्रत्यक्षज्ञानकारण प्रत्यक्षम् । करणत्वं च व्यापारवत्कारणत्वम् । व्यापारस्तु तज्जन्यजनकः । कारणत्वं चानन्यथासिद्धनियतपूर्ववृत्तित्वम् । दण्डसमादावतिव्याप्तिवारणायनियतेति । दण्डत्वदण्डरूपादावतिव्याप्तिवारणायानन्यथासिद्धेति । कार्यं च प्रमाभावप्रतियोगि । तच्चप्रमाण श्रोत्रादि भेदेनबहुविधम् । तद्व्यापारः इन्द्रियार्थसन्निकर्षः । सद्विविधः संयोगस्संयुक्ता श्रयण चेति । द्रव्य प्रत्यक्षे संयोगः । अद्रव्यप्रत्यक्षे संयुक्ता श्रयणम् केचित्तुदशमस्त्वमसीति वाक्यश्रवणानन्तरं दशमोऽहमिति प्रत्ययाच्छब्दजन्यमपि प्रत्यक्षमाहुः । तदसत् । परोक्षजनक शब्दस्य प्रत्यक्षाजनकत्वात् । अन्यथाधर्मवांस्त्वमितिकार्तान्तिकवाक्य श्रवणानन्तरं धर्मवानहमिति प्रत्ययाद्धर्मादेरपि प्रत्यक्षत्व प्रसङ्गात् । अत ऐन्द्रियकमेव प्रत्यक्ष अन्यत् सर्वं परोक्षमितिबोध्यम् ।

इति प्रत्यक्षनिरूपणम् ॥

॥ श्रीः ॥

श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥

अथानुमितिनिरूपणम्

अथानुमितिः निरूप्यते । व्याप्तिविशिष्टपक्षधर्मता विशिष्टहेतुज्ञानजन्यं ज्ञानमनुमितिः । हेतुज्ञानजन्यत्वं च तादृशहेतुज्ञानत्वेनविवक्षितम् । तेन संशयोत्तर प्रत्यक्षे पुरुषत्वव्याप्यकत्वादिमानिति ज्ञानजन्ये प्रत्यक्षे नातिव्याप्तिः । तत्रविशेषणज्ञानत्वेनैव हेतुत्वात् । तादृशहेतुज्ञानजन्य तदूनत्वसेत्यतिव्याप्तिवारणाय ज्ञानेति। यद्यपिध्वस्म प्रतियोगिनः प्रतियोगित्वेनैवकारणत्वात पूर्वविनश्यत्व नातिव्याप्तिः । तथापि ज्ञानपदं व्यष्टप्रतिपत्त्यैनिवेशितमिति बोध्यम् । व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानमनुमान प्रमाणम् । अथानुमितेरपिप्रत्यक्षफलत्वमेव । धूमसंयुक्तचक्षुरेव धूमज्ञानव्याप्ति पक्षधर्मताज्ञानादग्नेकविसंपन्न सद्वह्न्यादिज्ञानं जनयति। यद्वा व्याप्ति पक्षधर्मताविशिष्टधूमादिज्ञानद्वारावह्न्यादिज्ञानं जनयति । तथा च वह्न्यादिज्ञानस्य प्रत्यक्षत्वमितिचेन्न । इन्द्रियार्थसन्निकर्षजन्यधूमादिज्ञानमन्तरेणापिस्मृत्यारूढैः श्रुतैर्वा भूतभाव्यादिलिङ्गैर्वह्न्यादिज्ञान दर्शनान्न प्रत्यक्षत्वं तस्य ।

किंच यद्धियञ्जनयितैव यञ्जनयतितस्यतत्रतदवान्तरव्यापारत्वमितिहिव्यापारलक्षणम् । नचेदं लक्षणं धूमादिज्ञानेऽस्ति । धूमादिज्ञानमन्तरेणापिवह्न्यादेर्द्रष्टुं शक्यत्वात् । तथादर्शनाच्च । अतोऽनुमानादेव साध्यसिद्धिः । न पुनः प्रत्यक्षात् । अन्यथा शब्दज्ञानं व्यापारीकृत्य शाब्दज्ञानमपि प्रत्यक्षमेव प्रमज्येत । नचेष्टापत्तिः परोक्षापरोक्षविभागाभाव प्रसङ्गात् । अथापि सर्वविषयेण मनसावह्न्यादिज्ञानसंभवान्मानस प्रत्यक्षान्तर्भाव इतिचेन्न । संशयविपर्ययस्मृत्यादिमाधारणमनोजन्यत्वमात्रेणतस्य प्रत्यक्षत्वासिद्धेः । किं च वह्निप्रत्यक्ष धूमदर्शन दशायां जायते । उतव्याप्तिज्ञानदशायाम् । अथोपनयदशायाम् नाद्यः । धूमदर्शनेऽपि तदानीं वह्नेरदर्शनात् । नद्वितीयः । व्याप्तिग्रहणदशायां दृष्टान्तेवह्निदर्शनेऽपि पक्षेतदभावात् । न तृतीयः । उपनयजन्यज्ञानस्य पक्षे हेतुमत्ताऽवगाहनेऽपि साध्यवत्त्वानवगाहनात् । अतस्साध्यस्य पक्षधर्मता प्रतीतिरनुमानादेव । सैवानुमितिः । नन्वनुमानं प्रमाणमेव न भवति । प्रमाणत्वे हि प्रत्यक्षाप्रत्यक्षविवादस्स्यात् । तथा हि, किमनुमानेन विशेषस्साध्यते उत सामान्यम् ? न तावत् सामान्यम् । व्याप्ति ग्रहणदशायामेव दृष्टान्तेवह्न्यादि सिद्ध्यासिद्धसाधनदोषात् । न च विशेषस्साध्यः । तत्र व्याप्तिग्रहाभावात् । विशेषेऽनुमानाभावात् सामान्ये सिद्धसाधनात् । तद्धतोऽनुपपन्नत्वादनुमान कथा कुतः ॥

विशेषेऽनुमानाभावात् सामान्येसिद्धसाधनात् । अनुमानमप्यक्षेऽस्मिन न निमग्नावादिदन्तिनः । इति

अनुमानप्रामाण्यनिरासकचार्वाकादिभाषणाच्च । किञ्चव्याप्तिरेवानुमानस्य जीवातुः । सा च सर्वथा न सम्भवति । सम्बन्धग्रहासम्भवात् । कतिपयव्यक्तिदर्शनेन सम्बन्धग्रहस्तु व्यभिचारिसाधारणः । सकलव्याप्यव्यापकदर्शनेनसम्बन्धग्रहस्त्वसर्वज्ञेनकर्तुमशक्यः । यदिसर्वज्ञः सम्बन्धं वेदीतर्हि अनुमाननैष्फल्यम् । तथापि भूयोदर्शनेन व्याप्तेरव्यभिचारितत्वसिद्धिरितिचेन्न । अतस्मिंस्तद्व्यवहारदर्शनेऽपि पार्थिवत्वशीतस्पर्शयोर्हीरकमण्यादौ व्यभिचारदर्शनात् । अताऽनुमानं न प्रमाणमितिचेदुच्यते । एवमनुमानप्रमाणनिराकरणप्रवृत्तानामयमुद्घोषः किमनुमानमूलकः । उततर्कमूलकः । अथनिर्मूलकः । नान्त्यः । अनुमानप्रामाण्यनिराकरणयुक्तीनां निर्मूलत्वेन तत्प्रामाण्यस्य सुस्थिरत्वात् । नाद्यद्वितीयौ । अनुमानतर्कयोर्व्याप्तिसापेक्षत्वेन तत्राप्युक्तदूषणप्रसक्त्या मूलशैथिल्येनताभ्यामनुमानप्रामाण्यनिराकरणासम्भवात् । यत्पुनरत्रान्यैः सामान्ये सिद्धसाधनदोष इत्युक्तम् । तदनभ्युपगमादेव निरस्तम् ।

यदपिविशेषेऽनुपलम्भाभाव इत्युक्तम् । तदपि विशेषेव्याप्तेरनुपलम्भाङ्गत्वास्वीकारादेवनिरस्तम् । सामान्यव्याप्तेरेव पक्षधर्मतासहकारेण विशेषानुमितौहेतुत्वात् । तथाच सामान्यव्याप्त्या पक्षधर्मतयाच विशिष्टहेतुः पक्षेसाध्यं विशेषं साधयतीत्यभ्युपगम्यते । एवमभ्युपगमे प्रतितर्कयारापे क्रमेणतज्जीवत्वापत्तेः । यदुक्तं सर्वैर्व्याप्तिग्रहणासम्भवेनसामान्य व्याप्तिग्रहणं न सम्भवतीति तदनन्तरं परिहरिष्यामः । किञ्चानुमानस्याप्रामाण्यं अबाधितत्वेऽप्युच्यते, उतबाधितत्वे तत्रापि किं प्रत्यक्षेणबाधः । उतानुमानेन । उतागमेन । अथ नियतभावलक्षणाभावेऽपि संशयात्मकत्वेनात्र । बाधेतत्वेऽप्यप्रामाण्यं व्याहतत्वादयुक्तम् । बाधेऽपि प्रत्यक्षबाधो नाग्नेरेव; सपुनर्धूमादौ न दृश्यते । अतोनेन्द्रियवस्तुबाधने प्रत्यक्षबाधायोगात् । यत्रक्वचिद्बाध्यत्वेनानुमान तत्र प्रत्यक्षबाधमभ्युपगच्छामः । तावतानुमान प्रमाणस्य न हानिः प्रत्यक्षबाधविषयानुमानसद्भावात् । अन्यथा ज्वालाभेदानुमाननज्वालैक्य प्रत्यक्षबाधात् प्रत्यक्षस्या प्रामाण्यं स्यात् । द्वितीयव्याघातः कृत्स्नानुमाना प्रामाण्ये बाधकानुमानस्यापितदन्तर्गतत्वेना प्रामाण्यात् ।

नतृतीयः । आगमस्यैवव्युत्पत्तिदशायामनुमानसापेक्षत्वेन तदप्रामाण्यसाधकत्वात् । न चतुर्थः । बह्वयाद्यनुमितौ बह्वित्वेनैवतदर्थं बह्वादिव्यवहारदर्शनात् नतु धूमादिदर्शनाव्याप्तिग्रहणं न सम्भवति । व्यभिचारशङ्कायास्तत्र मूलशैथिल्यादितिचेन्न । भूयस्त्वे दृष्टेऽप्यल्पत्वे किं तत्रैवव्यभिचारशङ्का उत दृष्टान्तरादौ । नाद्यः । महानसादिदृष्टदृश्ये धूमादौ व्यभिचारशङ्काया अनुदयात् । न द्वितीयः । दृष्टान्तरस्यासाध्येकदृष्टतयाऽनुमानैवदुरवस्थितत्वात् । तदर्थं तत्रानुमानावश्यकत्वात् । तदनुमानाभ्युपगमेकातिचारः । तथापिसर्वत्राव्यभिचारशङ्कायां कथं व्याप्तिग्रहः । व्यभिचारज्ञानस्य प्रतिबन्धकत्वादितिचेन्न । व्यभिचारदर्शनस्यतन्निवर्तकत्वाभ्युपगमात् । व्यभिचार-

दर्शने श्रुत्यन्ना शङ्कानिवर्तते। पुनरुत्तरे त्वाशङ्का च नोत्पद्यते। ततश्च व्याघातदर्शनेन शङ्का-निवृत्तौ तर्कस्य प्रवृत्ति। ततः प्रमाणानुग्राहकतर्कोपोद्बलितव्याप्त्यनुमितिः। यथाहुर्न्यायविदः। शङ्काचेदनुमास्त्येव नचेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्कातर्कश्शङ्कावधिर्मतः॥

अस्यार्थः सन्निकृष्टदेशेव्यभिचारशङ्काया असम्भवादसन्निकृष्टदेशान्तरे व्यभिचारशङ्का-वाच्या। तथाचदेशान्तरज्ञानार्थमनुमानमस्त्येव शङ्कानास्तीतिचेत्तदासुतरामनुमानं प्रवर्तत एव। व्याघातावधिरेवशङ्कोदयः। व्याघातदर्शने सतिनिवर्ततइत्यर्थः। तर्कश्शङ्कावधिः। व्यभिचार-शङ्कायां सत्यांतर्को नोदेति। स्वमूलव्याप्तिशैथिल्यात्। तन्निवृत्तौ तदुदय इति। ननु व्याघात ज्ञानं न शङ्का प्रतिबन्धकं ग्राह्याभावानवगाहित्वात्। व्यभिचारशङ्काहि वह्न्याद्यभावेऽपि धूमा-दिसत्वज्ञानम्। न च व्याघातज्ञानम्। तद्विषयाभावावगाहव्याघातोहि धूमार्थं वह्न्यादेर्नियतो पादानोपपत्तिः। नच सातदभाव इति चेदुच्यते। नियतपूर्वसत्वाभावज्ञानं हि व्यभिचारशङ्का। व्याघातोहिधूमार्थं वह्न्यादेर्नियतोपादानम्। सचनियतसत्तापादकव्यापारः। तद्ज्ञानं च नियत-सत्ताज्ञाननान्तरीयकमितितस्य कथञ्चिद्ग्राह्याभावावगाहित्वेन प्रतिबन्धकत्वात्। ग्राह्याभावानवगा हिज्ञानस्य प्रतिबन्धकत्वं सिद्धान्त्यभिमतमित्यवस्तादुक्तम्। अतः अनुमानमपि प्रत्यक्षवत् प्रमाणान्तरमिति सिद्धम्।

तत्रव्याप्यं हेतुः। व्यापकं साध्यम्। हेतौव्याप्यत्वं साध्यानधिकदेशकालवृत्तित्वम्। तच्च न साध्यसमानाधिकरणाभावाप्रतियोगित्वं धूमवान् वह्नेरित्यत्र व्यभिचारिणि वह्नावतिव्याप्तेः वह्नेर्धूमसमानाधिकरणाभावप्रतियोगित्वात्। किंतुसाध्यानाधिकरणनिष्ठाभावप्रतियोगित्वम्। वर्तते च धूमादिसद्धेतोसाध्यानाधिकरणहृदादिनिष्ठाभावप्रतियोगित्वाद्धूमस्य। धूमवान् वह्नेरित्यत्र नाति व्याप्तिः। धूमानाधिकरणयोगोळकनिष्ठाभावप्रतियोगित्वाभावाद्वह्नेस्साध्ये व्यापकत्वं च व्याप्या-नूनकालवृत्तित्वम्। तच्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। तादृशव्यापकसमा-नाधिकरण्यं वा व्याप्तिः। अथवासाध्येन सहहेतोर्निरुपाधिकसम्बन्धो व्याप्तिः। साचव्याप्तिः भूयोदर्शनेन क्वचित्कानु गृहीतसकृद्दर्शनेन गृह्यते। निरुपाधिकसम्बन्ध इत्युपाधिर्नाम साधना व्यापकत्वसाध्यसमव्याप्तः। साध्यसमव्याप्तः उपाधिरित्युक्तेसावयवत्वादनित्यत्वसाधने कृतकत्व मुपाधिस्स्यात्। अतस्साधनाव्यापकत्वे सतीति। सावयवत्वमात्रस्यकृतकत्वेन साधनव्यापकत्वात् तस्यनोपाधित्वम्। तावन्मात्रोक्तो कृतकत्वादनित्यत्वसाधने सावयवत्वमुपाधिस्स्यात्। अतो विशेष्य दलानिवेशः। अनित्येषु गुणक्रियादिषु सावयवत्वाभावात् तस्य न साध्यव्याप्तत्वमिति न दोषः। वह्निमान् धूमादित्यत्रपक्षेतरत्वस्योपाधित्ववारणायसमशब्दः। वह्नेर्हेदान्तर्भावेन पक्षेतर-त्वाव्यापकत्वात्, तथा च साधनवन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वसमानाधिकरण व्याप्य-

वृत्त्यभाव प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्य समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेकधर्मावच्छिन्नत्वमुपाधिरित्युदयनाचार्याः ।

अन्येतु साधनाव्यापकत्वे सति साध्यव्यापकत्वमुपाधिः । द्रव्यत्वाद्द्रव्यत्वमाधने वस्तुत्वस्योपाधित्ववारणाय साधनाव्यापकत्वेति । वस्तुत्वाद्द्रव्यत्व साधने द्रव्यत्वस्योपाधित्ववारणाय विशेष्यम् । अस्मिन् पक्षेऽनुकूलतर्कविरहदशायां पक्षेतरवृत्तेरप्युपाधित्व सम्पन्नम् । समो वा विषमो वा साध्यव्यापकत्वमात्रमुपाधेरपेक्षितम् । तथाच साधनवच्चिष्ठाभाव प्रतियोगि तावच्छेदकसाध्यसमानाधिकरणा भावप्रतियोगितावच्छेदकधर्मावच्छिन्नत्वमुपाधिलक्षण फलितम् । श्रुतिबलात् सावयवनित्येश्वरविग्रहाद्यभ्युपगमेनसिद्धान्ते सावयवत्वादनित्यत्वे साध्ये कृतकत्वमुपाधिरेव । तस्यासद्धेतुत्वात् सचोपाधि द्विविधः । निश्चितोपाधिरशङ्कितोपाधिश्चेति । आद्यो यथा ईश्वरसेवादुः खसाधनं सेवात्वात् राजसेवावदित्यत्र पापारब्धत्वमुपाधिः । पक्षे ईश्वरसेवायां पापारब्धत्वं नास्तीति शास्त्रेनिश्चितत्वादयं निश्चितोपाधिः । एवमयोगोलकं धूमवद्वह्नेरित्यत्रार्द्रेन्धनमुपाधिः । पक्षे अर्द्रेन्धनाभावस्य प्रत्यक्षेण निश्चितत्वात् । सन्देहाधिश्चद्विविधः । एक पक्षवृत्तेरपन्देहाधीनसन्देहवान् । अपरस्तु पक्षेव्याप्तिसन्देहाधीनसन्देहवान् । आद्योयथा विप्रतिपन्नोजीवः एतच्छरीरावसाने मुक्तिमान् परिनिष्पन्नसमाधित्वात् । शुकवत् अत्र कर्मात्यन्तक्षय उपाधिः । सचनिष्पन्नसमाधौ विप्रतिपन्नजीवेऽस्ति नास्तीति सन्देहात् सन्दिग्धोपाधिः ।

यद्यपि योगिनामुत्तरपूर्वाघयोरश्लेषविनाशौभवतः । तथाऽपि प्रारब्धकर्मणां भोगेनैव क्षपयितव्यत्वात् तेषामेकशरीर एव पर्यवसानमिति न नियमः । निष्पन्नोपायस्यापि प्रारब्धसङ्कुलितकालावष्यनेकदिवसस्थितिवन्निष्पन्नोपासनस्यापि योगिनः प्रारब्धकर्म वेशेनानेक शरीरपरिग्रहोपपत्तेः । अत एव निष्पन्नोपायानामप्यादिभरतादीनां मृगत्वप्रसङ्गः स्मर्यते । तथा च सूत्रं, "भोगेनत्वितरेक्षपयित्वाथ संपत्स्यते"इति, "यावदधिकारमवस्थितिराधिकारिकाणामिति" च "विनिष्पन्नसमाधेस्तुमुक्तिस्तत्रैवजन्मनि" इत्यादिस्मृतिस्तुनिष्पन्नसमाधेरुत्तरशरीरान्तरयोगनियमपरतया प्रायिकविषया । अतोनास्य साधनाव्यापकत्वम् । तथ च कर्मात्यन्तपरिक्षयस्सन्दिग्धोपाधिः । द्वितीयोयथा । सप्तमित्रातनयान् श्यामान् दृष्ट्वाऽष्टमगर्भेमित्रातनये मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिविशेष उपाधिः । तत्रपक्षे नेरुक्तोपाधावत्वे साध्यव्यापकत्वमुपाध्यभावेनव्यापकत्वमिति व्याप्तिसन्देहात् सन्दिग्धोपाधिः । अस्यचाभावे एकेन दूषकत्वम् ।

तथाहि । ईश्वरसेवानदुःख साधनम् । दुःखसाधनत्वव्यापकापापारब्धकत्वाभाववद्व्यापकाभाववतो व्याप्याभावावश्यं भावात् । एवं व्यभिचारोऽप्यायकत्वेनापिदूषकत्वम् । यथाधूमवान् वह्नेरित्यत्रवह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनव्यभिचारित्वात् । यद्यद्व्यापकव्यभिचारी

तत्तद्व्यभिचारी घटत्वव्यापकपृथिवीत्वव्यभिचारिमेयत्वस्यघटत्वव्यभिचारित्वम्। तथा च व्याप्तिपक्षधर्मतावि शिष्ट हेतुस्सद्धेतुः। तच्छून्याहेत्वाभासाः। सन्दिग्धसाध्यवान् पक्षः। यथा-धूमेनवह्नेय दौ साध्ये पर्वतः। निश्चितसाध्यवान् सपक्षः। तत्रैव महानसः। निश्चितसाध्याभाववान् विपक्षः। यथातत्रैव ह्रदः। सचायं हेतुर्विविधः। अन्वयव्यतिरेकीकेवलान्वयीचेति। तत्रान्वयेन व्यतिरेकेणच व्याप्तिमानन्वयव्यतिरेकी। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। साध्याभावहेत्वभावयो र्व्याप्तिर्व्यतिरेकव्याप्तिः। यथा यत्रयत्रधूमस्तत्रतत्राग्निर्यथा महानस इत्यन्वयव्याप्तिः। यत्रवह्नय भावः तत्रधूमाभावः यथा महाहद इतिव्यतिरेकव्याप्तिः उभयव्याप्तिमत्वाद्धूमोऽन्वयव्यतिरेकी। अन्वय म त्रव्याप्तिम न् केवलान्वयी। यथाभिधेयत्वेसाध्येप्रमेयत्वं तत्रसाध्याभावहेत्वभावयोर-भावात् व्यतिरेकव्याप्तिविरहः।

ननु केवलव्यतिरेकिहेतोः सत्वात्कथं हेतोर्द्वैविध्यमितिचेन्न। केवलव्यतिरेकिहेतोर-सिद्धेः। ननुपृथिवी इतरेभ्यो भिद्यतेगन्धवत्वात् यदुक्तसाध्यंनभवति तदुक्तसाधकं न भवति। यथातेजइतिव्यतिरेकिहेतुरस्तीतिचेन्न। स च्छा प्रसिद्ध्या तदनुमानासम्भवात्। तथा हि व्याप्ति-ग्रहणापेक्षप्रमितिसाधन ह्यनुमानम्। व्याप्तिश्च साध्य साधनयोस्तदभावयोर्वा साध्याप्रसिद्धौ तदसम्भवात्। साध्यं च न क्वापिनिश्चितम्। यदपक्षे ज्ञातमित्युच्यते तदासिद्धसाधनम्। सपक्षेचेद्व्यतिरेकित्वाहानिः। विपक्षे चेद्बाधातः। पक्षैकदेशे घटादौचेत्तत्रहेतुमत्वेऽन्वयित्वं हेत्वभावे-ऽसाधारण्यं घटादिपक्षव्यावृत्तत्वात्। अतः केवलव्यतिरेकीदुर्लभ एव।

ननु यत्रव्यतिरेकिणि साध्यं भावरूपं तत्रव्यतिरेकग्रहणासम्भवः। व्यतिरेकस्या भावरूपत्वेनाभावस्य प्रतियोगिग्रहणं विनाऽसिद्धेः। प्रतियोगिन श्च पक्ष दौक्वचसिद्धेः। यत्रा भावरूपं साध्यं तत्र भावरूपोव्यतिरेकः। स च न प्रतियोगिग्रहणापेक्षः भावत्व त् स्वतः प्रतीतेः। अभावसाध्यकव्यतिरेकीचोक्तः। तत्रेतरभेदः इतरप्रतियोगिकान्योन्याभावः। तस्या भावरूपत्वात् तद्व्यतिरेकः इतरत्वादिभावरूपम्। तस्माद्भावरूपसाध्यव्यतिरेकस्य प्रतियोगिनिरपेक्षग्रहणसम्भवात् तेनैव हेतोर्व्याप्तिग्रहणं युज्यते इतिचेन्न। व्यतिरेकस्य भावात्मकत्वेऽपि व्यतिरेकव्याप्तिकथना-वस्थायां साध्य भावरूपत्वेन कथनावश्यकतया साध्याप्रसिद्धौतदसिद्धेः अन्यथा साध्य प्रति भटत्वेनाग्रहणेव्यतिरेकव्यवहारानुपपत्तेः। तथाच भावरूपत्वेऽभावरूपत्वे च व्यतिरेकस्य साध्य विरोधित्वेन ग्रहणावश्यं भावेन साध्याप्रसिद्धौतदसिद्धेः। साध्यं च पक्षादौ न क्वापिसिद्धमि-त्युक्तम्। अतोऽन्वयापरि ज्ञानेव्यतिरेकापरिज्ञानात्। केवलव्यतिरेकयसम्भवान्नद्वैविध्यहानिः। अन्वयव्यतिरेकीतु सर्वप्रधानः। अन्वयव्यतिरेकाभ्यामर्थतत्वनिर्णयात्। केवलान्वय्यपिक्वचिष्टः।

यत्रनिरुपाधिकत्वादिनिर्णयस्तर्कानुग्रहेणभवति प्रमेयत्वाभिधेयत्वादौ। केवलव्यतिरेकी त्वभावसाध्यकोभावसाध्यकोवा न साधकएव। अयं गौरितिव्यवहर्तव्य इति भावसाध्यकः। इतरेभ्योभिद्यत इत्यभावसाध्यक इति भेदः। ननु केवलव्यतिरेकयभावे सर्वमपिलक्षणं निष्प्रयोजनं स्यात्।

व्यावृत्तिर्व्यवहारोवालक्षणस्य प्रयोजनम्। इत्युक्तलक्षणप्रयोजनव्यावृत्तिव्यवहारयोः केवलव्यतिरेक्यनुमानसाध्यत्वात्। गौरितरेभ्योभिन्नः सास्नादिमत्वात् अयं गौरिति व्यवहर्तव्यः सास्नादिमत्वात्। यश्चैव तत्रैवं, यथागौरिषादिरितिहि लक्षणं व्यावृत्तसिद्धिः। अतोव्यतिरेकिहेतुरावश्यक इतिचेन्न असाधारणधर्मस्यैव लक्षणत्वेनतस्यैतर भेदात्मकत्वात् तथाच लक्षणप्रतीतिरेव भेद प्रतीतिरतोनुमान साध्यं नावशिष्यते लक्षण प्रतीतेरेव लक्षण प्रतीत्यासाधने आत्माश्रयताल्लक्षणातिरिक्तभेदोभवद्भिरङ्गीकृतोऽपि रथर्न्न स्मिरङ्गीक्रियते। अव्याप्तिनिवर्तकस्यैव भेद लक्षणत्वात्। गोत्व व्यसाधारणधर्मदर्शनस्यैव महिषादिव्यव्याप्तिनिवर्तकत्वात्। अथवा, लक्षणानुमानमन्वयेव युक्तम्।

तथाहिजलव्यतिरिक्तत्वेन संप्रतिपन्नेषु घटादिषुगन्धादर्दृष्टः। तमेवदृष्टान्तीकृत्य सन्दिग्धेष्वाज्यादिष्वयादिव्यतिरेकस्साधनीय इत्यन्वयित्वमेव। अयमेव पक्षोयुक्तः। लोके हि व्यवहारानुसारिणालक्षणेन शिक्षिताः पामराः परीक्षकाश्च विप्रतिपन्नविषयेषु लक्षणानुरोधे नार्थतत्वं निर्धारयन्ति। अतोलक्षणाल्लक्ष्येतरव्यतिरेकसाधनमन्वयिफलमेव। किञ्चव्यावृत्तिर्व्यवहारो वालक्षणस्य प्रयोजनमित्युच्यते। उभयमपि न सम्भवति गन्धलक्षणेन घटादिपृथिव्यां जलादि भेदसाधनमफलम्। तेषु प्रत्यक्षत एव जलादिभेदसिद्धेः। यद्यपि घटपटादिषुजलादिभेदप्रसिद्धः। तथाऽपि यावन्ति पार्थिवनिवस्तूनि परमाणुद्व्यणुकत्ररेणु भूतानिविप्रकृष्टानि च तेषां योनपद्येन जलविलक्षणत्वं न पूर्वसिद्धम्। तद्गन्धवत्वानुमानेन साध्यत इतिचेत्तत्र पृच्छामः। किं प्रसिद्धे पक्षे साध्यं साध्यते। उताप्रसिद्धे पक्षे आद्ये प्रसिद्धश्च सपक्षविपक्षाभ्यां व्यावृत्तत्वेनवक्तव्येति कृत्स्नाऽपि क्षोणीविपक्षव्यावृत्ततया प्रसिद्धैव।

तथाचानुमेय नावशिष्यते व्यावृत्तेरेवानुमेयत्वात्। द्वितीयेऽप्रसिद्धिश्चेत्र पक्षस्य कथमनुमानप्रसिद्धिः। नहिपक्ष प्रतीतिमन्तरेण नुमानं प्रवर्तत इति एव व्यवहारेऽपि। तथाहि व्यवहारोऽपि पूर्वमप्रसिद्धश्चेद प्रसिद्धविशेषणत्वम्, पक्षत्वेयं पृथ्वीतिव्यवहर्तव्या गन्धवत्वादिति ह्यनुमानं प्रयुज्यते। तच्च प्रसिद्धमेवघटादौ, अन्यथाकुत्रापि पृथिवीव्यवहारनियमप्रसिद्धयभावे विप्रतिपन्न जलमित्येव व्यवहर्तव्यं गन्धवत्वात्। एवमिदं गृथिवीति व्यवहर्तव्यं स्नेहवत्वादिति विपरीतानुमानं प्रवर्तेत। एवं व्यवहारे लोकव्यवहारविरोध इति चेत्तर्हिलोकव्यवहारादेव सर्वत्र

व्यवहारनियमे सिद्धेकिंपनुमानेन। तथा च व्यवहारस्यलोकसिद्धत्वाल्लक्ष्यवृत्तिलक्षणस्यैव स्वेतर-व्यावृत्तिरूपत्व च व्यावृत्तिर्वाहरोपापचयोपयोजनं न भवतीति सिद्धम्। कथं तर्हि-लक्षणेन तदर्थकथनस्य फलं सर्वैः क्रियते। अनादिसिद्धव्यवहारस्य नियामकधर्ममात्रप्रदर्शनं शिष्याणामिति गृहाण।

नन्वेवं न्यायशास्त्रविरुद्धमपि कथं भवद्भिरभिधीयते। न्यायशास्त्रस्य धर्म्येषु विद्या-स्थानेषु पुराणन्यायमीमांसेत्यभिधानादितिचेदुच्यते। न्यायशास्त्रस्य विद्यास्थानत्वं पुराणेत्यने-नोक्तं, नत्वक्षपादप्रणीतन्यायशास्त्रस्य वेदान्तविरुद्धत्वात्। तस्य वेदान्तविरुद्धस्य विद्यास्थानत्वं पुनः कथमितिचेद्वेदोपबृंहणरूपं तदविरुद्धं श्रीमन्नाथमुनि प्रणीतन्यायशास्त्रमेव विद्यास्थानम्। तदेवहि यामुनाचार्यादिभिः परिगृहीतम्। नन्वार्षं परित्यज्य मानुषपरिग्रहो न युक्तमिति चेन्न मानुषेष्वप्युपपन्नत्वे परिग्राह्यत्वमार्षस्यानुपपन्नत्वे परित्याज्यत्वमिति सर्वसम्मतत्वात्, अन्यथालोकायतादिशास्त्रस्य परिग्राह्यत्व प्रसङ्गात्। यद्वाऽक्षपाद प्रणीतन्यायशास्त्रमपि प्रत्यक्षमेव तत्रविरोधभावत्। परन्तु गौतमव्याख्यातार एवास्य प्रमाणतात्पर्यमन्यथा व्याख्यानमकार्षुः। सम्यङ्न्यायसिद्धिः परिशोधिते सर्वमप्याक्षपादसूत्रं वेदान्तविरुद्धमेव। तत्प्रकारस्तु श्रीन्यायपरिशुद्धावनुसन्धेयः।

स्यादेतत्। व्याप्तिग्रहोपायः क इतिचेद्भूयोदर्शनाद्व्याप्तिर्गृह्यते इतिन्यायवित्संप्रदायः वेदान्तिनस्तु सकृद्दर्शनेनैव व्याप्तिर्गृह्यत इत्याहुः। भूयोदर्शनं किमर्थमितिचेन्न। तस्य व्यभिचार शङ्कानिवारणार्थत्वात्। तर्हितर्कस्यकिंकृत्यमितिचेन्न। तस्यव्यभिचारशङ्कानिदानभूतोपाधिनिरा-करणार्थत्वात्। ननु तथाऽपि महानसवह्निधूमयोरेवव्याप्तिग्रहोऽस्तु। न तु सकलवह्निधूमानां तेषां विप्रकृष्टत्वेन प्रत्यक्षायोगादितिचेन्न। इन्द्रियसम्बद्धसमवेतजात्याधारत्वमसम्बन्धेन सर्वेषां वह्निधू-मानां प्रत्यक्षत्वसम्भवात्। तत्रकिंप्रमाणमिति चेदाबालगोपाल मानुमानिकव्यवहारोपपत्तिरेव-प्रमाणत्वात्। तथा च यन्यहेतोर्व्याप्तिः पक्षधर्मतायाश्चविद्यते स सद्धेतुः। व्याप्तिपक्षधर्मतान्यत-रविहीनाहेत्वाभासास्ते पञ्चविधाः। असिद्धविरुद्धानैकान्तिकसत्प्रतिपक्षबाधितश्चेति। तत्रासिद्ध-स्त्रिविध। आश्रयासिद्धः स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा जीवन्मुक्तः निर्दुःखः मुक्तत्वान्नित्यवैभूतिवासमुक्तवत्। अत्रजीवन्मुक्त आश्रयः सच नास्त्येव। अयं पक्षधर्मतावि हीनः। पक्षाभावात्।

स्वरूपासिद्धोयथामुक्तास्सुखितरसुकृतकर्मवत्वान्महाराजवत्। अत्रसुकृतकर्मवत्वं हेतुः। तच्चमुक्तेषु नास्त्येव। तेषां निश्शेषपक्षीणकर्मत्वात्। अयमपि पक्षधर्मशून्यः। पक्षसत्वेऽपिहेतोरस

त्वात् । सोपाधिकोऽप्यप्रयोजकत्वासिद्धः । यथा यागीयहिंसाअधर्मसाधनीभूताहिंसात्वात् रागप्रयुक्तहिंसावत् । अत्रनिषिद्धत्वमुपाधिः तस्या अधर्मसाधनत्वरूपसाध्यव्यापकत्वात् । पक्षेसाधनाव्यापकत्वं च । निषिद्धत्वरूपोपाधिमहित्वादयं सोपाधिकः । अयमपिव्याप्यत्वासिद्धः । एवं धूमवान् वह्नेरित्यत्रार्द्रेन्धनरूपोपाधिविशिष्टत्वाद्वह्निर्व्याप्यत्वासिद्धः । अयंव्याप्तिशून्यः । साध्याभावसाधक हेतुर्विरुद्धः । यथेयं गौरश्वत्वात् । अत्राश्वत्वहेतुस्तव्यविपरीतगोत्वाभावसाधकः । अयमपि व्याप्तिशून्यस्साध्यव्यधिकरणाश्वत्वस्य साध्यप्रामानाधिकरण्यघटितव्याप्तिविरहात् । अनैकान्तिकोद्विविधः । सपक्षविपक्षगामी सपक्षविपक्षव्यावृत्तश्चेति । आद्यश्शरीरं नित्यं वस्तुत्वादात्मवदित्यत्र नित्यत्वेननिश्चिते ईश्वरेऽनित्यत्वेननिश्चितेघटादौचवर्तते । एवं पर्वतोवह्निमान् प्रमेयत्वादित्यत्र प्रमेयत्वम् तस्यसपक्षे महानसे विपक्षेह्रदेच सत्वादयं व्याप्तिशून्यः व्याप्तेस्साध्याधिकरणेऽवृत्तित्वरूपत्वादुक्तहेतोस्साध्यशून्यवृत्तित्वात् ।

द्वितीयोयथा । जीवोऽनित्यः कर्मफलभोक्तृत्वात् । कर्मफलभोक्तृत्वं सपक्षेघटादौ विपक्षे ईश्वरादौ च नास्ति । किन्तुपक्षमात्रवृत्ति । एवं शब्दोनित्यश्शब्दत्वात् । अत्रशब्दत्वं घटादौविपक्षे ईश्वरादौसपक्षेव नास्ति । किन्तुपक्षमात्रवृत्ति अयमपि । व्याप्तिविहीनः । प्रत्यक्षप्रतिपक्षस्त्वेकेन हेतुनाकुत्रचित् कस्मिंश्चिदर्थे साधिते तद्वन्येनहेतुना तस्मिन्नेवतद्विपरीतसाधकः । यथा शब्दोनित्यश्शब्दत्वात् । शब्दोऽनित्य कार्यत्वात् अत्रशब्दत्वहेतुस्तत्प्रतिपक्षिणः । यस्य साध्याभावः प्रमाणान्तरेणनिश्चितस्सबाधः । यथावह्निरनुष्णः पदार्थत्वाज्जलवदित्यत्रानुष्णत्वाभाव उष्णत्वम् । तच्चप्रत्यक्षेणगृह्यते । एवं मुक्तोऽज्ञश्चेतनत्वाद्बद्धचेतनवदित्याज्ञत्वा भावस्सर्वज्ञत्वं तच्च "सर्वं हृपश्यः पश्यती"त्यादिश्रुतिभिर्गृह्यत इत्यज्ञत्वहेतोर्बाधितत्वम् । अयमपिव्याप्तिशून्यः पदार्थत्वस्य चेतनत्वस्य च साध्याधिकरणेऽवृत्तित्वात् । अन्ये तु बाधेऽपि सिद्धसाधनवत्साध्यसन्देहाभावात् पक्षधर्मता भङ्ग इत्याहुः ।

पुनरप्यनुमानं द्विविधम् । स्वार्थं परार्थं चेति । स्वार्थं स्वानुमितिहेतुः । परार्थं परानुमितिहेतुः । तत्र पञ्चावयववाक्यं प्रयोजकम् । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपञ्चावयवाः । तत्रपरप्रतिपिपादयिषया साध्यवत्तेन पक्षवचनं प्रतिज्ञा । यथापर्वतोवह्निमानिति । लिङ्गवचनं हेतुः । यथाधूमवत्त्वादिति । व्याप्तिनिर्देशपूर्वकदृष्टान्तवचनं उदाहरणम् । उदाहरणं द्विविधम् । अन्वयव्यतिरेक भेदात् । योधूमवान् सोऽग्निमान् यथा महानस इत्यन्वयदृष्टान्तः । योनवह्निमान् सनधूमवानिति व्यतिरेकदृष्टान्तः । व्याप्यस्यहेतोः पक्षे उपसंहारकं वाक्यमुपनयः । सद्विविधः । अन्वयव्यतिरेकभेदात् । तथाचायमित्यन्वयोपनयः । अयं न तथेतिव्यतिरेकोपनयः । साध्यव्याप्यहेतुमत्पक्षे साध्योपसंहारकवाक्यं निगमनम् । तदपि पूर्ववद्विविधम् । तस्मादग्निमान्-

त्यन्वयी। तस्मादनभिमानितिव्यतिरेकी। अवयवपञ्चकमपिप्रयोक्तव्यमिति गौतमीयाः। उदाहरणान्तं वा उदाहरणादिवा त्रयमेवेतिमीमांसकाः। उदाहरणोपनयावेवेतिसौगताः। श्रीभाष्यकारादिभिरनियमेन प्रयुक्तत्वादनियमः। अवयवत्रयमेवेत्याचार्याः। विस्तरस्तु न्याय-परिशुद्धावनुसन्धेयः।

तर्कोऽप्यनुमानाङ्गम्। अनभिमतव्यापकप्रसञ्जनं तर्कः। तस्यमानप्रत्यूहव्याघातक-त्वेनानुमितावुपयोगः। तथा हि, धूमोऽस्तु वह्निर्मास्त्वितिव्याप्त्यभावे शङ्कते यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति तर्केण तच्छङ्काभिद्यते। धूमस्य प्रत्यक्षसिद्धत्वेन तदभाव उभयोरप्य-निष्टः। तथा च वह्न्यभावव्यापकधूमाभावस्य पक्षेऽसम्भवेन तद्व्याप्यवह्न्यभावस्याप्यभावो निश्चीयते। इति वह्निधूमयोर्व्याप्तिनिश्चयेनानुमितिर्निर्बाधा। तस्य द्वौ विषयौ; प्रामाणिकपरि-त्यागोऽप्रामाणिकस्वीकारश्चेति तयोरन्यतरप्रसञ्जनमेवतर्कः। यथोपासितःप्रसूर्यादिफलप्रदो न स्यात्तर्ह्यर्थिभिर्नसेव्येतेति प्रामाणिकपरित्यागरूपस्तर्कः पीतममृतमन्तरधक्ष्यन्मयापीतमपि दहे-दित्यप्रामाणिकस्वीकार उप प्रसङ्गः। सचपञ्चविधः। आत्माश्रयेतरेतराश्रयचक्रकाश्रयानवस्था-निष्टप्रसङ्गभेदात्। तर्काङ्गानिच पञ्च। प्रसञ्जकं प्रसञ्जनीययोर्व्याप्तिः, प्रतितर्कप्रतिहतिः प्रस-ञ्जनीयस्य विपर्यये पर्यवसानं प्रसञ्जनीयस्यानिष्टत्वं परपक्षसाधकत्वं चेति। उक्तेष्वन्यतमहीनश्चे-त्तर्काभासः। तर्कस्य प्रमाणमात्रानुग्राहकत्वेऽपि व्याप्तिग्रहोपयोगादनुमानविशेषतोऽनुग्राहकत्व-मित्यन्यत्रविस्तरः।

यस्तु प्रत्यक्षानुमानागमादिसर्वप्रमाणमुज्झन् दुस्तर्कावलम्बनेन सर्वापलापं करोतितस्य कथानधिकार एव उक्तमिति शिष्येभ्योवक्तव्यम्। दूषणभूषणवादे प्रतिवादिस्वपक्षपरपक्षसाध्य-हेत्वाद्यनङ्गीकुर्वंस्तस्य वादाधिकारता कथं भवेत्। तेषां कथाङ्गत्वात् न हि बालमूकभ्रान्तादिभि-रविवेकिभिर्वादं कुर्वन्तिवादिनः। न चतदकरणाद्विदुषां वादकानामतिशयस्थकाचिद्धानिः। एव मद्वैतिवामपिवादानधिकार एव। तैर्निर्विशेषचिन्मात्रस्य प्रकाशब्रह्मातिरिक्तहेतुसाध्य दृष्टान्तान-भ्युपगमात्। अतश्शिष्येभ्यस्तेषांकथानधिकार एवेत्युपदेश्यः कार्यः। अत एवमहासिद्धान्तारम्भे भगवता भाष्यकारेण तदिदमौपनिषविद्धिरनादरणीयमित्युपपादितम्। अनेनतेषांकथानधिकार-स्सूचित इति श्रीमच्छतदूषण्यां कथानधिकारवादे आचार्यैरन्वग्राहि।

अत्रेदं बोध्यम्। यदिसर्वशून्यवादी कथां प्रविशेत् किंवदिष्यतीति। कथासाधनीभूत-हेत्वाद्यभावात्। यदिहेत्वादिकं गृह्णीयात्तदासर्वशून्यवादव्याघातस्यादितिस्वयमेवकथा संग्रामत-उपरमेदिति। परस्परविरुद्धवादिनाः परस्परोक्ति प्रत्युक्तिपरम्परोपपादनरूपाकथा। साचत्रिविधा। वादजल्पवितण्डाभेदात्। तत्रवीतरागकथा वादः। तत्प्रमाणतर्कसाधनम्। प्रयोजनं तत्त्वज्ञानम्।

वीतरागोऽधिकारी । उभयसाधनवतीविजयफलककथाजल्पः । वादेऽतिव्याप्तिवारणाय विजयेति । वितण्डायामतिव्याप्तिवारणाय उभयेति । स्वपक्षस्थापनाहीनत्वे सतिपरपक्षदूषणकथावितण्डा । पक्षोपन्यासतत्प्रतिक्षेपमात्रवतीकथा वितण्डेतिवा ।

केचित्तुवीतराग वितण्डा विजिगीषुवितण्डेतिवितण्डाद्वैविध्यमाहुः । तत्रविजिगीषुवितण्डाप्रसिद्धा । वीतराग वितण्डापि भवति । तथाह्यदौतावदाचार्योवदति । तदनुशिष्यस्सोपपत्तिकमेवतदनुयुङ्क्ते । आचार्योऽपि सोपपत्तिकमेव परिहरन् शिष्याक्षेपं निवर्तयति । ततश्शिष्यस्य तत्वज्ञानम् । तत्रतत्वबुभुत्सया प्रवृत्तत्वात् सैवत्रीतराग वितण्डा । वितण्डायामपि वादिप्रतिवादिमध्यस्थादिव्यवस्थानुपालनं कर्तव्यमेव । तथाहि वादिप्रतिवादिभ्यां स्वस्वपक्षसाधन परपक्षदूषणं च कर्तव्यमेव । छलजातिनिग्रहस्थानादिन कर्तव्यमेव । छलादेः परिभवहेतुत्वात् । एवं निरोष्ठ्यव्यवहारोदन्त्यव्यवहारः । उक्तशब्दस्य पुनरभिधानम् । यङ्प्रयोगः यङ्लुक् प्रयोगश्च प्रयोग इत्यादिना । शब्दविषयं स्वेच्छयाकल्पितम् । एवमनुमानेनैव साधन वैदिकागमेनैव साधनमित्यादि प्रमाणविषयम् । एवमपिवादिप्रतिवादिप्रौढि प्रकाशनार्थमन्यदपिकल्पनम् । तत्सर्वमनुपालनीयमेव । अन्यथापरिहास एवस्यात् । अतोवितण्डायामपि वादि प्रतिवादिनोस्सर्वव्यवस्थासंरक्ष्यैव ।

भट्टपराशरपादैः "स्वपक्षप्रामाण्यप्रतिपक्षाप्रामाण्यनिश्चयार्थव्यवहारोजल्पः" प्रतिपक्षा प्रामाण्यमात्रनिश्चयार्थव्यवहारो वितण्डेति च तयोर्लक्षणमुक्तम् । श्रीमद्वेदान्ताभाष्येवादः प्रवदतामित्यत्रजल्पवितण्डादिकुर्वतां तत्वनिर्णयाय प्रवृत्तोवादोयस्सोहमितिव्याख्यानात् कथात्रयमस्तीतिदर्शनम् । एतेन नविगृह्य कथां कुर्याद्विप्रं निर्जित्यवादतः । इति निषेधोऽपितत्वविद्विषयः । बाह्यकुदृष्टिदर्पभङ्गायतु तदावश्यकमिति सूच्यते । तथाचाक्षपादसूत्रम् । तत्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीज प्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् (अ - ४ आ - २ सू - ५०) इति तत्र वादिप्रतिवादिभ्यां दोषत्वेनाङ्गीकृतानां निग्रहस्थानादीनामभिधानेन कथायांपरेषां परिभवनरूपनिग्रहोभवति ।

निग्रहश्च तत्वाप्रतिपत्तिः । तत्सूचकं निग्रहस्थानम् । तानि च उक्तहानिः । उक्तविशेषणम् । उक्तापलापः । उक्तविरोधः । अपसिद्धान्तः । अवाचकम् । अनन्वितम् । अप्राप्तकालम् । अविज्ञातार्थम् । अर्थान्तरम् । न्यूनम् । अधिकम् । पुनरुक्तम् । अननुभाषणम् । अज्ञानम् । अप्रतिभा । विक्षेपः । मतानुज्ञा । पर्यनुयोज्योपेक्षणम् । निरनुयोज्यानुयोगः । प्रमाणभासश्चेति बहुविधानि । ननुपुनरुक्ताननुभाषणादेस्तत्वप्रतिपत्तावपि सम्भवेना प्रतिपत्तिलिङ्गत्वाभावात्तत्वाप्रतिपत्तिलक्षणं निग्रहस्थानमितिलक्षणमव्याप्तमितिचेदुच्यते । कथाङ्गं द्विविधम् । साध्यं साधनं

च साध्यं शब्दनित्यत्वादि। साधनं च व्याप्त्यादिपरिकरः। तत्रव्याप्त्यादिवत् पुनरुक्तत्व-भावाननुभाषणाभावादेरपिस्वतस्समयबन्धेनवाकथाङ्गत्वात्। तदज्ञानमपितत्वज्ञानमेवेतिनाध्याप्ति दोष इति। तत्र कथायां स्वोक्ते परेण दूषितेस्वेनैवतत्परित्याग उक्तहानिः।

सात्रिविधा। शब्दतोऽर्थतश्चयद्ययं प्रयोगो दुष्टस्यात्तर्हित्यज्यते। यमान्य एवोपादीयत इति। अर्थतस्तु प्रतिज्ञाहेत्वादित्यागः शब्दोनित्य इति साधने बाधितत्वेन दूषिते तर्हिअनित्य-श्शब्द इति प्रतिज्ञाकथनम्। हेतुहानिर्यथा तत्रैवशब्दत्वादित्युक्ते अपाधारणत्वादिभिर्दूषिते तर्हिकृतकत्वादिकं हेतुरितिवचनमित्यादिरहस्यम्। निर्विशेषणस्य पूर्वोक्तपक्षहेत्वादेः परेण दूषणे-कृतेऽनन्तरं विशेषणकथनमुक्तविशेषणम्। तद्यथाजीवोनिर्दुःखश्चेतनत्वादीश्वरव दत्रसंसारिषु-बाधे दर्शिते मुक्तजीव इतिविशेषकरणम्। तत्रैव चेतनत्वस्य मदु खे बद्धचेतने व्यभिचार प्रदर्शने बद्धचेतनत्वादिति विशेषणकरणम्। एवं साध्यादिष्वप्यूह्यम्। तथा च प्रागेव संपूर्ण प्रयोक्तव्य-मिति रहस्यम्। (२) स्वेनोक्तस्य सभ्यादिविदितस्य प्रतिज्ञादेः परेण दूषणे कृते तदपलाप उक्तापलापः। यथा जीवोनित्यमुक्तश्चेतनत्वादीश्वरवदित्युक्ते दूषिते नतथामयोक्तेन्यथैवोक्तः। त्वमेवैवमुक्त्वा मय्यारोपयसीत्याद्यपलापः। एष पश्यतोहरवत् सभ्यैस्समाविपतिनापिनिग्राह्याः। एवं हेत्वाद्यपलापोदाहरणमूह्यम्।

तथा च सभ्यादिविदितं स्वोक्तं नापलपनीयमितिरहस्यम्। (३) स्वेनैवस्वोक्तविरुद्धक-थनमुक्तविरोधः। सचद्विविधः। पदवाक्यभेदात्। पदविरोधो यथा, ईश्वरोनेश्वर इत्यादि। वाक्यविरोधो यथा ईश्वरस्सर्वज्ञ एव तथाऽपिस्वज्ञानमेकं न जानातीत्यादि सचायमवान्तरभेदा-द्बहुविधः। पक्षहेतुविरोधोयथा ईश्वरः कर्मवश्यः जीवत्वादिति। साध्यहेतुविरोधो यथा क्षित्या-दिकं सकर्तृकं अकर्तृकत्वादित्यादि। स्ववचनविरोधो यथा। याचञ्जोवमहं मौनी मूको वेत्यादि। एवं न किञ्चिदहं याचे याचमानायमेऽर्था दीयन्ताम्। नकश्चिन्मे सिद्धान्तः। तथाऽपि शून्यं चिन्मात्रं वा तत्त्वमवेद्यं ब्रह्म। तथाऽपि तज्ज्ञानान्मोक्ष इत्यादि। तत्तत्सैद्धान्तिकानां व्याहतभाषितान्यवगन्तव्यानि।

एवमुभयाभ्युपगतनियमविरुद्धाचरणमप्यत्रैवान्तर्भवति। तद्यथासंस्कृतभाषाभ्युप-गम्यापभ्रंशेन भाषणम्। हस्तचेष्टावर्जनभ्युपगम्यतत्करणमित्यादिदूषणान्यत्रैवान्तर्भवन्ति। स्वा-भ्युपगतसर्वाविरोधेनैवोपन्यासः कार्य इतिरहस्यम्। ४। स्वाभ्युपगतविरुद्धाभ्युपगमोऽपसिद्धा-न्तः। यथा सांख्यस्य आत्मा कर्तेति वैशेषिकस्यात्मा चिद्रूप इत्यादि सिद्धान्ते ईश्वरो न जगच्छरीरक इत्यादि। स्वसिद्धान्ताविरोधेनैव सर्वं वक्तव्यमितिरहस्यम्। (५) शब्दशास्त्रसिद्ध-विरुद्ध स्वरूपमवाचकम्। यथाकृत्तद्धितसमासाख्यातालंकारात्मने पदपरस्मैपदसकर्मकाकर्मकलिङ्ग-

वचनादीनां विपर्यासन्यूनातिरेकादयः । उदाहरणं तु व्याकरणाशिक्षित प्रयोगादिकं व्याकरणशिक्षितेनैव प्रयोक्तव्यमितिरहस्यम् ।

अनुचितान्वयमनन्वितम् । यथा गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादि । अदूरान्वयेनैव प्रयोक्तव्यमिति रहस्यम् । ७ । विवक्षितक्रमस्य विपर्यासकरणमप्राप्तकालम् । यथा सभ्याद्यनुमतविपर्यासेनवादारम्भः । प्रतिज्ञाहेत्वादेर्विपर्यस्तवचनेऽवयवविपर्यासः वाक्युक्तमदूषयित्वास्वपक्षसाधनेवादविपर्यास इत्यादि । नियमकथायामभ्युपगतक्रमातिक्रमणं न कार्यमितिरहस्यम् (८) सभ्यमध्यस्थ प्रतिवादिष्वन्यतमेनाप्यज्ञातार्थवचनमविज्ञातार्थकम् । तच्चाप्रसिद्धप्रयोगस्वसिद्धान्तमात्रसिद्ध प्रयोगार्थान्तरसाधारण प्रयोगादिभेदात् बहुविधम् । तत्राप्रसिद्धप्रयोगो यथा । अहार्यो बीति हेत्ववानित्यादिः । स्वसिद्धान्तमात्रसिद्धप्रयोगो यथा । पञ्चस्कन्धद्वादशायतनादिप्रयोग सौगतानां, स्पृक्कपालचषकादि प्रयोगः मीमांसकानां, सुनेजोविश्वरूपः पृथग्वर्त्मेत्यादि प्रयोगस्त्र्यन्तविदामित्यादि । साधारणप्रयोगोयथा । भूर्लोहिताश्ववानित्यादिः । श्रोतृणां सुखबोधकशब्दप्रयोगः कार्य इति रहस्यम् (९)

प्रकृतानुपयुक्तवचनमर्थान्तरम् । यथाग्निरित्यादिक सकर्तृक प्रमेयत्वादित्यादिरवयवदूषणप्रतिभासे । प्रमाणविषयः प्रमेयम् ; तत्रचत्वप्रत्ययान्तं प्रमेयत्वपदमित्यादि । एवं कुशकाशावलम्बनेन राजवार्तावतारणादिकमपि । अन्वितमप्युपयुक्तमेव वदेदितिरहस्यम् (१०) स्वसिद्धान्तनिर्णीतस्यैकदेशकथनं न्यूनम् । यथापञ्चावयववादिनैवाग्निरित्यस्यवयव प्रयोगः । सिद्धान्ते सर्वेशरीरिणईश्वरस्यकतिपयाऽचेतन शरीरकत्वकथनम् । सिद्धान्तसिद्धमपूर्णं न वदेदितिरहस्यम् (११) अन्वितमुपयुक्त कृतकरणतया पुनरुक्तमधिकम् । तच्च हेत्वाद्याधिक्यभेदेन बहुविधम् । यथावह्निमान् धूमवत्वादालोकवत्वादित्यादि । सिद्धयपेक्षितमात्रंसाधनमुपादद्दीतेति रहस्यम् । (१२) स्वोक्तिवशात् परेण शब्दतोऽर्थतोवा प्रतिपन्नस्यैव निष्प्रयोजन वचनं पुनरुक्तम् । तद्यथाऽनित्यश्शब्दोविनाशीशब्द इत्यादि । एवं देवदत्तो गृहेऽस्ति बहिर्नास्तीत्यादि च ।

यद्यपि सकृदुक्तौ परेण सभ्यैर्वायदप्रतिपन्न तदपेक्षया पुनरभिधानं युक्तम् । तथापि तदनपेक्षायां पुनरभिधानं निग्रहएव । निष्प्रयोजनं पुनर्नवदेदिति रहस्यम् । (१३) द्विभङ्क्यन्तरोक्तस्य प्राश्निकविदितस्यार्थस्यानुद्भावितस्वाज्ञानेनयथोचितानुभाषणाभावोऽननुभाषणम् । तच्चदृष्यैकदेशदूषणाननुभाषणादिना बहुविधम् । यद्यपिवादेत्विदं स्वाज्ञानाविष्करणं न दोषः । तथाऽपि जल्पवितण्डयोस्तुस्वाज्ञानं नाविष्कुर्यादितिदिक् । (१४) कथां प्रविष्टस्य साधनदूषणाद्यप्रतिपत्तिरप्रतिभा । गगनसूचनभुविलेखन केशविरचनसाध्वस स्वेदादीनामप्यत्रैवान्तर्भाव केचिदाहुः ॥ (१५)

कथामवगाह्येव तद्विच्छेदमिच्छतोऽनावश्यकापसरणव्याजवचनं विक्षेपः। यथा मह्-दिदानीं कृत्य मे वर्तत इत्यादि। अपजयभयादपसरणं दोषः। तथा च वाक्शूरगहित वादाह-वादपसरणं न कुर्यादिति रहस्यम्। (१६) स्वदोषमभ्युपेत्य परदोषप्रसञ्जनं मतानुज्ञा। यथात्व-द्वचनं दुष्टमित्युक्ते तवापि वचनं दुष्टमित्यादि त्व चोर इत्युक्ते त्वमपि चोर इतिवत्। अत्र पर-दोषे सत्यसत्यपि स्वदोषाभ्युपगमोऽनुचित इति नेनाक्षेन निग्रहावहत्वम्। ननु परदोषाभिधा-नाक्षेन। तर्हितस्यां शस्य किमर्थं लक्षणेनिवेश इतिचेत्, स्वदोषमभ्युपेत्य तूष्णींस्थितावप्रतिभा-न्तर्भावः स्यात्। अतस्तदुक्तम्। तथाच परापादितदोषोद्धारणेनैव परपक्षे दोष वदेदितिरहस्यम्। (१७) अवश्योद्धाव्यस्य निग्रहस्थानस्यावसरेऽप्यनुद्भावनं पर्यनुयोज्योपेक्षणम्। अत्रविदितस्वच्छिद्रो-ऽपि परच्छिद्रं नोपेक्षत इति नीतिरनुसन्धेया। तथाच परच्छिद्रप्रकाशनं स्वापजयहेतुरिति-रहस्यम्। (१८)

इत्यनुमितिनिरूपणम्॥

॥ श्रीः ॥

॥ श्रीमते श्रीलक्ष्मीनृसिंह परब्रह्मणे नमः ॥

॥ अथ शाब्दधीर्निरूप्यते ॥

अनाप्तोक्तभिन्नवाक्यार्थज्ञानं शाब्दप्रमा प्रत्यक्षेअतिव्याप्तिवारणाय वाक्यार्थज्ञान-मितिविप्रलम्भकवाक्यार्थज्ञानेऽतिव्याप्तिवारणाय अनाप्तोक्तिभिन्नेति। आप्तोक्तवाक्यार्थज्ञान-मित्युक्तौ वैदिके अव्याप्तिः। तस्यनित्यत्वेनाप्तोक्तत्वाभावात्। अतोनञ्द्वयगर्भगता। आप्तत्वं च यथार्थवक्तृत्वम्। एतेनेश्वरोक्तत्वेनवेदप्रामाण्यं वदन्तः प्रत्युक्ताः नमऋषिभ्योमन्त्रकृद्भ्य इत्या-दिभिः ऋषीणां मन्त्रकृत्वप्रतीतिस्तुतत्तन्मन्त्रद्रष्टृत्वेन उपपन्ना। सूत्रकारेणापि अत एव च नित्य-त्वमिति वेदनित्यत्वं स्थापितम्। एतत्प्रपञ्चोद्रव्ये निरूपयिष्यते। वाक्यजन्यवाक्यार्थ विषयक-यथार्थज्ञानं वा शाब्दप्रमा। प्रत्यक्षेऽतिव्याप्तिवारणायवाक्यजन्येति। विप्रलम्भवाक्यार्थज्ञान-निरासाययथार्थेति। तत्करणं वाक्यं शाब्दप्रमाणं सन्दर्भविशेषविशिष्टपदकदम्बकं वाक्यम् सन्दर्भविशेषविशिष्टत्वं च आकांक्षायोग्यतासन्निधिमत्वम्।

वाक्यं द्विविधम्। पौरुषेयं अपौरुषेयं चेति। पुरुषेच्छयारचितं पौरुषेयम्। तच्चान्वि-तार्थकमनन्वितार्थकं चेति। आद्यमाकांक्षादिमद्वाक्यम्। तत्प्रमाणं यथा कृष्णस्यभवने बहूनि-रत्नानिसन्तीत्यादि। द्वितीयमनन्वितार्थकमप्रमाणम्। अनन्वितार्थकत्वं च आकांक्षादिरहितत्वम्। तेन घटः कर्मत्वम्। आनयनं कृतिः अग्निनासिञ्चतिगिरिर्भुङ्क्ते अग्निमान् देवदत्तेन इत्यादि न

प्रमाणम् । आकांक्षायोग्यतासन्निधिविरहात् । अपौरुषेयं तुवेदवाक्यम् । तच्च सर्वमन्वितार्थकम् । आदित्योयूपः यजमानः प्रस्तरइत्यादेरपितत्साहश्यकार्यकरत्वादितात्पर्यान्वितत्वानपायात् । शब्दश्चवृत्त्याअर्थबोधकः । वृत्तिश्चशक्तिलक्षणान्यतररूपा । इयमेव व्युत्पत्तिरित्यभिधीयते । शक्तिश्चवाच्यवाचकयोर्बोध्यबोधक भावसम्बन्धः । साचशब्दगतबोधकत्वशक्तिरूपा । वह्नेर्दाहक शक्तिवत् । अत्र प्राथमिकव्युत्पत्त्यायत्तं हि शब्दस्य प्रामाण्यम् । प्राथमिकव्युत्पत्तिः कार्य एव जायते । वृद्धव्यवहारोहि व्युत्पत्तौहेतुः । प्रयोजकवृद्धो गामानयेति प्रयुङ्क्ते प्रयोज्यवृद्धश्चानयति । व्युत्पित्सुः पार्श्वस्थोबालोऽनेन वाक्येनानुमानसहीचाव्युत्पद्यते ।

स इत्थं ह्यनुमिनोति विप्रतिपन्ना प्रयोज्यप्रवृत्तिः कार्यत्वबुद्धिपूर्विकाचेतन प्रवृत्तित्वा दस्मदादिप्रवृत्तिवत् विप्रतिपन्नकार्यतावुद्धिः प्रयोजनवाक्यजन्या तदन्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायि तत्तज्जन्यं यथा संप्रतिपन्नमिति सामान्यतः कार्यतावोधकत्वे प्रयोजकवाक्यस्य निश्चिते गामानय गाम्बधानाश्वमानयाश्वं बधानेत्यादि वाक्येष्वावापोद्वापाभ्यां विशेषव्युत्पत्तिरपि जायते । कार्य एव शब्दानां व्युत्पत्तिः । तस्मात् सिद्धरूपे ब्रह्मणि वेदान्तानां न प्रामाण्यमित्याहुः । तन्नवायुर्वैक्षेपिष्ठादेवता इत्यर्थवादानां यत्र दुःखेन संभिन्नमित्यादिफल प्रतिपादकसिद्धपरवाक्यानां च तैरपि प्रामाण्यस्वीकारात् । तत्र विधिशेषतया प्रामाण्येऽपिस्वतः प्रामाण्यं नाभ्युपगतमितिचेत्, प्रकृतेऽपिध्यायीतोपासीतेत्यादिविधिशेषत्वेनैवब्रह्मणि वेदान्तानां प्रामाण्याभ्युपगमे बाधकाभावात् ।

तर्हि बालोपच्छन्दनादिष्विवयथावस्थित ब्रह्मस्वरूपसत्यत्वं न सिद्धयतीचेन्न । ब्रह्मतद्गुणतद्विभूतिसन्महिमादि प्रतिपादकवाक्यानां यथावस्थितार्थबोधकत्वस्वाभाव्यात् । प्रमाणानां स्वतः प्रमाजनकत्वात् । तत्र प्रमाणान्तरेण स्वेन च बाधादर्शनात् । यद्वा आद्यव्युत्पत्तिरिच्छद्वेऽपि प्रकारत्रयेणकर्तुं शक्यते । तथाहि, पुत्रस्ते जात इति देवदत्तायज्ञापय इतिकेनचित् पुम्स्वाचेष्टया चोद्यमानः कश्चित् पुरुषोदेव दत्तसमीपं गत्वातस्मै पुत्रस्ते जात इति वदति । तेनसहगतः कश्चिदन्योव्युत्पित्सुबालः मूकवचेष्टा विशेषज्ञस्तद्वाक्यं श्रुत्वाव्युत्पद्यते एवद्वाक्यं पुत्रजन्मरूपार्थं प्रतिपादकमितीत्येकः प्रकारः ।

प्रकारान्तरमपि । तथाहि,पित्रादिरिशक्षकोजनः बालानङ्गेनिधायांबाततमातुलसोदरादीनर्थानङ्गुल्यानिर्दिशन् तत्तद्वाचकशब्दान् प्रयुङ्क्ते । पश्चादङ्गुल्यानिर्देशमन्तरेणतान् सर्वान् शब्दान् वदति । व्युत्पित्सुर्बालस्तान् शृणोतिचेष्टापरिज्ञानवत्वात् । व्युत्पादकानां प्रवृत्ति व्युत्पादनार्थान् जानाति । ततश्चेष्टामन्तरेणापिशब्दश्रवणमात्रादेवस्वस्य तत्तदर्थं प्रतिपत्ति दृष्ट्वा शब्दस्यबोधकत्वशक्तिंजानाति अयं शब्द इममर्थं बोधयति । तत्रशब्दार्थयोस्सम्बन्धान्त-

रादर्शनात् सङ्केतयितृपुरुषाभावात् । परिशेषाद्धेत्वबोधकभावेनैवायं शब्दः इममर्थं बोधयतीति व्युत्पद्यत इति अयं चान्य प्रकारः । देवदत्तस्यपुत्रे जातेकश्चिद्गत्वापुत्रस्तेजातः इति वदति । तत् पश्यन् बालस्तस्यमुखविकासेनतस्यानुकूलबुद्धिं जानन्नेतद्वाक्यं सन्निहितानुकूलरूपपुत्रजन्मप्रतिपादकमितिव्युत्पद्यते ।

एवमन्योऽपि प्रकारः । प्रभिन्नकमलोदरेमधूनि मधुकरः पिबतीतिवाक्यं श्रुत्वा प्रभिन्नेत्यादिपदानां पूर्वगृहीतव्युत्पत्तिकत्वात् तत्सहपठनसामर्थ्यात् पूर्वमगृहीतव्युत्पत्तिकमधुकरपदमौचित्यात् भ्रमरपरतयाव्युत्पद्यते । ननुलौकिकशब्दानामेवं व्युत्पत्तिरस्तु न वैदिकानामिति चेन्न लोकवेदाधिकरणन्यायेन वैदिकानामपिलौकिकतुल्ययोगक्षेमत्वात् क्वचिच्छन्दविशेषस्तु व्याकरणप्रातिशाख्याद्यवगतः । नार्थवैषम्यम् । अतस्सिद्धेवाकार्थेषु सर्वत्रव्युत्पत्तिस्वप्नाना अतः कार्य एव व्युत्पत्तिरितिनिर्बन्धोनिर्निबन्धनः । एवं सत्यङ्गुलिनिर्देशायोग्येष्वर्थेषुपरमपुरुषदेवेन्द्रादि पदेषुकथं व्युत्पत्तिः । व्यवहारेणैवव्युत्पत्तिं वदतस्तवापि कथं तत्रव्युत्पत्तिरितिसमत्वात् । अप्रत्यक्षार्थस्य व्यवहारियोग्यत्वात् तत्रकथं व्युत्पत्तिरितिसौहार्देनपृच्छामीतिचेदुच्यते ।

सत्यं पादं प्रजापतेत्यादिपरमपुरुष प्रतिपादक प्रमाणघटकसत्यपादादिशब्दानां गृहीत शक्तिकत्वात् तादृशसंस्थान विशेषविशिष्टेत्य मङ्गळावग्रहवान् सः सहस्राक्ष इन्द्र इत्यादि प्राहक प्रमाणगत सहस्र शब्दादेर्गृहीत शक्तिकत्वाच्च तादृशाक्षिसहित शरीरसंस्थानवानिन्द्र इतिव्युत्पत्ति ग्रहसम्भवात् । एवमन्यत्रापि । सा च शक्तिस्त्रिविधा । योगरूढियोगरूढिभेदात् । आद्यापाचकादि पदेषु । द्वितीयामण्टपादिपदेषु तृतीयापङ्कजादिपदेषु । मुख्यार्थबाधेसतितदासन्नेवृत्तिर्लक्षणा । सापि त्रिविधा । गौण्यगौणीचेति । आयुर्घृतमित्यादौगौणी । परिशुद्धरूपगुणयोगान्मणवकेऽपि शब्दस्यव्यपदेशः । अजहती जहत् स्वार्थाऽजहत् स्वार्थाचेति द्विविधा । आद्यागङ्गायां घोष इत्यत्र प्रवाहरूप मुख्यार्थपरित्यागेन तीरलक्षणायास्स्वीकाराच्चैवगङ्गातीरलक्षणायां तु द्वितीया । एवं छत्रिणोयान्ति, काकेभ्योदधि रक्ष्यतामित्यादावपि । तत्र छत्र्यछत्रिकाकत्वादितरबोधतात्पर्यात् । तत्रान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वालक्षणाबीजम् ।

गङ्गायां घोष इत्यत्रान्वयानुपपत्तिः । इतरत्रतात्पर्यानुपपत्तिरितिज्ञेया । अथौदनेन विध्यर्थवादमन्त्रनामधेय भेदेनबहुविधम् । तत्रविधिस्त्रिविधः अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति अत्यन्ताप्राप्तस्वार्थस्यविधिरपूर्वविधिः । यथाव्रीहीन् प्रोक्षतीति । एतद्विध्यभावेव्रीहिप्राक्षणमन्यतो न प्राप्नोतीत्ययमपूर्वविधिः । पक्षप्राप्तस्याप्राप्तांश प्रापकोविधिर्नियमविधिः । यथाव्रीहीनवहन्तीति । अत्रव्रीहीणां तण्डुलप्रकृतित्वादेतद्विध्यभावेऽपि तण्डुलनिष्पत्त्या आक्षेपादेवावहननं प्राप्तमिति न

तदर्थो विधिः। किन्त्वाक्षेपादवहननवन्नखविदळनमपि प्राप्नुयादिति। अवहननेनैव वैतुष्यं कार्यमित्यप्राप्तांशपूरणं क्रियते।

इतरनिवृत्तिफलको विधिः परिसंख्याविधिः। यथा चयन प्रकरणे इमामगृभ्णन् रशनामृतस्य, पूर्वं आयुषीतिमन्त्रः श्रूयते मन्त्राणामनुष्ठेयार्थ प्रकाशनसामर्थ्यात्। अश्वरशनाग्रहणे गर्दभरशनाग्रहणेचायं मन्त्रः प्राप्तः। तत्र इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते इति विधि दृष्ट्या गर्दभरशनाग्रहणेमन्त्रनिवृत्तिः फलतीतीतरनिवृत्तिफलकत्वादयं परिसंख्याविधिरितिदिक्। सिद्धार्थस्तुत्यन्यतरप्रतिपादकं वाक्यमर्थवादः। सूर्य एकाकीचरति। अग्निर्वैहिमस्य भेषजम्। वायुर्वैक्षेपिष्ठा देवतेत्यादि। उद्भिदायजेतेत्यादिनामधेयम्। अत्रान्विताभिधानप्रक्रियैवास्मदाचार्याभिमता। इयं हितत्प्रक्रिया। प्रथमं तावच्छतानिसन्तिपदानि व्युत्पत्तिवशात्तत्तत्पदार्थस्वरूपाण्यनन्वितानिस्मारयन्ति। स्मरणानन्तरमाकाङ्क्षादिपरामर्शरूपन्यायानुगृहीतानिसन्ति, तत्तत्पदार्थविशिष्टैकार्थसंसर्गात्मकं वाक्यार्थं बोधयन्तीति। यथाहुः—

पदजातं श्रुतं सर्वं स्मारितान्वितार्थकम्। न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्॥ इति।

भाट्टास्तु अभिहितान्वय प्रक्रियां वदन्ति। सातु, पदैरभिहिताः पदार्था एवयोग्यत्वेनपरामृश्यमानास्सन्तः विशेषसंसर्गात्मकं वाक्यार्थंबोधयन्ति। अर्थेनैवार्थविशेषसिद्धेस्ततः पदव्यापाराभावात् पदानांस्मारकत्वमात्रमेवेति। यथाहुः।

पदमन्यधिकाभावात् स्मरणान्नावशिष्यते। इति एतत् प्रक्रियापिनात्यन्तानुपपन्नेतितत्वमुक्ताकलापे आचार्यैरभिहिता। पुनरपिवाक्यं द्विविधम्। समानाधिकरणवाक्यं व्यधिकरणवाक्यं चेति। समानविभक्तिविशेषणविशेष्यवाचकपदघटितवाक्यं समानाधिकरणवाक्यम्। यथा नीलोघटः नीलमुत्पलम्। तत्त्वमसि। सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिकम्। विभिन्नविभक्तिकपदघटितवाक्यं तद्भिन्नवाक्यं वा व्यधिकरण वाक्यम्। यथादेवदत्तस्य पुत्रः। जगतः कर्ता कृष्णः। जगत- कारणं ब्रह्म इत्यादिकम्। तत्रव्यधिकरणवाक्यवत् समानाधिकरणवाक्यमपिविशिष्टार्थ प्रतिपादकम्।

तथाहि, सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यपद सत्यत्वविशिष्टमुपस्थापयति। ज्ञानपदं ज्ञानत्वविशिष्टमुपस्थापयति। अनन्तपदमपरिच्छिन्नत्वविशिष्टम्। ततश्चसत्यत्वादिधर्मत्रयविशिष्टब्रह्मप्रतिपादकत्वात् विशिष्टपरमेव। यथा नीलमुत्पलमित्यत्र नीलत्वविशिष्टोपस्थापकनीलपदेन उत्पलत्वविशिष्टोपस्थापकोत्पलपदेनच नीलत्वोत्पलत्वविशिष्टोत्पलबोधनम्। तद्वत्। यत्तुसमानाधिकरणसत्यादिवाक्यानामखण्डैकरसनिर्विशेषचिन्मात्रप्रतिपादकत्वमाहुः तदनुपपन्नम्। वाक्यान्त-

स्वत्वेषामपि विशिष्टविषयत्वावश्यम्भावात्। अतएवहि लटश्शतृशानचावप्रथमासमानाधिकरण इति सूत्रव्याख्यानावसरेभगवतापतञ्जलिना भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणमुक्तम्।

तस्यार्थः, प्रवृत्तेर्निमित्तं प्रवृत्तिनिमित्तं, प्रकृष्टावृत्तिः प्रवृत्तिः। शब्दस्यार्थे प्रवृत्तिर्नाम तद्बोधनम्। तत्रविशेष्यभूत प्रधानार्थबोधनं प्रवृत्तिः। तस्यानिमित्तं द्वारम्। तच्चविशेषण भूतजातिगुणादिकं तद्वाचकानां शब्दानामेकस्मिन्नर्थे एकविशेष्येवृत्तिः बोधकत्वम्। तथाच, विभिन्न विशेषणवाचकानां शब्दानां तदाश्रयैकविशेष्यवाचकत्वं सामानाधिकरण्यमित्युक्त भवति। ततश्च समानाधिकरणवाक्यं विशिष्टैकार्थपरमिति वक्तव्यम्। ननु समानाधिकरणानि सत्यादिपदानि किंसत्यत्वादिविशेषणमात्रपराणि, उत तद्विशेषणविशिष्टपराणि, उत स्वरूपमात्रपराणि। न तावद्विशेषणमात्रपराणि। विशेषणानामनेकत्वादेकार्थत्वासिद्धेः। नापि विशिष्टपराणि। विकल्पासहत्वात्। किं क्रमेण युगपद्वाविशिष्टार्थपरत्वं पदानाम्। न तावत् क्रमेण; विशेषणानामन्योन्यसमवायप्रसङ्गात्। प्रथममेकेनाविशेषणेन विशिष्टतया अवगतस्य वस्तुनः पश्चाद्विशेषणान्तरविशिष्टतया अवबोधनं हि क्रमेण प्रतिपादनम्।

तत्र विशिष्टं प्रति विशेषणतयाऽन्वीयमानं पूर्वविशेषणस्यापि विशेषणं भवतीति विशेषणानामन्योन्य विशेषणविशेष्यभावप्रसङ्गोदुर्वारः। अवर्जनीयं च पदानां क्रमेणार्थप्रतिपादनम्। कुतः। उद्देश्योपादेयविभागवत्वात् सर्ववाक्यानां युगपदुद्देश्योपादेयभावासम्भवात्। सम्भवेऽपि विशेषणानां परस्परैक्यप्रसङ्गाच्च। तथाहि, प्रातिपदिकानां विशिष्टपरत्वे प्रातिपदिकार्थैक्य परस्य समानविभक्तिनिर्देशस्य विशिष्टैक्यपरत्वमवश्याश्रयणीयमिति विशेष्यैक्यवद्विशेषणानामप्यैक्यं प्रतिपाद्यमापद्यते। किञ्च, विशेषणानां व्यावर्तकत्वाभाव्याद्विशेषणभेदेन विशेष्यभेदप्रसङ्गोदुर्वारः। तथाहि, भेदकं विशेषणं, भेद्यं विशेष्यमिति विशेषणविशेष्यस्वरूपयोर्भेदः। दृश्यते च विशेषणानां विशेष्यभेदकत्वं खण्डोमुण्डः इत्यादिषु।

ननु नीलमुत्पलं देवदत्तः श्यामो युवा लोहिताक्षस्तप्तपरिमाण इत्यत्र विशेषणभेदेऽपि विशेष्यैक्यं दृश्यते। नैष दोषः। तत्र हि स्वतः प्राप्तं विशेषणानां विशेष्यभेदकत्वं प्रत्यक्षविरोधेनापोद्यते। प्रत्यक्षाद्यगोचरे ब्रह्मणि तु विशेषणभेदप्रयुक्तविशेष्यभेदोभवत्येव। अतः पारिशेष्यात् स्वरूपमात्रपरत्वमास्थेयम्। एवं तर्हि पदानां पर्यायत्वमेकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तर प्रयोगवैयर्थ्यं प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिश्च प्रसज्यत इति चेन्नैवम्। एकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वेन पदानामपर्यायत्वमर्थवत्त्वम्।

तथाहि, विकारास्पदजडपरिच्छिन्नरूपस्यकृत्स्नस्य जगतः कारणतयाविहितस्य ब्रह्मणः कार्यगतविकारास्पदत्वजडत्वपरिच्छिन्नशङ्कायां तद्व्युदासार्थं सत्यादिशोधकवाक्यं प्रवर्तते। तत्र-सत्यपदं जडत्वशङ्कां व्यावर्तयति। अनन्तपदं परिच्छिन्नत्वशङ्काम्। नचैतावता ब्रह्मणस्तद्व्यावृत्ति-रूपधर्मवत्त्व प्रसङ्ग'। सकलेतरव्यावृत्तेर्ब्रह्मस्वरूपत्वात्। यथा शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्ति-स्तत्तत्पदार्थस्वरूपमेव न धर्मान्तरमर्थान्तरानुपलम्भात्। तदभ्युपगमेऽनवस्थानाच्च। अतः कार्ष्ण्यादिव्यावृत्तं शौक्ल्यमित्यादिपदानां च पर्यायत्वम्। अर्थवत्त्वमनेकार्थत्वं च। तथा सत्यादिपदानां ब्रह्मस्वरूपमात्रविषयाणामप्यसत्यादिव्यावृत्त्यभेदेन न पर्यायत्वादिदोषप्रसक्तिः।

नन्वेवं सत्यत्वादिगुणविशिष्टवाचकानां सत्यादिपदानां तत्तद्गुणपरित्यागेन तत्तद्विरो-धिव्यावृत्तस्वरूपमात्रपरत्वे लक्षणास्यादितिचेन्न। अवाच्योपस्थापने हि पदानां लक्षणा। यथा गङ्गायां घोष इत्यत्र घोषपदस्य कूले। अत्र सत्यादिपदानां वाच्यैकदेशविशेषणपरित्यागेऽपि वाच्ये प्रधानांशभूतविशेष्यस्वरूपप्रतिपादनाल्लक्षणाप्रसङ्गाभावात्। वाक्यतात्पर्याविरोधाय सर्व-पदलक्षणाप्याश्रीयते। विषं भुङ्क्ष्वेतिवदं भोजननिवृत्तिं लक्षयति। प्रकृतेसामानाधिकरण्य-स्यार्थैक्यतात्पर्येणतन्निर्वाहाय सर्वपदानां लक्षणा न दोषः। तस्मात् सत्यादिवाक्यमखण्डैकरसं ब्रह्मप्रतिपादयतीति।

अत्रोच्यते। सत्यादिवाक्यं सत्यादिगुणविशिष्टमेव ब्रह्मप्रतिपादयति। नीलमित्यादिषु समानाधिकरणवाक्येष्वनेकविशेषणविशिष्टैकार्थव्युत्पत्तेः। तथाच, (सामानाधिकरण्यलक्षणं) भिन्न प्रवृत्तिनिमित्तानामिति शाब्दिकोक्तं, लक्षणमप्युपपादितम्। अत्रयदुक्तं समानाधिकरण-वाक्यस्यैकार्थ परत्वव्युत्पत्तेः। तद्घटकपदानां विशेषणमात्रपरत्वे विशिष्टपरत्वेचासिद्ध्या-स्वरूपपरत्वं वाच्यमिति, तन्नोपपद्यते। स्वदुक्तदूषणविकल्पयोस्तत्पक्षेऽपि प्रसङ्गात्। तथाहि, सत्यादिपदानि किं विरोधिमात्रपराणि। अथस्वरूपमात्रपराणि। किंवा विरोध्यवच्छिन्नस्वरूप-पराणि। न तावद्विरोधिमात्रपराणि। तेषामनेकार्थत्वेन एकार्थत्वासिद्धेः। नापिस्वरूपमात्र-पराणि। तथासतिपदानां पर्यायत्वप्रसङ्गात्। एकेनैवपदेनस्वरूपं प्रतिपन्नमिति पदान्तरप्रयोग-वैयर्थ्याच्च। नापि तदवच्छिन्नस्वरूपाणि विकल्पासहत्वात्। किं विरोधिनां स्वरूपावच्छेदकत्व-मुपलक्षणतया विशेषणतयावा।

नाद्यः एकेनैवोपलक्षणेन स्वरूपं प्रतिपन्नमिति उपलक्षणान्तरवैयर्थ्यात्। नद्वितीयः। विरोधिनामनेकत्वेनैकार्थत्वासिद्धेः। विशेष्यान्तर्भूतो विशेष्यप्रतीत्युपायोहि विशेषणम्। विशे-ष्यान्तर्भावश्च ज्ञाप्यान्तर्भावः। विशेषणभूतार्थभेदेऽपिविशेष्यभूत प्रधानार्थैक्यात् एकार्थत्व-

सिद्धिरितिचेदागतोऽसमदीयपन्थानमितिविशिष्टपरत्वेऽपिनविरोधः। यच्चोक्तम्। विशेषणान्तरविशिष्टेवस्तुनि विशेषणान्तरान्वयात् विशेषणानामन्योन्यसमवाय प्रसङ्ग इति।

तदसत्। विकल्पासहत्वात्। अन्योन्य समवाय प्रसङ्गः किंपदार्थस्मारणदशायामुत परामर्शदशायामाहोस्विद्वाक्यार्थाभिधानदशायाम्। न तावत् स्मारणदशायाम्। तदशायां मिथोऽन्वयप्रसङ्गाभावात्। नापिपरामर्शदशायाम् एकस्मिन्नर्थेऽविरुद्धानेकविशेषणसमवायस्य प्रत्यक्षावगतस्य यथावस्थितवस्तुपरामर्शदशायां तथैव परामृश्यमानत्वेनान्योन्यविशेषणसमवायस्यान्यत्रादर्शनेन तदानीमतथापरामर्शात्। नापितृतीयः। वाक्यार्थाभिधान दशायां सर्वैः पदैर्युगपदनेकविशिष्टैकवस्तु विषयकज्ञानजननेन क्रमाभिधान प्रयुक्तान्योन्यसमवाय प्रसङ्गाभावात्। यथाहेचक्षुषी जातिगुणाद्यनेकविशेषणविशिष्टैकवस्तुविषयामेकां क्रियं युगपज्जानतः, तथैवानेकादानियुगपदेवतत्तद्विशेष्यविशिष्टैकवस्तुविषयैव ज्ञानजनकानि भवन्ति। तथादृष्टविषयत्वात् पदानां व्युत्पत्तेः क्रमेणाभिधानानभ्युपगमेकथमुद्देश्योपादेयसिद्धिरितिचेदुच्यते।

ज्ञाताज्ञातविभागेनह्युद्देश्योपादेयविभागः। स च युगपत् प्रतिपादनेऽपि नापैति। एकेनवाक्येन एकवस्तुनोऽनेकविशेषणान्वये युगपत् प्रतिपाद्ये तत्रैकविशेषणान्वयः प्रागेव प्रतिज्ञातः। विशेषणान्तरान्वयस्त्वज्ञात इति ज्ञाताज्ञातविभाग इति परामर्शदशायां सम्भवत्येव। यदप्युक्तं विशिष्टैक्य प्रतिपादने विशेष्यैक्यवद्विशेषणैक्यं प्रसज्यत इति। तदपि न। भवत्पक्षेऽप्यसत्व प्रतियोगिविशेषणैक्य प्रसङ्गात्। प्रातिपदिकानां तत्तत्प्रतियोगिविशिष्टस्वरूपपरत्वेऽपि समानविभक्तेः प्रातिपदिकार्थैकदेश भूतविशेष्यमात्रैकपरत्वव्युत्पत्त्या न विशेषणैक्य प्रसज्यत इति चेत्तदस्माकमपिसमानम्। आवयोर्विशेषस्तु प्रागेवोक्तः। कार्ष्ण्यपीतिमरक्तिमादिव्यावृत्तं शौक्ल्यमित्यादिषुप्रतियोगिभेदस्यतत्तद्व्यावृत्तस्वरूपस्य च शब्दोपात्तत्वान्नलक्षणाप्रसङ्गः सत्यादिवाक्येतु न तथेतिविशेषः। एवं शौक्ल्यादिदृष्टान्तवाक्यात् सत्यादिदार्ष्टान्तिकवाक्यस्य शब्दद्वारकं वैषम्यमुक्तम्। अर्थद्वारकमपि वैषम्यमस्तीतिः कथमितिचेदित्थम्।

शौक्ल्यादेः कस्यचिद्द्रव्यस्य द्रव्यान्तराद्व्यावर्तकतयाधर्मान्तरानपेक्षत्वम्। ब्रह्मणस्तु नतथात्वमितिस्वरूपातिरिक्तव्यावर्तकधर्मापेक्षाऽस्त्येव। किञ्च शौक्ल्यादिस्वरूपस्फुरणेहि न कार्ष्ण्याद्यध्यासः। अतस्तत्रस्वरूपमेव सकलेतरव्यावृत्तिरित्यभ्युपगन्तुं युक्तम्। ब्रह्मस्वरूपस्फुरणेऽपितदितराध्यासाभ्युपगमात्। रजतादिव्यावृत्त शुक्तित्वादिवदधिष्ठान भूत ब्रह्मस्वरूपातिरिक्तसकलेतरव्यावृत्तिरूपधर्मोऽवश्याभ्युपगमनीयः। यच्चोक्तं विशेषणभेदेऽपि विशेष्यभेद प्रसङ्ग इति तदयुक्तम्। विशेषणभेदमात्रस्य विशेष्य भेदकत्वाभावात्। देवदत्तश्यामोयुवेत्यादिषु विशेषण भेदेऽपि विशेष्यैक्यदर्शनात्।

तत्तद्विशेषणभेदस्य स्वतः प्राप्तं विशेष्यभेदकत्वं प्रत्यक्षेणापेक्षितमितिचेन्न। धर्मिवाचकपदैकयात् समानविभक्तिनिर्देशाच्चैक्य प्रतीतेः। खण्डोमुण्डः पूर्णमृङ्गोगौरित्यत्रधर्मिवाचकपदैकयसमानविभक्तिनिर्देशेच सत्यपि विशेषणभेदाद्विशेष्यभेदः प्रतीयत इति चेन्न। यतः स्वतः प्राप्तं तयोर्विशेष्यैक्य प्रतिपादकत्वं प्रत्यक्षेण तत्रापेक्षितं परोक्षेऽपि तत्र खण्डत्वादिभेदेन विशेष्य भेदः प्रतीत इतिचेत् परोक्षेऽपिइष्यमन्वादिविशेषणभेदेऽपि विशेष्यैक्यप्रतीतिर्दृश्यत इति समानश्चविवादः। कोनियामक इतिचेद्यज्जातीयविशेषणानां नियमेनभिन्नाश्रयत्वं प्रत्यक्षदृष्ट तज्जातीयविशेषणानां परोक्षेऽपि विशेष्यभेदापादकत्वम्। खण्डत्वादीनां यज्जातीयविशेषणानां तु भिन्नाश्रयत्वनियमोनदृष्टः तज्जातीयविशेषणानां धर्मिवाचकपदैकये समानविभक्तिनिर्देशेचक विशेष्यसमवेतत्वमेव युक्तम्। यच्चोक्तं वाक्ये प्रधानांशस्य प्रतिपादनान्न लक्षणेति। तदप्यसत् विशेषणद्वारेणविशेष्यपर्यवसायिनश्शब्दस्य द्वारानभिधाने द्वार्यभिधानासिद्धेर्लाक्षणिकत्वेऽपि विशिष्टाभिधानस्वारस्यहानिरवर्जनीयेतिदिक्।

तस्मात् सत्यादिवाक्य सत्यत्वादिविशिष्टमेव प्रतिपादयतीतिसिद्धम्। ततश्च प्रत्यक्षानुमानशब्दाश्च त्रीण्येव प्रमाणानि। उपमानार्थापत्त्यादीनांतत्रैवान्तर्भावान्नत्रित्वविरोधः। अन्तर्भावस्तत्रैवम्। गवयशब्दो गवयत्ववाचकः। वृद्धैर्नियमेन तत्र प्रयुज्यमानत्वात्। योयत्रनियमेन प्रयुज्यते सतस्यवाचकः। यथा गोत्ववाचकगोशब्द इत्युपमानस्यानुमानेऽन्तर्भावात्। एवं देवदत्तस्य दिवाऽभोक्तृत्वे सतिपीनत्वं रात्रिभोजनमन्तरानोपपद्यत इति पीनत्वान्यथानुपपत्ति प्रयुक्तार्थापत्तिरप्यनुमानेऽन्तर्भूता। दिवाऽभुञ्जानोदेवदत्तः रात्रौभुङ्क्तेदिवाऽभुञ्जानत्वेसति पीनत्वात् योदिवाऽभुञ्जानत्वे सतिपीनस्सरात्रौभुङ्क्ते। यथारात्रिभोजननियमवत्पुरुष इत्यनुमातुं शक्यत्वात्। एवं सम्भवादीनामप्यनुमानाद्यन्तर्भावस्य सुवचत्वात्। न प्रमाणत्रित्वव्याघातः।

स्यादेतत्। नानुगवादिपदानां गोत्वादिरूपविशेषणमात्रे शक्तिः, उतगवादिरूपविशेष्ये। नाद्यः। गामानयेत्यादौ गवादिभानाभावप्रसङ्गात्। पदानुपस्थितस्य शाब्दधीविषयत्वाभावात्। न द्वितीयः। गोत्वादिविशेषणाबोधप्रसङ्गात्। तस्य पदानुपस्थितत्वादितिचेन्न। गोत्वादिविशेषणविशिष्टगवादिविशेष्ये शक्तिर्गवादिपदानाम्। न च लक्षणयाविशेष्यबोध इति वाच्यम्। अनुपपत्तिप्रतिसन्धानं विनापि विशेष्यबोधात्। एव शुक्लादिशब्दानामपि शौक्ल्यादिविशिष्टविशेष्यवाचकत्वं शुक्लःपट इत्यादौ तथा प्रतीतेः। शुक्लवान् पट इति मतुबन्ततया प्रयोगस्तु निष्कर्षविवक्षया निष्कृष्टप्रयोगे विशेष्यपर्यन्तामिधानशक्तेः प्रतिबन्धवत्। गुणेशुक्लादयः पुम्सि इति कोशेऽपि द्रव्यपर्यन्तत्वमभ्युपगम्य तदाविशेष्यलिङ्गत्वमुक्तम्। अतश्शुक्लादिशब्दाद्रव्यपर्यन्तवाचकाः। एवं देवादिशब्दानामपि देवशरीररूपविशेषण विशिष्टात्मवाचकत्वम्।

तत्र प्रमाणं तु शिष्टप्रयोग एव। शब्दार्थनिर्णये विशिष्टप्रयोगस्यैव नियामकत्वात्। अस्ति च देवादिशब्दानामात्मपर्यन्ताभिधाने लोकप्रयोगः। देवो मनुष्यः पशुर्मृग इत्यादि। तथा श्रुतिस्मृतिप्रयोगोऽपि चत्वारः पञ्चरात्रा देवत्वं गच्छन्तीति।

प्राप्य पुण्यकृतान् लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥

वाचिकैः पक्षिमृगतामित्यादि इदं त्ववधेयम्। विशेषणवाचकानां शब्दानां विशेष्यपर्यन्ताभिधाने, न विशेषणवाचकत्वमात्रं नियामकं दण्डकुण्डलादिषु शब्देषु विशेष्यपर्यन्ताभिधानाभावात्। किन्त्वपृथक्सिद्धविशेषणवाचकत्वम्। तच्चानुगतम्। ततश्च गोत्वशौक्ल्यादिवद्देवादिशरीराणामपि तत्तदात्मानं प्रत्यपृथक्सिद्धविशेषणत्वाद्देवादिशब्दानामात्मपर्यन्ताभिधानं निर्विवादम्। एवं यस्यात्मा शरीरं यस्य पृथिवी शरीरं, तत्सर्वं वै हरेस्तनुस्तानि सर्वाणि तद्वपुरित्यादि प्रमाणाच्चेतनाचेतनरूपप्रपञ्चस्य विष्णुशरीरत्वेन तदपृथक्सिद्धविशेषणत्वात्। अपृथक्सिद्धविशेषणवाचकानां शब्दानां विशेष्यपर्यन्तत्वनियमेन घटपटदेवमनुष्यादिशब्दास्तत्तच्छरीरक जीवशरीरकपरमात्मवाचिनः। लौकिकानां विशेष्यैश्वरापरिज्ञानाद्देवादिविशेषणप्रपञ्चस्य पृथक्सिद्धिव्यामोहः। नैतावताशास्त्रसिद्धं प्रपञ्चानामपृथक्सिद्धविशेषणत्वमपगच्छति।

वेदैश्चसर्वैरहमेव वेद्यः, वचसां वाच्यमुत्तमं, न तास्मत्सर्ववचसां प्रतिष्ठायत्र शाश्वतीत्यादिभिः ब्रह्मणस्सर्वशब्दवाच्यत्वं ह्यभिधीयते। किञ्चानेन जीवेनात्मनेति श्रुत्यासर्वस्य वस्तुजातस्य जीवशरीरक ब्रह्मानुप्रवेशेनैव नामरूपभाक्त्वाभिधानात्तत्तन्नामवाच्यत्वं ब्रह्मणस्सिद्धम्। विप्रतिपन्नानिपदानि परमात्मवाचकानि; निष्कर्षकार्थैतरत्वेसतितन्मूर्तिवाचकत्वात्। येनिष्कर्षकेतरत्वेसति तन्मूर्तिवाचकास्ते भगवद्वाचकाः यथा रामकृष्णादि शब्दा इत्यनुमानेनापि सर्वशब्दवाच्यत्वम्। ननु तर्हि लोकव्युत्पत्तिविरोधस्स्यात्। लौकिकानां घटादिष्वेव घटशब्दव्युत्पत्तिरितिचेन्न। लोकव्युत्पत्तेरपूर्णायाः पूरणं वेदान्तव्युत्पत्त्या क्रियते। न पुनः प्रथमव्युत्पत्तेरबाधः। वेदान्तश्रवणेन हि व्युत्पत्तिः पूर्यते। यथा कर्मकाण्डश्रवणेन देहमात्रपरतया व्युत्पन्नस्य देवादिशब्दस्य देहातिरिक्तात्मपरतयाव्युत्पत्तिः पूर्यते। तद्वत्। तथा च ब्रह्मणस्सर्वशब्दवाच्यत्वे, न कश्चिद्विरोधः।

अत्रेदं बोध्यम्। देवादिचेतनवाचिशब्दा घटाद्यचेतनवाचिशब्दाश्च देवत्वादिघटत्वादिप्रवृत्तिनिमित्तैस्साक्षात्परम्परासाधारणसम्बन्धेनैकयैव शक्त्याचिदचिच्छरीरिब्रह्माभिदधति। यथा शुक्लादिशब्दाश्शुक्लत्वप्रवृत्तिनिमित्तशुक्लरूपतदाश्रयाभिधायकाः। यथा च ब्राह्मणादिशब्दाः

पिण्डगतेन ब्राह्मणत्वनिमित्तेन सद्वारकाद्वारकार्थद्वयाभिधायकाः। तथा घटादिशब्दाः देवादि शब्दाश्च तत्तत्प्रवृत्तिनिमित्तैस्सद्वारकाद्वारकार्थद्वयबोधकाः। क्वचित् पण्डितानां विष्कर्षविवक्षया पामराणां विशेष्यापरिज्ञानाच्च वाच्यैकदेशे विशेषणमात्रे भङ्क्त्वाप्रयोगः। सोऽपिधर्मिपर्यन्त-नीलादिशब्दस्यनीलं रूपमित्यादौ वाच्यैकदेशे नैल्यादौ प्रयोगादुपपन्नः। अत्रतात्पर्यविभाग एव शक्ति भङ्गः। यद्यप्यचिज्जीवेश्वराः घटादिशब्दवाच्याः। तथापि धर्मिग्राहक प्रमाणेनाचितश्चेतनं प्रतिचेतनस्येश्वरं प्रति च प्रकारत्वात्। तत्प्रकारकविशिष्टेश्वर प्रधानक एव बोधः।

यथा जात्याकृति व्यक्तीनां पदार्थत्वपक्षे प्रमाणसिद्धवस्तुस्वभावानुगुण्येन जात्यादि-विशिष्टव्यक्तिप्रधानको बोधस्तद्वदिति। स्यादेतत्। ज्ञानानां प्रामाण्यं स्वाभाविकम्। उतौ-पाधिकम्। तद्ग्रहश्च स्वेनैव उतान्येनेतिविचार्यते। तथा हि, ज्ञानप्रामाण्यं ज्ञानगतयथावस्थित-वस्तु प्रकाशकत्वम्। तच्चवह्न्यादेर्दाहकत्ववत् स्वाभाविकमेव अप्रामाण्यं तु मणिमन्त्रादिवशेन वह्न्यादेरदाहकत्ववदोषवशादुत्पद्यते। अतः अप्रामाण्यमौपाधिकमेव। स्वाभाविकमेव प्रामाण्य-मीश्वरज्ञाने परैरपि स्वीकृतम् तस्य नित्यत्वेनौपाधिकत्वासम्भवात्। अथ ज्ञानं स्वत एव मानं चेत् कस्यचित् कुत्रचित् प्रमाणमप्रमाणं वेति संशयो न स्यात्। तथा च मीमांसादेर्वैयर्थ्यमिति चेन्मैवम्।

प्रामाण्यस्य स्वाभाविकत्वेऽप्युपाधिकृता प्रामाण्यशङ्काविधूननाय मीमांसापेक्षा सम्भवात्। दृष्टं चैतद्रूपादिविषये स्वतः प्रामाण्यस्य चक्षुष आलोकसहकारिसाहित्यापेक्षणम्। एवं स्वतः प्रमाणस्य निगमस्याप्यर्थतत्त्वावधारणे मीमांसापेक्षणम्। यदिचक्षुषारूपादि प्रत्यक्ष-जनने विरोधितमोनिवर्तन एवालोकस्योपयोगः; न प्रमोत्पत्ताविति। तत्र न स्वाभाविकप्रामाण्य-हानिरित्युच्येत। तथेहाप्युपाधिकृताप्रामाण्यशङ्कानिरसन एव मीमांसादेरुपयोगान्न स्वाभावि-कत्वहानिरिति समञ्जसमाधिरितिदिक्। एवमुत्पत्तौ स्वतस्त्वमुक्तम्। अथ ज्ञप्तौ स्वतस्त्वमुच्यते। तथा हि ज्ञानानां स्वप्रकाशत्वात् स्वस्मिन् ज्ञानत्वमिवप्रामाण्यमपिस्वेनैवगृह्यते। प्रत्यासत्ते-स्तुल्यत्वात् ज्ञानस्य यथावस्थितवस्तुग्राहकत्वस्वभावात्। यथावस्थितवस्तुग्राहकत्वस्यैव प्रामाण्य-पदार्थत्वात्।

ईश्वरज्ञाने स्वीयप्रामाण्यग्रहस्स्वेनैवेति परैरभ्युपगम्यते। तस्य सर्वविषयकत्वस्य स्वतः प्रामाण्यग्रहस्य च तैरभ्युपगमात् अन्यथा तस्यासर्वज्ञतापत्तेः। ज्ञानान्तरेण प्रामाण्यग्रहे ज्ञान द्वयाभ्युपगमप्रसङ्गाच्च। नचेश्वरीयज्ञानस्य तथात्वेऽपि जीवज्ञाने परत एव प्रामाण्यग्रह इति वाच्यम्। तथा कल्पने प्रमाणाभावात्। प्रमितिलक्षणप्रमायास्स्वीय प्रमात्वग्रहापत्तिसम्भवात्। अन्यथा सर्वानुवृत्तलक्षणग्रहाभावप्रसङ्गात्। अतः स्वत एव प्रामाण्यग्रहः। अप्रामाण्यग्रहस्त्वन्यत

एव। तथा हि, अर्थान्यथात्वावगाहित्वमेव ज्ञानस्याप्रामाण्यम्। तदन्यैर्बाधकज्ञानादिभिरवबुध्यते। न हि रजतज्ञानं रजतस्यान्यथात्वमावेदयति। अपि तु कारणदोषादिज्ञानम्। अतो प्रामाण्यग्रहस्य परत्वम्। ननु प्रामाण्यस्य स्वतोग्रहेममोत्पन्नं ज्ञानं प्रमाणं वेति संशयो न स्यात्। प्रामाण्यनिश्चयस्य प्रतिबन्धकत्वं तु। न च प्रामाण्यनिश्चयो न जात इति वाच्यम्। धर्मिज्ञानस्यैव प्रामाण्यनिश्चयरूपत्वात्।

यथावस्थितवस्तु विषयकत्वस्यैव प्रामाण्यादितिचेन्न प्रामाण्यनिश्चयेऽपि कारणदोषशङ्काहिताप्रामाण्यसंशयस्योत्पत्तौ बाधकाभावात्। अनाहितस्यैवाप्रामाण्यसंशयस्य प्रतिबध्यत्वात्। एवमभ्युपगमे तवापि कथं प्रामाण्यसंशयानन्तरमर्थसंशयस्स्यात्। अर्थनिश्चयस्य प्रतिबन्धकस्य सत्वात्। यद्याहितत्वादर्थसंशयस्य न तन्निश्चयप्रतिबध्यत्वं, तदत्रापि समानम्। अत्रेदं बोध्यम्। प्रामाण्यनिश्चयेऽपि क्वचित् स्थूणानिखननन्यायेन क्वचित् कारणदोषशङ्काहिताप्रामाण्यशङ्कया क्वचित् कुपतिकल्पितकुहनायुक्तिजाल जाताप्रामाण्यशङ्कया च तन्मीमांसाक्रियते। नैतावता प्रामाण्यस्य स्वतस्त्वहानिरित्यलमतिविस्तरेण।

स्वतः प्रमाणं वेदः। स्मृतेस्तु वेदमूलकत्वेन प्रामाण्यम्। वेदविरुद्धस्मृतेरप्रामाण्यमेव। अयं न्यायः पुराणादिष्वपि। पुराणानां परस्परविरोधे सात्विकासात्विकत्वाभ्यां प्राबल्यदौर्बल्ये। पाशुपताद्यागमास्तु कात्स्न्र्येनवेदविरुद्धत्वात् सर्वांशेऽप्यप्रमाणम्। श्रीपाञ्चरात्रशास्त्रं तु वेदाविरुद्धत्वात् सर्वज्ञप्रणीतत्वात् वेदमूलकत्वाच्च कृत्स्नं प्रमाणम्। अत एवास्मिन् शास्त्रे क्वचिदपि श्रुतिविरोधोनास्तीति श्रीभाष्यादौ स्थापितम्। अस्मिन्नेव क्वचित् परस्परविरोधे तात्पर्यभेदेन विरोधः परिहार्यः। अत्यन्तविरोधे श्रुतौ षोडशिग्रहणाग्रहणवदत्रापि विकल्पो ग्राह्यः। शिष्टाचाराणां स्मृतिमूलकत्वेन प्रामाण्यम्। अतः प्रत्यक्षस्मृतिविरुद्धाचारस्त्याज्य एवेति शास्त्रबुद्धी निरूपणम्।

अथ स्मृतिर्निरूप्यते।

संस्कारमात्रजन्याधीः स्मृतिः। न च स्मृतेरदृष्टकालोद्बोधकाद्यनेककारणजन्यत्वादसम्भव इति वाच्यम्। मात्रशब्दस्य प्रमितिकरणव्यवच्छेदार्थत्वात्। तथा च संस्कारेतरप्रमाणाजन्यत्वेसति संस्कारजन्यत्वं स्मृतिलक्षणं इति फलितम् तच्च स्मृतावस्तीति नासम्भवः। कार्यं बादरिरस्य गत्युपपत्तेरितिसूत्रम्।

मार्गोऽसावर्चिरादिर्गमयति परंधामगत्यादियोगात्
ब्रह्मोक्तेर्मुख्य भावादिति हि निरणयज्जैमिनिस्सत्यमेतत्।
वक्तव्यं त्वत्रकिञ्चिन्नयति परविदस्त्राग्वित ब्रह्मनिष्ठान्
तद्देहस्थात्मनिष्ठानपि मुखमिदयामी च संपूर्णनिष्ठाः॥ इति।

वादस्मिन्नतिक्षेपकस्य जैमिनेः पक्षमनूद्य शिष्याणां विशदप्रतिपत्त्यर्थं वक्तव्यं शेषमपि तत्राचष्टे मार्ग इति। अमावर्चिरादिमार्गः। परन्धाम तद्विष्णोः परमं पदमिति श्रुतिसिद्धं वैकुण्ठाख्यं परन्धाम गमयति। अथवा वैकुण्ठवासिनम्। अथ यदतः परोदिवोज्योतिर्दीप्यत इति दिव्यलोकवासिन निरतिशयदीप्तियोगेनधामशब्दवाच्यं परमपुरुषमेव गमयति। तत्रहेतुमाह। गत्यादीति।

दिव्यस्थानस्य तत्स्थानवासिनः परमपुरुषस्य च गमनेन प्राप्यत्वस्य सम्भवात्। न केवलं योग्यत्वेनायमर्थःसिद्ध्यति। अपि तु नपुंसकलिङ्गान्तस्य ब्रह्मशब्दस्य मुख्यत्वाच्चेति दर्शयति। ब्रह्माकारेति। भगवान् जैमिनिः परं ब्रह्मप्राप्नुवतामेवैषागतिरिति निरणैषीत्। उक्तमर्थमङ्गीकृत्यैव तत्र कञ्चिद्दोषं वक्तुं सत्यशब्दं प्रयुक्तवानाचार्यः। तदेवाहवक्तव्यमिति। प्रतिज्ञातमेव वक्तव्यं प्रकटयति। नयतीति। अयमर्थः—द्विधास्खलु ब्रह्मनिष्ठाः। स्वात्मशरीरकपरमात्मोपासकाः केचित्। परमात्मशरीरभूतस्वात्मनिष्ठाः परे। द्विविधानपितान् परविद्योमुखभेदेन ब्रह्मनिष्ठानर्चिरादिमार्गोगमयतीति जैमिनेरभिप्रेतार्थः।

ननु तर्हि विषमोपासकयोर्द्वयोस्संपूर्णब्रह्मनिष्ठत्वं कथमित्याशङ्क्याह। अमीचेति। विशेषणविशेष्यभाववैपरीत्योपदेशमात्रमेवात्रक्रियते। उभयत्रापि ब्रह्मप्राधान्यं जीवस्य। तद्विशेषणत्वमप्येकरूपमेवेत्येकार्थ्यसिद्धिः। यथा रामानुजं लक्ष्मणपूर्वजं चेत्यादिषूपदेशवैपरीत्येऽपि अर्थतत्वमेकरूपमेव। तदिदं सर्वमभिप्रेत्योक्तं सूत्रकारैः "अप्रतीकालम्बनान्नयतीति बादरायण" इति।

इति स्मृतिपरिच्छेदः ॥

हरिः ओं शुभमस्तु

॥ श्रीः ॥

॥ श्रीमते लक्ष्मीनृसिंह परब्रह्मणे नमः ॥

अथाद्रव्यपरिच्छेदः

इत्थं द्रव्यं निरूप्याद्रव्यं निरूप्यते। तत्प्रधानप्रयोजनं तु श्रुतिसिद्धार्थानामुदाहरणसिद्धिः। यथा संस्थानादि तत्तद्द्रव्यं प्रति नियमेनापृथक्सिद्धविशेषणं सत् तत्तद्द्रव्यनियताधेयं भवति तथा विश्वमपि परस्यापृथक्सिद्धविशेषणं सत् नियताधेयं भवति। तत एव विशेषणीभूत विश्वगतानां विकारादीनां तत्तद्द्रव्य द्वाराविशेषणत्वान्न स्वरूपे भगवतस्साक्षात् सम्बन्धः। तत

एव भगवतो निर्विकारत्वम्। एवं विशेषोदाहरणसिद्धये मुमुक्षूणामद्रव्यनिरूपणमावश्यकम्। अवस्थारहितत्वमद्रव्यलक्षणम्। अवस्थाचागन्तुकापृथक्सिद्धधर्म इति पूर्वमेवोक्तम्। इदं चाद्रव्यं द्रव्यादत्यन्तभिन्नम्। न पुनः कौमारिलजैनादिवद्भिन्नाभिन्नम्। इदं च समवायरूपसम्बन्धाभावेऽपि स्वभावादेव तत्तद्द्रव्यं विशिनष्टि। यथा समवायः स्वयं सम्बन्धान्तरा भावेऽपि स्वभावादेव विशिष्टव्यवहारमातनुते। अपर्यनुयोज्यत्वाद्वस्तुस्वभावानाम् शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः। इति हि स्मर्यते। स्वभावो नाम प्रामाणिकं रूपम्। अपृथक्सिद्धविशेषणतयोपलभ्यन्ते द्रव्यं प्रत्यद्रव्याणि। परेणापीह्येकमपराश्रितमेववर्तत इत्युद्घुष्यते। ययोरयुतसिद्धयोस्समवायः कल्प्यते। तयोरयुतसिद्धिरेव। न पुनस्समवायः कल्पनीयः। गौरवात्। स्वाभाविकापृथक्सिद्धिव्यतिरेकेण समवायस्यानुपलम्भात्। अतः स्वभाव एव द्रव्याद्रव्ययोस्सम्बन्धः।

न हि दृष्टेऽनुपपत्तिः। दृष्टापलापे विश्वमप्यपलप्येत। दृष्टमित्येव दृष्टं तावद्गृह्णन्ति प्रामाणिकाः। दृष्टानुरोधित्वादनुमानस्यानुमेयमपि दृष्टसजातीयमेव गृह्णन्ति। आगमोपि व्युत्पत्त्यादिसमये दृष्टमपेक्षते। एवं दूषणमप्यभिधीयमानं दृष्टानुरोधिचेत् भवत्येवदूषणम्। न चेद्दूषणमेव न भवति। व्याघातो हि सर्वदूषणानां सीमाभूमिः। स च दृष्टविरुद्धाभिधान प्रकाश्यमतीतमस्ति। सर्वं मिथ्या। मातामे वन्ध्या, यावज्जीवमहं मौनीत्यादिषु व्याघातवचनं दृष्टविरोधोद्घाटनमेव। अतो दर्शनानुरोधानङ्गीकारे सर्वापलापप्रसङ्गो दुर्वारः। अतो यथोपालम्भमद्रव्यस्वरूपाद्युपेयम्। ननु द्रव्यसिद्धावेवाद्रव्यसिद्धिः। अद्रव्यस्य द्रव्यप्रतियोगिकभेदविशिष्टरूपत्वेन द्रव्यासिद्धावद्रव्यस्याप्यसिद्धेः। एवं द्रव्यमप्यद्रव्यसिद्धिपूर्वकमेव अवस्थावत्त्वस्यैवद्रव्यलक्षणत्वात् अवस्थाचाद्रव्यमेव। तथा चावस्थारूपाद्रव्यरूपलक्षणाज्ञाने इतरव्यावृत्तलक्ष्यज्ञानासिद्धेः। अतोऽन्योन्यसापेक्षत्वात् द्रव्यसिद्धिरनुपपन्नेतिचेन्न।

किं द्रव्याद्रव्ययोरुपलम्भानुपपत्तिरन्योन्यापेक्षयोच्यते। उतव्यवहारानुपपत्तिः। उभयमपि न सम्भवति। एकस्मिन्नेवक्षणे एकेन्द्रियग्राह्ययोर्द्रव्ययोर्विशेषणविशेष्यभावेनोपलम्भात् विषयेन्द्रियसंयोगे अयं घट अयं गौरयं ब्राह्मणः अयं शुक्ल इति घटत्वादिरूपमद्रव्यं घटादिरूपं द्रव्यं च विशेषणविशेष्यभावेन एकदैवोपलभ्यते। न तु पौर्वापर्येण विलम्बेन वा। तस्माद्द्रव्याद्रव्ययोरुपलब्धौ नान्योन्यापेक्षा। एवं व्यवहारेऽपि नान्योन्यापेक्षा। व्युत्पत्त्यायत्तोहि व्यवहारः। व्युत्पत्तिश्चाधाराधेयतयायुगपदुपलभ्यमानयोर्द्रव्याद्रव्ययोर्विशिष्टप्रतीति विषययोर्मध्ये आधारभूतं विशेष्यमिदं द्रव्यशब्दवाच्यम्। आधेयं विशेषणमद्रव्यशब्दवाच्यमिति भवति। अतो व्युत्पत्तिमूलव्यवहारेऽपि न परस्परापेक्षा। लोके बाला अपि विशेषण विशेष्य भावेन

वस्तुस्वरूपं युगपदुपलभ्यशिक्षकशिष्यया इदं द्रव्यमिदमद्रव्यमिति व्युत्पत्तिं गृह्णन्ति। अतो लोके दृष्टविशेषणविशेष्यादि विभागानुसारेणद्रव्याद्रव्यविभागपरिकल्पनं न्याय्यम्।

किञ्च सामान्यविशेषरूपधर्माः धर्म्यतिरिक्ता अनुभूयन्ते। तेषामपलापे भ्रान्ति बाधसंशयादयो न सङ्गटेरन्। तथा हि साधारणकारे दृष्टे हि शुक्तिरज्वादौ रजतसर्पादिभ्रमः। शुक्तित्वरज्जुत्वदर्शनेसति भ्रमनिवृत्तिः। एवमूर्ध्वा ग्रत्वरूपसामान्यधर्मेण स्थाण्वादौ दृष्टे पुरुषादि संशयः। अतस्सर्वलोकव्यवहारसिद्धये द्रव्यातिरिक्तं सामान्यविशेषरूपमद्रव्यं सर्वैर्दुरपह्नवमिति द्रव्याद्रव्यविभागो नानुपपन्नः। अथैवं रीत्या शौक्ल्यादिधर्मेऽपि धर्मान्तराभ्युपगमप्रसङ्गः। तत्रापि भ्रान्ति बाधाद्युपलम्भात्। नचेष्टापत्तिः। अनवस्थादोषात् शौक्ल्यादौ व्यावृत्तिस्तत्तत्पदार्थस्वरूपमेव न धर्मान्तरमिति श्रीभाष्यविरोधाच्च। अतो धर्मे धर्मान्तराभावेऽपि भ्रान्ति बाधादिव्यवहारवत् द्रव्येऽप्यद्रव्याभावेऽपि तादृशव्यवहारनिर्वाहसम्भवात्। द्रव्यातिरिक्ताद्रव्यसाधनं निरर्थकमितिचेदुच्यते।

गौरयं ब्राह्मणोऽयं नीलोऽयमितिविशिष्टप्रतीतेस्सार्वजनीनत्वाद्यथोपलम्भं गोत्वब्राह्मणत्वादिरभ्युपेयः। गोत्वादिकं विनागवादेरनुपलम्भात्। अन्यथा गोत्वापलापे गवादेरप्यपलापेन द्रव्यमपि न सिध्येत। धर्मेधर्मान्तरस्तूपलम्भाभावादनवस्थादोषाभ्युपगम्यते। शौक्ल्यादि धर्माणां स्वतोव्यावर्तकत्वेन भ्रान्त्यादेरसम्भवात्। अतो यथोपलम्भं द्रव्याद्रव्यविभागो युक्त इति सिद्धम्।

तथाविधमद्रव्यं दशविधम्। सत्वरजस्तमश्शब्दस्पर्शरूपरसगन्धसंयोगशक्तिभेदात्। गुरुत्वद्रवत्वस्नेहसंस्कारसंख्यापरिमाणपृथक्त्वविभागपरत्वापरत्व कर्मसामान्यसादृश्यविशेषसमवायाभाववैशिष्ट्यादीनां यथासम्भवमुक्तेष्वन्तर्भावं वक्ष्यामः। उक्तेषु कस्यचिदन्तर्भावं केचिदाचार्या मन्यन्ते। तच्चतत्प्रकरणेस्पष्टीभविष्यति। तत्रप्रकाशसुखलाघवादिनिदानमतीन्द्रियं शक्त्यतिरिक्तमद्रव्यं सत्वम्। रजस्तमसोरतिव्याप्तिवारणाय प्रथमं विशेषणम्। शब्दादिपञ्चकव्यावृत्त्यर्थं द्वितीयम्। शक्त्यतीन्द्रिय संयोगादिव्यावृत्त्यर्थं तृतीयम्। तच्च द्विविधं। शुद्धमशुद्धं चेति। रजस्तमोशून्यद्रव्यवृत्तिसत्वं शुद्धसत्वम्। तन्नित्यविभूतौ। रजस्तमस्समानाधिकरणसत्वमशुद्धसत्वम्। तच्चत्रिगुणद्रव्ये। एतच्चप्रकृतित्वावस्थायामनुद्भूतं देहारम्भकमहदादि विकारादिषूद्भूतम्। अत्रप्रकाशः वस्तुयाथात्म्यावबोधः। तन्निदानम्। तज्जननैकान्तस्वभावं लाघवं चारोग्यं तद्धेतुः। सात्विकाहारादिसेवने आरोग्योपलम्भात्। ननु,

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥

इत्यनेन सत्वस्यापि बन्धहेतुत्व मुच्यते । अन्यत्रतु सत्वस्य परम्परया बन्धनिवृत्ति हेतुत्वं जायमानस्त्वीत्यादिभिरभिधीयते । ततो द्वयोर्विरोधः इतिचेन्न । एष सत्वाख्यो गुणो महदादिप्रकृतिपरिणामारब्ध देवमनुष्यादिदेहे स्वभावतस्सत्वादिगुणरहितमात्मानं सुखसङ्गेन च बध्नाति । ज्ञानसुखयोस्संयोगो जायते । तत्वसाधने लौकिके वैदिके च कर्मणि प्रवर्तते । ततश्च तत्तत्फलानुभवसाधनभूतेषु योनिषु जननम् । ततः पुरुषस्यातिशयितज्ञानसुखजननम् । तद्द्वारापुनस्सत्वोद्रेकेणोत्तरोत्तरसम्यग्ज्ञानजनन देह वियोगानन्तरमात्मयाथात्म्यविरुद्धजनन म् । तत्साधनपुण्यकर्मकरणादत्यन्तसत्वोद्रेकेण फलाभिसन्धिरहितभगवदाराधनरूपनित्यनैमित्तिककर्मानुष्ठानम् । तेन प्रतिबन्धकनिवृत्तिपूर्वक भगवत्प्राप्तिरित्येव क्रमेणसुखहेतुर्भवति । एव च सत्वकार्यं बन्धनं न संसारहेतुः । किन्तु देहिनः देहस्थितिमात्रे रूप सदुक्तक्रमेण मोक्षहेतुः अतोनोक्तदोषः ।

नन्वेवमपि प्राकृतसत्वस्य सर्वदा रजस्तमोमिश्रितत्वेन विरुद्धरजःकार्यप्रतिबन्धात् ज्ञानादिकार्यं कथं सिद्धयतीति वाच्यम् । प्राचीनकर्मवशेन देहाप्यायनभूताहारवैषम्येन च सत्वादीनां परस्परमुद्भवाभिभवस्य शास्त्रसिद्धत्वाच्च । रजस्तमसी अभिभूयवर्तमानस्य सत्वस्य स्वकार्यकरणे बाधकाभावात् । एवं सत्वाभिभवेरजस्तमसोः स्वकार्यसिद्धिः । अन्यथा त्रयाणामपि प्रकृतेः स्वाभाविकगुणत्वेन सामानाधिकरण्येन च कदापि स्वकार्यं न स्यात् ।

तत्रसत्वं निर्मलत्वात् प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ।

इत्युपक्रम्य, "ऊर्ध्वं गच्छन्ति सत्वस्था" इत्यन्तेन सत्वकार्यविशेषाश्श्रीमद्गीताचार्येणानुगृहीताः । लोभप्रवृत्त्यारम्भादिनिदानमतीन्द्रियशक्त्यतिरिक्तं अदृश्यं रजः । सत्वव्यावृत्त्यर्थं प्रथमं विशेषणम् । शेषं पूर्ववत् । इदं च प्रकृत्यवस्थायामनुद्भूतमपि महदादिविकारे उद्भूतम् । अत्रलोभः स्वकीयद्रव्यस्यत्यागशीलता । प्रवृत्तिः प्रयोजनमनुद्दिश्यापि चलनस्वभावता । आरम्भः फलसाधनभूतानां कर्मणामारम्भः । एतेषां रजोहेतुः । एव रागतृष्णाहेतुश्च भवति । रागो योषित्पुरुषयोरन्योन्यस्पृहा । तृष्णा शब्दादिविषयस्पृहा । सङ्गः पुत्रमित्रादि सम्बन्धिषु संश्लेषस्पृहा । एतेषामपिरजोहेतुः । एष रजोगुणो देहिनां फलसाधनेषु कर्मसु स्पृहा जननद्वारेण प्रवृत्तिमुत्पाद्य पशुपुत्रवृष्टयन्नादिफलकर्मानुष्ठानजनितपशुपुत्रादिभोगप्रवणतामुत्पाद्य पुनः पुनः फलसाधनकर्मसङ्गं यावद्देहवियोगकालं जनयति । देहवियोगानन्तरं फलार्थं कुर्वतां कुले जनयित्वा स्वर्गादिफलसाधनकर्मानुष्ठानेनोद्रिक्तरजस्कं कृत्वा फलाभिसन्धिपूर्वक कर्मारम्भपरम्परारूपसांसारिकदुःखप्रायसुखं जनयित्वा बन्धकं भवति । पुनरपि स्वर्गादिफलहेतु

भूतरजोगुणाभिभूतो देही फलसाधनभूतं कर्मानुष्ठाय पुनरपि जनित्वा तदेवानुष्ठाय स्वर्लोकभूलोकादिषु परिवर्तते। अतो रजोगुणस्यांसारिकदुःखहेतुर्बन्धाय भवतीति। एतदपि

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥

इत्युपक्रम्य मध्येतिष्ठन्ति राजसा इत्यन्तेन गीताचार्येणानुगृहीतम्। प्रमादमोहालस्यादिनिदानमतीन्द्रियं शक्तयतिरिक्तमद्रव्यं तमः। रजस्तमन्वादिव्यावृत्त्यर्थं प्रथम विशेषणम्। शेषं पूर्ववत्। अत्र प्रमादः कर्तव्यात् कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानम्। मोहोविपर्ययज्ञानम्। आलस्यं कर्मस्वनारम्भस्वभावः। स्तब्धतेति यावत्। एतेषां हेतुस्तमोगुणः। परापरस्वरूपतिरोधायकः निद्राहेतुश्च भवति। एष तमोगुणस्सर्ववस्तुयाथात्म्यज्ञानमावृत्य विपरीतज्ञानमुत्पाद्य पुनर्निद्रालस्यप्रमादमोहादिभिरुद्रिक्ततमस्कं कृत्वा देहवियोगे मूढयोनिषु जनित्वा सर्वपुरुषार्थसाधनकर्मवैमुख्यमुत्पाद्य उत्तरोत्तरनिकृष्टगुणवृत्तिषु रुचिं जनयित्वाऽधो गतिहेतुर्भवति। प्रथममन्त्यत्वम्। ततस्तिर्यक्त्वम्। ततः कृमिकीटादिकम्। ततस्स्थावरत्वम्। ततो गुल्मलतात्वम्। ततश्शिलाकाष्ठलोष्टतृणादित्वम्। एवं रूपाधोगतिहेतुस्तम इति। एतत्सर्वं,

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥

इत्युपक्रम्य जघन्यगुणवृत्तिस्था अधोगच्छन्ति तामसाः। इत्यन्तेन श्रीमद्गीताचार्येणानुगृहीतम्। सत्वरजस्तमोमयप्रकृति परिणामरूप भोग्यभोगोपकरण भोगस्थानात्मकजगत्सत्वरजस्तमसामुद्भवाभिभवभेदेनाहारादीनां च त्रैविध्यमुक्तम्। एवं सात्विकाहारादिसेवनतया सत्वोद्रिक्तप्रकृति परिणामभूतशरीराधिष्ठातृत्वेन च पुरुषस्य सात्विकत्वं सत्वोत्तरमगवदाराधनत्व येषेणफलाभिसन्धिदोषराहित्येन कर्तृत्वत्यागममतात्यागपूर्वकानुष्ठानेन च कर्मणा सात्विकत्वम्। एतादृशकर्मानुष्ठानाद्युपयोगि बुद्ध्यादेस्सात्विकत्वम्। एवं राजसतामसाहारसेवनया रजस्तम उद्रिक्त प्रकृतिपरिणामभूतशरीराधिष्ठातृत्वेन च पुरुषस्य राजसत्वतामसत्वे। रजोगुण भूयिष्ठकेवलेन्द्राद्याराधनरूपत्वेन तमोगुणभूयिष्ठप्रेताद्याराधनत्वेन फलसङ्गेन कर्तृत्वाभिमानपूर्वककर्मानुष्ठानेन च कर्मणां राजसत्वतामसत्वे। तदनुष्ठानोपयोगि बुद्ध्यादेश्च राजसत्वादिकं च।

आहारस्त्वपि सर्वस्य त्रिविधो भवतिप्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥

इत्युपक्रम्य, न तदस्ति पृथिव्यां वादिवि देवेषु वा पुनः। इत्यन्तेन प्रस्पष्टमनुगृहीतम्। त्रीण्यप्येतानि यावत् प्रकृतिव्याप्तान्यनित्यानि प्रळयदशायां समानि सृष्ट्यादौ विषमाणि सन्ति सृष्टिस्थितिसंहारोपयुक्तानि परमेश्वरसङ्कल्परूपसहकारिभेदात् परस्परोद्रेकाभिभवकार्यभाञ्जि तत्तद्दृष्टोपष्टब्धपुरुषेषु कालभेदेन प्रकाशादिकार्यकराणि भवन्ति। यथोक्तं भगवता-पराशरेण—

वस्त्वेकमेवदुःखाय सुखायेर्ष्यामयाय च । कोपाय च यतस्तस्माद्वस्तुत्रस्त्वात्मकं कृतः ॥

तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते ॥

तस्माद्दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम् ।

इत्यादि । एकमेव योषिद्वस्तु भर्तुस्सुखाय सपत्न्याः दुःखाय कामुकस्य मोहाय योषिदन्तरस्येर्ष्यायै पुत्रादेरभीष्टाय च भवतीति लोकदृष्टमेतत् । अतस्सर्वं प्राकृतं वस्तु सत्त्वरजस्तमोमयम् । इदमेव पुरुष भेदेन कालभेदेन सहकारिभेदेन च बन्धक मुक्तारकं चेति दिक् । इदमेव रजस्तमसी परस्परसाहाय्येन देवतामि भवेऽसुरराक्षसमानुषान्यायवत्सत्त्वाभिभवे प्रयतेते । श्रीभाष्ये च रजस्तमसोर्निबर्हणद्वारा सत्त्वनिवृद्धिर्भवतीत्युक्तम् । श्रीमद्गीतायामपि ।

द्वौभूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ॥

इत्याद्यम्य, मामात्मपरदेहेषु प्रद्विषन्तोभ्यसूयकाः । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥

मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।

इत्यन्तेन सत्त्वाभिभावकत्वेन रजस्तमसोरेकराश्येनासुरप्रकृतित्वमुक्तम् । अत एव न त्रिधा विभागः कृतः । बन्धकत्वोपाधिनासत्त्वाभिभावकत्वोपाधिना वा रजस्तमसोरैकराश्यात् । तर्ह्यनन्तराध्याये,

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

इति त्रिधाकीर्तनमसङ्गतमितिचेन्न । सत्त्वाभिभावकत्वबन्धकत्वसाम्येपि रजस्तमसोः प्रकीर्तनं-लोभप्रवृत्त्यादिप्रमादमोहाद्यवान्तरकार्यभेदजनकत्वप्रदर्शनेन तत्साङ्गत्यात् । नन्वेवमपि

यया धर्ममधर्मं च कार्यं चाकार्यमेव च । अयथावत् प्रजानाति बुद्धिस्सापार्थ राजसी ॥

अधर्मं धर्ममितिया मन्यते तमसावृता । सर्वार्थान् विपरीतांश्च बुद्धिस्सापार्थतामसी ॥

इति द्वयोरपि वस्तु याथात्म्यतिरोधानेन मोहकत्वसाम्यात् कार्यभेदाभावेन पृथगभिधानवैयर्थ्यं स्यादितिचेन्न । असमग्रवेदनं राजसकार्यम् । अन्यथावेदनं तामसकार्यमिति विशेषादसमग्रवेदनं न मोहहेतुः । एष जानन्नपि समग्र न जानाति । अथापि न मुग्ध इति व्यवहारात् । अन्यथा वेदनं तु मोहहेतुरेव, तस्यैव तमः कार्यत्वमिति कार्यभेदात् पृथगभिधानावैयर्थ्यं बोध्यम् । अन्ये तु प्रकारान्यथाभावः राजसकृत्यम् । प्रकार्यन्यथाभावस्तामसकृत्यमिति विशेषः । प्रकारान्यथा-

त्वं निरूपितस्वरूपविशेषकधर्मवैपरीत्यम्। तत्पीतशङ्खभ्रमेतद्राजसकृत्यं स्वरूपनिरूपकधर्मवैपरीत्यं प्रकार्यन्यथात्वम्। तच्च शुक्तिरजतभ्रमेतत्तामसकार्यमित्याहुः।

अधर्मं धर्ममिति यामन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिस्सा पार्थतामसी॥

इति प्रमाणेन सर्ववस्तुविपरीतज्ञानस्यैवतामसकार्यत्वाभिधानादयं विभाग उपपन्न इति तस्यैव मोहजनकत्वमित्यलं प्रसक्तानुप्रसक्तया।

इति द्रव्यपरिच्छेदे सत्वरजस्तमोनिरूपणम्॥

अथ शब्दोनिरूप्यते। अस्मदादि श्रोत्रग्राह्यश्शब्दः। नित्यमुक्तेन्द्रियाणां ग्राह्यनियमाभावात् श्रोत्रग्राह्यत्वस्य रूपादावपि सत्वादतिव्याप्तिवारणायास्मदादीति। आस्माकीनेन्द्रियाणां ग्राह्यनियमानतिवृत्तित्वान्नातिव्याप्तिः। स च पञ्चभूतवृत्तिः। सः द्विविधः। वर्णात्मको अवर्णात्मकश्चेति। अकचटतपयादिवर्णगतप्रकारान्यतमवान् वर्णात्मकः। स च मनुष्यतालव्यादिभेदत्रयः। स च क्षकारेण सह एकपञ्चाशत् प्रकारः। मातृकापाठेकचिल्लळयोरभेदात् पञ्चाशत् प्रकारतोच्यते। मातृकापाठे च अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः इति षोडशस्वराः। कादिमान्तास्स्पर्शाः पञ्चविंशतिः। य र ल व श ष स ह ळ क्ष इति दश एते एकपञ्चाशद्वर्णाः एव लिख्यन्ते। अत एकपञ्चाशत् सङ्ख्याकोवर्ण इति सिद्धम्। न च क्षयादीनां सत्वात् कथमेकपञ्चाशत्सङ्ख्याकत्वमितिवाच्यम्। यरलवादिभिस्सहककारस्य संयोगेनसिद्धयातेषामाधिक्याभावात्। न च षकारेण ककारस्य संयोगे क्षकारसिद्धया नाधिक्यमितिवाच्यम्। मातृकाध्यान श्लोके क्षकारस्य बीजाक्षरत्वेन पृथग्गणनात् अकारादीनां गणनाच्च। अत एव मातृकापाठेऽपाणिनीयस्यापि पृथग्वर्णता प्लुतादेर्निवृत्तिश्च सङ्गच्छते। कोऽसौ मातृकाध्यानश्लोकः। केषां च वर्णानां तस्मिन् परिगणनमस्ति। कोसौ तदनुसारिमातृकापाठ इति चेदुच्यते।

आधारं तु चतुर्दळारुणलसद्वासान्तवर्णात्मकं स्वाधिष्ठानमनेकवैद्युतनिभं बालान्तषट् पत्रकम्। रक्तामं मणिपूरकं दशदळं डाद्यं फकारान्तकं पत्रैर्द्वादशभिस्त्वनाहतमिदं हैमं कठान्तैर्वृतम्॥

मात्रामिर्दशषोडशस्वरयुतं ज्योतिर्विशुद्धाम्बुजं हक्षेत्यक्षरबीजयुग्मदळयुग्रक्ताभमाज्ञाम्बुजम्। तस्मादूर्ध्वगतं प्रभासितमिदं पद्मं सहस्रच्छदं नित्यानन्दपदं सदाहरिपदं नित्यं नमस्येतराम्॥ इति

मातृकाध्यानश्लोके आधारशब्दार्थे गुदेवशषसाश्चत्वारोवर्णास्स्वाधिष्ठानशब्दिते लिङ्गेबभमसरलाष्टवर्णाः, मणिपूरकशब्दिते नाभौ डढणतथदधनपफ इति दशवर्णाः अनाहितशब्दिते हृदये कखगघ

ङचछजझञटठ इति द्वादशवर्णाः विशुद्धां वुजशब्दिते तालुनि। अआइईउऊऋॠऌॡएऐओऔ अंअः। इति षोडशवर्णाः।

आज्ञाम्बुजशब्दिते भ्रूमध्ये हक्षेत्यक्षरयुग्मम्। एवं प्रकारेण पञ्चाशद्वर्णाश्रयतत्तदवयव शोभिता मातृकाभिमानिदेवतामूलप्रकृतिः। तत ऊर्ध्वं सहस्राक्षरात्मकसहस्रदलपद्माकारं नित्यानन्दरूपं श्रीमतो वासुदेवस्य स्थानं नित्यविभूति नमस्कामीत्यर्थादुक्तवर्णसङ्ख्यासिद्धिरिति। अत एव श्रुतौ क्वचित् सहस्राक्षरत्वकथनमपि। नित्यविभूतौ सहस्राक्षरत्वप्रतिपादनमितिसङ्गच्छते। क्वचित्तत्राधिक्योक्तिस्तेषामेववर्णानां सन्दर्भविशेषादुपपद्यते। अत्वकत्वादि शून्यो अवर्णात्मकश्शब्दः। स च वादित्रवारिधरमारुतमागादिव्यङ्ग्यः। ननु शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धे गृह्यमाणत्वात्। घटवदित्यनुमानेन शब्दस्यद्रव्यत्व सिद्ध्यतीतिचेन्न। शब्दस्य द्रव्यत्वे सिद्धेन साक्षादिन्द्रियसंबन्धेन साक्षात्कारासिद्धिः। तत्सिद्धौ तत्सिद्धिरित्यन्योन्याश्रयात्। किञ्चशब्दसंयुक्तनिष्ठत्वस्यैवेन्द्रियसम्बन्धात्, हेतोः स्वरूपासिद्धेः। न च श्रोत्रस्याकाशत्वाच्छब्दस्याकाश गुणत्वात् साक्षात् सम्बन्धसम्भवेन न स्वरूपासिद्धिरिति वाच्यम्। श्रोत्रेन्द्रियस्याहङ्कारिकत्वेन शब्देन सह साक्षात्सम्बन्धाभावात्।

किञ्च शब्दस्याकाशगुणत्वमपि न सम्भवति। मेघो गर्जति शङ्खोनदति मेरीध्वनति-वायुरुन्नदति, जर्झरीघा उद्घोषान्त। बाह्यश्चटचटाकरोतीत्यादिलोकोपलम्भात्। श्रुतिरपि शब्दस्य भूतान्तरनिष्ठत्वमुपपादयति। नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामीति वायोरेव वेदात्मना परिणतिरुपलभ्यते। ततुवायोश्शब्दाधारत्वमन्तरेण न सङ्गटते। एवं तस्य हवा एतस्य महतो भूतस्य निःश्वसितमे तद्यदृग्वेदः इत्यादिकमपि ग्राह्यम्। अतस्सर्वभूतवृत्तिशब्दः द्विविधोयं शब्दश्श्रोत्रसन्निहित एव श्रोत्रेन्द्रियेण गृह्यत इत्येकः पक्षः।

अस्मिन् पक्षे दूरस्थितमेर्यादिताडने सतिशब्दवद्भेर्यादिवयवागमनेनश्रोत्रदेशसमीपप्राप्तौ संयुक्तनिष्ठत्वसम्बन्धेन शब्दस्य साक्षात्कारः। तदा प्राच्या शब्दः दूर शब्द आसन्ने शब्द इति दिगादि प्रतीतिस्त्वनुमानादिभिर्भवति। श्रोत्रं तत्र तत्र गत्वा पञ्चभूतस्थितं शब्दं गृह्णातीत्यपरः पक्षः। अस्मिन् पक्षेचक्षुरिन्द्रियस्यव श्रोत्रेन्द्रियस्यापि वृत्त्यादूरस्थित वस्तुवृत्तिशब्दसम्बन्धात् प्राच्यादिदिग्विशेषाधीनां द्रव्यत्वाच्छ्रोत्रेण द्रव्यग्रहणासम्भवात् कथं तत्साक्षात्कार इति वाच्यम्। श्रोत्रादीनामपि विशेषणविधया द्रव्यग्राहकत्वस्य प्रकृतिपरिच्छेद समर्थितत्वात्। सचायं शब्दः आकाशादि भूतैस्सहजायते नश्यति च। अत एवाकल्पं सर्ववर्णानामैक्यम्। समस्तवीचीत्वादयो व्यञ्जकवायुधर्मास्तद्व्यङ्ग्यत्व प्रयुक्तश्शब्देतद्व्यवहारः। ननु शब्दस्यादृव्यत्वमभिव्यङ्ग्यत्वं च कथं

निर्णीयते। द्रव्यत्वकार्यत्वयोश्श्रुत्यादिसिद्धत्वात्। तथाहि, "यद्वेद दौस्वरः प्रेक्तोवेदान्ते च प्रतिष्ठित" इत्यत्रवर्णानां वर्णान्तरोपादानत्वबोधनात्। नचाद्रव्यस्योपादनत्वम् निमित्त वाश्रयणं तु प्रकृतिलीनपदस्वारस्यविरुद्धम्। न हि कार्यस्यानुपादाने लयस्यसम्भवति। श्रीभाष्यकारसूक्ति विरोधश्च।

तथा च वेदार्थसंग्रहे वेदाद्यन्तरूपतया वेदबीजभूत प्रणवस्थेत्यु क्त्वा सर्वस्य वेदजातस्य प्रकृतिः प्रणवः। प्रणवस्य च प्रकृतिरकारः, प्रणवाकारोवेदः। स्वप्रकृतिभूते प्रणवेलीनः प्रणवस्त्वप्रकृतावकारे लीनः। तस्य प्रणवप्रकृतिभूतस्याकारस्य यः पराभाव्यः स एव महेश्वर इत्युक्त्वावाचकजातस्याकारप्रकृतित्वं वाच्यजातस्य ब्रह्मप्रकृतित्वं च स्पष्टमित्युक्तम्। श्रीगीताभाष्ये च अक्षराणामकारोहमित्यत्राक्षराणां मध्येऽकारो वै सर्ववागिति श्रुतिसिद्धं सर्ववर्णानां प्रकृतिरकारोहमिति। तथा परिणामित्वं च शब्दस्याक्तं भाष्ये। प्राकृतप्रळये सृष्टु प्रजापतेर्भूताहङ्कारपरिणामशब्दस्य च विनष्टत्वादिति। तथा दीपेष्यव्याकृतपरिणामशब्दमयेषु वेदेष्वित्यादि। अतश्श्रुत्या श्रीसूक्त्या च शब्दस्य द्रव्यत्वकार्यत्वयोस्स्फुट प्रतीतेरिति चेदुच्यते। शब्दस्याद्रव्यत्वमेव भाष्यकारामिप्रेतम्। सत्वरजस्तमसामद्रव्यत्वसाधनाय श्रीभाष्योक्तयुक्तीनामत्रापि सत्वात्। अव्याकृताहङ्कार परिणामव्यपदेशापि शब्दस्यागन्तुकधर्मत्वाभिप्रायेणघटते। श्रीमद्गीताभाष्येपि मात्रास्पर्शा इत्यत्र शब्दस्पर्शरूपरसगन्धस्याश्रया इति त्रयोदशे पञ्चदशेन्द्रिय गोचरा इत्यत्र शब्दस्पर्शरूपरसगन्धा इति स्थलान्तरे च शब्दस्पर्शरूपरसगन्धा इत्युक्त्वा च स्पर्शरूपरसादिवच्छब्दस्याप्यद्रव्यत्वप्रतिपादनाच्च यद्वदादाविति श्रुतेर्वेदाभिमानिदेवतायाः प्रणवाभिमानि देवताप्रकृतेः। तस्या अकाराभिमानि देवता प्रकृतिरित्यर्थान्न वर्णानां वर्णान्तरोपादानत्वशङ्क्या शब्दस्य द्रव्यत्वसिद्धिः।

अत एव श्रीभाष्यसर्वस्ववेदिभिर्व्यासाचार्यैर्यस्य वेदाश्शरीरमित्यत्रशब्दस्वरूपवेदस्य द्रव्यत्वघटितशरीरलक्षणाभावात् कथं शरीरत्वमित्याशङ्क्य वेदशब्दस्य वेदाभिमानिदेवतापरत्वमुक्तम्। यद्युक्तरीत्या शब्दस्यद्रव्यत्वं भाष्यकारमिप्रेतं स्यात्, तदा यस्यवेदाश्शरीरमित्यत्राशङ्कानुत्थितेस्तत्परिहारप्रकारकथनं व्यासाचार्याणां निष्फलं स्यात्। तर्हि वेदार्थसंग्रह श्रीसूक्तेः स्वारस्यहानिः। तत्र वेदाख्यशब्दानां प्रणवः प्रकृतिः प्रणवस्याकारः प्रकृतिरितिवर्णान्तरोपादानत्वकण्ठोक्तेरितिचेदुच्यते। वर्णानां वर्णान्तरोपादानत्वकथने श्रीभाष्यकाराणां न भरः। तस्या प्रकृतत्वेनानपेक्षितत्वात् भूताहङ्कारपरिणामभूतशब्दस्य विनष्टत्वात्।

अव्याकृतपरिणामशब्दमयेषु वेदेष्विति श्रीभाष्यदीपयोर्विरोधाच्च किन्तु, यद्वेदादौस्वर इति वाक्यगत महेश्वरशब्दस्य श्रीमन्नारायण परत्वस्थापन एव भरः। देवतान्तरपरतया शङ्क्य-

ACADEMY ... SANSKRIT RESEARCH
MEL... LIBRARY
Acc 19511
Date 01-2-96

मानानां श्रौतपुरुषात्मसद्ब्रह्मशिवाकाशादिशब्दानां विष्णुपरत्वस्थापनप्रकरणात्। तत्र समाख्याविशेषात् महेश्वरशब्दस्य रुद्रपरत्वशङ्कानिरसनाय अकारवाच्यविष्णुरेव महेश्वरशब्दवाच्य इति निर्णयाय च तथा श्रुत्यर्थविवरणात्। अ इति भगवतो नारायणस्य प्रथममभिधानं भगवतो वाचकमकारं प्रयुञ्जानेन किं नाम मङ्गळं न कृतमिति भाष्यस्थोक्त्याकारेणोच्यते। विष्णुस्सर्वलोकेश्वरोहरिः अकारो विष्णुवाचक इति श्रुतिस्मृतिभ्यां चाकारस्य विष्णुपरत्वे सन्देहाभावात्। तेन महेश्वराशब्दार्थं विवरणे महेश्वराशब्दो विष्णुपर इति। स एव प्रकृत दहरपुण्डरीके उपास्य इति प्रतिपादन एव भाष्यकाराणां तात्पर्यं, नतु वर्णानां वर्णान्तरोत्पत्तिप्रतिपादने। अतो न द्रव्यत्वं शब्दस्य भाष्यकाराभिप्रेतम्। अत्र प्रकृतिशब्दस्योपादानपरत्व प्रसिद्ध्या साक्षादुपादानोपादेय भावस्य वर्णेषु परस्परं बाधादधिष्ठानदेवताद्वारेणेत्युक्तम्।

यद्वा प्रकृतिशब्दो मूलपरः। सर्ववर्णानां प्राथमिक इत्यर्थः। यद्वा स्पर्शान्तस्थोष्मणां सर्वेषां हलामकारसहितोच्चारणेनैव स्वरूपावगत्या तस्य सर्वमूलत्वम्। सर्वोच्चारणमूलभूतोकार इत्यर्थः। बह्वृचोपनिषदि अकारो वै सर्ववाक्। सा च स्पर्शोष्मभिः व्यज्यमाना बह्वी। नानारूपा भवतीति। समस्तशब्दमूलत्वादकारस्य स्वभावतः। समस्तवाच्यमूलत्वाद्ब्रह्मणोपि स्वभावतः। वाच्यवाचकस्सम्बन्धस्तयोरर्थात् प्रतीयते। इति श्रुतिस्मृतिभ्यामकारस्य सर्ववर्णानां मूलत्वमभिहितम्। नोपादानत्वम्। तथा च प्रणवोपक्रमत्वाद्वेदस्य प्रणवोमूलम्। प्रणवस्याकाराकारमकाररूपस्याकारोपक्रमत्वादकारोमूलम्। तादृशाकारवाच्यो यस्समहेश्वर शब्दवाच्य इति नारायण एव दहरविद्योपास्य इति वाक्यार्थः; अतो न वर्णस्य वर्णान्तरोपादानत्व प्रयुक्त द्रव्यत्वशङ्कागन्धोपि। नन्वकारोवै सर्वावागित्यकारोपादानत्वं क्वचिच्छ्रूयते। सर्वत्र हरिरोमित्युपक्रमाद्धकारोपादानत्वं क्वचिदितिपरस्परविरोध इति चेन्न। अकार एव पूर्वतया परतयावस्थित्वापोडशत्वं वर्ण विसर्गमुपलक्षयति। स एवोपादानम्। नत्वकारमात्रम्। अत एव हलामचां च मध्ये द्व्यात्मकस्य तस्य स विसर्गपाठः। अनुभवसिद्धं च विसर्गपूर्वकाकारोच्चारेण संहितायां हत्वं दध्यत्रेत्यत्रेकारस्य यत्ववत्। अत एव लक्ष्मीतन्त्रे अ इति ब्रह्मेति षोडशशिरस्क एवाकार आम्नायते।

अन्यथा एति ब्रह्मेति स्यात्। तथा च विसर्गपूर्वको वा विसर्गपरको वा अकार एव सर्वत्रोपादानमिति न विरोधः। केचित्तु प्रमाणभूततन्त्रे क्वचिदपि हकारपरिग्रहो नास्ति। तथा सति हकारो वैसर्वा वागिति श्रूयेत। किञ्च, सविसर्गस्याकारस्य प्रणवघटकत्वे ओमिति रूपं न स्यात्। अतः प्रथमः केवलाकार एव सर्वत्रोपादानं, हरिरोमित्युपक्रमात् हकारोपक्रमत्वं क्वचिच्छ्रूयत इति प्रवादस्तु यथाऽकारस्य सर्वकारणभूत परमात्मवाचक हरिशब्दघटक हकारस्यापि परमात्मवाचकत्वाभिधानादुपपन्न इत्याहुः।

नन्वेवमप्योंकारस्य प्रकृतित्वे, ओङ्कारप्रभवावेदाः, प्रणवाद्यास्तथा वेदाः, ओङ्कारेण सर्वा वाक् संत्रण्णा, ओङ्कार एवेदं सर्वमिति प्रणवप्रकृतित्वकथनस्य का गतिरिति चेन्न। प्रणवाश्च भूताकारप्रकृतित्वात् प्रणवप्रकृतित्वोक्तेर्विरोधाभावात्। एवं प्रणवस्य वेदत्रयात्मकत्वं क्वचित् श्रूयते। क्वचिद्वेदचतुष्टयात्मकत्वं श्रूयते। तत्रापि प्रणवस्य मकारपर्यन्तवर्णत्रयात्मकत्वे वेदत्रयात्मकत्वं मन्त्रशास्त्रे मकारोत्तरमर्धमात्रात्मकोनादसंज्ञकः कश्चिदस्तीति प्रसिद्धिः। तत्साहित्येन प्रणवस्य वर्णचतुष्टयात्मकत्वाद्यजुस्सामाथर्वरूपवेदचतुष्टयात्मकत्वमिति विरोधपरिहारो बोध्यः। अकारात् प्रणवोत्पत्तिः कथमितिचेदकारवाच्यात् परमात्मनः प्रणवाधिष्ठातृदेवताया उत्पत्या उपचारात्तद्व्यवहार इति बोध्यम्। एवं प्रणवाश्च भूताकारादेरेकैकस्य गार्हपत्यगायत्री प्रथमपादऋग्वेदस्वर्लोकादिप्रकारेणयोयमवान्तरभेदश्रुतिभिः प्रतिपाद्यते। सभेदस्तदुपासननिष्ठैस्तत्फलविशेषायानुसन्धेय इति नेह प्रकाश्यते।

ननु वर्णानामनित्यत्वेन तद्घटित शब्दस्याप्यनित्यत्वेन तत्समूहरूप वेदस्यकथं नित्यत्वमितिचेदुच्यते। न वयं स्वरूपतो वेदानां नित्यत्वं वदामः। किन्तु नित्यैकरूपक्रमविशेषोच्चार्यमाणत्वरूपं नित्यत्वम्। तच्च पूर्वपूर्वोच्चारणक्रमविशेषो यादृशः तादृशेनैवक्रमेण उत्तरोत्तरोच्चार्यमाणत्वरूपं नित्यत्वमितिनिष्कर्षः। तच्च पूर्वपूर्वाध्यापकाध्ययनानुक्रमानुसारेण भवति। कल्पादावीश्वरोपि पूर्वपूर्वकल्पानुसारेण चतुर्मुखाय वेदमुपदिशति। अतः कालत्रयेप्यविच्छिन्नक्रमविशेषोच्चार्यमाणत्वरूपं नित्यत्वं वर्णानित्यत्वेपि वेदानां सिध्यति। नन्वेवमपि विध्यर्थवादमन्त्रनामधेयेषु तथा सिद्धावपि मन्त्रेषु न तथात्वम्। यन्मे माता, अग्नये जुष्टं निर्वपामी, त्र्यत्र यन्मे मातुर्माता, सूर्याय जुष्ट निर्वपामीत्याद्यूहेन नित्यैकरूपक्रमविशेषविशिष्टोच्चार्यमाणत्वभङ्गादितिचेन्न। यन्मे माता, अग्नये जुष्टं निर्वपामीत्यादीनामेवमन्त्रत्वात्। ऊहितानां तु न मन्त्रत्वमनुष्ठेयार्थ प्रकाशनोपयोगव्यक्त्यैकिलतयोह्यते। तत्रमन्त्रत्वव्यवहारो गौणः। अत एवानाम्न तेष्वमन्त्रत्वमित्यत्र ऊहितानां मन्त्रत्वं नास्तीति सिद्धान्तितं मीमांसकैः। यद्वा यन्मे मातेतिवत् यन्मे मातुर्मातेत्यादीनामपिपृथङ्मन्त्रत्वम्। अतस्तत्तदानुपूर्वीणामप्यनादित्वान्नोक्तदोषः। तेषामपाठस्तु अध्ययनेन मूलभूतमन्त्रग्रहणेसतितस्मिन्नेवमन्त्रे ऊहात्तत्पदप्रक्षेपमात्रेण तेषां ग्रहणसिद्धेः। अस्मिन् पक्षे प्रायश्चित्तविशेषे नियुक्तस्य संहितापारायणादेः प्रवृत्तौ सूर्याय जुष्टं निर्वपामीत्यादीनामपाठे किञ्चित् प्रायश्चित्तवैकल्यमस्तीति भाव्यम्। वस्तुतस्तु मूलभूतमन्त्र पाठेपति एकदेशविकृतस्यानन्यत्वन्यायेन ऊहितानामपि पठितप्रायत्वान्न वैकल्यमितिप्रतिभाति। न च निरतिशयपुरुषार्थतदुपायतदनुष्ठानप्रकारदर्शनेदमास्त्रास्त्यस्पवृष्टयन्नपशुपुत्रादिफल तदुपायतदनुष्ठानप्रकारप्रदर्शकत्वमसङ्गतमितिवाच्यम्। 'प्रत्यर्थं च शास्त्रस्य सिद्धयस्संप्रकीर्तिताः', इति शास्त्रार्थविश्वासदार्ढ्यायतत्प्रदर्शन

साङ्गत्यात् । शास्त्रार्थे विश्वासोनामशास्त्रचोदितततत्फलोपायानुष्ठानेतत्तत्फलमवश्यम्भावीतिनिश्चयः । स च स्वर्गमोक्षाद्यकौकिकफलसाधनतयाशास्त्रचोदिते ज्योतिष्टोमभक्त्यादौ प्रथमं न सेत्स्यतीति वृष्ट्यन्नपशुपुत्रादि दृष्टफलसाधनकारीरिचित्रयागादितदनुष्ठानप्रकारः प्रदर्शितः ।

ततश्च तत्तत्फलकामीशास्त्रार्थं संयग्ज्ञात्वा यथावच्छास्त्रार्थमनुष्ठाय वृष्ट्यादिफलं संपाद्य शास्त्रार्थे सविश्वासोभवति । अनन्तरं वृष्ट्यादि फलानामल्पास्थिरत्वं दृष्ट्वातिशयितफललोभेन शास्त्रादितदुपायेनिस्सन्देहं प्रवर्तते । अथालौकिक पुरुषार्थोपायप्रवृत्तये लौकिकफलोपायतदनुष्ठानप्रकारप्रदर्शनं शास्त्रस्य सुपङ्गत्वम् । तत्तत्फलार्थिनं प्रतितत्तदुपायप्रदर्शनेन वात्सल्यं च । नन्वेवमपि कारीर्यादिविधानेनैव शास्त्रविश्वासदार्ढ्ये सतिहिंसोपायश्येनाद्यभिचारविधानमफलम् । प्रत्युताभिचारादेर्नरकसाधनत्वेन शास्त्रस्य, हितपरत्वभङ्गप्रसङ्गश्च । अपनिशास्त्रे तादृशोपायस्य ज्ञातुमशक्यत्वात् । तस्य नरकहेतुत्वं च तेनैव शास्त्रेणाभिचारकर्तुः प्रायश्चित्तविधानादवगम्यते । ननु च श्येनादिवदग्नीषोमीयपश्वालम्भनस्यापिहिंसात्वेन श्येनाद्यभिचारविधाने परं शास्त्रस्य हितपरत्वभङ्गः इत्याक्षेपः कथमितिचेन्न । अग्नीषोमीयपश्वालम्भनस्य हिंसात्वाभावात् पापफलपरिणतिरूप पशुशरीरविच्छेदेन पशोर्निरतिशय सुखप्राप्तिहेतुविशिष्टशरीरप्राप्तेः न वा उवेतन्म्रियसेनरिष्यसि यत्रयान्तीत्यादिमन्त्रवर्णावगतेः ।

व्रणादिशान्त्यैदाहच्छेदकारिषु वैद्यास्वबन्धादिषु रक्षकत्वमेव दृश्यते न हिंसकत्वम् । अतो वैषम्यम् । अन्ये तु तत्र हिंसात्वमभ्युपगच्छन्ति । आलभेतेतिहिंसायाविधानात् । नहिंस्यादितिनिषेधस्तु तद्व्यतिरिक्तविषयः । श्येने तु हिंसानूद्यते । अतो रागप्राप्तत्वान्नहिंस्यादितिनिषेधो निरङ्कोचं तत्र प्रवर्तते । यदि हिंस्यात् श्येनेन हिंस्यादिति वाक्यार्थः ।

अतो वैषम्यमित्याहुः । तथा च श्येनादिविधानेन शास्त्रस्यानाप्ततमत्वप्रसङ्ग इति चेदुच्यते । तत्तत्फलार्थिनां तत्तदुपायप्रदर्शनपरशास्त्रस्य शत्रुनाशफलार्थिनं प्रतितदुपायभूताभिचारस्यापि प्रदर्शनीयत्वात् । यद्यपि हिंसाया अविधानेपि हिंसोपायविधानेन किञ्चिदनर्थावहत्वम् । तथापि मातेतिर्यक्षुकामीतेतिन्यायेन शत्रुनाशोद्युक्तस्य साक्षात् खड्गादिना नाशकरणे महाप्रत्यवायो भवेत् । श्येनेन तु नाशकरणे स्वल्पः प्रत्यवायः । स च परिहार्यः फलं च भवतीति गुरुतर प्रत्यवायानापादकोपायप्रदर्शनेन हितपरत्वसिद्धेः । यद्वा भक्ष्यविशेषैर्बालानामिव शठानां वशीकरणार्थत्वेन । यद्वा देवब्राह्मणहिंसकादिदुष्टनिग्रहार्थं तदुपायप्रदर्शने नवाभिचारादिकर्माराध्यत्वतत्तत्फलप्रदत्वरूप भगवदैश्वर्यविशेषज्ञानेन वा तदभिधायिशास्त्रस्यापि हितपरत्वमित्यवधेयम् ।

इति शब्दनिरूपणम्।

॥ श्रीः ॥

अथाद्रव्यपरिच्छेदे स्पर्शनिरूपणम् ।

अथ स्पर्शोनिरूप्यते । अस्मदादिस्पार्शनैकेन्द्रिय ग्राह्यमद्रव्यं स्पर्शः । द्रव्येऽतिव्याप्ति वारणाय विशेष्यम् । रूपादावतिव्याप्तिवारणायविशेषणम् । संयोगादावतिव्याप्तिवारणाय एकेति । स त्रिविधः । शीतोष्णानुष्णाशीत भेदात । जलेशीतम् । उष्णं तेजसि । अनुष्णाशीतः वायुपृथिव्योः । उष्ण जलं शीतं वायुः शीतं शिलातलमित्यादिप्रतीतिस्तु तत्तद्भूतसंसर्गाद्भवति । तथान्वयव्यतिरेकदर्शनात् । पुनः पाकजापाकजभेदेनस्पर्शोद्विविधः । तत्रापाकजो वायुतेजस्सलिलेषु । पाकजःपृथिव्याम् । पृथिव्यामप्यपाकजानुष्णाशीतस्पर्शाः प्रथमं जाताः पश्चात्तस्यां पाकभेदात् स्पर्शभेदाः अन्वयव्यतिरेकाभ्यां प्रत्यक्षेणोपलभ्यन्ते । मृदुत्वकठिनत्वादयोपिस्पर्शविशेषाः । स्पार्शनेन्द्रियेणैव तदुपलम्भात् । क्वचिच्चक्षुषामृदुत्वादिग्रहणं तु तदविनाभूतरूपग्रहणानुविधाय्यनुमानात् ।

न च पाकजस्पर्शविशेषरूप काठिन्यस्यकरकावस्थजलेसत्वात् जलेपिपाकजस्पर्शाङ्गीकार इति वाच्यम् । पृथिवीसम्बन्धादेवतदुपलब्धेः । अत एव विलीनेतस्मिन् काठिन्यं नोपलभ्यते । मार्दवादीनां संयोगविशेषात्मकत्वं केचिदाचार्या अनुमन्यन्ते । दुरालभाश्चन्द्रकान्तमणिस्पर्शादयोपि पाकजाः । तेषामसावैत्रिकत्वेनापाकजत्वायोगात् । गोब्राह्मणचण्डालादिषुस्पर्शभेदश्शुष्यशुष्यादिरूपः । न स्पर्शगुणविशेषः । तेषां स्पार्शनेन्द्रियाग्राह्यत्वात् । स च धर्माधर्मतारतम्याधीनमत्वरजस्तारतम्याज्जायते । ननु सलिलादिष्वपि पाकजस्पर्शः कुतोनास्तीतिचेन्न । औष्ण्यशान्तौ स्पर्शान्तरस्य पाकजस्य पृथिवीवदननुवृत्तेः । तद्यौष्ण्यमेव पाकजं तत्रस्यादितिचेन्न । वायुशैत्यवदौपचारिकत्वोपपत्तेः । न च शीतोष्णाभाव एवानुष्णाशीतः, न गुणान्तरमितिवाच्यम् । आकाशादावपिप्रसङ्गात् । तत्र शीतोष्णयोरभावात् ।

केचित्तु सजातीयबुद्धिहेतुत्वस्य सामान्यतोदर्शनात्, शीतस्यवातबुद्धिहेतुत्वाद्वातोपि शीत इति वर्णयन्ति । तदसत् । खर्जूरपनसाम्रकदळीफलादिषुरसादिसाम्येपिवात श्लेष्मादिधातुवर्धकत्ववैभवस्य तेषुवैषम्यदर्शनवदत्रापि शैत्याधीन बुद्धिमत्वस्यापि वायुस्वरूपप्रयुक्तत्वात् । ननु शीतो भवहनूमत इत्यनेन हनूमन्तं प्रतिवह्नेश्शीतत्वात् तत्र शैत्यमपिस्यादितिवाच्यम् । सीतानुग्रहेणहनूमद्विषयेवह्नेर्दाहकत्वप्रतिबन्धाच्छैत्यानुत्पादात् । ननु निमृष्टेपि सलिले प्रशान्तेपि च वह्नौ पृथिव्यां शीतोष्णोपलब्ध्या पृथिव्यामपि शीतोष्णस्पर्शौस्यातामितिचेन्न । तयोस्सूक्ष्मजलाग्नयवयवानां तत्रसंक्रमणेन तन्निष्ठत्वात् । अन्यथाकालान्तरेपि तत्रतयोरुपलम्भप्रसङ्गात् । अतस्सिद्धं वह्नौ औष्ण्यं जलेशीतमनुष्णाशीतस्पर्शो वायुपृथिव्योः ।

अथ रूपं निरूप्यते । अस्मदादिचक्षुरिन्द्रियैक ग्राह्यविजातीयव्यावृत्तमद्रव्यं रूपम् । चक्षुर्मात्रग्राह्यप्रभाद्रव्येतिव्याप्तिवारणाय विशेष्यम् । संयोगादावतिव्याप्तिवारणाय एकेति । नित्यमुक्तेन्द्रियाणां ग्राह्यनियमाभावादसंभववारणायास्मदादीति । अप्रत्यक्षरूपादावव्याप्तिवारणाय विजातीयव्यावृत्तेति । अथवा विजातीयव्यावृत्तत्वं न देयम् । ग्राह्यत्वस्यग्रहणयोग्यत्वरूपत्वाद्-प्रत्यक्षरूपादावपि ग्रहणयोग्यत्वसत्वान्नाव्याप्तिः । यद्वासितरक्तकृष्णाद्यन्यतमप्रतिपत्तिहेतुत्वं तल्लक्षणम् । तेन प्रभाघटसंयोगे नातिव्याप्तिः । तच्चसितरक्तकृष्णभेदेनत्रिविधम् । सितादिप्रति पत्तिहेतुत्वं प्रत्येकलक्षणम् । तत्रसलिलेसितं रूपम् । वह्नौरक्तम् । पृथिव्यां कृष्णं रूपम् । कळधौतशङ्खशुक्तिशशाङ्कादिषुरूपविशेषास्सितभेदाः । जपाकुसुमदाडिमबन्धुजीवविद्रुमकुङ्कुम पद्मरागादीनां रूपविशेषाः रक्तभेदाः । काञ्चनहरिद्राहरितालादिषु पीतरूपविशेषा अपि रक्त-भेदाः । मरकतकमधुकरतिमिरजलधरतमालादीनां रूपविशेषाः कृष्णभेदाः । यदग्नेरोहितं रूपमिति तेजोवन्नेषु रूपत्रयाभिधानात् । पीतादीनामपि रक्ताद्यवान्तरत्वं युक्तम् ।

ननु यदग्नेरोहितमिति श्रुत्यातेजोबन्नेषु रक्तशुक्लकृष्णरूपाद्येकैकाभिधानं कथं सङ्गच्छते । तेजस्त्वापहिमकरतटिदादिषु जले यमुनासमुद्रमरुजलादिषु च पृथिव्यां हरिद्राकळधौत शङ्खशुक्ति कादिषुचान्यथोपलब्धेः । प्रत्यक्षविरोधे शास्त्रस्यान्यपरत्वादितिचेन्न । समष्टौ तत्तत्स्वभावगुण-नैयत्यप्रतिपादनपरत्वात् । व्यष्टौ त्रिवृत्करणेन गुणानामनियतत्वात् तेजोऽबन्नानां नानाविध-रूपोपलब्धिः । पाकभेदाच्च तत्तद्रूपविशेषास्सितरक्तकृष्णैर्जायन्ते । यथा मधुररस एवेक्षुक्षीरगुड शर्करादिषुपाकभेदान्नाना जायते, अतस्तंमिश्रणात् पाकभेदाद्वा तेजोजलपृथिवीद्रव्याणि नाना रूपवन्ति । ननु मन्त्रशास्त्रे,

पीताश्वेतमम्भोग्नीरक्तोधूम्रस्समीरणः । नीलं नभस्तथामन्त्रा अपि तादृशवर्णकाः ॥

इति वाय्वाकाशयोरपि रूपवत्त्वस्य पृथिव्याः पीतरूपवत्त्वस्य च प्रतिपादनाद्विरोध इतिचेन्न । तस्य तद्ध्यानार्थत्वेन दृष्टिविधित्वात् वास्तववर्ण व्यवस्थापरत्वाभावात् । प्रत्यक्षविरोधाच्च । न च रक्तं जलं नीलं जलं शुक्लं तेज इत्यादि प्रतीत्या जल तेजसोरपि रूपान्तरसम्भव इति वाच्यम् । तेषां पृथिवी सम्बन्धायत्तत्वस्यान्वयव्यतिरेकसिद्धत्वात् । अत्र काणादाः । नीलपीतारब्धावय-विनिपरस्परविरोधेन नीलपीतानुत्पत्त्यानीलरूपत्वे तस्याप्रत्यक्षत्वप्रसङ्गाच्च तत्रचित्रमितिरूपान्तर-मङ्गीकार्यम् । नचांशिकनीलपीताभ्यां प्रत्यक्षत्वोपपत्तावतिरिक्तकल्पनेगौरवमितिवाच्यं रूपस्य व्याप्यवृत्तित्वनियमस्यप्रत्यक्षसिद्धत्वात् ।

न चैवंरीत्याचित्ररसस्वीकार इति वाच्यम् । अवयवरसादेरेवावयविनि रसादिप्रतीतेः चित्ररसादिकल्पनेगौरवात् । रूपवद्रसादेर्धर्मिप्रत्यक्षाहेतुत्वेनानुपपत्त्यभावादितिवदन्ति । तन्न ।

अवयविन एवाभावात्। तत्तदवयवगतनानारूपैरेवचित्रप्रतीतिर्निर्बाधेनातिरिक्तचित्ररूपकल्पना। मानाभावान्नानावर्णचूर्णनिर्मितरज्ज्वस्यादावप्यवयव्यभावेन तत्रचित्रप्रतीतेर्भवतापि तत्तच्चूर्णगतनानावर्णैरेवनिर्वाह्यत्वाच्च। यदि चित्ररूपकल्पने आग्रहस्तथाचित्रस्पर्शोपिकल्पनीयः। स्पर्शवद्द्रव्यप्रत्यक्षेस्पर्शस्यैवकारणत्वेनावयविनोनिस्पर्शत्वेतत्स्पार्शनाभावप्रसङ्गात्। ननु द्रव्यप्रत्यक्षं प्रतिरूपस्यैव हेतुत्वम्। न स्पर्शस्य तथा च स्पर्शशून्यधर्मिणस्तदीयरूपेणैव प्रत्यक्षसंभवान्नचित्रस्पर्शाङ्गीकार इतिचेन्न। तथा सतिवायोस्त्वाचप्रत्यक्षस्य सर्वानुभूतस्यापलापप्रसङ्गात्।

यदि वायोस्त्वाच प्रत्यक्षाभावे इष्टापत्तिरित्युच्येत, तदाद्रव्यप्रत्यक्षं प्रतिस्पर्शस्यैव हेतुत्वं स्वीकृत्यप्रभाया अप्रत्यक्षत्वे इष्टापत्त्या च निस्पर्शावयविनः प्रत्यक्षत्वायचित्रस्पर्शस्यावश्यकत्वेन चित्ररूपस्यैवत्यागः प्रसज्येतेतिवक्तुं शक्यत्वात्। न च जलतेजसोश्शीतोष्णनैयत्यात्, पृथिव्या अनुष्णाशीतत्वाच्च, विजातीयभूतद्वयारब्धावयविनोऽसम्भवात्, विरुद्धस्पर्शवदवयवारब्धावयविनो दौर्बल्येनचित्रस्पर्शस्वीकारप्रसक्त्यभाव इति वाच्यम्। मृदुत्वकठिनत्वयोस्स्पर्शविशेषत्वाभ्युपगमेन मृदुकठिनावयवारब्धावयविनस्सम्भवेन तत्र चित्रस्पर्शस्वीकारप्रसक्तिसम्भवात्। अतश्चित्रस्पर्शरसादिवच्चित्ररूपमपि नास्तीतिसिद्धम्।

अथ रसो निरूप्यते। अस्मदादिरसनग्राह्यमद्रव्यं रसः। सचजलपृथिवीवृत्तिः। पृथिव्यपि प्रथमं मधुरा जाता। पश्चात् पाकविशेषेणाम्ललवणकटुकषायतिक्तवती भवति। निदाघपीतगङ्गाजलादौमाधुर्यस्यैवानुभवात्। जलेमधुर एव रसः। कटुजलं तिक्तं जलमित्यादि प्रतीतिस्तु पृथिवीसम्बन्धात्। पृथिव्यामपि मधुर एव रसः स्वाभाविकः। विशेषाभावे कारणभूतजलगतमाधुर्यानुविधानस्योचितत्वात्। रसान्तरं तु तस्यामुपाधितः। अथ गन्धोनिरूप्यते। अस्मदादिघ्राणग्राह्यमद्रव्यं गन्धः। पृथिवीमात्रवृत्तिः। तस्य सुरभिःस्वाभाविकोधर्मः। पूतिविस्रादिगन्धास्तु पाकविशेषाधीनाः। अस्यां च गन्धरसरूपस्पर्शशब्दास्सहैवोत्पद्यन्ते। सहैवनश्यन्ति च। क्वचिदन्यतमानुवृत्तिः अन्यतमनिवृत्तिश्च यथोपलम्भं पाकवैषम्याङ्गीकारात्। एकेनाग्निसंयोगेन पूर्वरूपादिसमुदायनिवृत्तिः। अन्येनोत्तरसमुदायोत्पत्तिः इत्येके। एकेनैव पूर्वनिवृत्युत्तरोत्पत्ती इति वयं ब्रूमः। यथैकस्यैव सामग्र्याऽनेक कार्योत्पत्तिः तद्वत् सापीलुपिठरपाकभेदाद्विप्रतिपद्यन्ते केचित्। परमाण्ववयविनोः अभावान्नोभयमप्यस्माकम्। किन्तु संहतावस्थायां विभक्तावस्थायां वेति विचारेक्वचिद्विभक्तावस्थायामितिस्वीक्रियते।

अत्रेदं तत्त्वम्। आकाशस्यशब्दः स्वाभाविकः वायोश्शब्द अनुष्णाशीतस्पर्शश्च स्वाभाविकः। इतरस्त्वौपाधिकः। शब्दोष्णलोहिताः वह्नेस्वाभाविकाः। इतरस्त्वौपाधिकः। शब्दशीतशुक्लमधुराः जलेस्वाभाविकाः। इतरेत्वौपाधिकाः। शब्दानुष्णाशीतविशेषकृष्णमधुरसुगन्धाः

पृथिव्यां स्वाभाविकाः। शीतोष्णे औपाधिके। कृष्णान्यरूपाणि मधुरान्यरसास्सुगन्धान्यगन्धाश्च पाकाद्भवन्ति। जलादिषु तत्तद्रूपरसगन्धादिः पृथिवीसम्बन्धान्न पाकात्। जलादौ पाकासम्भवस्योपपादितत्वात्। अत एव आकाशे नीलं नभ इति प्रत्ययस्तदन्तर्भूतपञ्चीकृत पृथिवीसम्बन्धाद्भवति। समष्टौ तस्य रूपशून्यत्वात्। तर्हि वायोरपि व्यष्टौ रूपवत्वप्रसङ्ग इति चेदिष्टत्वात्। अप्रत्ययस्तु तदन्तर्भूत पृथिव्यादेरनुभूतरूपवत्वात्; उद्भूतत्वानुद्भूतत्वे फलबलादेव सर्वैः कल्प्यते। अतो न दोषः।

अथ संयोगोनिरूप्यते। संयुक्तव्यवहार हेतुस्संयोगः। द्रव्यमात्रवृत्तिः। सच स्वरूपमात्र स्वरूपमिति केचित्। तन्न। स्वरूपयोस्सतोरेवसंयोगपूर्वोत्तरकल्पयोस्संयुक्त व्यवहाराभावात्। सचाव्याप्यवृत्तिः। स्वाभावसमानाधिकरणतयैव धर्मिग्राहकप्रमाणसिद्धत्वात्। अंशभेदेनैकत्रभावाभावयोर्विरोधेमानाभावात्। न च निरङ्गेष्वात्मेश्वरकालादिषु कथं प्रादेशिकसंयोग इति वाच्यम्। तत्राप्यौपाधिकसद्भावात्। न चैवं उपाधिसंयोगेप्युपाध्यन्तरापेक्षायामनवस्थेति चेन्न। ज्ञप्तावुपाधिसंश्लेषमात्रातिरिक्तानपेक्षणात्। एतदुक्तं भवति। उपाधिसंयोगज्ञाने उपाधिसंयोगमात्रस्यापेक्षितत्वेपिसंयोगहेतोरुपाध्यन्तरसंयुक्ताम्शस्य ज्ञानमपेक्षितमेव। नहिकारणविज्ञानं कार्यविज्ञानकारणमिति उत्पत्तावुपाध्यन्तरावच्छेदेन तस्य प्रादेशिकत्वं तस्याप्यन्यावच्छेदेनेतिबीजांकुरानवस्थावददोषात्।

यद्वानिरवयवेषु द्रव्येषु पृथङ्निर्देशयोग्यस्वाभाविकोऽम्शभेदो भवतु। न चैकस्मिन्नेकत्वानेकत्वे प्रसज्येयातामिति वाच्यम्। ईदृशाम्शस्य भेदव्यपदेशहेतुत्वाभावेनैतावदेकत्वानेकत्वस्य प्रमाणबलादभ्युपगन्तुं शक्यत्वात्। यद्वानिरवयविनि संयोगोव्यावर्तताम्। नैयायिकाभ्युपगतजातिवत्। यद्यप्येकत्र परिपूर्णस्यान्यत्र पूर्णत्वं नास्ति तथापि संयोगस्यामूर्तत्वात् जातिवदनेक पूर्णत्वे बाधकाभावाच्च। काणादादिभिरपिनिर्भिदाकाशे शब्दस्य विभ्वात्मनि ज्ञानस्य च प्रादेशिकत्वाभ्युपगमेनतत्सिध्यै भेरीशरीरादीनां प्रादेशिकसंयोगापेक्षायां तत्संयोगस्य प्रादेशिकत्वाय उपाध्यन्तरापेक्षयानवस्थाप्रसक्तौ परिहारस्योक्तरीतेरेवानुसरणीयत्वात्।

यद्वा निरवयविनि संयोगस्योपाधिनिरपेक्षस्वपरनिर्वाहकप्रमाणेन प्रादेशिकत्वं स्वीक्रियते यथोपलम्भम्। तथैवाचार्यैस्सर्वार्थसिद्धावनुगृहीतत्वात्। सच संयोगोद्विनिष्ठः, तथैवोपलम्भात्। न च द्विनिष्ठं किञ्चिदपि न दृष्टमितिचेन्न। अस्यैवदृष्टत्वात्। नचान्यस्य तथात्वादर्शनादन्यस्य तथात्वासम्भवः। प्रत्येकं प्रतिनियतासाधारणस्वभावानां भङ्गप्रसङ्गात्। न चैवं संयोगस्य कृत्स्नैकदेशवृत्तिविकल्पेन द्विनिष्ठत्वाभावनिरंशत्वाभावयोरन्यतरप्रसङ्ग इति वाच्यम्। संयोगस्यामूर्तत्वेन तादृशप्रसङ्गाभावात्। नैयायिकाभिमतजातिवन्निरंशत्वेप्यनेकवृत्तित्वोपपत्तेः।

ननुतर्हि जातिवदेवास्य प्रादेशिकत्वं नस्यादितिचेन्न। धर्मिग्राहकप्रमाणसिद्धस्य दृष्टान्तमात्रेण चालयितुमशक्यत्वात्। अन्यथातिर्यग्गमनस्वभाववायुदृष्टान्तेन वह्नेरूर्ध्वगमनभङ्गप्रसङ्गात्।

सचायं संयोगःद्विविधः। कार्योऽकार्यश्चेति। पूर्वोभूर्तानां मूर्तैर्विभुभिश्चान्यतर प्रयत्नेनोभयप्रयत्नेनवा जन्यते। तत्र मेषयोस्संयोग उभयप्रयत्नजन्यः। श्येनस्याप्योस्संयोग अन्यतर प्रयत्नाधीनः। श्येन कालादीनां च, तृतीयं संयोगजसंयोगमपिकेचित् कल्पयन्ति। यथा हस्तपुस्तकसंयोगात्कायपुस्तकसंयोग इति। तदसत्। अवयव्यभावेनावयवसंयोगस्यैव सङ्घातसंयोगात्मकत्वात्। अवयव्यभ्युपगमपक्षेपि येन हेतुनावयवस्संयुज्यते तेनैवावयव्यपि संयुज्यताम्। न हि हस्तपुस्तकसंयोगानन्तर्य देवदत्तपुस्तकसंयोगस्योपलभ्यते। हस्तेन पुस्तके संयुक्ते देवदत्तः पुस्तकवानिति प्रतीतेः। न च क्रियायास्संयोगासमवायित्वेनस्वाश्रय एव संयोगजनकत्वेन हस्तक्रियायाश्शरीरसंयोगजनकत्वाभाव इति वाच्यम्। तन्तुगतरूपेणासमवायिनास्वाश्रयसमवेतत्वसम्बन्धेन पटरूपोत्पत्तिवद्धस्तक्रियायाः स्वाश्रयसमवेतत्वसम्बन्धेन शरीरसंयोगजनकत्वसम्भवात्। हस्तक्रियायाहस्तावच्छेदेनशरीर क्रियात्वात् यसमवा सम्बन्धेनाप्यसमवायिकारणत्वसम्भवाच्च।

एवं तर्हिक्रियाया अव्याप्यवृत्तित्वं स्यादितिचेन्न। संयोगवत्तस्या अव्याप्यवृत्तित्वस्येष्टत्वात्। पृथुतरशिलाद्युद्धरणे तोलनादिभिरुद्धरणप्रदेश एव हि चलन मन्यत्र निष्पन्दत्वं दृश्यते। क्रियायाः स्वाश्रय एव संयोगजनकत्वमित्यप्ययुक्तम्। अन्यप्रक्षिप्तपुस्तकपतनेकाय-हस्तयोर्निष्पन्दत्वेपि संयोगदर्शनेन व्यभिचारात्। न च हस्तस्यनिष्पन्दस्थले हस्तशरीरयोर-विशेषेण पुस्तकक्रियायासंयोगसम्भवेपि हस्तस्पन्दस्थले हस्त एव संयोगः न कायेपीति वाच्यम्। पुस्तकगतक्रियायाश्शरीरसंयोगहेतुत्वं न हस्तक्रियाया इत्यत्र नियामकाभावात्। उभयोर्व्यधिकरणत्वाविशेषात्। यत्तुदिनकरेणवस्तुतोयत्रकपालक्रियायाकपालान्तरेण तरुणाचैकस्मिन् क्षणे संयोगः, तदुत्तरक्षणे घटोत्पत्तिः कपालक्रियानाशश्च। नाशकस्योत्तरसंयोगस्य पूर्वं सत्वात्। तदुत्तरक्षणे कुम्मतरुसंयोगानुपपत्तिः। पूर्वक्षणे कपालक्रियायानाशात्। तस्मात् कपालसंयोग एव तत्र कारणमिति संयोगजसंयोगसिद्धिर्निराबाधैवेत्युक्तं, तदप्यसङ्गतम्। अन्वयव्यतिरेकाभ्यां क्रियायास्संयोगहेतुत्वकल्पन्या तत्र कुम्मतरुसंयोगोत्पत्तिपर्यन्तं क्रियासत्वाभ्युपगमात्।

ज्ञानजातीयापेक्षाबुद्धेर्द्वित्वसविकल्पकार्यान्यथानुपपत्त्याक्षणविलम्बवदस्या अपिक्षणविलम्बाङ्गीकारेबाधकाभावात्। एतेन विभागजविभागोऽपि निरस्तः। तस्य चास्मिन् मते उक्तेष्वन्तर्भावं वक्ष्यामः। अकार्यसंयोगो विभूनां नास्तीतिचेन्न। तेषां सान्तराळत्वप्रसङ्गात्। नचान्यतरकर्मादिहेत्वभावाद्विभुसंयोगाभाव इति वाच्यम्। नित्यसंयोगस्य हेतुनिरपेक्षस्येश्वरे

नित्यज्ञानवदभ्युपगमे बाधकाभावात्। तत्रद्यावापृथिवी जनयन देव एक इत्यादि श्रुत्या-जगत्कर्तृत्वश्रवणात् कर्तृत्वस्य ज्ञानचिकीर्षाकृतिमत्वरूपस्य ज्ञानाभावेऽसिध्या अहेतुकमपिज्ञानं स्वीक्रियते इतिचेत तथा सर्वव्यापी च भगवान्, अन्तर्बहिश्च तत्सर्वमित्यादि श्रुत्याविभुद्रव्यासि-सिध्या नित्यसंयोगोपि स्वीकार्य इति तुल्यम्। किञ्च, सर्वाधारं धामविष्णुसंज्ञमित्यादिना ब्रह्मणस्सर्वाधारत्वबोधात् विभ्वाधारत्वमपि ग्राह्यम्। तदाधारत्वं च तदपृथगवस्थानमित्यज-संयोगसिद्धिः।

नचेश्वरातिरिक्तं विभुद्रव्यमेव नास्तीतिवाच्यम्। यस्सर्वज्ञस्सर्ववित्। अनादिर्भगवान् कालः। नान्तोस्तद्विजविद्यते इत्यादीनां ईश्वरज्ञानकालयोर्विभुत्वेन तयोस्संयोगस्य नित्यत्वात्। अन्यथेश्वरस्य कालपरिज्ञानप्रसङ्गात्। न च तयोर्विषय विषयिभाव एव सम्बन्ध इति वाच्यम्। ज्ञानं द्रव्यं, तस्य विषयैस्संयोगस्सम्बन्धः इति सिद्धान्तात्। न च रूपादिभिन्नज्ञानस्य कथं संयोगसम्बन्धः। तेषामद्रव्यत्वादितिवाच्यम्। तत्रसंयुक्तानिष्ठत्वस्यैव सम्बन्धात्। तर्हिसंयोग-सम्बन्ध इति सिद्धान्तः कथं घटत इतिचेन्न। संयुक्तनिष्ठत्वस्य संयोगघटितत्वेन तस्यावश्यकत्वे नाविरोधादित्यलं प्रसक्तानुप्रसक्तया। अथ शक्तिर्निरूप्यते। सर्वकारणानां कारणत्वनिर्वाहकः कश्चिदद्रव्यविशेषश्शक्तिः। तर्कागमाभ्यां सासिध्यति। प्रतिबन्धकर्मणि मन्त्रादिसत्वे वह्न्यादेः स्वरूपसहकारिवैकल्यमात्रेपियदुपरोधाद्वह्निर्नदहति साह्यतीन्द्रियाशक्तिरयस्कान्तदुन्दुभिस्वनादा-वुपलभ्यते। आगमश्च।

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः। इत्यादि। ननु वह्न्यादिस्वरूपात् प्रथम-शक्तिर्जायते। प्रतिबन्धके सति नश्यति; पुनः प्रतिबन्धकापगमे उत्तेजकसत्वे च जायत इति तस्या अनियतकारणत्वप्रसङ्ग इतिचेन्न। प्रतिबन्धकाभावसहितवह्न्यादिस्वरूपस्यैवकारणत्वात्। प्रतिबन्धकं च उत्तेजकाभावविशिष्टमण्यादि तदभावश्च वह्न्यादावुत्तेजकसहितमणिसमवधानेमण्यप-गमे केवले चैकरूप इति नानियतकारणत्वप्रसङ्गः। न च निरुक्तवह्न्यादिनैवदाहसम्भवे मध्ये शक्तिकल्पनमफलमितिवाच्यम्। शास्त्रसिद्धार्थे उक्तदोषासम्भवात्। ननु शक्तिश्शक्तावानवा। आद्येशक्तावपिशक्तिस्सिद्धा। तत्राप्युक्तविकल्पे शक्त्यन्तरसिद्धावनवस्था। द्वितीये अशक्तत्वेना-कारणत्वं न स्यात्। अन्यथा सिकताभ्यस्तैलस्यापिलाशकलादङ्कुरस्यचोत्पत्तिस्स्यादितिचेन्न। कार्यानुगुण्यस्वरूपतयासिद्धायाश्शक्तेश्शक्त्यन्तरविरहेपिक्षत्यभावात्। औष्ण्यमुष्णवह्नवा। पूर्वत्रा-नवस्था। उत्तरत्रतत्कार्यं नोत्पादयेत्। शीतवदतिप्रसङ्गस्य दुर्वारत्वात्। अतः,

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः। यतो ते ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः॥

भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता।

इत्यादि प्रमाणसिद्धस्वभावशक्तिर्नैकथाऽपि परित्यागमर्हतीति। सेयं शक्तिर्द्रव्येष्वेव। अद्रव्येषु शक्तिर्नास्ति। शब्दानां शक्तिरूपत्वेनवा सामानाधिकरण्येन शक्तिमत्त्वेनवाकार्यकरत्वं बोध्यम्। गुरुत्वमाद्यपतनासमवायिकारणम्। तच्च पृथिवीजलवृत्ति। पतनकल्प्यमतीन्द्रियं तोलनादिसहकृतपतनतारतम्याद्गुरुत्वतारतम्यानुमानमितिकाणादावदन्ति। अन्ये तु तोलनादिदण्डायामतिरिक्तं गुरुत्वगुणस्य स्पार्शनप्रत्यक्षत्वम्। न च मध्योर्ध्वदेशादिषु स्पर्शेसतितस्य स्पार्शनप्रत्यक्षं स्यादितिवाच्यम्। तोलनादेस्सहकारित्वादितिवदन्ति।

अन्येत्वाहुः। पृथिवीजलस्वरूपातिरिक्तं गुरुत्वमितिनास्तीत्यादि प्रतिबन्धाभावेसति पृथिवीजलाभ्यामेवपतनकार्यसिद्धेः। अतिरिक्तस्वमतेपिस्वभावादेव हि गुरुत्वस्य पतनहेतुत्वमुच्यते। सच स्वभावः जलपृथिव्योरेवास्तिलाघवात्। अत एव स्मर्तारोपि पतनतारतम्याधीनफलादिव्यवस्थापि तत्तदवयवाधिक्यन्यूनतानिबन्धनेतित्रसरेण्वष्टकं रेणुः। 'तत्रयं राजसर्षपमि'त्युपक्रम्य शतमानन्तु दशभिर्धारणैः पलमेवचेत्यादिभिः प्रतिपादयन्ति। किञ्च यदिपतनाज्जलपृथव्योः स्वरूपातिरिक्तं गुरुत्वम्। तर्ह्यूर्ध्वज्वलनात्तिर्यग्गमनाच्चवह्निवाय्वोरपि गुणान्तरं किमिति न कल्प्येत लाघवाद्द्रवत्वादिस्वरूपादेव तत्तत्कार्यसिद्धावतिरिक्तकल्पने गौरवमितिचेत् पतनकार्यस्यापि जलादिस्वरूपेणैव सिध्यातदतिरिक्तगुरुत्वकल्पने गौरवमितितुल्यम्। किञ्च हस्तेन तोलनादौसत्यपि प्रत्यक्षेणोत्पतितस्य पुनर्निपतनेऽभिघातारव्यसंयोगरूपाक्रमणमुपलभ्यते। न गुरुत्वं वाय्वादिभिरभिघातादिवत्तावतैवगुरुत्वव्यवहारः।

अत एव बलवता पुरुषेणाक्रमणे सति गुरुत्वप्रत्ययः। तस्य मन्दमाक्रमणेलघुत्वप्रत्ययः। अतो भवदभिमतगुरुत्वं प्रत्यक्षेणानुमानादिनावा न सिध्यति। ननु पतनकार्येऽनेकेषां स्वरूपाणां हेतुत्वकल्पने गौरवात् अतिरिक्तगुरुत्वस्य पतनकार्य हेतुत्वकल्पनं युक्तमितिचेन्न। शक्त्यङ्गीकर्तृणामस्माकं जलादिवृत्तिशक्तेरेव तद्धेतुत्वेनोक्तदोषाभावात्। वह्निवाय्वोरूर्ध्वज्वलनतिर्यग्गमनकार्यमपि तद्वृत्तिशक्तेरेवतस्य स्वर्वकार्यनिर्वाहकत्वस्वभावात्। अतो गुरुत्वकल्पनं गुरुत्वपराहतम्।

अथ द्रवत्वम्। अत्रकेचिदाद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिवीजलतेजोवृत्ति। तत्द्विविधम्। सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ। न च घृतसुवर्णादौ जलसम्बन्धात् द्रवत्व प्रतीतिरितिवाच्यम्। साक्षात् सम्बन्धेन द्रवत्व प्रतीतेः परम्परासम्बन्धविषयत्वकल्पने गौरवात्। जलद्रवत्वस्य सांसिद्धिकस्य तत्रप्रतिबन्धकत्वकल्पनागौरवाच्च। नचैतज्जलत्वमात्रङ्कर-

काद्यवस्थायां काठिन्योपलम्भात्। अतोद्रवत्वमतिरिक्तगुण इति वर्णयन्ति। तदपरे न क्षमन्ते। यदुक्तं स्यन्दनहेतुतया द्रवत्वं गुण इति तज्जलत्वान्नातिरिच्यते। तस्यैवस्यन्दनहेतुत्वसम्भवात्। नचोष्णं तेज इति द्रवं जलमिति विशेषणतयास्फुरणाज्जलत्वातिरिक्तं द्रवत्वमिति वाच्यम् संयोगविशेषात्मकसंस्थानविशेषस्यैव जलत्वात्मकत्वेपि द्रवत्वात्मकत्वेपि च मात्रयाभेदमाश्रित्य सास्नादिसंस्थानविशेषवान् गौरितिवत् द्रवज्जलमिति प्रतीतेर्बाधकाभावात्। अत एव चापर्याय-त्वमपि। ऊर्ध्वदेशेत्रलेनिम्नोन्नतिलेशरहितप्रयोगः किन्निबन्धन इति चेज्जलत्वनिबन्धन इति मद्विधाः।

नन्वतिरिक्तद्रवत्वाभावे पृथिव्यामिवजलेपि दुष्प्रवेशतास्यादितिवाच्यम्। द्रवत्व-शून्यस्याकाशस्यापि दुष्प्रवेशत्वप्रसङ्गात्। निस्स्पर्शत्वात्तत्प्रवेश इति चेद्वाय्वातपयोरपि दुष्प्रवे-शत्वप्रसङ्गात्। तेषां प्रशिथिलत्वमाव इति चेदत्रापि तुल्यम्। जलत्वात्मकत्वाभ्युपगमादाशङ्का-नुत्थानाच्च करकाद्यवस्थायां द्रवत्वाप्रतीतिर्जलत्वेवदुपष्टम्भकद्रव्यसंसर्गात्। अतएव विलीने तदुपलब्धिः घृतसुवर्णादावुपष्टम्भकजलसम्बन्धात् द्रवत्वम्। तर्हि द्रवत्वस्य कुत्रान्तर्भाव इति चेज्जलत्वस्य संयोगविशेषरूपतयाजलत्वात्मकद्रवत्वस्य तत्रैवान्तर्भाव इति गृहाण। अतो जल-त्वातिरिक्तं द्रवत्वं न गुणान्तरम्।

अथस्नेहः। चूर्णादिसंग्रहहेतुर्गुणःस्नेहः। नचैषद्रवत्वस्वरूप इति वाच्यम्। सुवर्णादि-द्रवत्वस्य पाम्सुसंग्रहप्रसङ्गात्। नापि जलत्वमात्रम्। स्निग्धं जलमितिपृथग्व्यवहाराज्जलत्वाहित-मधूच्छिष्टादिषुस्निग्धत्वप्रत्ययाच्च। अतः प्रत्यक्षसिद्धस्सलिलैकवृत्तिः पाम्सुसंग्रहणहेतुः स्नेहाख्यो गुणविशेष इति वैशेषिकाः। तदसत्। स्निग्धं जलमितिवत स्निग्धं शिलातलं स्निग्धं काञ्चनं स्निग्धं दारु स्निग्धं स्थलमित्यादिप्रतीतेः न जलमात्रवृत्तिः स्नेहाख्यो गुणविशेषः। पाम्सुसंग्राह-कत्वमपि जलस्य न स्नेहगुणप्रयुक्तम्। मधूच्छिष्टपनसनिर्यासादिष्वपि पाम्सुसंग्राहकत्वदर्शनात्। अथापि स्नेहाख्यगुणविशेषसिद्धिरितिचेत् विश्लेषहेतुत्वादग्नौ रौक्ष्याख्य गुणान्तरं सिध्येत्। यदि। तत्र औष्ण्यादिमिरेव विश्लेषसिद्धिस्तर्हि स्नेह्यादेवसंग्रहसिद्धिरिति पश्यतुभवान्। तर्हि जलस्य पाम्सुसंग्राहकत्व कुत इति चेदयस्कान्तस्यायस्संग्राहकत्ववत् स्वभावाच्छक्तिविशेषाद्वेतिवाच्यम्। न च सलिलं पाम्सुसंग्राहकमित्येवनियमः। शुष्कमृत्पिण्डादीनां सलिलसेकेविश्लेषदर्शनात्। अतस्सलिलस्वरूपमेव सहकारिविशेषमासाद्यसंग्राहकं विश्लेषकं चेतियथोपलम्भमङ्गीकार्यमिति न गुणान्तरसिद्धिः।

मित्रादिचेतनवृत्तिस्स्नेहःप्रीतिः उपादित्सावा। शत्रुगवरौक्ष्यमपि दुःखं जिघांसा क्रोधोवा। तथा च स्नेहस्य स्पर्शविशेषरूपत्वात् स्पर्शेन्तर्भावः। अथसंस्कारः। अनुभवजन्या-

स्मृतिहेतुर्भावना। साच संस्कार इत्युच्यते। साचकार्यकल्प्या। नचानुभव एवस्मृतौहेतुः। तस्यचिरध्वस्तत्वात्। नाप्यनुभवोपलक्षित आत्मा विनष्टस्याज्ञायमानस्य उपलक्षणतयापि कारणत्वायोगात्। नापिध्वम्सः। तस्योत्तरावधिरहितत्वेनसंस्कारप्रमोषाभावप्रसङ्गात्। नापि सदृशदर्शनादि, अनुभवरहितस्य सदृशदर्शनमात्रेण स्मृतिप्रसङ्गात्। नाप्यनुभवविशिष्टसदृशदर्शनादि। तस्य विशेषणत्वे कालान्तरस्मृतिर्नस्यात्। उपलक्षणत्वं त्वज्ञायमानस्यासम्भवीति पूर्वमुक्तत्वात्। तस्माद्वासनाख्यसंस्कारः ज्ञानावस्यारूप आवश्यकः। अत्र काणादाः। संस्कार इति गुणान्तरम्। सत्रिविधः। वेगोभावना स्थितस्थापकश्चेति वेगःपृथिव्यप्तेजो वायुमनोवृत्तिः। स्थितस्थापकोपि पृथिव्याङ्कटादिवृत्तिः। वेगस्तु शरीरादिवृत्तिः। भावनात्वात्मगुणः। अनुभवजन्यस्मृतिजनकः। सचप्रबलतरव्याध्यावाशरीरवयोगेनवानश्यति। तावत्पर्यन्तमात्मनिस्थित्वा उद्बोधकसन्निधानादाहितशक्तिस्तदातदास्मृतिञ्जनयतीतिकार्यबलात् कल्प्यते। नचानुभवध्वम्सस्यैव स्मृतिजनकत्वमस्तु। उद्बोधकासन्निधानेन जन्मान्तरेस्मृतिप्रसङ्गाभाव इति वाच्यम्। बाल्येऽनुभूतस्य व्याध्यादिसम्भवे यौवनेऽस्मरणानुभवेनध्वम्सस्यद्वारत्वासम्भवात्।

नच दृष्टस्य द्वारत्वं कल्प्यतां, किं गुणान्तरकल्पनेनेतिवाच्यम्। पुण्यपापरूपस्य तस्य विधिनिषेधगोचरधर्माधर्मजन्यत्वेनकेवलानुभवाजन्यत्वात्। अनुभूयतेचेदानीं संस्कारप्रमोषो जात इति। न च ज्ञानादिवदात्मगुणत्वेक्षणिकत्वापत्तिरितिवाच्यम्। कार्यबलकल्पितस्य तस्यादृष्टादिवद्यावत्कार्यं स्थित्युपगमादनुभवस्मृत्योस्सामानाधिकरण्यादात्मनिष्ठत्वमिति च वदन्ति। अत्र भावनाख्यसंस्कारस्तु विद्यत एव। सतु ज्ञानावस्यातो नातिरिक्त इत्युक्तम्। अतिरिक्तत्वे मानाभावान्न गुणान्तरम्। नचान्यानुभूतस्यान्यस्यास्मरणेनानुभवसंस्कारस्मृतीनां सामानाधिकरण्येनकार्यकारणभावस्यवक्तव्यतया कथ संस्कारस्यज्ञानधर्मत्वमितिवाच्यम्। अनुभवस्मृत्योरपि ज्ञानधर्मत्वेनादोषात्।

न च देवदत्तो घटमनुभवतिस्मरतिचेत्यात्मधर्मत्वमनुभवस्मृत्योः प्रतीयत इति वाच्यम्। देवदत्तोगच्छतिपचतिभुङ्क्ते इत्यादौ शरीराद्वारैवानुभवस्मृत्यादीनामपि ज्ञानद्वारात्मधर्मत्वाभ्युपगमात्। वस्तुतस्तु, अनुभवादिशब्दानामवस्थायां तद्विशिष्टे च प्रयोगदर्शनात्तेषामात्मधर्मत्वसम्भवाच्च। न च तेषां ज्ञाननिष्ठत्वे ज्ञानमनुभवति स्मरतिचेति प्रत्ययप्रसङ्ग इति वाच्यम्। ज्ञानस्यात्मानं प्रत्यपृथग्सिद्धविशेषणत्वेन पारतन्त्र्याद्धर्म्युल्लेखेनैवप्रतीतेः। अन्यथा शरीरं पचति भुङ्क्त इत्यादि प्रत्ययप्रसङ्गात्। तत्राप्यात्म पर्यन्ततयैव प्रतीतेरुपपादनीयत्वात्। यद्वानुभवतिस्मरतीत्यत्रानुभवस्मृतिस्वावस्थाविशिष्टस्यैवार्थत्वेनतदवस्थितस्यज्ञाननिष्ठत्वाभाव त् पूर्वोक्तप्रयोगापत्तिवारणं सम्भवतीति बोध्यम्।

न च ज्ञानस्य त्रिक्षणवृत्तित्वेन तन्नाशे तद्वृत्तिसंस्कारस्यापि नाशेन कालान्तरे स्मृतिर्नस्यादितिवाच्यम्। नविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यत इत्यादि श्रुत्या आत्मवत् ज्ञानस्यापि नित्यत्वात्। तस्य द्रव्यत्वेनानुभवसंस्कारस्मृतीनां तदवस्थाविशेषत्वसिद्धेः। न च ज्ञानाश्रयस्यात्मनोनित्यत्वेन तत्रानुभवसंस्कारस्मृतीनां सामानाधिकरण्ये सर्वेषामज्ञस्येन तदतिरिक्तनित्यज्ञानाभ्युपगमे गौरवमितिवाच्यम्। न विज्ञातुरित्युक्तश्रुत्यैव ज्ञातृत्ववत् नित्यज्ञानसिद्धेः। कल्पितेर्थे हि गौरवं दोषः। न श्रुत्यादि प्रमाणसिद्धार्थे। वेगोपि कर्मविशेषात्मा अतिरिक्तेमानाभावात्। शीघ्रं गच्छति द्रुतं गच्छतीत्यादिप्रत्ययस्य कर्मातिशयमात्रेण चरितार्थत्वात्। ननु वेगेन शरोगच्छतीत्यादौ वेगस्य गमनक्रियातिरिक्तशरधर्मत्वप्रतीत्यागमनक्रियाविशेषत्वासम्भव इतिचेन्न। मान्द्येन गच्छतीतिप्रतीतिबलान्मान्द्यस्याप्यतिरिक्तत्वापत्तेः। क्रियाविशेषरूपं मान्द्यमिति चेद्वेगोपि तथेतिभवानेव पश्यतु। स्थितस्थापकोपि तत्तत्संस्थानविशेष एव संस्थानविशेषविशिष्टस्यैवशाखाकटादेः प्रतिगमनदर्शनात्। तर्हि यावत् संस्थितिद्रव्यस्य प्रतिगमनं स्यादिति चेद्भवतोवा कथं आकर्षणमोक्षणादि। सहकारिसाहित्यात् परिहार इति चेत्तुल्यमस्माकमपि।

किञ्चातिरिक्तवादेपि स्वसंस्थानगमने शैघ्र्यमान्द्यव्यवस्थायास्तत्तद्वस्तुसंस्थानाधीनत्वस्य वक्तव्यतया तेनैवसंस्थानविशेषेणस्वस्थानगमनसिद्धेरतिरिक्तकल्पनानैष्फल्यात्। नन्वेवमपि संस्थानातिरिक्तास्वीकारे रज्वा चिरकालमाकृष्यबध्वा विमुक्ते आन्दोळिकादण्डादौ पूर्वदेशप्रतिगमनप्रसङ्गः। संस्थानविशेषस्य सत्वात्। ममतुस्थितस्थापकस्य नाशादितिचेन्न। पूर्वसंस्थानस्य रज्जुबन्धनेन नाशाद्वक्रीभूतस्य तस्य संस्थानान्तरविशिष्टत्वेन प्रतिगमनकार्यासमर्थत्वात्। तवस्थितस्थापकनाशकल्पनं तु अधिकम्। यत्तुकार्पासबीजे लाक्षारागरूपितेसति तद्रक्ततापगमेपकुसुमफलादौ रागदर्शनाद्वासनानुवृत्त्यातिरिक्तवासनाख्य संस्कारःस्वीकार्य इति तदप्यसत्। तत्रापि अतिरिक्तसंस्कारानभ्युपगमात्। बीजावयवेषु लाक्षावयवानुवृत्तिबल देवकुसुमफलादौ रक्तत्वोपपत्तेः। यत्तुश्रीगारुडमन्त्राभिमन्त्रित जल निर्विषहरणदर्शनात् तत्रसंस्कारविशेषोऽङ्गीकर्तव्य इति तदप्यसत्। मन्त्रविशेषाहितशक्तिविशेषेणैव विषहरणादप्युपपत्तावतिरिक्तसंस्कारकल्पनेमानाभावात्। मीमांसकास्तु व्रीहीन् प्रोक्षति। व्रीहीनवहन्तीत्यादि विहितकर्ममिर्व्रीह्यादिद्रव्यनिष्ठकार्यान्तरयोग्यतापादकः कश्चित्संस्कारोङ्गीकार्यः। स च द्रव्येषु किञ्चित्कारमनपेक्ष्यनकेवलात्मसमवेतादृष्टरूपः। तथा सति प्रयाजादिवत् प्रोक्षणादेरप्यारादुपकारकत्वप्रसङ्गात्। ततश्च नैवाचारचरुयुक्तायां विकृतौ व्रीहीणामेव प्रोक्षणं स्यात्। न तु नीवाराणाम्। तत्प्रोक्षणस्य प्रकृताविहितत्वेनात्मसमवेतादृष्टासिद्धेः। अदृष्टस्य विहितकर्मजन्यत्वात्। तथा च द्रव्यनिष्ठस्संस्काराख्यगुणविशेषसिद्धः।

एवं स्वर्गकामो यजेतेत्यादावाशुतरविनाशियागादेःकालान्तरभाविफल जननायात्मसमवेतापूर्वनामधेयादृष्टविशेषरूपसंस्कारोपि स्वीकार्यः। न च "तृप्त एवैनमिन्द्रः प्रजयापशुभिस्तर्पयती"त्यादयर्थवादावगतदेवताप्रीतेर्द्वारत्वसम्भव इति वाच्यम्। अर्थवादानां स्वार्थप्रतिपादनपरत्वानभ्युपगमात्। अर्थव्ययक्लेशादिभूयिष्ठे कर्मणिकर्तुः प्ररोचनासिद्धयैविधेयार्थप्राशस्त्यपरत्वेन यथाकथञ्चिदर्थवादानां प्रामाण्यं न स्वतः। अत एव न यथावस्थितार्थपरत्वं तेषां सतावाऽसतावास्तुतिसिद्धेः। अविद्यमानगुणकथनस्यैव स्तुतित्वात्। अतो द्रव्यसंस्कार आत्मसंस्कारश्चेति गुणान्तरस्वीकार आवश्यक इति वर्णयन्ति। अत्राशुविनाशिकर्मणां कालान्तरफलजननाय कर्तुरात्मनोऽदृष्टविशेषसंस्कार आवश्यक इति तत्सत्यमेव। अथापि न गुणान्तरं श्रुतहानाश्रुतकल्पनादि दोषप्रसङ्गात्। किन्तु देवताप्रीत्यादिरूप एवसः। श्रूयते च "स एवैनं भूतिं गमयति एनं प्रीतः प्रीणाति। आप्तमेवैनमिन्द्रः प्रजया पशुभिस्तर्पयति।"

मामात्मपरदेहेषु प्रद्विषन्तोभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्॥

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ इत्यादि।

किञ्च यजदेवपूजायामिति यजतेर्देवपूजावाचित्वं पूजनं च प्रीतिहेतुसेवाविशेष इति सुप्रसिद्धम्। अतो यज्ञाद्याराधितादेवाः फलं ददतीति वैदिकाः पन्थाः। अतोऽपेक्षिते देवता प्रीतिकोपरूपद्वारे श्रुत्यैव प्रतिपन्नेऽश्रुतादृष्टकल्पनं निरर्थकमेव। विध्यपेक्षितार्थस्यार्थवादप्रतिपन्नत्वेपि प्रामाण्यं तैरभ्युपगम्यते। अन्यथा रात्रिसत्रस्य प्रतिष्ठाफलकत्वभङ्गप्रसङ्गात्। स्वर्गस्य यन्नदुःखेन संभिन्नमित्यादयर्थवादिकसुखरूपत्वासिद्धेश्चातोर्थवादप्रतिपन्नत्वेपि देवता प्रीत्यप्रीत्योर्द्वारत्वमुचितम्। न च देवता प्रीत्यप्रीत्यर्देवतानिष्ठत्वेन जीवात्मसमवेतसुखदुःखजनकत्वं कथं? वैयधिकरण्यादति प्रसङ्गाच्चेतिवाच्यम्। यदीयविहितानिषिद्धकर्मभ्यां देवतायाः प्रीतिकोपौजायेते तदीयसुखदुःखजनकतायाः तयोरभ्युपगमात्। स्वजनककर्मकर्तृत्वसम्बन्धेन प्रीतिकोषयोस्स्वाश्रयज्ञानवत्त्वसम्बन्धेन सुखदुःखयोर्हेतुत्वोपगमेनातिप्रसङ्गवैयधिकरण्ययोरभावात्, सुखदुःखयोः ज्ञानावस्थविशेषत्वात् कार्यतावच्छेदकसम्बन्धे ज्ञानवत्त्वं निवेशनीयम्।

ननु देवताप्रीतेर्द्वारत्वे कल्पान्तरकृतकर्मणां कल्पान्तरेफलं न स्यात्। न चेष्टापत्तिः कृतहान प्रसङ्गात्। आप्त एवैनमित्यादिभिरिन्द्रादिप्रतीतेरिन्द्रादेर्वा फलप्रदत्वेन तस्य कल्पान्ते भ्रष्टाधिकारत्वात् उत्तरकल्पेन्द्रादेः पूर्वकृतकर्मानाराधितत्वाच्च द्वारत्वासम्भवः। आत्मसमवेतादृष्टस्यद्वारत्वेतु यावत्फलप्राप्ति अदृष्टस्य सत्वादितिचेन्न। पूर्वोत्तरकल्पवृत्तीन्द्रादिदेवतान्तर्यामिणस्सर्वकर्मसमाराध्यस्य प्रीत्याततत्फल भवतीत्यभ्युपगमात्। यथा पूर्वोत्तराधिकारिणोधिपतिर्महाराजस्तत्तद्देशवर्तिनां तत्तत्फल तत्तदधिकारिमुखेन दापयतीतिलोके दृष्टम्। नन्वेवमपि तृप्त

एवैनमित्यादिभिरिन्द्रादिप्रीतेरेव फलप्रदत्वं श्रूयते। न तदन्तर्यामिप्रीतेः। अतश्रुतहानाश्रुतकल्पनं भवतोप्यनतिलङ्घनीयमितिचेन्न। यस्यात्मा शरीरम्। अन्तःप्रविष्टश्शास्ताजनानाम्। सर्वाणिभगवद्वपुः। जगत् सर्वं शरीरं ते इत्यादि प्रमाणैरिन्द्रादिदेवतानां भगवच्छरीरत्वाच्छरीरवाचिशब्दानां शरीरिपर्यन्तत्वदर्शनेन क्वचिदयोगार्थपौष्कल्येन चेन्द्रादिशब्दानां भगवद्वाचकत्वेन भगवत्प्रीतेरश्रुतत्वाभावात्।

अथ परमात्मज्ञानविधुरैः केवलेन्द्रादियाजिभिः कल्पान्तकृतकर्मणां कल्पान्ते फलं न स्यात्। तत्रेन्द्रादीनामेव प्रीत्युत्पत्त्या तेषां भ्रष्टाधिकारत्वात्। परमात्मप्रीत्यर्थतयातैरननुष्ठानात् परमात्मप्रीत्यसम्भवादिति तत्रवादृष्टं द्वारं कल्पनीयमिति चेन्मैवम्। परमात्मज्ञानं विनापीन्द्रं यजामह इति केवलेन्द्रादिदेवताराधन कर्मकरणेपीन्द्रादिशब्दानां भगवत्पर्यन्तत्वेन वस्तुवृत्त्या भगवत्प्रीत्युत्पत्तेः। परमात्मज्ञानपूर्वककर्मानुष्ठान इव भगवत्प्रीतेर्द्वारत्वसम्भवात्। इयांस्तु विशेषः। येचाग्निहोत्रदर्शपूर्णमासादीनिकर्माणि भगवत्समाराधनरूपाणीत्यजानन्तः केवलेन्द्रादि देवताराधनरूपाणीत्यनुतिष्ठन्ति। तेऽविधिपूर्वकं यजन्ते। अत एवच्यवनस्वभावाः परिमितफलवन्तो भवन्ति। येचतान्येवाग्निहोत्रदर्शपूर्णमासादीनिकर्माणि भगवत्समाराधनरूपाणि इन्द्रादि शब्दाश्च भगवत्पर्यन्ता इति जानन्तः अनुतिष्ठन्ति ते विधिपूर्वकं यजनादपरिमित फलभोगिनो नित्याभवन्तीति। स्मर्यतेचायमर्थः।

येप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः। तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥

अहं हि सर्वभूतानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥

यान्तदेवव्रतादेवान् पितॄन् यान्ति पितृव्रताः।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि माम्।

इत्यादिना। ननुतर्ह्यन्ततो भगवत्प्रीतिरेव हव्यकव्य सर्वकर्माणि तयैव फलसिद्धौकिमिन्द्रादिप्रीत्यातस्य। अप्रयोजकत्वादितिचेदुच्यते। वैदिकं कर्मद्विविधम्। हव्यं कव्यं चेति। देवतामुखेन भगवत्समाराधनं हव्यम्। तच्चदेवता प्रीतिपूर्वक भगवत्प्रीतिहेतुरूपमिति। पितृमुखेन भगवत्समाराधनं कव्यम्। तच्चपितृप्रीतिद्वारकभगवत्प्रीतिहेतुसेवारूपमिति च निष्कर्षः। अतो देवपितृप्रहाणेहव्यत्वकव्यत्वासम्भवेनकर्मद्वैविध्याभावप्रसङ्गात्। अतो भृत्यप्रीत्याराजप्रीतिवत् देवतापितृप्रीत्यापरमात्मप्रीतिः। सैवफलप्रदापण्डापूर्वैपरमापूर्वन्यायोऽत्र बाध्यः। किञ्च कर्मभिराराधितो भगवान् सकलमपि फलं कर्तुः प्रयच्छतीति शास्त्रसिद्धम्। तथा च पूर्वकल्पे तैस्तैरधिकारिभिः कर्मविशेषसमाराधितो भगवानुत्तरकल्पे तेषामधिकारिणां तत्फलतयाहव्यकव्या-

राध्यत्वरूपा देवतापितृवेददानि। तथा च देवानां पितॄणां च भगवत्सङ्कल्पायत्तं प्रधानभूतस्व-प्रीतिहेतुप्रीतिजनककर्माराध्यत्वं विधिबलप्राप्तं न त्यागमर्हति श्रुतहानप्रसक्तेः।

नन्वेषां देवताराधनत्वेकथं भगवदाराधनत्वं, तदाराधनत्वेवा देवताराधनत्वमितिचेन्न। श्रद्धनिमन्त्रित ब्राह्मणाराधने पित्राराधनवन्निर्जराणां देवत्वात्तदाराधनस्य शरीरिभूतभगवदारा-धनत्वात्। तथा च न देवताप्रीत्यतिरिक्तात्मादृष्टसिद्धिः। यत्तु व्रीहीन् प्रोक्षतीत्यादिकर्मणा व्रीह्यादिषु कार्यान्तरयोग्यतासंपत्तये द्रव्यनिष्ठसंस्कार आवश्यकः। अन्यथाविकृतौ नीवारप्रोक्षणं न सिध्यतीति तदसत्। तत्र नीवाराणामेव प्रोक्षणम्। न तु व्रीहीणां; तत्प्रोक्षणेन नीवारे देवतामिमत्यभावात्। प्रकृतिवद्विकृतिः कर्तव्येतिसामान्यातिदेशप्राप्तनीवारप्रोक्षणेन तत्रदेवतामि-मत्युत्पत्त्या नीवाराणां प्रोक्षणीयत्वसिद्धेः। अत्रकेचित् चिरध्वस्तकर्मणः कालान्तरफल जननाय-लिङादिवाच्यं स्थायिकार्यमात्मधर्मरूपमपूर्वमस्ति। तच्च नियोज्यप्रसिध्यैफलजनकमपिभृत्यपोषण-न्यायेन प्रधानं; राजा हि कार्यनिर्वाहाय भृत्यान् पोषयति।

एवमपूर्वमपि स्वप्रसिद्ध्यै स्वर्गादिकं नियोज्यफलं प्रयच्छति। नित्येपि लिङस्तत्वेना-पूर्वार्थकत्वम्। अन्यथा लिङो वैयर्थ्यादिति वदन्ति। तत्रापि कल्प्यापूर्वपक्ष इव श्रुतहाना श्रुतार्थवृत्तिकल्पनादोषसाम्यम्। अपूर्वं प्रधानमिति यदुक्तं तदप्यसत्। सुखादेरेव कृत्युद्देश्य-त्वात् प्राधान्यम्। श्रुतनिर्वाहकत्वादेवाप्यपूर्वे प्रवृत्तिः। तत् कथं प्रधानो भवितुमर्हति। किञ्चा-ज्ञातेऽपूर्वे लिङादेर्वृत्तिः, उत ज्ञाते; नाद्यः। व्याघातात्। नद्वितीयः। लिङाज्ञाते उत अन्येन ज्ञाते नाद्यः, अन्योन्याश्रयात्। ज्ञाते च व्युत्पत्तिः। व्युत्पन्ने चाभिधानम्। अभिधानाच्च ज्ञानमिति चक्रकाच्च। अन्येन ज्ञातत्वेकिमन्यत्। अनुभूतिःस्मृतिर्वा। न तावदनुभूतिः। अपूर्वस्यातीन्द्रियत्वात्। तदन्यस्यानुभूतिमूलकत्वात्। प्रमाणान्तराभावाच्च। नापूर्वाचकत्वं लिङादेः। तर्हि विधिप्रत्ययार्थः क इति चेदुच्यते। यागादिगतं कार्यत्वमेवलिङाद्याख्यम्। तच्च कृतिसाध्यत्वरूपम्। अतिरिक्तस्य लिङाद्याख्यत्वाभ्युपगमेपि देवताप्रीत्यादिकमेववाच्यमस्तु। तदाश्रुतहानाश्रुतकल्पनान्योन्याश्रयदोषाणामभावात्।

न च प्रवृत्ति प्रतीष्टसाधनत्वस्य कारणत्वात् पुरुषप्रवर्तनाय इष्टसाधनत्वमेव लिङर्थ इति वाच्यम्। दुरनुबन्धेमर्वादाविष्टसाधनत्वस्य सत्वेपि प्रवृत्त्यभावात्। नचेष्टसाधनत्वाज्ञानेपि कृति-साध्ये प्रवृत्तिरस्यादिति वाच्यम्। इष्टसाधनत्वस्यप्रकारितयोपगमात्। किञ्च लोकेशिष्टप्रयोगात् व्याकरणाद्वाशब्दार्थनिर्णयः क्रियते। द्वयमप्यस्मिन् पक्षेऽनुकूलं; लडादयोलकारास्तुल्येपि धात्वर्थस्य वर्तमानत्वभूतत्वादिकं किमपि रूपमभिदधति। एवं लिङादयोपि धात्वर्थस्यैव यागादेः कर्तृव्यापारसाध्यत्वमभिदधतीतिलिङाकृतिसाध्यत्वस्यैव प्रतिपाद्यत्वं युक्तम्। कालान्तरभाविफल-

साधनत्वायद्वारमात्रमपेक्षितम्। तच्च देवताप्रीतिरूपमेवेति पूर्वमेवोक्तम्। न च स्वर्गकामोयजेतेत्यादौ लिङाकार्यत्वबोधनादिष्टसाध्यत्वप्रतीतिःकथमितिवाच्यम्। स्वर्गस्यसुखरूपस्येष्टत्वेन तत्साधनत्वमर्थाद्यागे प्रतीयत इतीष्टसाधनत्वस्यार्थसिद्धत्वात्। एवमपगोरणशतयातनादेरप्यनिष्टसाधनत्वमार्थं कृतिसाध्यत्वं वाच्यम्। नित्येष्वकरणनिमित्तप्रत्यवाय सद्भावादनिष्टसाधनत्वमार्थम्।

सर्वत्रकृतिसाध्यत्वं शाब्दम्। अतस्सर्वानुगतत्वात् कृतिसाध्यत्वमेवलिङर्थः। तत्सहकारिभूतेचेष्टसाधनत्वं विशिष्टसाधनत्वे इत्यलं प्रसक्तानुप्रसक्त्या। अथ सङ्ख्या। एकत्वादि व्यवहारहेतुस्सङ्ख्या। द्रव्यमात्रनिष्ठा। तत्रैकत्वं नित्यद्रव्यवृत्ति नित्यम्। अनित्यद्रव्यवृत्ति अनित्यम्। आश्रयनाशाच्च नश्यति। द्वित्वादयस्त्वपेक्षाबुद्धिसहकृतैः प्रत्येकवृत्तिभिरवयवैकत्वैर्जन्यन्ते। न च द्वित्वादीनां घटादिनिष्ठानां रूपादिवदृद्रष्टॄणां सर्वेषां प्रत्यक्षत्वं स्यादिति वाच्यम्। सहकारिभूततत्तदपेक्षाबुद्धेस्तत्प्रत्यक्षे हेतुत्वोपगमेनोक्तदोषाभावादपेक्षाबुद्धिनाशाच्च तेषां नाशः। अतस्सर्वं द्वित्वादिकमनित्यम्। एकं रूपं रसात् पृथगिति व्यवहारस्त्वेकार्थसमवायेनद्रव्यनिष्ठैकत्वविषयः। गुणाश्चतुर्विंशतिः पञ्चकर्माणीत्यादिप्रतीतिस्तु सेनावनैकत्ववदपेक्षाबुद्धिविषयत्वरूपानेकत्वविषयिणी। तथा च सङ्ख्या गुणान्तरं वैशेषिका आहुः। तदसत्। तत्र कार्यैकत्वं नास्त्येवावयव्यभावात् कार्यैकत्वासिद्धेः। समुदायैक्यं तु राश्येकत्ववदेवापेक्षा बुद्धि विषयत्वरूपम्। अत एव राशिदशायामपि प्रत्येकविवक्षया व्रीहयस्सन्तीत्यनेकत्वं व्यवहरन्ति राश्यादौवाकीदृशमेकत्वमिति सौहार्देन पृच्छामीतिचेत् समूहिनां सयोगविशेष एवेति गृहाण।

ननु प्रळयदशायां प्रपञ्चैक्यं परस्यां देवतायामेकीभवतीति प्रतीयते इति चेत् न। तदैक्यस्य प्रकृतित्वावस्थारूपत्वात्। तच्चनामरूपविभागानर्हावस्थारूपमितिनिष्कर्षः। तस्या एव प्रकृतेः पुनरुत्पत्तिकाले प्रपञ्चत्वरूपबहुत्वावस्था जायते। यथा चूर्णत्वावस्थाप्रहाणेन पिण्डत्वावस्था। पिण्डत्वावस्थाप्रहाणेन चूर्णत्वावस्था। तत्र चूर्णत्वपिण्डत्वयोरेव बहुत्वैकत्वरूपत्वम्। तथा प्रकृतित्वप्रपञ्चत्वयोर्बहुत्वैकत्वरूपमितिनातिरिक्तोगुणः। निरवयवगतैक्यमपि नातिरिक्तमभ्युपगम्यते। किन्त्वेकस्यां क्रियायां समप्रधानतया समुच्चीयमानवस्त्वन्तर प्रतिपत्यभावकालीन वस्तुप्रतिपत्तिविषयत्वमेकत्वम्। वस्त्वन्तरप्रतिपत्तौ सत्यां वस्तुप्रतिपत्तिविषयत्वमेकत्वं न सम्भवतीति वस्त्वन्तरप्रतिपत्त्यभावकालीनेति घटरूपादि प्रतिपत्तौ सत्यामप्येकत्वसत्वात् समप्रधानतया समुच्चीयमानेति वस्त्वन्तरविशेषणं, अयमेकः अयमेक इत्यादौ समप्रधानतयासमुच्चीयमानवस्त्वन्तरप्रतिपत्तौ सत्यामप्येकत्वव्यवहारादेकस्यां क्रियायामित्युक्तम्। एवं चैकं रूपमेको रस इत्यत्राप्येकत्वस्य प्रतीतेरगत्या भवतापिनिरुक्तैकत्वं स्वीकार्यम्।

नचाश्रयगतमेकत्वमेवैकार्थसमवायेन भासत इति निरुक्तैकत्वेभानाभाव इति वाच्यम्। एको घट इतिवदेकं रूपमिति साक्षात्सम्बन्धेनैकत्वप्रतीतेः परम्परासम्बन्ध विषयकत्वस्यान्याय्यत्वात्। अन्यथा कपालैकत्वस्य निरुक्तसम्बन्धेन घटे भानसम्भवेन घटादावेकत्वादि भङ्गप्रसङ्गात्। इष्टापत्तौमिक्षुषादप्रसरणन्यायेन परमाण्वेकत्वपरिशेषे तत्रोपलम्भाभावेन तत्राप्यसिध्या गुणेष्विव द्रव्येष्वपि सङ्ख्याविलोपस्य दुर्वारत्वात्। अतोनैकत्वसङ्ख्या गुणान्तरम्। तद्द्वित्वत्रित्वादयोपि तत्तत्सहकारितयाभ्युपगतापेक्षाबुद्धिविशेषविषयत्वरूपाः। चतुर्विंशतिर्गुणाः। पञ्चकर्माणीत्यादिष्वपेक्षाबुद्धिविषयरूपतायास्त्वयैवाभ्युपगमात् द्रव्येष्वपि तथाङ्गीकारस्योचितत्वात्। भवतामतिरिक्तद्वित्वादिकल्पनं तत्सहकार्यपेक्षाबुध्यातदुत्पत्तिकल्पनमाश्रयसद्भावेपि तन्नाशान्नाशकल्पनं तत्प्रत्यक्षे च तत्पुरुषीयापेक्षाबुद्धेर्नियामकत्वकल्पनमनितरसाधारणव्याप्यवृत्तिपर्याप्तिसम्बन्धकल्पनमित्याद्यनेकदोषास्सोढव्याः। अतोवरं सङ्ख्यागुणान्तरप्रत्याशापरित्याग इति केचिदाचार्याः निरवयवगतमेकत्वं सङ्ख्यारूपं गुणान्तरमस्त्येवेत्याहुः। तन्मतेऽद्रव्यमेकादशविधमितिबोध्यम्।

अथ परिमाणम्। मानव्यवहारासाधारणकारणं परिमाणम्। तच्चतुर्विधम्। अणु महद्दीर्घं ह्रस्वश्चेति। चतुर्विधमपि परिमाणं सप्रतियोगिकम्। इदमेतस्मादणु इदमस्मान् महत्। इदमितो ह्रस्वम्। इदमस्माद्दीर्घमित्येव प्रतीतेः। एतच्चनवद्रव्यवृत्ति। विभुष्वपिमहत् परिमाणमस्ति। ततोमहद्धस्त्वभावात् तत् परममहत्परिमाणमित्युच्यते। परमाणुद्व्यणुकयोरणु, परिमाणम्। तच्चनत्र्यणुकपरिमाणारम्भकम्। परिमाणस्य स्वसमानजातीयस्योत्कृष्टपरिमाणजनकत्वेन त्रसरेणोरणुतरत्वप्रसङ्गात्। किन्तु, द्व्यणुकत्र्यावयवगतत्रित्वसङ्ख्याजायते। चतुरणुकादिष्ववयवगतमहत्त्वेनावयविनिमहत्त्व जायत इति वदन्ति। तन्न देशव्याप्तिविशेषस्यैवतत्तत्प्रतिसम्बन्धि निरूप्यस्य परिमाणप्रतीतिविषयत्वात्। अतिरिक्तवादेप्येतत्परिमाणाविनाभूतमभ्युपगतम्। तेनैव परिमाणव्यवहारोपपत्तौ अतिरिक्तगुणस्वीकारे गौरवम्। ननु देशसंयोगमात्रं परिमाणमतिप्रसङ्गात्। अतोऽवच्छिन्नदेशविशेष इति वाच्यम्। नचावच्छेदोयेनकेनापि। किन्तु, परिमाणविशेषविशिष्टेन भाव्यम्। अतस्तन्मूलकेन देशावच्छेदेन तन्निरासो न युज्यते। देशपरिमाणं च देशान्तराधीनमित्यनवस्था च स्यात्। अतः परिमाणमिति तत्वान्तरस्वीकार इतिचेन्न। परिमाणनिरपेक्षस्यावच्छेदस्य निरूपयितुं शक्यत्वात्।

यत्संयुक्तदेशं देशान्तरं च युगपदाक्रमितुं शक्तं तत्ततोधिकपरिमाणं यत् संयुक्तदेशमखिलमेकदैव यदाक्रमितुं न शक्तं ततोन्यूनपरिमाणं महत्त्वपरिमाणं, विजातीयाणुपरिमाणं नास्त्येव। महत्सेवापकृष्टेऽपकृष्टतरेऽपकृष्टतमेचाणुतारतम्यव्यवहारः। एकदिग्देशावच्छेदेनाधिक्यं दैर्घ्यं तेनैव न्यूनत्वं ह्रस्वत्वं नानादिग्देशावच्छेदेनाधिक्यं महत्वं नानादिग्देशावच्छेदेनन्यूनत्व-

मणुत्वम्। चतुर्विधस्यापि देशव्याप्तिरूपत्वेन तत्तत्प्रतियोग्यपेक्षया भेदव्यवहारः। अत एवैकस्मिन्नेवस्तम्बान्तरापेक्षया स्थूलत्वाणुत्वह्रस्वत्वदीर्घत्वव्यवहारः घटते। अतोवच्छेदे परिमाणापेक्षाया अभावान्मूलघातित्वानवस्थित्यादिदोषोपिदूरोत्सारितः। अतिरिक्तवादेपि रज्ज्वादिषु महत्त्वव्यवहारस्य प्रत्येकव्रीह्यादिव्याप्तदेशाधिकदेशव्यापनस्यैवनियामकत्वात्तत्रावयवभावेन परिमाणानभ्युपगमात्। तथैव सर्वत्रव्यवहारसिद्धौकिमधिककल्पनेन।

अत्राय निष्कर्षः। अधिकदेशव्यापनं महत्त्वम्। अल्पदेशव्यापनं अणुत्वम् ऋजुदेशेऽधिकदेशव्यापन दैर्घ्यम्। तत्रैवाल्पदेशव्यापनं ह्रस्वत्वम् तिर्यग्दूरत्वं स्थौल्यम्। तिर्यक सामीप्यं कार्श्यम्। स्वाम्शे स्वाम्शस्थिति राजवम्। तच्चर्जुदण्डेहातेन गृह्यमाणे ऋजुत्वानिरीक्ष्यमाणे पूर्वपूर्वांशस्योपर्युत्तरोत्तराम्शस्थितिरूपम्। पराम्शे स्वाम्शस्थितिर्वक्रता। सर्वदिगवच्छेदेन दूरत्वसामीप्यसाम्यं वृत्तत्वम्। तच्चपूर्वदिगन्त्यावयवानां तद्विरुद्धपश्चिमदिगन्त्यावयवानां च यादृशं दूरत्वं सामीप्यं च तादृशमेव दक्षिणोत्तरयोराग्नेय वायवीयनैर्ऋतैशान्ययोर्दूरसामीप्यसाम्यं चेद्भवति तदेवबर्तुळत्वम्। केवलं विरुद्धदिगम्शेभ्यः केवलं विरुद्धदिगम्शानां कोणविरुद्धदिगन्तराम्शेभ्यः कोणविरुद्धदिगन्तराम्शानां दूरत्वसामीप्यसाम्यं चतुरश्रत्वं प्राच्योदीच्यदिगम्शयोर्यादृशं दूरत्वं सामीप्यं च तादृशं चेद्दक्षिणोत्तरदिगन्ताम्शयोर्दूरत्वं सामीप्यं च। तथाग्नेयवायवीयकोणयोर्यादृशं दूरत्वसामीप्यं तादृशं चेन्नैर्ऋतैशानदिगन्ताम्शयोर्दूरत्वं सामीप्यं च भवति। तच्चतुरश्रत्वमिति निष्कर्षः। अतः परिमाणं न गुणान्तरमितिसिद्धम्।

पृथक्त्वव्यवहारकारणं पृथक्त्वं गुण इति काणादाः। तद्भेद नातिरिच्यते। पृथक्त्व प्रत्ययस्य भेदविषयतयैव उपपत्तेरतिरिक्तकल्पने मानाभाव त यदिपृथक्त्वभेदयोर्भेदस्वीक्रियते तदायमस्माद्भिन्नः पृथक्चेतिकदाचित् प्रयोगस्स्यात्। किञ्च यदि पृथक्त्वं गुणान्तरं, तद द्रव्येष्वेवायमस्मात् पृथगितिव्यवहारःस्यात्। न गुणादिषु। गुणेगुणानङ्गीकारात्। व्यवह्रियते हि रूपं रसात् पृथगिति। सभ्रम इति चेन्न। बाधकाभावात्। न च परम्परासम्बन्धेन द्रव्यनिष्ठस्यैवव्यवहार इति वाच्यम्। साक्षात्संबन्धस्याबाधेन परम्परासंबन्धविषयत्वकल्पन नौचित्यात्। अन्यथाद्रव्येष्वप्येवं प्रसङ्गात्। अतोद्रव्येऽद्रव्ये च भेदमादायैव पृथक्त्वव्यवहारं समर्थय। त्यज गृहीतग्राहिताम्। न च पृथक्त्वातिरिक्तभेदानङ्गीकारेण तस्यातिरिक्तगुणत्वं सिद्धमिति वाच्यम्। भेदस्य घटत्वपटत्वगोत्वाश्वत्वादितत्तत्संस्थानरूपत्वेनतदभिन्नपृथक्त्वस्याप्यतिरिक्तत्वासिद्धेः।

नचाननुगतानां घटत्वादीनां कथं भेदशब्दवाच्यत्वमिति वाच्यम् विलक्षणबुद्धिविषयत्वोपाधिना स्वरूपादिशब्दवत्तेषां वाच्यत्वसंभवात्। तदेव किमिति सौहार्देन पृच्छामीति

चेत्तादात्म्यविरोधिबुद्धिविषयत्वमिति गृहाण न च घटः पटो नेत्यत्र घटात् पृथगितिवदवधिपञ्चमी कुतो नास्तीतिवाच्यम्। अर्थैक्येपि पृथग्विनानानाभिस्तृतीयान्यतरस्यामिति पृथग्शब्दप्रयोग एव पञ्चमी विधानात्। पृथक्त्वगुणवाचकान्यशब्दपर्यायप्रयोगेऽन्यारादिति सूत्रेण पञ्चमीविहितानन्वन्योन्याभावार्थकशब्दयोगे घटो न पट इत्यत्र पञ्चम्यभावात् अतः पृथक्त्वगुणः स्वीकर्तव्य इति वाच्यम्। धर्मिपर्यन्तान्योन्याभावार्थकान्यादिशब्दयोग एव पञ्चमीविधानात्। अत्र च धर्मिपर्यन्तान्योन्याभावार्थकत्वविरहात्। तद्योगे पञ्चम्यभावात्। तर्हि घटात् पृथक्त्वं पटे इत्यत्र कथ पञ्चमीतिचेन्न। पृथग्स्तुनोभावः पृथक्त्वमिति प्रथमं धर्मिणमुल्लिख्यैव धर्मबोधेन धर्मिपर्यन्तत्वानपायात्।

नन्वेवं घटाद्भेदः पटः इत्यत्र पञ्चमी न स्यात्। भेदशब्दस्य धर्मिपर्यन्तत्वाभावात्। धर्मिपर्याययोग एव अन्यारादिति सूत्रेण पञ्चमीविधानमितिचेन्न। अन्यारादिति सूत्रेण यथा कथञ्चिदन्यार्थकानां योगे पञ्चमीविधानेन भेदस्याप्यन्यार्थत्वेन तत्र पञ्चमीनिर्बाधैव। घटो न पट इत्यत्रत्वपानोनादीनां समानाधिकरणावधिसापेक्षस्य दर्शनेन निरातातिरिक्तान्यार्थकयोग एव पञ्चम्यावक्तव्यतयोक्तस्थले दोषाभावात्। अतो भेदान्नातिरिच्यते पृथक्त्वगुणः। अथ संयोगनाशको गुणः विभागः। स च गुणान्तरमिति नैयायिकाः। तदयुक्तं विभागजनकतयाभ्युपगतानां नोदनपाटनादीनामेव संयोगनाशकत्वात्तेनैव विभागप्रत्ययनिर्वाहात्।

न च संयोगजनकजातीयानां नोदनादीनां कथ संयोगनाशकत्वमितिवाच्यम्। रूपादिजनकाग्निसंयोगजातीयानां रूपनाशकत्वाभ्युपगमात्। न च पाट्यमानवंशे शब्दोत्पादकतयाविभागगुणः कश्चित् कल्प्यत इति वाच्यम्। तत्रापिपाटनादेरेवतज्जनकत्वाभ्युपगमात्। पाटनादेश्च संयोगविशेषरूपत्वस्य वक्ष्यमाणत्वाद्विभक्तप्रत्ययस्य संयोगाभावविषयतयोपपत्तेः। तर्हिमेरुविन्ध्ययोरपि विभक्तप्रत्यय विषयत्वं किं न स्यादितिचेन्न। तादृशप्रत्ययस्य संयोगध्वंसात्मकाभावविषयत्वात्। ननु क्षणिकस्य विभागस्य ध्वंसात्मकत्वं कथमितिचेन्न परिभाषामन्तरेण तस्य क्षणिकत्वे प्रमाणाभावात्। प्रतियोगिस्मरणादौसति तस्माद्विभक्तोयमिति प्रत्ययस्य यावत् पुनस्संयोगेसत्यपि विभक्तबुद्धिस्स्यादितिचेन्न। भवतामपि पूर्वसंयोगप्रध्वंसस्य विद्यमानत्वेनासंयुक्तप्रत्ययप्रसङ्गात्। यावदुत्पन्नसंयोगध्वंसे सतितदा तत्तत्प्रतियोगिकतया तथा प्रतीतिरिति चेत्तुल्यम्।

ननु प्रध्वंसोपि भावान्तरमेव भवतामितिशब्दान्तरेण विभागस्स्वीकृत इतिचेन्न। उत्तरसंयोगस्वरूपत्वात् तस्य। ननु सजातीयस्यैव कथं तद्विरोधित्वमिति चेदभावनिरूपणे

एतत्परिहारस्य वक्ष्यमाणत्वात्। अत एव वियुक्तो विघटितो विशिष्टो विनष्टसंयोगो विभक्तो विभिन्नो विप्रकृष्टो देशान्तरगत इति प्रतीतिर्जायते। अतो न गुणान्तरमितिसिद्धम्।

दिक्कालापेक्षया परापरधीहेतुगुणौ परत्वापरत्वे। ते द्विविधे। दिक्कृते कालकृते चेति। तस्यैकस्यां दिश्यवस्थितयोर्द्वयोः पिण्डयोः इदमस्माद्दिप्रकृष्टमिदमस्मान्निकृष्टमिति बुद्धिरूपनिमित्तकारणानुगृहीतसंयुक्तसंयोगभूयस्त्वापरत्वव्यङ्ग्यदिक्पिण्डसमवायिकारणवशेन परत्वापरत्वे उत्पद्येते। एवमनियत दिगवस्थितयोर्युवस्थविरपिण्डयोर्यमस्माद्बहुतरकालसंबन्धी, अयमस्माद्बहुतरकालसम्बन्धीत्यपेक्षाबुद्धिनिमित्तकारण सहकृतेन तपनपरिस्पन्दाल्पत्वभूयस्त्वोपनायक कालपिण्डसंयोगासमवायिकारणेन कालकृतपरत्वापरत्वे उत्पद्येते इति काणादा आहुः। ते दिक्कालसम्बन्धान्नातिरिच्येते। लाघवात्। न च कालदिक्संयोगस्याप्रत्यक्षत्वेन परत्वापरत्वयोः प्रत्यक्षत्व न स्यादितिवाच्यम्। तत् प्रत्यक्षत्वस्य सपर्थित्वात्। यादृशोपाध्यवच्छिन्नदिक्कालसंबन्धः परत्वापरत्वोत्पादकः भवतां, तादृश एवास्माकं परापरव्यवहारविषय इत्युपगमेनाति प्रसङ्गानवकाशात्। यदिपरापरव्यवहारमात्राद्गुणान्तरं कल्प्यते तदा परापरजाति व्यक्तपरापरपरिमाणपरापरज्ञानशक्त्यादिष्वपिपरत्वापरत्वगुणान्तरकल्पिः स्यात्। व्यवहारस्याविशेषात्।

ननु तत्रन्यूनाधिकवृत्तित्वन्यूनाधिकदेशव्याप्तिन्यूनाधिकविषयत्वादिभिरेव परापरव्यवहारोपपत्त्या जात्यादौपरत्वापरत्व गुणान्तरं नकल्प्यमितिचेन्न। अत्रापि न्यूनाधिकदिक्कालसंबन्धेनैव व्यवहारोपपत्तौ दैशिककालिकपरत्वापरत्व गुणान्तरकल्पनं मुधेतिपश्यतु भवान्। पृथक्त्वापृथक्त्वादयो भूतत्ववर्तमानत्वादयश्च दिक्कालसंबन्धमात्राद्व्यवहार्या इत्यङ्गीकर्तृणां अत्र परं गुणान्तरस्वीकारः कुत इति मन्यामहे। अतः परत्वापरत्वेन गुणान्तरमितिसिद्धम्। अथ कर्म। चलतीति प्रत्यक्षविषयः कर्म। तत् प्रत्यक्षेणैव गृह्यते हस्तश्चलति वृक्षश्चलतीत्यादि प्रतीतेः। तत् पञ्चविधम्। उत्क्षेपणाक्षेपणाकुञ्चनप्रसारणगमनभेदात्। भ्रमणादयस्तु गमनेऽन्तर्भूताः। यद्यप्युत्क्षेपणादीन्यपि गमनेन्तर्भावयितु शक्यानि। तथापि महर्षिणागौतमेन पञ्चविधत्वकथनात्। भ्रमणादीनां पृथगभिधानाच्च पञ्चकर्माणीत्युक्तमितिकेचित्। केचित् कर्मानुमेयमित्याहुः। तदसत्। तथासति कर्मणएवासिद्धिप्रसङ्गात्।

तथाहि, कार्येण संयोगेनजनकतया हि कर्मकल्पनम्। एवं च जलधरगिरिसंयोगस्य गिरावपि सत्वेन तत्रापि कर्म कल्प्येत। नन्वन्यतरकर्मजनितोयं संयोग इति चेत् केन प्रमाणेन सिद्धम्। तत्रापि जलधर कर्म जनितोयमितिनियमश्च कुतस्सिद्धः। जलधरगिर्योश्चलाचलत्वेन प्रतीतेरितिचेत् तर्हि सिद्धं कर्मणः प्रत्यक्षत्वम्। तथा च प्रत्यक्षसिद्धत्वात् कर्मातिरिक्तमिति तदसत्। कर्महेतुतयाभ्युपगतैः प्रयत्नादृष्टादिभिः कर्मजन्यतयाभ्युपगतविभागपूर्वकसंयोग एव

जन्यते। न मध्येकर्म गौरवात्। चलतीत्यादिप्रत्ययस्तु तादृशसंयोगविषयक एव। अतो विभाग पूर्वक संयोगान्नातिरिच्यते कर्म। न च चन्द्रतारकादीनां विभागपूर्वक संयोगदर्शनाच्चलतीति प्रत्ययस्यादिति वाच्यम्। प्रत्यक्षप्रतीयमान तादृशसंयोगसन्तान नैरन्तर्यस्यैव चलतीति प्रत्यक्ष विषयत्वात्। अतिरिक्तपक्षेपि भ्रमणे सत्यपि प्रत्येकं कर्म क्षणेषु भ्रमतीतिप्रत्ययप्रसङ्गादितिप्रतिबन्द्यां भ्रमणसन्ताननैरन्तर्याभावादिति परिहारस्य तुल्यत्वात्। न च कर्मणासंयुज्यत इति व्यवहारात् संयोगातिरिक्तत्वं कर्मणः सिध्यतीति वाच्यम्। कार्यभूतोत्तरसंयोगापेक्षया विलक्षणतद्धेतुभूतसंयोगस्यैव कर्मशब्दवाच्यत्वेन तथा व्यवहारात्। अन्यथाधावनात् पततिगमनात्स्खलतीति व्यवहाराद्गमनातिरिक्तस्वीकारप्रसङ्गात्। नचेष्टापत्तिः। सर्वेषां गमनान्तर्भावप्रतिपादनात्।

नचैवमप्युत्तरसंयोगेस्थिरे सति यावत् संयोग चलतीतिप्रत्ययप्रसङ्ग इति वाच्यम्। व्यवहारबलादारम्भक्षण विशिष्टसंयोगस्यैव चलनप्रत्यय विषयत्वात्। भवतापि तत्र कर्मनाशः कल्प्यते। अतो विभागपूर्वक संयोगारम्भकत्रस्य तत्तत्क्षणविशिष्टनिरन्तरतत्तत्सन्तानस्यवा कर्मत्वमिति निगमान्तगुरूणां मतम्। अन्ये केचिदाचार्याः। न विभागपूर्वकसंयोग एव कर्म। एकेन जलधरेण विभज्यमाने जलधरान्तरेण तेनवा पुनस्संयुज्यमाने पर्वते चलतीतिप्रत्यय प्रसङ्गात्। न च स्वाधारभूत पूर्वदेशविभागोत्तरदेशसंयोगयोः कर्मपदार्थत्वात् पर्वते स्वाधारपूर्वदेशविभागाभावान्नचलतीति प्रत्ययप्रसङ्ग इति वाच्यम्। महाप्रवाहवृत्तिनिष्कम्पझषेचलतीति प्रत्ययप्रसङ्गस्य दुर्वारत्वात्। तत्र स्वाधारप्रवाहरूप पूर्वदेशविभागतादृशसंयोगयोस्सत्वात्। भूमाविव प्रवाहेपि देशव्यवहारसाम्यात्।

अथ स्थिरदेशविभागसंयोगयोः कर्मत्वं प्रवाहस्तु न स्थिरदेशः अतो नोक्तदोषप्रसङ्ग इति चेत् तर्हि स्थिरास्थिरविभागस्य संयोगातिरिक्तेन निर्वाह्यत्वात् सिद्धमतिरिक्तं कर्मेतिवदन्ति। कर्मणा सह एकादशविधमद्रव्यमिति तेषामाशयः। अत्रेदं तत्वम्। यत्र स्वाधारदेश विभागपूर्वक देशान्तरप्राप्तिजनकव्यापारः स एव चलतीति व्यवहियते। व्यापारश्च प्रयत्नभगवत्सङ्कल्परूपादृष्टदेशान्तर प्राप्तिजनकनोदनादि संयोगविशेषरूपः। तथा च स्थाणुर्वैतादौ पक्षिजलधरादिसंयोगस्य द्विनिष्ठत्वस्वाभाव्यात् उभयवृत्तित्वेपि स्थाणौ पर्वते वा न चलतीतिव्यवहारः। तत्र तादृशव्यापारस्या भावात्। एवं च प्रवाहस्थमकरादेर्निश्चलत्वाभावेन तत्र चलतीति प्रतीतेरिष्टापत्त्या निश्चलाकाशादेश्चञ्चलप्रवाहसम्बन्धेप्याकाशेनिरुक्तव्यापाराभावाच्च आकाशश्चलतीतिप्रसङ्गवारणेऽतिरिक्तकर्मतत्त्वकल्पिर्मुधेत्याचार्याणामाशयः इति।

अथ सामान्यं चिन्त्यते। अत्र वैशेषिकाः। अत्यन्तविभिन्नघटादिव्यक्तिषु घट इत्येकाकारबुद्धिरनुभूयते। सा न निष्कारणिकेतिवक्तुं शक्या। अनुगतधर्मं विनानुगतप्रतीतेरनुदयात्।

अतस्सर्वघटव्यक्तिनिष्ठानुगतं नित्यमेकं घटत्वरूपं सामान्यमस्तीत्यभ्युपगन्तव्यम्। न च ज्ञानाकार एव तदितिवाच्यम्। घटत्वादेश्चाक्षुषत्वाभावप्रसङ्गात्। चक्षुषोज्ञानग्रहणासमर्थत्वात्। एवं घट-पट-गवादिशब्दानां तत्तदर्थं प्रतिपत्तौ शक्यतावच्छेदकस्यानुगतस्याभावे घटादिव्यवहारोपि न स्यात्। एवमनुमानप्रामाण्यविलोपप्रसङ्गश्च। प्रत्यक्षदृष्टधूमवह्न्योर्व्याप्तिग्रहणेप्यनुमीयमानवह्निधूमयोर्व्याप्त्यग्रहणात्। वह्निधूमयोर्भेदात् सकलवह्निधूमव्यक्तिषु वह्नित्वधूमत्वरूपानुगतधर्मस्वाकारे तु वह्निधूमचाक्षुषात्तरं चक्षुरसंयुक्तसामान्यप्रत्यासत्त्या सकलवह्निधूमसाक्षात्कारे तत्तद्धूमव्यक्तिषु तत्तद्वह्निव्याप्तेरपि ग्रहणादनुमानप्रामाण्यं घटते। अतस्संस्थानातिरिक्तमनुगतं सामान्य तत्त्वान्तरमिति वदन्ति। तदनुपपन्नम्। संस्थानातिरिक्तस्यानेकेष्वेकाकारबुद्धिविषयस्यादर्शनात्। तावतैव गोत्वादिजातिव्यवहारोपपत्तेः। संस्थानस्यातिरिक्तत्ववादेपि संप्रतिपन्नत्वाच्च संस्थानमेवजातिः। तदतिरिक्तजात्यभ्युपगमे मानाभावात्।

अयं सास्नादिमानयमपि सास्नादिमानयं पृथुबुध्नोदराकारः अयमपि पृथुबुध्नोदराकार इति सास्नादिनैवानुवृत्तिव्यवहारतत्प्रतीत्योरुपपत्तेः। व्याकृतरूपजाति विशेषादशब्दानामिव घटपटगवादिशब्दानामपिसुसदृशोपाधे शक्यतावच्छेदकत्वसम्भवेन व्युत्पत्तिमूलव्यवहारानुगत प्रतीत्योरुपपत्तेश्च। ननु संस्थानस्य तत्तद्वस्त्वसाधारणस्वरूपस्य प्रतिवस्तुव्यावृत्तत्वात् कथमनुगतधीहेतुत्वमिति चेन्न। संस्थानानां सोसादृश्यनानुगतधी व्यवहारहेतुत्वात्। संस्थानेषु सोसादृश्यं किमिति चेत् सुसदृशव्यवहारासाधारणहेतुस्वरूपत्वम्। तच्च संस्थानेषु घटगवादिषु वर्तते यथैकस्याघटव्यक्तेर्यादृश पृथुबुध्नोदराकारस्तादृश एव सर्वघटव्यक्तीनाम्। एवं एकस्यागोव्यक्तेर्यादृशं सास्नादिमत्वं तादृशमेवानखिलगोव्यक्तीनामिति सुसदृशमेव तत्तत्संस्थानमितिनानुपपत्तेः। अतिरिक्तवादेपि स्वरूपव्याकृजातिविशेषाद्यनुगतप्रतीतौ सोसादृश्योपाधिवशादेवानेवाहस्तेषु जाति शून्यत्वात्। अन्यत्रापि तथैवलोक्रियतामिति। ननु सोसादृश्यमिति नामान्तरेण परामृशतजातिस्वीकार इति चेन्न। व्यावृत्तानां संस्थानस्यैव प्रतिनियतप्रतियोगिस्मारकस्वभावतयासोसादृश्यरूपत्वेन परामृशतजातिस्वीकारासंभवात्। तादृशवादेपि गोजातीयत्वप्रसङ्ग इतिचेन्न। तत्र सादृश्यलेशसद्भावेपि सोसादृश्याभावात्। गवयादौ गोलक्षणस्य सास्नादेरतिव्याप्तिपरिहाराय सुसदृशसास्नादेरभावस्य त्वयाप्युपादानीयत्वात्।

किञ्च, अतिरिक्तगोत्वादिजातौ किं मानम्?। न तावत् प्रत्यक्षम्। तद्धि बाह्याबाह्यभेदेनद्विविधम्। तत्र न तावदबाह्यं मानम्। मनसः बाह्यग्रहणासमर्थत्वात्। बाह्यमपि चक्षुरादिभेदभिन्नं बहुविधम्। तत्र न तावच्चक्षुः। घटादौ निपुणं निरीक्ष्यमाणेपि घटत्वस्य संस्थानातिरिक्तस्यानुपलम्भात्। नापि त्वक्। अन्तर्बहिश्चत्वचा घटे व्याप्रियमाणेपि घटत्वानुप-

लम्भात्। नापि श्रोत्ररसनघ्राणादीनि। तेषां शब्दरसगन्धतज्जातिमात्रग्रहण समर्थत्वात्। नाप्यनुमानम्। कल्पकाभावात्। सत्वेपि च संस्थानेनान्यथासिद्धेर्वक्तुं शक्यत्वात्। नचागमस्तद्विषयो दृष्टचरः। अतः प्रमाणाभावान्न संस्थानातिरिक्त जातिसिद्धिः। किं च स्वाश्रये घटादौ घटत्वादिजातिः किं प्रतिव्यक्ति पूर्णा वर्तते उतैकदेशेन। आद्येऽन्यत्र वृत्तिर्नस्यात्। द्वितीये प्रतिव्यक्ति जातिप्रत्ययो न स्यात्। तत्र जात्यसत्वात्। जातेस्सांशत्वप्रसङ्गाच्च। न च भवदभिमतसंयोगेप्येवं वृत्तिकल्पनेनायं दोषः प्रसज्यत इति वाच्यम्। तस्यानेकेपि स्वाश्रये परिपूर्ण वृत्तित्वेन धर्मिग्राहकमानसिद्धत्वात्। कल्प्यमानेह्ययं दोषः। न तु कल्पते। अतस्संस्थानातिरिक्त जातिकल्पनेदोष प्रसज्यत एव। एवमाश्रयघटादिनाशे घटत्वादिस्थितिर्दुरुपपादा।

व्यक्त्यन्तरमाश्रित्य वर्तत इति चेन्न। अद्रव्यस्य तस्य गमनासम्भवात्। न च तत्रोत्पद्यत इति वाच्यम् तस्यानित्यत्वेनोत्पत्तिनाशयोरसम्भवात्। न चैवं संस्थानेपि दोष इति वाच्यम्। तस्य प्रतिव्यक्तिभिन्नत्वादनित्यत्वाच्च। किञ्च घटत्वादि जातेः पृथुबुध्नोदराकाररूप संस्थानमभिव्यञ्जकम्। गोत्वादिजातेस्सास्नादिसंस्थानमभिव्यञ्जकमिति जातिवादिन आहुः। तत्र सास्नादिजात्यन्तरेणानुगतिकृतं सदेव गोत्वादिकमभिव्यनक्ति। उतानुगतिकृतं सत्। अननुगतत्वे तस्यानुवृत्त्यभावादनुगतजातिव्यञ्जकत्वानुपपत्त्या जात्यन्तरपरिगृहीतत्वमेववाच्यम्। तथा च सापिजातिर्व्यञ्जकान्तरेण व्यङ्ग्यास्यात्। तच्चव्यञ्जकं जात्यन्तरपरिगृहीतं भवेत्। सापि व्यञ्जकान्तरमपेक्षत इति जातिं तव्यञ्जकसंस्थानपरंपरयानवस्थास्यात्। तत्परिहारायव्यञ्जकधर्मस्य स्वेनैवानुगतिरितिचेत्तर्हिजातिकल्पनं व्यर्थम्। तेनैवस्वतोनुगतेनधर्मेण जातिकार्यनिर्वाहात्। व्यावृत्ता एव धर्मा अनुगतां जातिं व्यञ्जयन्तीति चेत्तर्हित एव व्यावृत्तधर्मा अनुगतधीव्यवहारयोर्निर्वाहकाः भवन्तुवस्तुसत्वाभावात्। तथा च निरर्थं जातिकल्पनम्।

अथ संस्थानादिभिरेव गवाद्यनुवृत्तधीव्यवहाराइत्युक्तम्। तत्र किं व्यावृत्तैरनुवृत्तैर्वा गवाद्यनुवृत्तव्यवहारनियमः। न तावद्व्यावृत्तैर्व्यक्तिवत्। न हि व्यक्तयोनुवृत्तत्वव्यवहारं कुर्वन्ति। एवं व्यावृत्तधर्मानानुवृत्तव्यवहारं नियन्तुमर्हन्ति। अनुवृत्तैर्धर्मैर्व्यवहारनियमश्चेत्तदा जातिरिकाणाय प्रयासो व्यर्थः। अनुवृत्तधर्मस्वीकारात्। यदिव्यावृत्ता एव धर्मा अनुवृत्तधर्मान्तरेण परिगृहीताः गवादि व्यवहारमनुवृत्तं निर्वहन्तीत्युच्यते। तदा प्रथममेवास्मदभिमतानुवृत्तधर्म स्वीकार एवोचितः। किमेभिर्मध्ये परिकल्पितैर्व्यावृत्तधर्मैर्गौरवादितिचेन्मैवम्। केचित् संस्थान विशेषाः क्वचिदविकारेषु मेथस्सादृश्यरूपामवन्ति। ये च जात्यभिव्यञ्जकतया परेषामिष्टास्त्त एव सौत्राद्दश्यव्यवहारविषयीभूतां सामान्यव्यवहारं निर्वहन्ति। सौत्राद्दश्यादेकजातीयास्सन्त एकव्यवहारहेतवो भवन्ति। तत्रैकजातीयत्वमन्योन्यानुगमजनितान्योन्याभेदव्यवहारापादकस्मृति

विषयत्वम्। अतो नानवस्था। अन्यथाजातिव्यञ्जकोपाधिरूप सौत्राद्दृश्यनिरूपणासंभवात् भवता जातिरप्युत्पन्नास्यात्। अतो यथोपलब्धं संस्थानमेव घटत्वादि जातिरित्यास्थेयम्।

किञ्च भूतत्व मूर्तत्वशरीरत्वेन्द्रियत्वजातित्वविशेषत्वा भावत्वादीनां जातिबाधकसद्भाव सङ्केताज्जातित्वमनभ्युपगच्छतां स्वरूपव्यक्तिराशिसेनावनादिषु च जातिमनभ्युपगच्छतां तत्रभवतामनुगतप्रतीतिव्यवहारादयः कथं निर्वाह्याः। अनुगतधर्माभावाच्चतत्तत्संस्थानादिभिस्तुसदृशैरेव निर्वाह इति चेदन्यत्रापि तथा निर्वाहेसत्यत्रामाणिकजातिकल्पनाप्रयासोव्यर्थः। नन्वगतिकस्थले गौणाश्रयणेऽन्यत्रापि तदाश्रयणप्रसङ्गो न युक्तः। तथाचेद्गौणमुख्यन्यायविलोपस्स्यात्। भवतापि यस्य वेदाश्शरीरं यस्य यज्ञाश्शरीरं इत्यत्र गौणाश्रयणवत् पृथिव्यादावपि तथास्यात्। अतस्स्वरूपादौ गौणाश्रयणेपि गवादौ जातिस्वीकारोयुक्त इतिचेन्न। अनन्यथासिद्धप्रमाण प्रतिपन्नार्थे यथाप्रमाणं वस्तुस्थितिमभ्युपगम्यागतिकस्थले गौणाश्रयणं सर्वसम्मतम्। यथा गङ्गापदस्य प्रवाहे मुख्यत्वं तीरे गौणत्वं स्वीकृतम्। तथा संस्थानातिरिक्तजातौ प्रमाणाभावात् नात्रगौणमुख्य न्याय प्रसरावकाशः। तथा च काल्पनिकार्थे च सर्वदोषाणां परिहार्यत्वात् पूर्वोक्तप्रसङ्गो दुर्वार एव। किञ्च परस्परपरिहारेण वर्तमानयोर्धर्मयोरेकत्रमेळनं साङ्कर्यमिति जातिदोषं कल्पयित्वा भूतत्व मूर्तत्व शरीरत्वेन्द्रियत्वादेर्जातित्वमनभ्युपगच्छतां घटत्व गोत्वाश्वत्वादेरपि जातित्वं न स्यात्। तत्रापि साङ्कर्यदोषसद्भावात् मृद्घटसुवर्णघटताम्रघटायसघटाः वर्तन्ते। उपलभ्यन्ते च घटा इति तत्रमृत्वं विहाय घटत्वं सुवर्णघटे घटत्वं विहायमृत्व कुड्यादौमेळनं मृद्घटे, एवं ताम्रघटादावपि। एवं मृत्सुवर्ण ताम्रदारुगवाश्वादेस्सत्वाद्गोत्वाद्यभिरपिमृत्वादेस्साङ्कर्यं बोध्यम्।

ननु समाविष्टानां जातीनां परापर भावः। परस्परपरिहारेणवर्तमानानां जातीना न समावेश इति सिद्धान्तात्। सुवर्णघटे घटत्वस्वीकारे मृत्वपरिहारेणवर्तमानस्य तस्य मृत्वापरत्वा भावप्रसङ्गेन सुवर्णघटादौ घटत्वजात्यनभ्युपगम इतिचेन्न। मृद्घटमृद्गवादाविवसुवर्णगोघटादावपि घटत्वाद्यनुगतप्रतीतिव्यवहारयोस्तुल्यत्वेन तादृशासिद्धान्तस्य निर्युक्तिकत्वात्। अनुगत प्रतीतिव्यवहराभ्यामेवहि सर्वत्र जातिः कल्प्यतेत्वया। यदि साङ्कर्यस्य जातौ बाधकत्वं परित्यज्य भूतत्वादीनामपि जातित्वमभ्युपगम्यप्रतीतिव्यवहारस्समर्थित। तदा घटत्वगोत्वाश्वत्वादावपि जातिजातिरित्यनुगतप्रतीत्याविशेष समवायाभावयोश्च विशेषत्वाद्यनुगत प्रतीत्यातेषामपि जातित्वेनानवस्थितिरितीहान्यसम्बन्धानामपि जातिबाधकत्वं न स्यात्। तथा च सामान्यादावपि जात्युपगमप्रसङ्गः।

एतदुक्तं भवति। यदा अनुगतप्रतीतिव्यवहारावनुगतधर्मेणैव निर्वाह्यौ तदाजात्यादावपि जातिस्वीकार आवश्यकः। तत्तद्वस्तुस्वभावादेवसुसदृशानां तेषां तादृशप्रतीतिव्यवहारनिर्वाह

कत्वम्। तदान्यत्रापि तत्तद्वस्तुस्वभावादेवानुगतप्रतीतिसिद्धौ जातित्यागस्सिद्ध इत्यत्राह कश्चिन्नवीनः। सुसदृशसंस्थानैरनुगतप्रत्ययव्यवहाराविति युक्तम्। तत्र सौसादृश्यं किमनुगतमननुगतं वा। आद्ये तदेव पराभिमतजातिस्स्यात्। द्वितीये सादृश्यस्याननुवृत्तत्वेन तस्यानुवृत्तबुद्धिव्यवहारनिर्वाहकत्वासम्भवात्। किञ्च सुसदृशसंस्थानविशेष एवानुगतप्रतीतौ नियामक इत्युक्तम्। स च निरंशे आत्मादौ रूपरसगन्धादौ च नास्ति। अवयवरचनाविशेष रूपत्वात् संस्थानस्य रूपादौ तदभावात्। अतो निरंशे सांशे रूपादौ चानुगतप्रतीतिव्यवहारायानुगत धर्मस्वीकारस्यैव जातिरित्यतिरिक्तजातिरावश्यकीति।

अत्रोच्यते। यद्यपि सास्नादिसंस्थानरूपं तत्तद्व्यक्तिनिष्ठमसाधारणम्। तथाप्यन्यनिष्ठैस्सास्नादिभिस्स्वभावत एव सप्रतिद्वन्द्विकं भवति। एतदेवान्योन्यप्रतिद्वन्द्विकरूपं सादृश्यवाच्यमभिधीयते। तथा च संस्थानानां स्वभाव एव सादृश्यशब्दवाच्यतयास्थित्वानुगतप्रतीतिव्यवहारावुत्पादयति। तत्र स्वभावोहि नाम प्रामाणिकं स्वरूपमेव यद्यथा प्रतीयते। तत्तथैव स्वीकृत इति हि न्यायविदः। अतस्सास्नादीनां सास्नादिभिरेवान्योन्यसप्रतिद्वन्द्विकत्वं न पुनः केसरादिभिः। एवं केसरादीनां चाश्वादिषु केसरादिभिरन्योन्यं सप्रतिद्वन्द्विकत्वं न पुनः पृथुबुध्नोदराकारादिभिस्तथैवोपलम्भात्। अत एवाग्नेरौष्ण्यं जलस्य शैत्यं घटाभावे घटस्य प्रतियोगित्वं पटाभावेपटस्य प्रतियोगित्वं घटव्यक्तीनामेव घटत्वजातिव्यङ्ग्यकत्वं पटव्यक्तीनामेव पटत्वजातिव्यङ्ग्यकत्वमिति नियमास्सिध्यन्ति। अत्र भवतामपि तत्तत्स्वभावातिरिक्तस्वनियामकत्वदौर्बल्यात्। अतो यथोपलम्भमेकैकनिष्ठसंस्थानादिधर्मास्स्वभावत एव परस्परसादृश्यं भजन्ते। अनुगतप्रतीतिनियमं च कुर्वन्ति। निरंशे आत्मादौ रूपरसादौ च तत्तद्वस्तुस्वभावनियम एव सर्वत्रनियामकः। स्वभावतस्सप्रतिद्वन्द्विकत्वे प्रमाणसिद्ध तत्तद्वस्त्वेव तत्तदनुवृत्तधीव्यवहारहेतुः। तथैवोपलम्भात्।

एवं स्वभावनियमानङ्गीकारे रसत्वजातेः रस एवाधारः। रूपत्वजातेः रूपमेवाधार इत्यत्र किं नियामकम्। रूपरसयोरूपत्वरसत्वाभिव्यङ्ग्यावयवरचनारूपसंस्थानाभावादितिचोद्ये स्वभावविशेष एव नियामक इति भवतापि च वाच्यम्। अन्यतश्चेदनवस्थादिदोषात्। अतस्स संस्थानेषु वस्तुषु संस्थानविशेष एवानुगतधीव्यवहारनियामकः। निरंशेरूपाद्यद्रव्ये च तत्तत्स्वभाव इति निरवद्यम्। यच्चान्यत्र कल्पनं-"सामान्यं द्विविधम्। परमपरं चेति। परं सत्ता। अपरं द्रव्यत्वादि। परत्वं व्यापकम्। तच्चाधिकदेशवृत्तित्वम्। सत्तायाः द्रव्यादिस्त्रिकवृत्तित्वात्। अपरत्वं ततोन्यूनवृत्तित्वम्। द्रव्यत्वादेर्द्रव्यमात्रवृत्तित्वं न्यूनत्वं द्रव्यं सत् गुणस्सन् कर्मसदित्यनुगत प्रतीत्यासत्ताजातिसिद्धि"रिति; तदप्यनुपपन्नम्।

सन्निधिप्रतीत्याश्रयत्वं सिध्यतुनाम । तथापि तज्जात्यन्तरम् । किन्तु प्रामाणिकत्वरूपम् । एतच्चसर्ववस्तुसाधारणं द्रव्यं सदित्यादिवत् सामान्यं सद्विशेषस्सन् समवायस्सन् अभावस्सन्निधिप्रतीतेस्तुल्यत्वात् । यदि सन्निधिप्रतीत्या सत्ताजातिस्सिध्येत तदासर्वत्र सास्यात । नतु द्रव्यादित्रिक इति । एवं पदार्थभाववस्तु इत्याद्यनुगतप्रतीत्या पदार्थत्वभावत्व वस्तुत्वादीनां जातित्वप्रसक्तौ तेषामेव परत्वम् । तदपेक्षयान्यूनत्वात् सत्ताया अपरत्वमेव । तेषामुपाधित्वे सत्ताया अप्युपाधित्वं स्यादेव । अतः प्रामाणिकत्वरूपमेव सत्वमिति । द्रव्यादित्रिकवृत्तिसत्ताया अभावेन परापर जाति विभागोप्यनुपपन्न इति सिद्धम् । अथ विशेष निराक्रियते । अथ नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ताः । तेच परमाणूनां व्यावर्तनाय च भवन्ति । यद्यपिघटादीनामनित्यानां द्व्यणुकपर्यन्तानां तत्तदवयवसमवेतत्वादिभिर्व्यावृत्तिस्सिध्यति । तथापि परमाणूनां व्यावर्तनाय विशेषास्स्वीक्रियन्ते । विशेषास्तु स्वभावत एव व्यावर्तकाः । अतो नानवस्थादिदोषः एवं नित्यानां जीवात्मनामपि व्यावृत्त्यै विशेषा एव प्रभवन्ति । अतो विशेषोऽतिरिक्तः पदार्थ इति काणादा आहुः ।

अत्र केचिदप्रत्यक्षाणुकल्पने प्रमाणाभावेनाश्रयासिध्या तद्वृत्तिविशेषकल्पनं वन्ध्यासुतस्य कर्णभूषणादिकल्पनवदपहास्यम् । प्रत्यक्षदृष्टतत्तत् संस्थानविशेषेणैव घटपटगोमहिषमनुष्यादीनां भेदसिद्धेः संस्थानस्यैव परस्परं व्यावर्तकत्वात् । तच्च क्वचिदवयवसन्निवेशरूपं क्वचित् स्वरूपमित्युक्तम् । तस्यैवाध्यासनिवर्तकत्वेन व्यावर्तकत्वमप्युक्तम् । अतस्तदतिरिक्तविशेषकल्पनं निष्फलम् । किञ्च क्वचिद्गन्धादीनामाश्रयेणापि व्यावृत्तिः । यथा सामान्यतोगन्धप्रतीतौकिमीयोयं गन्ध इति सन्देहे समीपे केतकीसन्दर्शने केतकीयोयं गन्ध इति गन्धान्तराद्व्यावृत्तिर्दृश्यते । एवं तमसिवस्तु विशेष संसर्गादनुभूयमानशीतस्पर्शः किमीयोयमिति सन्देहे दीपारोपणे सत्युष्णस्पर्शसम्बन्धीय इति निश्चीयते । अतो घटादीनां व्यावर्तनाय न विशेषापेक्षा ।

एवं बद्धचेतनानां वर्णगोत्रप्रवरशरीरविशेषादिभिस्सुखदुःखादिभिश्चव्यावृत्तिरनुभूयते । नित्यानां मुक्तानां च शास्त्रसिद्ध तत्तत्परिचर्याविशेषैर्भगवत्सङ्कल्पानुविधायिस्वेच्छापरिगृहीत शरीरविशेषैश्च व्यावृत्तिः । मुक्तानां भगवत्सङ्कल्पाधीनतत्तत्पितृपात्रप्रत्यादिभिर्भक्षणादिभिरमुक्तदशाभाविभिः प्राचीनैरुपलक्षण भूतैर्धर्मविशेषैश्च व्यावृत्तिर्ज्ञायते । अतो नित्यद्रव्यव्यावर्तनाय न विशेषः कल्पनीयः । किञ्च परमाणवः आत्मानश्च परस्परव्यावर्तकधर्मवन्तः द्रव्यत्वात् । घटपटादिवत् । गोमहिषादिवच्चेत्यनुमानेन विशेषसाधनेपि प्रयोजनाभावान्न विशेषसिद्धिः । तथाहि एते विशेषाः किमस्माकमुपकुर्वते ? उत योगिनां ? उतेश्वरस्य ? न तावदाद्यः । परमाण्वादीनां परात्मनां चास्मभिरसाक्षात्कर्तुमशक्यत्वात् । न द्वितीयः । तेषां योगदृष्टमहिम्नाहर्ज्ञत्वेन

सर्ववस्तु प्रकाशप्रसङ्गात्। न तृतीयः। स्वविषयकनित्येश्वरसाक्षात्कारस्य विशेषाधीनप्रकारनैरपेक्ष्यात्। अतो निष्फलाविशेषकल्पनेति।

प्रत्यनुमानं च परमाणवो आत्मानश्च स्वतोव्यावृत्ताः निरंशत्वात् खाद्यादिसंख्यानवत् भवदभिमतविशेषवच्च। न च द्रव्यत्वमुपाधिः। त्रसरेणोर्निरंशस्य प्रत्येकं स्वतो व्यावृत्तस्य द्रव्यत्वेनोपाधेरप्यव्यापकत्वादित्यलमतिविस्तरेणेति वदन्ति। अथ समवायः। अत्र काणादाः। नित्यसम्बन्धरूपसमवायः। स च गुणगुणिनोः क्रियाक्रियावतोरवयवावयविनोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च संसर्गतयावतिष्ठते।

तत्रचानुमानं प्रमाणम्। गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषयिणी विशिष्टबुद्धित्वात् दण्डीतिविशिष्टबुद्धिवत्। अत्र संयोगस्य बाधात् समवायस्सिध्यति। न च स्वरूपसम्बन्धेनार्थान्तरम् अनेकस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवेनातिरिक्तसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः। तत्रस्पर्शसमवायसम्बन्धेनतस्यैव रूपसमवायत्वात् सम्बन्धस्य सम्बन्धिसत्वव्याप्यत्वादितिवाच्यम्। सम्बन्धसत्वेपि रूपाभावात्। तादृशव्याप्तेः प्रायिकत्वेन सार्वत्रिकत्वाभावात् न वायौ रूपवत्ताबुद्धिप्रसङ्ग इति वदन्ति। तदसत्। स्वरूपातिरिक्तसमवायाख्यसम्बन्धस्योपलम्भनिरस्तत्वात्। यद्यपि विशिष्टबुद्धित्वादित्यनुमानं प्रमाणमुक्तम्। तत् सम्बन्धमात्रबाधकम्। न तु स्वरूपातिरिक्तबाधकम्। तथा व्याप्त्यभावात् स्वरूपसम्बन्धबाधनेन चरितार्थत्वाच्च। यद्यपि दृष्टान्ते स्वरूपातिरिक्तसंयोग सम्बन्धोभासते। तथापि तद्भानं न विशिष्टबुद्धित्वप्रयुक्तम्। किन्तु उपलम्भसिद्धं तेन दृष्टान्तमात्रेण सम्बन्धमात्रं सिध्येत्। न तु स्वरूपातिरिक्तसम्बन्धः।

अथोक्तानुमानेन सम्बन्धमात्रसिद्धौ अनेकस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवज्ञानसहकारेण ईश्वरज्ञानैकत्वनित्यत्ववत् स्वरूपातिरिक्तत्वं सिध्यतीतिचेत् तर्हि रूपसमवायी घट इत्यादि विशिष्ट बुद्धया समवायस्यापि स्वरूपातिरिक्तसम्बन्धस्सिध्येत् इष्टापत्तौ उक्तरीत्या तत्सम्बन्धस्यापि सम्बन्धान्तरं सिध्येदित्यनवस्था स्यात्। तत्परिहाराय समवायस्य स्वरूपमेव सम्बन्ध इत्युच्येत। तदा गुणगुणिनोरपि स्वरूपसम्बन्ध इति यथोपलम्भमभ्युपगम्य समवाय सम्बन्धकल्पनां परित्यज। एवमङ्गीकारे ज्ञानज्ञेययोः प्रतियोग्यभावयोः पितृपुत्रयोश्च स्वरूपातिरिक्तसम्बन्धवर्गकल्पिस्स्यात्। किञ्च, समवायस्य सर्वसाधारणत्वाद्गोत्वं गत्वा संबध्यते। नत्वश्वेन, एवमश्वत्वमश्वेन संबध्यते न तु गवेति नियमो न स्यात् ततश्च जातिसाङ्कर्यात् व्यवहारसाङ्कर्यं प्रसज्येत। यदि गोत्वादि तत्तद्वस्तुस्वभावादेव नियमं ब्रूयाः, तेनैव विशिष्टबुद्धयुत्पत्तौ मध्ये समवायकल्पिर्मुधा। तथा च स्वरूपातिरिक्तसमवायसम्बन्धकल्पनं निष्फलं निर्युक्तिकं चेति सिद्धम्।

अथाभावः। अत्रकाणादाः। भावातिरिक्तोऽभाव इति सप्तमपदार्थः। अत्राभावत्वमखण्डोपाधिरितिप्राञ्चः। नव्यास्त्वखण्डोपाधित्वेमानाभावः। किन्तु भावभिन्नत्वमभावत्वम्। तच्च समवायसामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावरूपम् तच्च पूर्वानुपस्थितमपिप्रकारः। एवं च घटाभावपटाभाव प्रतीतीनामभावांशेऽनुगतत्वमुपपद्यते। न च विषयानवस्था। सत्ताभावस्यस्वरूपत एव प्रकारत्वोपगमात्। अत एव सत्तारूपप्रतियोगिज्ञानं विनापि घटो नास्तीति बुद्धौ स्वप्रकारः। अभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगिधियो हेतुत्वात्। अन्यथेदं तम इति प्रतीत्यनापत्तेः। न च सत्ताभावरूपस्याभावत्वस्यानुपस्थितस्य प्रकारत्वे विशेषणधियो हेतुत्वे व्यभिचार इति वाच्यम्। विशेषणभेदेन हेतुतायाभेदेन तत्र तद्धेतुत्वानुपगमात्। फलानुरोधित्वात् कल्पनाया इति प्राहुः।

सचाभावश्चतुर्विधः। प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावभेदात्। तत्र विनाश्याभावत्वं प्रागभावत्वम्। जन्याभावत्वं प्रध्वंसत्वम्। नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वम्। प्रागभावध्वंसौ प्रतियोगिसमवायिकारणे देशे वर्तेते। कपाल एव घटो भविष्यति घटोध्वस्त इति प्रतीतेः। अत्यन्ताभावस्तु प्रतियोग्यनधिकरणदेशेवर्तते। तत्रैव घटोनास्तीतिप्रतीतेः। अन्योन्याभावस्तु प्रतियोगिव्यतिरिक्ते सर्वस्मिन् वस्तुनिवर्तते। स्वस्मिन स्वभेदानभ्युपगमात्। एतेषां विशेषणविशेष्यभावः सम्बन्धः। नत्वतिरिक्तवैशिष्ट्याख्यसम्बन्धः अतिरिक्तकल्पने गौरवात्। न च घटानयनानन्तरमपि भूतले घटोनास्तीतिप्रत्ययप्रसङ्गः। अत्यन्ताभावस्य नित्यत्वात् भूतलात्मकसम्बन्धस्य च सत्वादिति वाच्यम्। कालविशेषविशिष्टभूतलादेरेव संसर्गत्वोपगमेनादोषात्।

न च तादृशभूतलादिनैवाभावप्रतीत्युपपत्तावतिरिक्तकल्पन व्यर्थम्। अतिरिक्तवादेपि संबन्धितयातस्यावश्यकत्वादितिवाच्यम्। अनन्तस्वरूपाणामभावप्रत्ययविषयत्वापेक्षयाऽतिरिक्तस्यैकस्याभावबुद्धिविषयत्वेलाघवात्। किन्तु पाषाणे गन्धाभावः घ्राणेन्द्रियेणगृह्यते। गुडेतिक्ताभावः रसनयागृह्यते। आकाशे रूपाभावश्चक्षुषेणगृह्यते। तेषां तत्तदधिकरणस्वरूपत्वे तत्तदधिकरणानां घ्राणादिभिर्ग्रहणं न स्यात्। तेषां द्रव्यग्रहणासमर्थत्वात्। एतेन कालविशेषाद्यात्मकत्वमभावानामित्यपि प्रत्युक्तम्। कालादेरतीन्द्रियत्वेन तदात्मकाभावानामप्रत्यक्षत्वप्रसङ्गात्। अतोतिरिक्त एवाभावः। नचैवम्घटीत्याऽभावाभावोप्यतिरिक्तस्तदभावोप्यतिरिक्त इत्यनवस्थास्यादितिवाच्यम्। अभावाभावस्य प्रतियोगिस्वरूपत्वेनानवस्थाभावात्।

अत्रायं निष्कर्षः। प्रागभावध्वंसः प्रतियोगितदुध्वंसरूपः। अन्यथाप्रागभावोन्मज्जनप्रसङ्गात्। ध्वंसप्रागभावः प्रतियोगितत्प्रागभावरूपः। जनित्वाभविष्यतीतिव्यवहारात्।

एवमत्यन्ताभावाभावोपिप्रतियोगिस्वरूप एव। प्रतियोग्यधिकरण एव। तत्प्रतीतेः तदभावस्तु प्रथमाभावस्वरूपः। समनियताभावैक्यात्। तदभावपरम्परापि प्रतियोगिप्रथमाभावाभ्यां नातिरिच्यते। तयोस्ताभ्यां समनियतत्वात्। अन्योन्याभावात्यन्ताभावस्तु प्रतियोगितावच्छेदकस्वरूपः। अभावाधिकरणकाभावोप्यधिकरणस्वरूपः।

न च घटाभावाभावस्य घटस्वरूपत्वे घटादिबुद्धेः प्रतियोगिसापेक्षत्वं, घटाभावबुद्धेव प्रतियोगिनिरपेक्षत्वं स्यादितिवाच्यम्। अभावत्वप्रकारकबुद्धावेव प्रतियोगिज्ञानहेतुत्वात्। यदा घटाभावाभावत्वेन घटो भासते, तदाप्रतियोगिज्ञानापेक्षा। एव घटत्वस्य यथा घटभेदात्यन्ताभावत्वेनप्रतीतिः तदाप्रतियोगिज्ञानापेक्षा। यदास्वरूपेण भानं तदा नप्रतियोगिज्ञानापेक्षेति नोक्तदोषावकाशः। भेदभेदस्त्वतिरिक्तः। नचैवंरीत्यानवस्थादोष इति वाच्यम्। बीजांकुरादिनवस्थावत् प्रामाणिकत्वेनादोषात्। अतो भावातिरिक्तोऽभावस्सप्तमपदार्थ इति वदन्ति। अत्र वेदान्तिनः। यद्यपि चतुर्विधोप्यभावः प्रतीतिव्यवहाराभ्यां समस्ति। तथापि भावान्नातिरिच्यते। तथाहि, स्वविरोधिपूर्वावस्थाप्रागभावः स्वविरोध्युत्तरावस्थाध्वंसः। विरोधित्वन्तरगतासाधारणधर्मोभेदः। स एव परैरन्योन्याभाव इत्युच्यते। देशकालविशेषस्तत्कृतावस्थाविशेषो वा संसर्गाभावः। स एव परैरत्यन्ताभाव इत्युच्यते।

सिद्धान्तेतु संसर्गाभावविशेषोऽत्यन्ताभावः। स च कालासम्बन्धिप्रतियोगिकाभावः। एवं यत्रकालत्रयेपि यस्य संबन्धो नास्ति तत्र तदभावश्च। तत्राद्योगगनकुसुमाद्यभावः। द्वितीयो नित्येषुसंसाराभावः। अत्रमानम्। पिण्डत्वावस्थायामेव घटो भविष्यतीतिप्रतीतेः पूर्वावस्थैव प्रागभावः। कपालत्वावस्थायां घटोध्वस्तः इति प्रतीतेः उत्तरावस्थाध्वंसः। एव घटः पटोनेति प्रतीतेः पटत्वमेव घटभेदः। कदाचित् पटे घटत्वं नास्तीत्यधिकरणनिषेधेनापि सएव घटभेदः पटत्वादिरूपः प्रतीयते। पटे घटत्वनिषेधे घटतादात्म्यमर्थान्निषिध्यत इति तादात्म्यनिषेधपर्यवसानेन पटे घटत्वं नास्तीतिप्रतीतेर्भेदविषयकत्वौचित्यात् परैरपिभेदस्य तादात्म्यनिषेधस्वरूपत्वाङ्गीकारात्। भूतले घटोनास्तिपटोनास्तीतिप्रतीतेर्भेदविषयकत्वौचित्यात् परैरपिभेदस्य तादात्म्यनिषेधस्वरूपत्वाङ्गीकारात्।

भूतले घटोनास्ति पटोनास्तीतिप्रतीत्योस्संसर्गाभावोविषयः। सचाभावस्संसर्गतयाभवदभिमतकालविशेषविशिष्टभूतलात्मा तत्तत्कालविशेषात्मावेतिनातिरिच्यते भावात्। न च श्यामावस्था प्रहाणेनरक्तावस्थापरिग्रहे घटनाशव्यवहारप्रसङ्ग इति वाच्यम्। रक्तावस्थायाःस्वोत्तरत्वेपि घटविरोधित्वाभावात्। न चाभावत्वेनैकाश्रयानुप्रविष्टानां चूर्णत्वपिण्डत्वाद्यवस्थानां विरोधो न युज्यत इति वाच्यम्। तेजस्तिमिरतृणदहनमार्जारमूषिकगरुडसर्पशीतोष्णादिभावानां

सहानवस्थानवध्यघातुकत्वलक्षणविरोधदर्शनात्। भवतापि अभावाभावस्य भावत्वस्वीकारात्। अन्यथावस्तुत्वेनाभावस्यापि एकस्यैवान्तर्भावेन क्वापि भावविरोधोऽभावस्य न स्यात्। ननु कपालत्वरूपोत्तरावस्थैव घटनाशस्तर्हि कपालविनाशे घटध्वंसनाशात् चूर्णत्वावस्थायां घटोन्मज्जन प्रसङ्गः। यदि पिण्डत्वावस्थाघटप्रागभावः तदापिण्डीकरणात्पूर्वं प्रागभावाभावात् घटसिद्धिः स्यात् अत्यन्ताभावोवा। न चेष्टापत्तिः। प्रागभावकाले मृदि घटात्यन्ताभावाभावानभ्युपगमात्। ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावस्य विरोधात्। अतोतिरिक्तावेव ध्वंसप्रागभावाविति चेदुच्यते।

स्वविरोधिपूर्वावस्थामात्रं न प्रागभावः। किन्तु तादृशावस्थापरम्परैव। एवं स्वविरोध्युत्तरावस्थामात्रं न ध्वंसः। किन्तु तादृशावस्थापरम्परैव। अतोनोक्तदोषः। एवमनभ्युपगमेऽतिरिक्तभावपक्षेप्युक्तदोषोदुर्वारः। तत्रापि हि यदि घटारब्धं द्रव्यं घट प्रागभावनिवृत्तिः। तर्हि पटनिवृत्तौ घटप्रागभावनिवृत्तिरेव निवृत्तेतिपुनर्घटप्रागभावोन्मज्जनप्रसङ्गः। तथासतिमध्ये प्रागभावस्य विच्छेदायोगात् घट एव न स्यात्। प्रागभावस्य च सामग्रीसम्पत्तौ भावशिरस्कत्वनियमात् नष्टाया एव घटव्यक्तेः पुनरुन्मज्जनं स्यात्। एव यदि प्रध्वंसस्य घट एव प्रागभावः। तदाघटोत्पत्तेः पूर्वं प्रागभावाभावात् पिण्डत्वावस्थायां घटध्वंसस्स्यात्। तथा सतिकदाचिदपि घट एवनोत्पद्यते। स्वप्रध्वंसे वर्तमाने स्वोत्पत्त्ययोगात्। अन्यथा कपालावस्थायामपिदुन्मज्जनप्रसङ्गात्। एव च पिण्डावस्थायां घट विनाशप्रसङ्गे विनाशस्य भावोत्तरकालीनत्वात् पिण्डात् प्रागेव घटसिद्धिस्स्यात्। तथा च तद्बुद्धिनाशकालयोर्द्वयोरपि कारकव्यापारानर्थक्यमित्यादि दूषणशतेन घटध्वंसप्रागभावः घटतत्प्रागभावरूपः।

एवं प्रागभावध्वंसः घटतद्ध्वंसरूप इति वाच्यम्। तथास्माभिरपि विरोध्युत्तरावस्थापरम्पराध्वंसः विरोधिप्रागवस्थापरम्परा प्रागभावः इत्यभ्युपगम्यते। पराभ्युपगतात्यन्ताभावोपिकालविशेषरूप इत्युक्तम्। स च कालः घटानधिकरणकालः। तदानीमेव घटोनास्तीति प्रतीतेः। अतिरिक्तवादेप्यत्यन्ताभावस्यनित्यत्वेन घटानयनानन्तरं घटाभाववुद्धिप्रसङ्गपरिहाराय तत्सम्बन्धघटकतयाघटानधिकरणकालस्यावश्यकत्वेन उभयसंप्रतिपन्नेनतेनैव घटोनास्तीतिबुद्धिव्यवहारोपपत्तौ अतिरिक्तकल्पने प्रमाणाभावात्। गौरवाच्च। नचाभावस्य कालविशेषरूपत्वे प्रत्यक्षत्वं नस्यादित्युक्तमिति वाच्यम्। इदानीं घटस्तदानीं घटो जायत इत्युल्लम्भात् कालस्य सर्वप्रतीतावपि विशेषणत्वेन प्रत्यक्षत्वाभ्युपगमात्। न च रूपस्पर्शशून्यस्य कालस्यकथं प्रत्यक्षत्वमितिवाच्यम्। तादृशस्य रूपादेः कथं भवतो वा प्रत्यक्षत्वमिति प्रसङ्गात्। रूपवत्समवेतत्वस्य तत्र नियामकत्वादितिचेत् रूपवत् संयुक्तत्वस्यापि नियामकत्वात्।

रूपवद्घटादिभिः कालस्य संयोगात्। न च रूपवद्घटादि संयोगादीश्वरस्यापि प्रत्यक्षत्वं स्यादितिवाच्यम्। रूपवत् समवेतत्वसाम्येपि गुरुत्वस्येवेश्वरस्याप्ययोग्यत्वकल्पनात्। न चैवमपि द्रव्यग्रहणायोग्यघ्राणरसनादिभिः कालस्वरूपगन्धाभावादीनामप्रत्यक्षत्वं स्यादित्युक्तमितिवाच्यम्। घ्राणादिभिरपि कालोल्लेखेनैवगन्धतदभावप्रत्यक्षोपगमात्। न च चक्षुस्त्वङ्नांसि द्रव्यग्राहकाणी तराण्यद्रव्यग्राहकाणीति सर्वसंप्रतिपन्न विभागव्याघात इति वाच्यम्। प्राधान्येन द्रव्यग्रहणतद भावाभ्यां विभागसिद्धेर्व्याघाताभावात्। अन्यथा घटमहं जानामीतिमानसविषयत्वात् घटस्य मनसोपि बाह्येन्द्रियत्वापत्त्याबाह्यबाह्यविभागोप्यनुपपन्नस्यात्। अतः कालविशेषरूपः एवं देशविशेषरूपोवासंसर्गाभाव इति सिद्धम्। न च कालद्रव्यप्रत्यक्षत्वस्य पूर्वमेवसमर्थितत्वात् अत्र पुनरुक्तिरिति वाच्यम्। कुतर्कवासनावासितमनसामक्षोभ्यत्वायासकृन्निरूपणस्यापेक्षितत्वात्। एवं तर्हिसर्वेषामाश्रितानां रूपादीनामपित्यागप्रसङ्गः। तत्तत्कालविशेषेणैव रूपादिबुद्धिव्यवहारोपपत्तेरितिचेन्न। अनन्यथासिद्धबुद्धिव्यवहाराभ्यां तेषां त्यागायोगात्। रूपादीनां प्रतिनियतेन्द्रिय ग्राह्यत्वोपलम्भाच्च। अभावधियस्तु भावविशेषैरेवान्यथासिद्धत्वेनातिरिक्ताभावत्वासंभवात्।

ननु भावानां नञ्प्रयोगार्हत्वमभावत्वधर्मयोगित्वं च कथं घटत इतिचेन्न। अतिरिक्तवादेप्यभावाभावस्यप्रतियोगिस्वरूपस्य भावत्वेनतयोस्वीकारेण तत्परिहारान्वेषणस्यतुल्यत्वात्। किञ्चनास्तीतिप्रतीतेर्भावातिरिक्ताभाव विषयकत्वाभ्युपगन्तुस्तवघटाभावोनास्ति-एवंतदभावोनास्तीति प्रतीत्याऽभावपरम्पराकल्पनापत्त्यानवस्थास्यात्। तत्परिहाराय क्वचित् विश्रमान्वेषणे द्वितीये तृतीये वाऽभावे विश्रमापेक्षया यथादर्शनं प्रथममेवभावे उचितम्। तावद्गमनेपि नास्तीति प्रतीतेरतिरिक्ताभावविषयकत्वपरित्यागात्। स्यादेतत्। ननु द्रव्याणामवस्थान्तरप्राप्त्यातेषु अवस्थाभिर्जन्मनाशादिरुपपद्यतां नाम। अथाप्यवस्थारूपाणां संयोगरूपरसादीनामवस्थान्तर प्राप्त्यभावात् तेषां प्रागभावजन्मनाशादयोतिरिक्ता एव वाच्याः। अतोतिरिक्ताभावसिद्धिरितिचेन्न। ता एवावस्था अन्योन्यं विरुद्धतयान्योन्यस्य नाशादिरूपाभवन्ति। अयमर्थः। द्रव्यस्यावस्थान्तरप्राप्तिर्विनाशः। अवस्थानां तु तदेवावस्थान्तरं विनाशशब्दवाच्यतां प्राप्नोति। पूर्वावस्थापेक्षया उत्तरावस्थायाविरुद्धत्वात्।

एतदुक्तं भवति। अवस्थानां स्वयमेवोत्पत्तिः। स्वसमानाधिकरण विरुद्धपूर्वावस्था प्रागभावस्योत्तरविरुद्धसमानाधिकरणावस्थाविनाश इति। स्यादेतत्। अन्योन्या भाव एव भेदः। स च वस्त्वन्तरगतासाधारण धर्मस्वरूप इत्युक्तम्। ननु यदिघटत्वादिः पटादिभेदस्तदातस्य धर्मिप्रतियोगिभ्यामभेदः, उत भेदः। आद्येव्याघातः। धर्मधर्मिभावादेर्भेदघटितत्वात्। द्वितीये आत्मनैव भेदाङ्गीकारे आत्माश्रयः। द्वितीये भेदमङ्गीकृत्य परस्परभेदकत्वकथनेऽन्यो-

न्याश्रयः। तृतीयादिभेदमङ्गीकृत्यपरिवर्तनेचक्रकम्। उत्तरोत्तरमपिधावनेऽनवस्था। किञ्चघटभेदः पटत्वं चेत् कुड्येपटत्वाभावाद्घटभेदाभावेन घटकुड्यतादात्म्यप्रसङ्गः। पटत्ववत्कुड्यत्वकुसूलत्वादिसर्वं घटभेद इष्यते। तदा घटभेदबुद्धेः पटत्वादि कृत्स्नधर्मविषयत्वेन गौरवम् असर्वज्ञदुर्ज्ञेयता च पटत्वाद्यतिरिक्त एव घटभेद इति।

अत्रोच्यते। पटत्वादिरेव घटादिभेदः। अतिरिक्तत्वे मानाभावात्। अथापिभेदस्य स्वेतरवैलक्षण्याभावेकथं स्वरूपसिद्धिरितिचेत् स्वस्य स्वयमेवभेदस्स्वपरनिर्वाहकत्वात्। योहियत्र यदध्यासविरोधीसतस्माद्भेदः। तथा च पटादौ स्वाश्रये स्वस्मिंश्चोत्तराध्यासविरोधित्वात् स्वाश्रयस्यापि च स्वयमेवभेदः। अतोनानवस्थान्योन्याश्रयादिदोषः। श्रीमद्भाष्ये च यथा शौक्ल्यादेः कार्ष्ण्यादि व्यावृत्तिस्तत्पदार्थस्वरूपमेव न धर्मान्तरमिति स्वपरनिर्वाहकत्वं धर्माणामनुगृहीतम्। एषस्स्वपरनिर्वाहकत्वसमाधिः परेणापि विशेषे स्वीकृतः। विशेषान्तरं प्रतिस्वयमेव व्यावर्तकस्सन् स्वाश्रयपरमाणुं व्यावर्तयतीति। अतः पटत्वादिरेवघटभेदः। यच्चोक्तं घटभेदः पटत्वं चेत् कुड्येतदभावाद्घटकुड्यतादात्म्यं प्रसज्यत इति तदनभ्युपगमादेव परिहृतम्। यदप्युक्तं पटत्वादिसर्वं घटभेदश्चेत् भेदबुद्धेरनेकविषयत्वेनगौरवम्। असर्वज्ञदुर्ज्ञेयत्वञ्चेति। तदध्यासनिवर्तकस्वरूपभेदत्वेनतावद्धर्माणां विषयत्वेनगौरवानवकाशात् सुज्ञेयत्वाच्च निरस्तम्। एवमेव परेणापि घटादिबुद्धीनां तत्तदभावबुद्धीनां चानन्तघटानन्ताभावव्यक्तिविषयकत्वेपि घटत्वाभावत्वाभ्यां क्रोडीकरणाद्धि लाघवं सुज्ञेयत्वं चोपपद्यते। तदस्माकमपि।

एवं घटत्वादिधर्माणां यदाभेदत्वेनप्रतीतिस्तदाप्रतियोगिस्फुरणापेक्षा, यदा च स्वरूपेणभानं तदा न प्रतियोगिस्फुरणापेक्षेति सर्वसम्मतम्। एवं विशिष्टाभावादयोपि व्याख्याताः। तेषामपि तत्तत्कालदेशविशेषरूपत्वात्। अत्रेदमवधेयम्। प्रागभावः प्रध्वंसाभावो न्योन्याभावस्संसर्गाभावश्चेतिचतुर्विधोप्यभावः भावस्वरूप एव। तत्र भविष्यतीति प्रतीतिविषयः प्रागभावरूपः। सच स्वविरुद्धपूर्वावस्थापरम्परास्वरूपः। ध्वस्त इति प्रतीतिविषयोध्वंसः। सच स्वोत्तरविरुद्धावस्थापरम्परास्वरूपः। अन्योन्याभाव एव भेद इत्युच्यते। सच स्वविरुद्धवस्त्वन्तरासाधारणधर्मस्वरूपः। सच घटो न पटः घटात् पटः पृथगित्यादिप्रतीतिविषयः।

अत्र घटोनास्तीदानीं घटोनास्तीत्यादिप्रतीतिविषयस्संसर्गाभावः। सएवात्यन्ताभाव इति परैरुच्यते। सिद्धान्तेतु संसर्गाभावविशेषोत्यन्ताभाव इत्युच्यते। देशान्तरकालान्तरवृत्तिपदार्थस्य देशान्तरकालान्तरेऽभावस्संसर्गाभावः। सच यत्किञ्चिद्देशकालस्वरूपो घटाभावादिः। कृत्स्नदेशकृत्स्नकालासम्बन्धिप्रतियोगिकस्संसर्गाभावः अत्यन्ताभावः। सच गगनकुसुमशशविषाणाद्यभावः। सच कृत्स्नदेशकृत्स्नकालस्वरूपः। एवं क्वचित् प्रसिद्धस्यापि प्रतियोगिनः

क्वचिदधिकरणविशेषकालत्रयेष्वसम्बन्धस्सोप्यत्यन्ताभावः। यथानित्येषु संसाराभावः। ईश्वरे दुःखाभावश्च। सतु तत्तदधिकरणविशेषस्वरूपः। तथा च सर्वोप्यभावो भावस्वरूपान्नातिरिक्त इति। ननु नेहनानास्तीत्यत्रकीदृशाभावः प्रतीयत इति चेदुच्यते। न चात्रभेदसामान्यनिषेधः क्रियते। प्रत्यक्षादिभिर्बहुत्वामिति श्रुत्या च विरोधात्। किन्तूत्सर्गापवादन्यायेनविहितव्यतिरिक्तविषयच्छागपशुन्यायेनवाविशेषविषय इत्येव द्रष्टव्यः।

तथा च यस्यात्मा शरीरं, अन्तःप्रविष्टश्शास्ता। येनाश्रुतं, बहुस्यां, सन्मूलास्सोम्येमा इत्यादिभिः श्रुतिभिः सर्वस्यवस्तुजातस्य ब्रह्मान्तर्यामिकत्व ब्रह्मकार्यत्वविधानात् तत्प्रत्यनीकाब्रह्मात्मकत्वा ब्रह्मकार्यत्वादिर्निषिध्यत इति सोप्यत्यन्ताभावः। सचदेशविशेषस्वरूपः। जगतिकालत्रयेप्यब्रह्मात्मकत्वसम्बन्धस्याब्रह्मकार्यत्वसम्बन्धस्य चाभावात्। यद्वा सिद्धान्तेपि व्यधिकरणधर्मावच्छिन्नाभावः स्वीक्रियते, तेनाब्रह्मात्मकत्वेन नानानास्तीत्यर्थः। अब्रह्मात्मकत्वं च ब्रह्मणि प्रसिद्धं घटत्वेन पटोनास्तीत्युक्ते पटे घटत्वनिषेधपर्यवसानात्, जगति अब्रह्मात्मकत्वनिषेध पर्यवसानात्। सोपि पूर्वोक्तात्यन्ताभावः। निरीश्वरसाङ्ख्यसिद्धान्तश्रवणजनितश्रद्धाविशेषात् प्रसक्तमब्रह्मकार्यत्वं काणादाद्यनेकसिद्धान्तश्रवणात् प्रसक्तमब्रह्मात्मकत्वं च नेहनानास्तीतिनिषिध्यत इतिनाप्रसक्तप्रतिषेधदोषः। तत्तद्भ्रान्त्युन्मूलनेन निषेधसाफल्यं चेति सर्वमुपपन्नम्। यत्तुब्रह्मव्यतिरिक्तस्य सर्वस्यमिथ्यात्वेनावास्तविकत्वात्सत्यभूतं किञ्चिदपि नास्तीतिनिषिध्यत इत्युक्तं मायिभिः तदत्यन्तापहास्यम्।

सोऽकामयत बहुस्यां, तत् सृष्ट्वा सच्चत्यच्चाभवत्, आकाशाद्वायुः, तन्मात्राणि भूतादौलीयन्ते अक्षरं तमसिलीयते इत्यादिश्रुतिभिः प्रत्यक्षाद्यगोचरमसर्वज्ञदुर्ग्रह लोकविलक्षणं वस्तु जातं मातापितृसहस्रेभ्योपि वत्सलतरं शास्त्रं स्वयमेव प्रदर्श्य स्वयमेव नेहनानास्तीत्यनेन निषेधतीत्युपपादनमत्यन्तमपहास्यम्। विस्तरस्त्वन्यत्रद्रष्टव्यः। अतोभावान्तरमेवाभाव इति सिद्धम्। स्यादेतत्। नन्वेतावन्त एव पदार्थाः, न परः इति निर्णेतु कथं शक्यते। सिध्यसिद्धिभ्यां व्याघातात्। सिद्धौनिषेधायोगात्। असिद्धौप्रतियोग्यभावादेवनिषेधायोगत। अतःकथं निर्णीयत इतिचेन्न। योयं प्रमाणेनलोके सिध्यति सपर्वोपि एतेभ्यो नातिरिच्यते इत्यर्थात्।

एतदुक्तं भवति। सामान्यतः प्रमाणप्रतिपन्ने वस्तुनि प्राङ्निरूपितादर्थादर्थान्तरत्व प्रतिषिध्यत इति एवमङ्गीकारे भवतामाक्षेपानुत्थानात् परिहारोपिवाच्यः। अधिकमर्थं केनापि प्रमाणेनबुध्वाकिलाधिकत्वशङ्काकार्या मित्तिलाभे हि चित्रकरणमितिन्यायादाक्षेप नुत्थतौपरिह रानुत्थानात्। अतः पूर्वोक्तार्थ एव स्वीकरणीय इति सर्वं रमणीयम्।

॥ इत्यद्रव्यपरिच्छेदः इति श्रीकूरं ग्रामाभिजनेन चण्डमरुतोपाधिमता विद्वच्चक्र र्ति श्रीकृष्णमाचार्य सूनुना श्रीनिवासराघवार्य विदुषा विरचितः श्रीरामानुजसिद्धान्तसंग्रह संपूर्णः॥

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431



44-ஆம் பட்டம் ஸ்ரீமதழகியசிங்கர்
ஸ்ரீவண்சடகோப ஸ்ரீ வேதாந்ததேசிக யதீந்த்ர மஹாதேசிகன்

பிருந்தாவன டிரஸ்டு (பிரைவேட்)
தசாவதார ஸந்நிதி, ஸ்ரீரங்கம்-620 006.

நம்ட் ரஸ்டின் மூலம் தேவரீர் / தாங்கள் கீழ்க்கண்ட வகைகளில் ஏதேனும் விருப்பப்பட்ட கைங்கர்யத்திற்கு இயன்றளவு தாராளமாக கூடிய விரைவில் பொருளுதவி செய்து ஆசார்ய பாகவதானுக்ரஹத்தைப் பெறுமாறு கேட்டுக் கொள்கிறேரும்.

1 நாள் தேசாந்தரிக் கட்டளைக்கு ரூ. 50/- 1 மாதத்திற்கு ரூ. 1500/- இதுதவிர த்வாதசி-திருநக்ஷத்திரங்கள்-விசேஷ தினங்களில் ததீயாராதனத் திற்கு ரூ 1500/-தேவைப்படுகிறது. முன்பு தேவரீர்/தாங்கள் செய்த உபகாரத் தால் ட்ரஸ்டு நன்கு நடந்துவருகிறது. மேன்மேலும்-தடையின்றி கைங்கர்யம் நடைபெறத்தக்க உதவியை-அவ்வப்போது செய்து வரவேண்டும.

இத்துடன் 1994 செப்டம்பர் பவ-ஹ்ரு ஆவணி-மீ 44-ஆம் பட்டம் ஸ்ரீமதழகியசிங்கரின் 100 ஆவது திருநக்ஷத்திரம் தொடங்குகிறது. அதையும்-இங்கு விமரிசையாகக் கொண்டாட வேண்டும். சென்ற வருஷம் போல் இவ்-வருஷமும் வர்ஷாராதன கைங்கர்யமும் சிறப்பாய் நடக்கத் தேவரீர்/தாங்கள் தக்க உதவியைச் செய்தும், நேரில் வந்து சேவித்தும் அழகியசிங்கரின் அனுக்ரஹத்தைப் பெற்றுக்கொள்ள வேண்டுகிறேன்.

கீழ்க்கண்ட வைஷ்ணவ க்ரந்தங்கள் ஆஸ்திகர்களுக்குப் பயன்படுபவை

		விலை	தபால் செலவு (ரிஜிஸ்டர்)
1.	ஸ்ரீ பாஷ்யார்த்த மணிப்ரவாள தீபிகை	68-00	10-00
2.	ஸ்ரீ பாஷ்யார்த்த தீபிகை தனித்தமிழ்	57-00	10-00
3.	ஆத்யாத்மிகஸாரம் (பாராயண ச்லோகங்கள்) (மூன்றுக்கும் சேர்த்து தபால் செலவு ரூ 14)	5-00	2-00
4.	ஸ்ரீ ராமானுஜ ஸித்தாந்த ஸங்க்ரஹம் (ஸம்ஸ்கிருதம்)	40-00	12-00
5.	* ஸ்ரீராமானுஜ தத்வங்கள் தமிழ் (அச்சில்)		

அன்புள்ள,
டாக்டர் E. S. V. நரஸிம்ஹாசார்யர்,
மானேஜிங் டிரஸ்டி & ஆஸ்தான வித்வான,
1, தேசிகர் தெரு, தசாவதார நகர்,
ஸ்ரீரங்கம்-620 006.

ACADEMY OF SANSKRIT RESEARCH
MELKOTE - LIBRARY
Acc. 19511
Date 01-2-96